श्री महाकविबिल्हणविरचितम्

विक्रमाङ्कदेवचरितम्

महाकाव्यम्

प्रथमो भागः

(१—७ सर्गाः)

भारद्वाजविश्वनाथशास्त्रिविरचितरमाख्यसंस्कृतटीकया
हिन्दीभाषानुवादेन च सुपरिष्कृतम् ।

सम्पादकः

पं० विश्वनाथशास्त्रिभारद्वाजः

एम्० ए० काव्यतीर्थविद्यावागीशादिपदवीविभूषितो
हिन्दूविश्वविद्यालयीयसंस्कृतसाहित्यानुसन्धानसमितिसदस्यः
संस्कृतमहाविद्यालये संस्कृतसाहित्यदर्शनेतिहासाध्यापकः ।

हिन्दूविश्वविद्यालयीय-संस्कृतसाहित्यानुसन्धानसमितितः ।

संवत् २०१५ वैक्रमे ।

मूल्यम्—अष्टरूप्यकम् ।

THE
VIKRAMANKADEVA CHARITA MAHAKAVYA

VOL. I

I—VII CANTOES.

EDITOR & COMMENTATOR

Pt. VISHWANATH SHASTRI BHARADWAJ

M.A., Kavyateerth, Vidyavageesh,

Member-Samskrit Sahitya Research Committee,
Lecturer, History of Samskrit Literature and Philosophy,
Samskrit Mahavidyalaya,
Banaras Hindu University, Banaras.

THE
SAMSKRIT SAHITYA RESEARCH COMMITTEE
OF
THE BANARAS HINDU UNIVERSITY

1958

Price Rs. 8/-

PUBLISHED ON BEHALF OF THE

SAMSKRIT SAHITYA RESEARCH COMMITTEE

OF THE

BANARAS HINDU UNIVERSITY

PRINTED BY

RAMAKRISHNA DAS

AT THE BANARAS HINDU UNIVERSITY PRESS

VARANASI

विषयानुक्रमणिका

परिशिष्टानि

यः पठति लिखति पश्यति
परिपृच्छति पण्डितानुपाश्रयति ।
तस्य दिवाकरकिरणै—
र्नलिनीदलमिव विकास्यते बुद्धिः ॥

* किञ्चित् प्रास्ताविकम् *

अयि विद्वज्जनमनोमयूरविश्रामारामा निरतिशयशेमुषीमण्डिताः पण्डिताः !

विदितचरमेव तत्र भवतां भवतां यत् विक्रमाङ्कदेवचरितमहाकाव्यं त्रिभुवन-मल्लदेव-विद्यापति-काश्मीरकभट्ट-श्रीबिल्हणमहाकविविरचितं प्रशस्तमहाकाव्येषु प्रमुखतार्हमिति ।

अद्य यावदस्य महाकाव्यस्य त्रिवारं प्रकाशनं जातम् ।

१. डा० जॉर्ज ब्युह्लरमहोदयेन महता परिश्रमेण श्री पण्डित वामनाचार्य-झळकीकर-महोदयानां श्री भीमाचार्यमहानुभावानाञ्च साहाय्येन मुम्बापुरीसंस्कृत-ग्रन्थमालायां १८७५ तम ईशवीये वर्षे प्रकाशितम् ।

२. प्रातःस्मरणीयानां गुरुवर्याणां स्व. म. म. श्री पं. रामावतारशर्मणां नाम्ना काशीस्थज्ञानमण्डलसंस्थात ईशवीये १९२७ तम वर्षे प्रकाशितम् ।

३. श्री पं. मुरारीलाल नागर महोदयैः साहित्याचार्य-एम्. ए. पदवी-विभूषितैः विद्वद्वराणां डा० मङ्गलदेवशास्त्रिणां निरीक्षणे काशिक-सरस्वतीभवन-पुस्तकालयप्रकाशनविभागात् प्रकाशितम् ।

प्रथमं—डा० ब्युह्लरमहोदयस्य पुस्तकं सम्प्राप्तैकहस्तलिखितपुस्तकाधारेण मुद्रितं, सन्दिग्धस्थलेषु स्वकल्पितपाठभेदेनाञ्चितञ्चाऽशुद्धिबहुलम् । परञ्च महाकाव्यस्याऽस्य सर्वप्रथमं प्रकाशनं कृत्वा गूढान्धकारनिपतितसंस्कृतग्रन्थभाण्डा-रादस्योद्धरणं साधारणलोकावलोकने स्थापनञ्च संस्कृतविद्वत्सु डाक्टरमहोदयस्य कृतज्ञत्वं नाऽऽकलयतीति तु न । तथापि विदुषोर्यदत्र सहयोगो वर्णितस्स पुस्तक-स्यैतस्याऽवलोडनेन न सन्देहराहित्यमधिगच्छति ।

द्वितीयं—काशीस्थज्ञानमण्डलाधिकारिभिर्गुरुवर्य्याणां सम्मत्याऽसम्मत्या वा तन्नाम्ना प्रकाशितमतीवाऽशुद्धमिति श्री गुरुवर्याणां दृष्टिपथमपि न गतं स्यादित्येव द्योतयति । सति रविकरनिकरप्रवेशे कुतोऽन्धकारस्य सम्भवः ।

तृतीयं—श्री नागरमहोदयानां पुस्तकं गवेषणापूर्णसमालोचनात्मकोपोद्घातयुक्तं पञ्चषहस्तलिखितपुस्तकानां मुद्रितपुस्तकयोश्चाऽऽधारेण पाठभेदविचारपूर्वकं महता परिश्रमेण सम्पाद्य मुद्रितं सर्वेषामेवाऽस्मदादीनां प्रशंसास्पदम्। परञ्च यत्र कुत्रचित्पाठभेदविचारे कार्यसम्पादनरभसादन्यकारणाद्वाऽत्र पाठभेदनिर्णये स्खलनं वरीवर्ति। तत्तस्थानान्यत्सृज्य सर्वत्रैवाऽस्मिन्पुस्तकेऽस्यैव पुस्तकस्य पाठक्रमः स्वीकृतः।

श्रीनागरमहोदयैर्जैसलमेरबृहज्ज्ञानकोषभाण्डारस्थाद्धस्तलिखितात्पुस्तकात् महता श्रमेण टिप्पणीसंग्रहं कृत्वा चरितचन्द्रिका नाम्ना सा परिशिष्टरूपेण स्वपुस्तके संगृहीता, केनाऽपि कविरहस्यकुशलेनैव धीमतैषा गुम्फितेत्यत्र नाऽस्ति सन्देहलेशावसरः। ईशवीय १२८६ वर्षतोऽपि प्राचीनेऽस्मिन् हस्तलिखिते पुस्तके टिप्पण्येषा स्वप्राचीनत्वं प्रकटयत्येव। कुत्रचित् "अस्य शब्दस्यार्थागमो न जायते" इति स्पष्टं लिखित्वा टिप्पणीकृता विदुषा निरहङ्कारं स्वपाण्डित्यं परिचायितम्। गुणिनो न दुराग्रहा इति स्वगुणित्वमपि प्रकटितम्। टीकाया अभावेऽर्थावबोधविषये टिप्पण्येषा बहुषु स्थलेषु विदुषां पाठकानामतीवोकारिणीति निश्चप्रचम्।

बहुषु संस्कृतविद्यालयेषु विश्वविद्यालयेषु चैतत्पुस्तकं पाठ्यपुस्तकत्वेन निर्धारितमपि न कुत्राऽप्याऽऽपणे लभ्यमिति हेतोर्हिन्दूविश्वविद्यालयीय-संस्कृतसाहित्यानुसन्धानसमित्याऽ (The Samskrit Sahitya Research Committee, B. H. U.) स्य महाकाव्यस्य प्रकाशनं नितान्तमावश्यकं मत्वा मयि तत्सम्पादनभारस्समारोपितः। कठिनमप्येतत्कार्यं विघ्नपरम्परामनुभवताऽपि मया साहित्य-व्याकरणाचार्य-एम्. ए.-पदवीविभूषितानां सम्प्रति हिन्दू विश्वविद्यालयीय-संस्कृत महाविद्यालये साहित्यविभागाध्यक्षपदं भूषयतां श्री पं. रामकुबेरमालवीयानां हार्दिकसाहाय्येन श्री जगज्जननीसंकष्टहरणीकृपयैव संस्कृतव्याख्याभाषाटीकाभ्यां सहितं सप्तसर्गान्तमेतन्महाकाव्यं सम्पाद्य प्रकाश्य च विद्वत्करकमलेषु सादरं स्थाप्यते।

पाठ्यपुस्तकत्वेन निर्धारितमेतन्महाकाव्यं टीकाभूषितञ्चेत् परीक्षार्थिनां महदुपकारकं भवेदिति निर्धार्य सरलसंक्षिप्तटीकारचना कृता। यद्येतया विद्यार्थिनां परीक्षासु कथमप्युपकारश्चेदस्मत्परिश्रमः साफल्यं गच्छेत्।

सप्तसर्गान्तमेतन्महाकाव्यं पृथक् पुस्तकरूपेण प्रकाश्याऽष्टमसर्गत अष्टादशसर्गान्तमेतद्द्वितीयभागरूपेण प्रकाश्यमेष्यति। प्रायः सप्तसर्गान्तमेवैतन्महा-

काव्यं सर्वत्र पाठ्यपुस्तकत्वेन नियोजितं दृश्यते। स्वभावत एवाऽकिञ्चनानां संस्कृतच्छात्राणां सम्पूर्णमहाकाव्यक्रये धनबाधा मा भूदिति धिया सप्तसर्गान्तभागो बुद्धया पृथक् प्रकाशितः।

अस्य महाकाव्यस्य महत्त्वं किमु वर्णनीयम्। विविधच्छन्दसामलङ्काराणां नूतनोत्प्रेक्षाणां गभीरध्वनीनाञ्चाऽऽकरेऽस्मिन् महाकाव्ये कालिदासभारव्याद्यमर-कीर्तिमतां महाकवीनां पदे पदे स्मरणं भवतीत्येत्काव्यानुशीलनचणानां नाऽविदितम्। रसमाधुरीप्रवाहपरम्पराणां निधिरूपमेतन्महाकाव्यं ब्रह्मास्वाद-सहोदरानन्दं समर्प्य हर्षयत्येव पाठकान्। ऐतिहासिकमिदं महाकाव्यं संस्कृत-विद्वाँस ऐतिह्यरसानभिज्ञा इति पाश्चात्यानां सबलमाक्षेपं दूरत एव शतधा करोति।

ऐतिहासिके काव्ये भूगोलस्य ज्ञानं सापेक्षम्। अतोऽत्र तात्कालिक-भारत-मानचित्रं प्रकाशितम्। तेन चरितनायकस्य विजययात्रासु भारते कुत्र कुत्र गमनं जातमिति च्छात्राणां सुस्पष्टं भवेत्।

विद्यार्थिनां सौकर्यार्थमत्र परिशिष्टेषु प्रधाननाम्नामनुक्रमणिकाऽकारादिक्रमेण सप्तसर्गान्तर्गतश्लोकसूची सूक्तिसंग्रहश्च संकलिताः। तत्रैव ग्रन्थनायकं ग्रन्थ-ञ्चाऽवलम्ब्याऽद्ययावत्प्रकाशितानां लेखानां पुस्तकानाञ्च सूची संयोजिता। येन सौभाग्यात्संस्कृतच्छात्रेषु केषाञ्चिदस्मिन्विषये विशिष्टाध्ययने नवीनाविष्करणे चेच्छा जागर्ति चेत्तेषामायासमन्तरैव सर्वं पूर्वजातं विदितं भवेत्।

टीकालेखने श्रीमतां पण्डितवर्याणां श्री रामकुबेरमालवीयानां साहाय्यं प्रत्येकं सर्गान्ते प्रेम्णा स्वीकृतमेवेति ते धन्यवादार्हाः। श्रीमतः पूज्यवर्येभ्यः श्री बलदेवो-पाध्यायेभ्य एम्. ए. साहित्याचार्येभ्यो हिन्दूविश्वविद्यालयीय-भारतीविद्यालया-(College of Indology) ध्यापकेभ्यः सहस्रशो धन्यवादा वितीर्यन्ते। यैर्भाषा-टीकायामन्यत्र च यथोचितपरामर्शप्रदानेन परमनुगृहीतोऽहम्। श्री पं. राज-नारायणशर्मणो हिन्दू विश्वविद्यालयीय-संस्कृतमहाविद्यालयव्याकरणविभागाध्यक्षा धन्यवादैरभिनन्द्यन्ते। यैस्सहर्षं सर्वदैव कठिनाप्रयुक्तशब्दसिद्धौ स्वानुपमशब्द-शास्त्रज्ञानेन शब्दसिद्धिं संसाध्य महानुपकारः कृतः। श्रीमन्तो बटुकानाथशास्त्रि-खिस्ते-महोदया एम्. ए. साहित्याचार्या राजकीयसंस्कृतमहाविद्यालयसाहित्यशास्त्रा-ध्यापकाः साशीर्वादं धन्यवादानर्हन्ति। यैरामूलचूलं संस्कृतहिन्दीव्याख्यासहितं लेखरूपमिदं निभाल्य बहुषु स्थलेषु विशेषतोऽलङ्कारनिवेशे कविमात्रगम्यदुरूह-विचाराणां निर्देशं कुर्वद्भिरत्र गुणाधिक्यमुत्पादितम्। चिरायुष्मतो विनायक-

जोशीति नामधेयस्य लेखनकार्ये साहाय्यमपि न विस्मरणीयम्, जगज्जनन्यनुग्रहात् स चिरं जीयात्। प्रकाशकाः श्री रामकृष्णदासमहोदयाः साशीर्वादधन्यवादयोग्याः। यैर्हिन्दूविश्वविद्यालयीयविविधकार्यभारान्महता विलम्बेनाऽपि भवतु, चतुर्वारमपि संशोधनार्थं प्रार्थितं प्राथमिकपत्र (Proof) मस्खलितरूपेणाऽस्मत्सविधे संप्रेष्य स्वकर्तव्यपरायणता प्रकटिता। श्रीमद्भ्यो डा० जाँर्ज ब्युह्लर, के. कृष्णम्मा-चारियर, ए. बी. कीथ, रामनाथ दीक्षित, महावीर प्रसाद द्विवेदि, कह्लण, शास्त्रिमुरारीलाल-नागरप्रभृतिभ्यः सर्वेभ्यो मान्येभ्यो लेखकेभ्यस्तेषां पुस्तक-लेखावलोकनेन बहुश उपकृतत्वात् धन्यवादान् समर्पयामि। अन्ते च चरित-चन्द्रिकाटिप्पणीकारा, ये केऽपि ते भवन्तु मम हार्दिकान् धन्यवादानर्हन्ति। एतेषां टिप्पण्या टीकालेखने महती सहायता जातेत्यमायं निरूप्य विरमाम्यति-विस्तरात्।

वाराणसी
विजया दशमी
संवत् २०१४ वै०

विश्वनाथशास्त्री
भारद्वाजः
सम्पादकः

॥ श्रीः ॥

श्री काशी हिन्दूविश्वविद्यालयकुलपतिः

श्री डा० वेणीशङ्कर झा

पीयूषप्रतिमं रसायनमिदं वाग्देवताया नवं
काव्यं बिल्हणनिर्मितं विवरणं नाम्ना "रमाख्यं" दधत्
वेणीशङ्कर झा! मनीषिमुकुटालङ्कार! युष्मत्करा-
म्भोजं विन्दतु रत्नकाञ्चनसमाश्लेषः समुन्मीलतु।

समर्पयिता

भारद्वाजो विश्वनाथशास्त्री

।। श्रीः ।।

।। श्री गणेशाय नमः ।।

।। श्री सङ्कष्टनाशिन्यै नमः ।।

—भूमिका—

अयि सुरसरस्वतीपरिचरणपराः शास्त्रधुरन्धरा विपश्चिद्वरा महानुभावाः !

प्रथितयशस्सु तत्रभवत्सु न ह्येतत्तिरोहितं यद्वाङ्मये काव्यस्य कीदृशं महितमास्पदमिति ।

काव्यं नाम लोकोत्तरवर्णननिपुणकविकर्म । कवेर्भावः कर्म वा काव्यमीदृश्या व्युत्पत्त्या कविशब्दाद् "गुणवचनब्राह्मणादिभ्यः कर्मणि" चेति सूत्रेण ष्यञ्प्रत्यये कृते काव्यपदसिद्धिरिति वैयाकरणी प्रसिद्धिः । कवते (वर्णयति), कौति, कुवते (शब्दायते) वेति कविः । "कुङ" शब्दे इति भौवादिकात्तौदादिकाद्वा "कु" शब्दे इत्यादादिकाद्वा धातोः "अच इः" इति सूत्रेणेप्रत्यये कृते कविपदनिष्पत्तिरिति शाब्दिकी व्युत्पत्तिः । निरुक्ते (१२–१३–१) यास्काचार्येण कविशब्दस्य मेधावीत्यर्थं प्रतिपाद्य 'कविः क्रान्तदर्शनो भवति कवतेर्वा' इति व्युत्पादितम् । वैदिकनिघण्टौ (२–१४), "कवते" इति रूपं गत्यर्थकधातुषु पठितम् । "गत्यर्थाः सर्वे ज्ञानार्थाः" इति न्यायात्कविशब्दस्य क्रान्तदर्शी मेधावी वेत्यर्थस्संगच्छते । वैदिकनिघण्टौ (३–१५) मेधाविशब्दस्य पर्यायवाचकेषु शब्देषु कविशब्दः पठितः । तादृशस्य कवेः कृतिः काव्यमिति पूर्वमेव प्रतिपादितम् ।

काव्यलक्षणं यथाऽऽह मम्मटभट्टः—"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वाऽपि" इति । निर्दोषं सगुणं स्फुटास्फुटालङ्कारञ्च शब्दार्थयुगलं काव्यमिति लक्षणस्यैतस्य निष्कर्षः । श्रीमतां पुरतस्ससम्मानमुपस्थाप्यमानमेतद्विक्रमाङ्कदेवचरिताभिधानं ग्रन्थरत्नं च नित्यदोषाभावात्प्रसादादिगुणसहितत्वादुपमाद्यलङ्कारमहितत्वाच्च स्फुटमेव काव्यकोटिमेवाऽऽटीकते ।

विश्वनाथकविराजस्य "वाक्यं रसात्मकं काव्यम्" इति लक्षणमपि प्रकृतप्रबन्धस्य वीरशृङ्गारादिरसभूषितत्वात्काव्यत्वाभ्युपगमानुगुणमेव ।

तच्च काव्यं दृश्यत्वेन श्रव्यत्वेन च भेदद्वयविभक्तम् । तत्र चाऽभिनेयत्वात् दृश्यत्वस्य, प्रस्तुतकृतेः श्रव्यत्वं निर्विवादम् । श्रव्यकाव्यान्यप्यनेकप्रकाराणि ।

तत्र चाऽस्य प्रकृतग्रन्थस्याऽष्टाधिकसर्गनिबद्धत्वान्महाकाव्यस्य[१] लक्षणान्तरसद्भावाच्च महाकाव्यत्वमुररीक्रियते ।

उपजीव्यस्य कथाभागस्य भेदाच्च तत्काव्यमभिनवसमालोचनेक्षिकया पुनर्द्विप्रकारकम् । यस्योपजीव्यकथाभागः पुराणाद्गृहीतस्तत्पौराणिकमेवमेव यस्य च काव्यस्य नूतनेतिहासस्तदैतिहासिकम् ।

एवञ्चाऽस्य विक्रमाङ्कदेवचरितस्य कथाभागो नूतनेतिहासाद्गृहीतस्तत एवेदं महाकाव्यमैतिहासिकमिति निर्विवादम् । संस्कृतसाहित्ये सत्स्वपि बहुष्वैतिहासिककाव्येषु पद्यकाव्यं विक्रमाङ्कदेवचरितं गद्यकाव्ये हर्षचरितञ्चेति काव्य द्वितयमेवैतिहासिकरूपेण सातिशयं प्रथितम् ।

---

[१] महाकाव्यलक्षणं यथा साहित्यदर्पणे —

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतां च गुणवर्णनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनी—प्रदोषध्वान्तवासराः ॥
प्रातर्मध्यान्हमृगया-शैलर्तुवन-सागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥

श्लोकाः ३१५—३२७

प्रकृतस्य महाकाव्यस्य सर्वप्रथमं तावच्छार्मण्य (Germany) देशीयो विद्वद्वरो डा० जॉर्ज बूह्लर महोदयः स्वमित्रेण डा० एच्० याकोबीमहाशयेन साकं राजस्थानप्रदेशे पर्यटन् १८७४ तमे खृष्टाब्दे जैसलमेरस्थित-जैनबृहज्ज्ञानकोश-भाण्डारेऽतिप्राचीनां प्रतिलिपिमासादितवान्। स च काव्यस्याऽस्याऽनितरसाधारणतामाकलयन्नात्मसुहृत्साहाय्येन दिवससप्तकाभ्यन्तर एवाऽस्य प्रतिलिपिं विधाय तस्मिन्नेव हायनान्तरे चाऽऽत्मभूमिकया समं महाकाव्यमिदं सर्वसुलभञ्चकार। इत्थञ्चाऽस्य महाकाव्यस्यैकस्या एव प्रतिलिपेरवाप्त्या बहवोंऽशा अशुद्धिग्रस्ताः। तदनन्तरं डा० रामकृष्णभाण्डारकर-वेङ्कटराममहोदयादयश्चालुक्यवंशेतिहासे प्रकृतकृतौ विक्रमाङ्कदेवचरिते च नवनवान्बहून्विषयान्प्रकाशपथमासादयामासुः। एवं सत्यपि काव्यमूलरूपं तदवस्थमेव (अशुद्धिबहुलम्) आसीत्।

कालक्रमाद्बूह्लरसंस्करणे समाप्तिमासादिते काशीस्थज्ञानमण्डलमुद्रायन्त्रालयान्महामहोपाध्याय-पण्डितप्रवर-गुरुवर-श्रीरामावतारशर्मनाम्ना सम्पादितं प्रकृत-महाकाव्यस्य संस्करणान्तरञ्च प्रकाशभावमानीयत। परमत्र संस्करणेऽपि पूर्व-संस्करणाशुद्धीनां निराकरणस्य का कथा? नवनवान्यशुद्धयन्तराण्यपि लोचन-पथातिथितां प्रयान्ति, यतः सहृदयानां चेखिद्यते चेतः। अत्र श्रीमतां गुरुवर्याणां नामसंयोगो मनसि विचिकित्सामुत्पादयति।

समाप्तप्रायेऽस्मिन्नपि संस्करणेऽस्य काव्यस्य महत्वं लोकप्रियत्वञ्च निरीक्ष्य शास्त्रिमुरारिलालनागर एम्० ए० साहित्याचार्यमहोदयैः परिश्रमातिशयेन जैसलमेरबृहज्ज्ञानकोशभाण्डारात्, पुण्यपत्तनस्थ-भाण्डारकरप्राच्यगवेषणासंस्थातः (Bhandarkar Oriental Research Institute. Poona.), अन्यतश्च प्रस्तुतग्रन्थस्य पञ्चपहस्तलिखितानि पुस्तकान्यासाद्य शुद्धपाठनिर्धारणे श्लाघ्यं प्रयासं कृत्वा महाकाव्यमिदं काशीस्थसरस्वतीभवनतः (Princess of Wales Saraswati Bhavana Text Series.) प्रकाशितम्। परञ्चाऽत्राऽपि यत्र तत्र सम्पादनरभसादन्यकारणाद्वा पाठभेदनिर्णये प्रमादो जात इव दृश्यते यथा—

अस्नरद्द्विरदानवारिणा तेन वारिनिधिराविलीकृतः।
हन्त सन्ततमदस्य विभ्रमानभ्रमुप्रियतमस्य दन्तिनः॥ (सर्ग ५ श्लो० १६)

इत्यत्र तेनेति पाठात्तस्येति पाठः साधुतरः प्रतिभाति।

एवमेव

हस्तद्वयीगाढगृहीतलोल-दोलागुणानां जघने वधूनाम्।
असंवृतस्रस्तदुकूलबन्धे किमप्यभूदुच्छ्वसितो मनोभूः॥ (सर्ग ७ श्लो. २९)

इत्यत्र 'असंवृते स्रस्तदुकूलबन्धे' इत्येव पाठः समुचितः ।

एवमादिस्थलानि विहाय सर्वत्र प्रस्तुतपुस्तके अस्यैव पाठः संगृहीतः । नागरमहोदयैरूपोद्घाते डा० बूह्लरमहादेयकृतैतिहासिकविषयस्य सुतरां बहुषु स्थलेषु खण्डनं कविलिखितघटनायाश्च याथार्थ्यं साधितम् । तत्काव्यान्ते चरितचन्द्रिकानाम्ना जैसलमेरबृहज्ज्ञानकोशभाण्डारस्थपुस्तकाट्टिप्पणीसंग्रहो नागरमहोदयस्य संस्करणं सुवर्णं सुगन्धयुक्तमिवाऽकरोत् । टिप्पणीकारः क इति यद्यपि न ज्ञातं तथापि तस्य पाण्डित्यप्रकर्षो विद्योतत एव ।

तदिदं विक्रमाङ्कदेवचरिताख्यं महाकाव्यमष्टादशसर्गनिबद्धम् । तत्राऽऽद्येषु सप्तदशसु सर्गेषु चालुक्यवंशोत्पत्तितज्जातनृपवर्णनपुरस्सरं विक्रमाङ्कदेवचरितं प्रतिपादितम् । अन्तिमे चाऽष्टादशे सर्गे महाकविरात्मवर्णनकथाप्रसङ्गे स्वाभिजनं कश्मीरदेशं तत्पालकान्भूपालाँश्चाऽवर्णयत् ।

संस्कृतसाहित्ये महाकाव्यस्याऽस्याऽसाधारणं स्थानम् । एतत्कर्ता विलक्षणकाव्यविच्छित्ति-प्रकाशन-प्रवणो विचक्षणवरोऽजल्पमधुरकल्पनाचणो बिल्हणः । विक्रमाङ्कदेवचरितस्य प्रकाशनात्प्रागपि कविवरो बिल्हणो भारतीयमहाकविषु प्रधानभावेन संस्तुतः । एतत्कृता [१]चौरपञ्चाशिका वा चौरीसुरतपञ्चाशिका कर्णसुन्दरी नाटिका च रसिकमानसेषु हर्षोल्लासप्रकाशिका वर्तते । एवञ्च सुभाषितसंग्रहप्रबन्धेष्वपि बिल्हणविरचितानि बहूनि पद्यानि संगृहीतानि । सूक्तिसंग्रहणप्रवणजल्हणसंकलितायां सूक्तिमुक्तावल्यामेव बिल्हणस्याऽष्टाधिकानि शतसंख्यकानि पद्यानि विलसितानि । किमधिकेन । प्रसादाभिधानेन गुणेन वैदर्भ्या रीत्या चाऽयं महाकविः काव्यनिर्माणे कविकुलगुरोः कालिदासस्य शैलीं बिभर्ति । शार्दूलविक्रीडितस्रग्धरादिषु वृत्तेषु कवेरस्य शैली भवभूति-श्रीहर्षादिसदृशी दरीदृश्यते । किञ्च कविरयं तत्र तत्र स्वप्रबन्धे कालिदासादिमहाकवीनां छायां स्ववैशिष्ट्यं संस्थाप्यैवाऽनुचकारैतदधिकमस्य महत्वं किं निवेद्यते ।

काव्यकलेवरपीवरत्वभीत्याऽस्माभिः कृतिरियं भागद्वये कृतविभागा । तथा च सर्गसप्तकमितोऽयं प्रथमो भागः । अथाऽत्र सर्गसप्तकं यावदस्य महाकाव्यस्य स्तोकमालोचनमनुष्ठीयते ।

---

[१] चौरपञ्चाशिकायाः प्रथमं प्रकाशनं शार्मण्य (Germany) देशीयै डा० सॉल्फमहोदयै १८८६ खृष्टाब्दे शार्मण्यभाषाग्रथितभूमिकया सह कृतम् । परञ्चाऽस्य नूतनं विस्तृतं संस्करणमपेक्षितम ।

इह कविर्मङ्गलाचरणानन्तरमादौ रीतिचतुष्टये—

अनभ्रवृष्टिः श्रवणामृतस्य सरस्वती-विभ्रम-जन्म-भूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥

इत्यनेन पद्येन वैदर्भीमेव रीतिं प्रशशंस । प्रस्तुतकृतौ कविः वैदर्भीमेव रीतिं प्रायेण समाललम्बे ।

अत्र परमरमणीयेन प्रकारेण स्वविनयवर्त्ति स्वस्य चोपजीव्यनरपतौ निरतिशयां भक्तिञ्च द्योतयता महाकविना बिल्हणेनोक्तं—

गिरां प्रवृत्तिर्मम नीरसाऽपि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसम्बन्धिनीं मूर्धनि धारयन्ति ॥ (१-२८)

एवञ्चाऽस्य महाकवेः श्रीहर्षेणाऽधस्तने पद्ये विशिष्टरूपेणाऽनुकरणं व्यधायि ।

पवित्रमत्राऽऽतनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ इति ।
(१-३) नैषधचरिते

निम्नस्थपद्ये कविनिबद्धवक्तुराहवमल्लदेवस्य—

किमश्वमेधप्रभृतिक्रियाक्रमैः सुतोऽस्ति चेन्नोभयलोकबान्धवः ।
ऋणं पितॄणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभम् ॥ (२-३४)

इत्युक्तिः कीदृशी सहृदयहृदयावर्जिका, कालिदासनिबद्धवक्तुर्दिलीपस्य—

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम् ।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ॥ (रघुवंशे १-६९)

इति वचनं स्वप्रौढिप्रकर्षेणाऽतिशेत इत्यत्र विपश्चिद्वरा एव प्रमाणम् । तस्यैवाऽऽहवमल्लदेवस्यात्मजायां प्रत्यात्मजोत्पादनमनूद्य—

अधीतवेदोऽस्मि कृतः श्रुतागमः श्रमोऽस्ति भूयानितिहासवर्त्मसु ।
गुरुष्ववज्ञाविमुखं सदा मनस्तदभ्युपायोऽत्र मया न दुर्लभः ॥ (२-३९)

आलापोऽयं कथंविधः प्रौढिपूर्ण आत्मविश्वासप्रकाशकश्चेत्ययमर्थो गुणग्राहकाणां विदुषामतिरोहितः । एवञ्चाऽत्रस्थमाहवमल्लतपोवर्णनं कालिदासस्य कुमारसम्भवस्थं पार्वतीतपोवर्णनं मनोहरविधयाऽनुहरति । ज्यायसि भ्रातरि वर्तमाने जनकपरिकल्पितं स्वीयं यौवराज्यं प्रतिषेधतो विक्रमाङ्कदेवस्य—

चालुक्यवंशोऽपि यदि प्रयाति पात्रत्वमाचारविपर्ययस्य ।
अहो ! महद्वंशसमाः किमन्यदनङ्कुशोऽभूत्कलिकुञ्जरोऽयम् ॥ (३-३६)

उक्तिरियं कालिदासस्य रघुवंशे यज्ञियमश्वमपहरन्तमिन्द्रं प्रति रघोः—

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्या ननु दिव्यचक्षुषा ।
स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधिः ॥ (रघुवंश ३-४५)

वचनमदः स्वप्रौढिप्रकर्षेणातिक्रामतीत्यत्र विदुषां नो विप्रतिपत्तिः । एवञ्चाऽत्रत्यं विक्रमाङ्कदेवदिग्विजयवर्णनं रघुवंशस्थितं रघुदिग्विजयवर्णनमनुकरोतीत्ययं विषयः काव्यद्वितयशीलिनां विमलमतीनां कृतिनां मतिपथे स्फुटमेवाऽवभासते । दोषवर्जनपूर्वकं सतां गुणग्राहकत्वं कीदृश्या विच्छित्याऽत्राऽधस्तने पद्ये दृष्टान्तालङ्कारेण प्रदर्शितम्—

दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः ॥ (५-५१)

अत्रैकत्र षष्ठसर्गस्थेऽष्टमे पद्ये महाकविना "विललापे" ति प्रयोक्तव्यत्वे 'ललापे'ति प्रयुञ्जानेनाऽवाचकत्वं नाम दोषोऽपि प्रकाशितः । सप्तमसर्गीये चत्वारिंशत्तमे श्लोके "अक्ष्णशब्दे" अप्रयुक्तत्वदोषः । परं तादृशि महाकवौ दूषणमिदं तस्य निरङ्कुशतामेव द्योतयति नत्वज्ञानम् । सोमदेवस्याऽश्वानामिदं

जवसमुचितधावनानुरूपा किमिति कृता पृथुला न नाथ ! पृथ्वी ।
नभसि खुरपुटैरिति स्फुरद्भिर्विधिमिव ये स्म मुहुः प्रतिक्षिपन्ति ॥ (६-४९)

वर्णनं महाकविश्रीहर्षकृतमधोलिखितं नैषधाश्ववर्णनमतिशेते ।

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुत्थितं रजः ॥ (१-६९) इति ।

एवञ्च—

रथस्थितानां परिवर्तनाय पुरातनानामिह वाहनानाम् ।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम् ॥ (७-६)

इह महाकविनोत्प्रेक्षालङ्कारमाश्रित्य रवेरुदीचीगमनं येन चित्ताकर्षकविधानेन समुपवर्णितं तत्प्रशंसनीयमेव । सप्तमे सर्गे कविना वसन्तादिवर्णनं कुर्वता कमनीयं काव्यकौशलं प्रकाशितमिति दिक् ।

इदानीमस्याः कृतेस्तत्तल्लक्षणसंवादित्वं वैशिष्ट्यमुपदर्शयितुमापाततः प्रतीयमानदोषाभासनिरासार्थञ्च स्तोकं प्रयत्यते।

प्रस्तुतपुस्तकं महाकाव्यमिति पुरस्तादुपवर्णितमेव। अस्य नायकः खृष्टैकादशशताब्द्यां चालुक्यशाखाचतुष्टये कल्याण-चालुक्यवंशोद्भूतो वीरवरो विक्रमाङ्कदेवः। नायकलक्षणं यथा साहित्यदर्पणे—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता॥

इत्थञ्च चरितप्रणेत्रा स्वनायकस्य पूर्वोक्तगुणगणालङ्कृतत्वं सम्पादनीयम्। एवञ्च नायकस्य भेदचतुष्टयमपि तत्रैव प्रदर्शितम्। यथा—

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥ इति।

तत्र च प्रकृतनायको विक्रमाङ्कदेवो धीरोदात्त इतीयं वार्ता निम्नस्थलक्षणेनाऽवसीयते। तद्यथा—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥

अविकत्थनो यथा—

गौडकामरूपकाञ्चीकेरलमलयचक्रकोटद्रविडादि—भूपालान्विजित्याऽपि कल्याणपुरं प्रत्यावर्तमानेन तेन विक्रमाङ्कदेवेन न कुत्राऽपि स्वमुखेन स्वपौरुषमुद्घोषितम्। प्रत्युत द्राविडेन्द्रदूतस्य समागमे तेन स्वपराक्रममधरीकृत्योक्तम्—

ईदृशीं सुजनतामजानता कार्मुकेण मुखरत्वमत्र मे।
यत्कृतं किमपि तेन लज्जया भारती कथमपि प्रवर्तते॥ (५-५०)

एवमेव—**अङ्गानि चन्दनरसादपि शीतलानि चन्द्रातपं वमति बाहुरयं यशोभिः।**
चालुक्यगोत्रतिलक क्व वसत्यसौ ते दुर्वृत्तभूपपरितापगुरुः प्रतापः॥
(५-८६)

इत्यादिद्रविडेश्वरोक्तौ स तूष्णीमेव स्थितः।

क्षमावान् यथा—

जयकेशि-आलुपेन्द्र-द्रविडक्षितिपति-लङ्काधीशादीन् शरणागतान् स क्षाम्यति स्म। ज्येष्ठे भ्रातरि सोमेश्वरे बन्धनधामनीतेऽपि—

वितरितुमिदमग्रजस्य सर्वं पुनरुपजातमतिः स राजपुत्रः । (६-९३)

इत्ययं विपयस्तस्य क्षमावत्त्वं साधयत्येव ।

अतिगम्भीरो यथा—

उभयतः समागतयोर्द्रविडपतिसोमेश्वरसैन्ययोः स्थितौ स गाम्भीर्येण—

मदकरटिनमुत्कटप्रतापः प्रकटितवीरमृदङ्गधीरनादः ।
मथनगिरिमिवाधिरुह्य वेगात् प्रतिबलवारिधिलोडनं चकार ।। (६-६८)

महासत्वो यथा—

अन्तकः प्रतिभटक्षमाभृतां निर्दयप्रहणनोद्यतं ततः ।
तन्मदद्विरदपादचूर्णितं सैन्यमेककवलं चकार सः ।। (५-७)
विघटनमटवीधनुर्धराणां विषमपथेषु विधाय लीलयैव ।
पुनरपि स जगाम तुङ्गभद्रां विरचितवन्दनमालिकां तरङ्गैः ।। (५-२५)

इत्यादिस्थलेषु राज्ञो महासत्वशालित्वं प्रकटितमेव ।

स्थेयान् यथा—

प्राप्तमप्यनयपङ्कशङ्कितस्तद्बलं न सहसा जघान सः ।
अप्रतर्क्यभुजवीर्यशालिनः सङ्कटेऽप्यगहनास्तथाविधाः ।। (५-६)

इत्यत्रोक्तमेव । पुरतः पृष्ठतश्च समागतयोर्विपक्षसैन्ययोः सः स्वधृतिमवलम्बितवान् ।

निगूढभावो यथा—

कीदृशी शशिमुखी भवेदिति स्पृश्यते स्म हृदये स चिन्तया ।
कामुकेषु मिषमात्रमीक्षते नित्यकुण्डलितकार्मुकः स्मरः ।। (५-४८)

तथापि

अब्रवीच्च मनसः प्रसन्नतां दन्तकान्तिभिरुदीरयन्निव ।
ओष्ठपृष्ठलुठितस्मिताञ्चलः कुन्तलीनयनपूर्णचन्द्रमाः ।। (५-५९)

इत्यत्राऽस्य निगूढभाववत्त्वं सुस्पष्टमेव ।

दृढव्रतो यथा—

आहवमल्लदेवस्य स्वपितुर्यौवराज्यपदग्रहणे महत्याग्रहे वर्तमानेऽपि स वैदग्ध्येन

चालुक्यवंशोऽपि यदि प्रयाति पात्रत्वमाचारविपर्ययस्य ।
अहो महद्वैशसमाः किमन्यदनङ्कुशोऽभूत्कलिकुञ्जरोऽयम् ।। (३-३६)

एतादृशैर्युक्तियुक्तैर्वचनैः स्वदृढव्रतत्वं प्रकटितवानिति ।

महाकविना बिल्हणेनेत्थमेव तत्र तत्र नायकस्य धीरोदात्तत्वं प्रतिपादितम् ।

अत्रैतिहासिकतत्वसंरक्षणपरा डा० बूह्लरादयो विपश्चिद्वरा विप्रवदन्ति—'महाकविना बिल्हणेन स्वकृतावैतिहासिकं तथ्यं वितथीकृतमिति'। वस्तुतस्त्वेतद्दूषणमापातत एव प्रतिभाति न तत्त्वदृष्ट्या। प्रकृतकृतिरितिहासमूलाऽपि काव्यमेव नेतिहासः। अत्र कविना प्राधान्येन प्रकाशनीयं कवित्वमेव, न त्वितिहासतत्त्वम् । यत्त्वत्रेतिहासतत्त्वं प्रकाशितं तदानुषङ्गिकत्वेन न प्रधानत्वेन । कल्पनाकाननसञ्चरणपराणामेतादृशानामेव कवीनां कृतिमुदिश्य—

अपारे काव्यसंसारे कविरेव प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत् ।
स चेत्कविर्वीतरागोनीरसं व्यक्तमेव तत् ॥ (अग्निपुराणो)

एतादृश्युक्तिः समजनि । किं बहुना, महाकवीनामेतादृशां कृते स्वनायकस्य मर्यादासंरक्षणार्थमालङ्कारिकैः सुधीभिः स्तोकरूपा स्वतन्त्रताऽपि प्रदत्ता । यथा सा साहित्यदर्पणे—

यत्स्यादनुचितं वृत्तं नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥ इति ।

अतएव धीरोदात्तनायकेन श्रीरामचन्द्रेण छद्मना वालिहननमनुचितमिति धिया महानुभूतिना भवभूतिना वीरचरिते रामवधार्थमायातो वाली रामेण व्यापादित इति प्रतिपादितम् । अपरञ्च, काव्यसाधितं वस्तु मिथ्यारूपमितिहासप्रकाशितमेव तथ्यमित्यत्र का नाम विनिगमना ? इतिहासवर्णितमपि वस्तु वितथं विलोक्यते । यथा वङ्गेतिहासे सिराजुद्दौलाभिधानेन वङ्गाधीशेन कृष्णप्रकोष्ठे (Black Hole of Calcutta) वहव आँग्लदेशाभिजना निरुद्धास्तत्र च स्थानस्य सङ्कुचितत्वाद्बहुसंख्यका उपरता अल्पा एवाऽवशिष्टा इति यदितिहासे लिखितं तत्साम्प्रतं मिथ्यैवेति बहुभिर्विद्वद्भिः साधितम् । एवंविधे व्यतिकरे लोचनगोचरे सति प्रकृतेऽपि प्रकृतचरितनायकस्य तत्सदस्यकविप्रदर्शितं वृत्तं वितथमितिहासनिर्दिष्टमेव तथ्यरूपमित्यपि सर्वतोभावेन प्रतिपादयितुं न शक्यम् । कालान्तरे विस्तृतगवेषणानन्तरं प्रकृतकविकृतवृत्तस्य सत्यत्वसिद्धिरपि संभाव्यते । श्री नागरमहोदयैः स्वोपोद्घाते डा० बूह्लरखण्डिताः काश्चिदैतिहासिकघटनाः डा० बुह्लरमतखण्डनपूर्वकं सत्यत्वेन प्रमाणीकृता वर्तन्ते ।

ऐतिहासिकेन विदुषा समं कवेरियं कलहवार्ता नाऽत्रैव पाश्चात्यदेशेऽपि स्फुटमाकर्ण्यते। प्रतीच्यामैतिहासिकोपन्यासलेखकानामादिमो नूतनवाट (New way.) प्रकाशकः सर् वाल्टर स्काट् (Sir Walter Scott.) महाशयोऽपीत्थमेव दूषणभाजनं समजनि। आधुनिकानामाङ्ग्लेतिहासज्ञानां फ्रीमैनाभिधानः कोविदः परमप्रसिद्धः। उपन्यासप्रस्तुतायामितिहासविकृतौ रोषं प्रदर्शयता कृतिनाऽमुनाऽभिहितं—'यूरोपदेशोद्भूते धर्मयुद्धयात्रायुगे (The age of the Crusades) ये किमपि ज्ञातुमीहन्ते तैः स्कॉटकृत 'आइवान हो' (Ivanho) नाम उपन्यासो न पाठ्य इति। अत्राऽपि समाधानं पूर्ववदेव बोध्यम्। एवमेवाऽत्र कृतौ महाकविना चरितनायकस्य तत्तत्कार्यकालानां पौर्वापर्यविपर्ययोऽकारीति यद्दूषणमुपन्यस्तं तत्रेयं वार्ता—नेयं कृतिः प्राधान्येनेतिहासः प्रत्युत काव्यमेव। महाकविना स्वलेखनसौविध्यमाचरतेत्थमाचरितमतो नाऽत्र स उपालम्भभाजनम्।

'शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते'। इत्युक्तेरत्र वीरोऽङ्गी रसो **यथायथमङ्ग**रूपाणि रसान्तराणि च बोद्धव्यानि। मङ्गलाचरणरूपे प्रथमश्लोके कृपाणमुपवर्णयता महाकविनाऽस्य महाकाव्यस्य वीररसाश्रयित्वं द्योतितमेव।

अत्र सत्स्वप्यलङ्कारान्तरेषु महाकविर्विशेषत उपमोत्प्रेक्षादृष्टान्तार्थान्तरन्याससमासोक्तिवृत्त्यनुप्रासादीन् बाहुल्येन लोचनगोचरीकरोति।

यद्यपि स्वकृत्या कृतसहृदयहृदयसंवननः स चाऽयं महाकविर्विलक्षणः काश्मीरेषु प्राप्तजननस्तथाप्ययं कल्याण-चालुक्य-वंशस्य षष्ठविक्रमादित्यस्य विक्रमाङ्कदेवापरनामकस्य सभापण्डित आसीत्। भारते वर्षेऽस्य षष्ठविक्रमादित्यस्य शासनं १०२८ तः ११२७ खृष्टाब्दपर्यन्तं स्थितम्।

काश्मीरेषु प्रवरपुरम् (श्रीनगरम्) प्रधाननगरमस्ति। तस्मात्क्रोशत्रये खोनमुषनामकं ग्रामं महाकविरयं स्वजन्मनाऽलङ्कृतवान्। तत्र कौशिकगोत्रोत्पन्ना ब्राह्मणा निवसन्ति स्म। तदन्वयमेवाऽयं भूषितवान्। अस्य प्रपितामहो मुक्तिकलशः पितामहो राजकलशः पिता च ज्येष्ठकलशः आसीत्। अस्य मातुर्नाम नागादेवीति। अस्य ज्येष्ठभ्राता-इष्टरामोऽनुजश्चाऽऽनन्दनामाऽऽसीत्। द्वावप्येतौ भ्रातरौ विद्वत्तया तत्र प्रसिद्धावास्ताम्।

काश्मीरेष्वेव सकलवेदशास्त्राद्यधीत्य बाणभट्ट इवाऽयमपि विदेशान्प्रति प्रतस्थे। मथुरायां वृन्दावने च शास्त्रार्थविषयेषु पण्डितान्विजित्य क्रमशः कान्यकुब्जतः प्रयागं समाजगाम। ततः काश्यां डाहलाधीशस्य कर्णनृपतेः सभायां

श्रीगङ्गाधरनामानं कञ्चित् विशिष्टं पण्डितं पराजितवान्। ततो भोजराजधानीं धारां प्राप्तः। परञ्च भोजस्य दिवङ्गमात्तस्य तत्र गमनमसफलमेवाऽऽसीत्। ततः स गुर्जरदेशे समागत्य सोमनाथमहादेवस्य दर्शनं कृतवान्। सोमनाथान्निर्गत्य स दक्षिणदेशे चिरं बभ्राम। सेतुबन्धरामेश्वरदर्शनानन्तरं स कल्याणनगरं ययौ। तत्र लब्धविद्यापतिपदवीकः सः षष्ठ-विक्रमादित्यस्य चालुक्यवंशीयस्य सभां यावज्जीवं सम्भूषयति स्म।

सर्वस्वं गृहवर्ति कुन्तलपतिर्गृह्णातु तन्मे पुन—
र्भाण्डागारमखण्डमेव हृदये जागर्ति सारस्वतम्।
रे क्षुद्रास्त्यजत प्रमोदमचिरादेष्यन्ति मन्मन्दिरं
हेलान्दोलितकर्णतालकरटिस्कन्धाधिरूढाः श्रियः॥ १॥
अयि! किमनिशं राजद्वारे समुद्धुरकन्धरे
कुवलयदलस्निग्धे मुग्धे विमुञ्चसि लोचने।
अमररमणीलीलावल्गद्विलोचनवागुरा—
विषयपतितो न व्यावृत्तिं करिष्यति बिल्हणः॥ २॥

उपर्युक्तं पद्यद्वयं काश्मीरासादित-चौरीसुरतपञ्चाशिकाग्रन्थे प्रारम्भ एवाऽस्ति। एताभ्यां पद्याभ्यां बिल्हणविक्रमादित्ययोः पूर्वं कादाचित्कं वैमनस्यं द्योत्यते। प्राचीनराजसभापण्डिताः स्वभावत एव नूतनमहापण्डितप्रवेशे विरोधिनो भवन्तीति नैतदसम्भवम्।

श्री कृष्णम्माचारियरमहोदयस्त्वेतदेव वैमनस्यं पाश्चात्कालिकं विमृश्य महाकाव्यस्याऽस्याऽपूर्णत्वे कारणमिति कल्पयति। तन्मते खृष्टीये १०८५ वत्सरे विक्रमादित्यस्य नर्मदातटयात्राऽत्र न वर्णितेत्यस्याऽपूर्णत्वम्। परन्तु नैतन्महाकाव्यमपूर्णम्। खृष्टीय १०८५ वर्षीया घटना महाकाव्यरचनानन्तरभूतेति तस्या अत्र समावेशोऽसम्भवः। महाकाव्यं परिसमाप्यैवाऽन्तिमेऽष्टादशसर्गे महाकविना स्ववंशवर्णनं कृतमित्यपूर्णतायाः कल्पना निराधारैव।

एवमेव 'इण्डियन एण्टिक्वेरी' पत्रसंपादकस्य 'बिल्हणः श्लेषालङ्कारस्य परमोपासक इत्यादि समालोचनं, श्रीमतो द्विवेदिमहोदयस्य महाकवेरस्य प्राचीनकवीनामनुकरणदोषारोपणं, डा० बूह्लरमहोदयस्य चैतिहासिकघटनाऽपटुत्वेन दूषणं सर्वमिदं समालोचनमनालोचनपूर्वकमेव। न कोऽपि निर्दोष इति विचार्यैव महाकविना कालिदासेन कुमारसम्भवे भणितं—

एकोऽहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। इति

यो महाकविः स्वग्रन्थे काव्यार्थचौर्यं निन्दति स कथं तदेव कुर्यात् ।

ईदृग्भूतानां समालोचकानां कृत एव महाकविना बिल्हणेनोक्तम्

रसध्वनेरध्वनि ये चरन्ति संक्रान्तवक्रोक्ति—रहस्यमुद्राः ।
तेऽस्मत्प्रबन्धानवधारयन्तु कुर्वन्तु शेषाः शुकवाक्यपाठम् ॥ (१-२२)

एतादृशस्य महाकाव्यरत्नस्य काऽपि विशदटीका न विद्यते । चरित-चन्द्रिकाऽभिधाना केवलमेका टिप्पणी कविहार्दभावप्रकाशनऽसमर्था । अत एवाऽयमस्माकं टीकालेखने समारम्भः । अस्मदीयायामस्यामभिनवव्याख्यायां रमानाम्न्यां यथामति कवितात्पर्यप्रकाशनपुरस्सरं रसध्वन्यलङ्कारच्छन्दःप्रभृतय आलङ्कारिका विषया वैशद्येन प्रतिपादिताः । तदधस्तले च हिन्दीभाषामयोऽनुवादोऽपि सविस्तरं व्यक्तरूपेण न्यधायि । तत्राऽस्माभिः कियती सफलताऽधिगता, विषयेऽत्र सहृदयाः कोविदा एव प्रमाणम् । यथोक्तं कविकुलगुरुणा महाकविना कालिदासेन—

आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥

उपयुक्तसमयाभावेन सर्गसप्तकं यावदतिसंक्षिप्तया विधयाऽत्रत्याः काश्चिद्विशेषताः प्रकाशिताः । भागान्तरे वैशिष्ट्यान्तराणि चोपस्थापयिष्यन्त इति धिया साम्प्रतमेतावतैव विरम्यते ।

सर्गसप्तकस्थः कथासारः ।

प्रथमसर्गे—

मङ्गलाचरणप्रस्तावनानन्तरं प्रकृतचरितनायकचालुक्यकुलमूलपुरुषस्योत्पत्तिः प्रदर्शिता । सा चेत्थं-जातुचिच्चतुर्वदने प्रातः सन्ध्यावन्दनपरे सुरपतिर्धराभरापनयनार्थमलौकिकपौरुषस्य कस्यचिन्महापुरुषस्याऽऽवश्यकतां निवेदयामास । तदनु वेधाः सन्ध्यासलिलपूर्णमात्मचुलुकमालुलोके । तस्माच्च कमलासनचुलुकाल्लोकत्रयत्राणप्रवीणः सुभट आविरासीत् । स पुरुषः पुरुहूतं 'धृतिमान् भव' इति प्रस्थाप्य सुरविपक्षक्षयदीक्षितोऽभूत् । तत एव चालुक्यकुलं समजनि । यत्र च हारीतमानव्यनामानावादिपूरुषौ बभूवतुः । तत्कुलजा युद्धदुर्धर्षा भूपाला अयोध्यां स्ववासस्थानं चक्रुः । केचिच्च विश्वविजयक्रमेण विलासितया च दक्षिणस्यां दिशि निवासं विदधुः । किञ्चित्कालानन्तरं तैलपो नामाऽतुलविक्रमो

भूपस्तद्वंशावतंसोऽभूत् । ततोऽनुपमशौर्यश्रियः सत्याश्रयो नाम नरपतिः प्रादुर्बभूव । ततश्च समराङ्गणेषु मुहुर्मुहुः प्राप्तजयो जयसिंह आविर्भूतः । तस्माच्च त्रैलोक्यमल्लापरनामक आहवमल्लाभिधानो विश्रुताऽवदानो नरनायकः समजायत । अनुपमविक्रमः स नरपालश्चोलदेशं मालवराजधानीं धाराञ्च जिगाय । डाहलपतिं कर्णञ्च विवर्णं चकार । एवमेव बहुष्वाहवेषु मल्लः स आहवमल्लो द्रविडप्रकाण्डं वीररसस्याऽभाजनं विदधे, चोलराज्यश्रियञ्चाऽऽचकर्ष ।

द्वितीयसर्गे—

प्रक्रान्तविक्रान्तचरित आहवमल्लदेवः सर्वाः ककुभो विजित्य गुणिगणमण्डितां कल्याणपुरीमात्मराजधानीरूपेण विदधे । समधिगतसम्पदतिशयः पूरितार्थिसार्थमनोरथोऽपि स भूपतिस्तनयाभावेन दूयमानमानसोऽभूत् । ततः स देव्याः समं विमृश्य सकलराज्यकार्यभारं मन्त्रिषु विनिवेश्य तनुजाऽऽसादनार्थं शङ्करानुष्ठाननिष्ठो बभूव । जातुचिद्विभाते चन्द्रशेखरपरिचरणपरो नरवरः स इमामशरीरिणीं गिरमाकर्णयति स्म—"भो नरपते ! कृतं तपसा । भगवान्पार्वतीपतिस्त्वयि प्रसादाभिमुखः संवृत्तः । इयं त्वदीया दयिता तनयत्रितयसमन्विता भविष्यति । तत्राऽपि शिवप्रसादाद्द्वितीयस्तनयोऽतुलबलो भविता" इति । अनन्तरं नरदेवो व्रतपारणाविधिं विदधे । ततश्च शुभे मुहूर्ते देवी सुतमेकमसूत, यो नाम्ना सोमेश्वरः संवृत्तः । ततो माङ्गलिके लग्ने देव्या गर्भतो लोकोत्तर-गुणगणसमलङ्कृतः समस्तशुभलक्षणलक्षितः शिवप्रसादीकृतो द्वितीयस्तनयः समजनि । निरतिशयहर्षप्रकर्षपरवशो महाराजश्चाऽऽत्मजस्य जातकर्मादिसंस्कारं सम्पादयामास ।

तृतीयसर्गे—

नवप्रसूतः प्रभूतशुभलक्ष्मपूरितो राजसुत आख्यया विक्रमाङ्कदेव इति ख्यातिमभजत् । स च बालोऽनितरसाधारणगुणान्बाल्य एव प्रादर्शयदकरोच्च मातापितरौ प्रमोदमेदुरमानसौ । अचिरेणैव समयेन विक्रमादित्यो विक्रमाङ्कदेवापरनामा समधिगतसमस्तविद्यः संवृत्तः । अत्रान्तरे नराधिपस्य जयसिंहनामकस्तृतीयस्तनयोऽपि समजायत । अथ राजा प्रतापेनाऽऽदित्यसन्निभो द्वितीयमप्यद्वितीयं विक्रमादित्याभिख्यं तनूजं यौवराज्यालङ्कृतं कर्तुमियेष । ज्येष्ठे भ्रातरि स्थितेऽपि स्वयौवराज्याभ्युपगमे महदनौचित्यं पश्यन्वाचोयुक्तिपटुः स

उक्तिविशेषैर्मुहुर्मुहुराग्रहग्रहग्रहिलं स्वपितरं न्यषेधत् । इत्थञ्च सोमेश्वरः सोमदेवापरनामधेय एव यौवराज्यपदभागजायत। वस्तुतस्तु विक्रमाङ्कदेव एव राजयुवराजयोर्द्वयोरपि भारमादिकमठो भूमिशेषयोरिव विशेषरूपेण बभार । तदनन्तरं पितुराज्ञया सर्वत्र रणोत्सवेषु विजयमवाप । एवञ्च स चोलाञ्जिगाय, स्वशरणागतं मालवाधीशं निष्कण्टकं राज्ये समस्थापयत् । बहवो भूपालाः कन्यकाप्रदानच्छलतोऽस्य सर्वस्वदानं चक्रुः ।

चतुर्थसर्ग—

विक्रमाङ्कदेवो दिग्विजयार्थं प्रयाणमकरोत् । तद्गजा मलयं मलयजरहितमकुर्वन् । स केरलदेशं जीवितेशदेशं प्रापयत् । तद्भयात्सिंहलभूपालस्तच्छरणं जगाम । एवञ्च विक्रमाङ्कदेवो गाङ्गकुण्डपुरं चोलदेशं च जिगाय । वेङ्गिभूपालं चक्रकोटपतिञ्च स निर्वीर्यं चकार । एवञ्चाऽपराक्रान्तो महाविक्रान्तो विक्रमाङ्कदेवः कृतकार्यः सन्ननिवार्यदैवगत्या स्वदेशप्रत्यावर्तनकाले बहुविधान्यपशकुनानि प्रत्यक्षीचकार । ततश्च स तच्छान्त्यर्थं सर्वस्वदानमालोच्य कृष्णानदीतटे विशश्राम । तस्मिन्नेव समये कल्याणपुरात्समायातो दूत एतादृशीमभव्यां वार्तामश्रावयत्—"राजकुमार ! भवज्जनको भावत्कं पाण्ड्यचोलसिंहलभूपालविजयं समाकर्ण्याऽमन्दमानन्दसन्दोहमन्वभूत् । परं नियतिदुर्गतिपरवशः स दाहज्वराभिभूत्या दक्षिणापथत्रिपथगां तुङ्गभद्रां प्राप्य सुवर्णदानपूर्वकं कण्ठदघ्ने तत्तोये प्रविश्य चन्द्रशेखरपुरं प्रययौ" इति । इत्थञ्चाऽकाण्ड एव जनककैलाशवासमाकर्ण्य परितप्तः स भृशं परिदेवयामास । अथ स संस्थितस्य तातस्योत्तरक्रियां यथाविधि विधाय सत्वरमग्रजालोकनोत्कण्ठया कल्याणप्रयाणमुद्दिश्य जगाम ॥

ततः स कियद्भिरपि दिवसैः कल्याणपुरीं समासाद्याऽग्रे समागतेनाऽग्रजन्मना सम्मानितस्तेनैव समं समानसक्लेशं नरेशप्रासादं विवेश । तदनु तावुभावकृत्रिमाभिर्मिथः प्रणयवृत्तिभिः कतिचिद्वासरानयापयताम् । गुणगणज्येष्ठोऽपि स ज्यायाँसं तातप्रतीकाशं प्रतीक्ष्यं समीक्ष्य समर्पयामास च तस्मै दिग्विजयोपार्जितं समस्तं वस्तुजातम् । ततश्चाऽनिवार्यया भवितव्यतया सोमेश्वरो दुर्विनयपरोऽभूद्येन च स भूपो विमले चालुक्यकुले कलङ्करूपो बभूव । यदा विक्रमादित्य आत्मनोऽग्रजस्य दुराग्रहं निराकर्तुं न शशाक, तदाऽयशोभीत्या भेरीरवेण श्रवणविवरं भिन्दन्कल्याणपुराद्विनिर्ययौ ॥

पञ्चमसर्गे—

विक्रमादित्यः कल्याणपुरत्यागसमये स्वाग्रजात्सङ्कटमाशङ्क्य नयविनयोपेतं जयसिंहाऽपरनामधेयं स्वाऽनुजं सिंहदेवमपि निनाय। अथैतद्वृत्तमसहमानश्चालुक्येश्वरः सोमेश्वरो विक्रमादित्यस्य पृष्ठतः पुष्कलं बलं व्यसर्जयत्। ततश्च निर्दयप्रहरणपरं तद्बलमनिच्छन्नपि महाविक्रमो विक्रमश्चूर्णितं चकार। उत्तुङ्गशक्तिः स तुङ्गभद्रां प्राप, युद्धेच्छया चोलसम्मुखवर्ती च बभूव। एवं च स कञ्चित्कालं यावद्वनवासमण्डलमध्युवास। स्वबलवाद्यनिनदैर्मलयदेशभूभुजामात्मपूर्वविक्रमं स्मारयन्विक्रमः पुरत उच्चचाल। तस्मिन्नेवान्तरे कोङ्कणदेशनरेशो जयकेशी प्रार्थितादप्यधिकं धनं तस्मै समर्पयामास। आलुपपालकश्च तदन्तिके रणचापलं त्यक्त्वा समृद्धिं चाऽऽप। ततः स रणेच्छया चोलांश्चचाल। विक्रमबलाऽतिक्रमाऽक्षमश्चोलभूपालः सन्ध्यर्थं स्वसन्देशहरं विक्रमान्तिकं प्राहिणोत्। स दूतो विक्रमं बहुशः स्तुत्वा चोलभूपालो भवते स्वकुमारीं समर्पयितुमिच्छती" ति निवेदयामास। विक्रमोऽपि तत्प्रार्थनामभ्युपयञ्छंस्तुङ्गभद्रानदीतटमगात्। ततश्चोलपतिः स्वकन्यां विक्रमाय समर्पितवान् ररक्ष चैवं विक्रमबलाक्रमणाच्चोलाऽचलाम्।

षष्ठसर्गे—

अथ चोलपतिः कन्यादानानन्तरं जामातुरभ्यनुज्ञां समवाप्य चचाल। ततो विक्रमादित्यः किञ्चित्कालाऽनन्तरं दैवहतकस्य दुर्विलसिताद्रणाङ्गणे चोलपतेः सुरलोकप्रयाणमाकर्णयत्। परिदेवनादनु स चोलराजकुमारे श्रियमभिषेक्तुं काञ्चीं प्रति समुच्चचाल। तत्र च विक्रमादित्यं विलोक्य काञ्चीकामिन्यो बहुविधाः शृङ्गारचेष्टाश्चक्रुः। ततश्च स दुष्टवर्गं खर्वतेजसं विधाय चोलेन्द्रनिर्मापितं गाङ्गकुण्डपुरं प्रययौ। तत्र च स परिपन्थिसैन्यनिधनपूर्वकं चोलराजकुमारं राजपदमधिरोप्य मासपर्यन्तं तत्राऽवस्थाय भूयोऽपि तुङ्गभद्रां वव्राज। दिष्टाऽनिष्टतया कतिपुचिद्दिवसेषु गतेषु राजिगाऽभिधानः वेङ्गिनाथः प्रकृतिविरोधहतस्य तस्य विक्रमश्यालकस्य राज्यमपाजहार। कुटिलमतिरसौ राजिगः पुनर्विक्रमाक्रमणमाशङ्क्य विक्रमाग्रजं सोमेश्वरं स्वसहायकमकृत। ततो विक्रमादित्ये राजिगवधार्थं कृतप्रयाणे सति सोमेश्वरस्तस्य पृष्ठे त्वरिततरमुपागतः। अग्रजेन समं समरकरणे परममक्रमं मन्वानो विक्रमोऽश्रुपूर्णनयन उद्यतो न बभूव, युद्धनिराकरणार्थं बहून्यनुनयवचनानि च तत्पार्श्वे विससर्ज। इत्थं च समराऽनुद्यतं निद्रापरवशं तं भगवांश्चन्द्रशेखरः क्षात्रधर्मपरिरक्षणार्थं युद्धतत्परं चकार।

ततश्च रोमहर्षणो रणः प्रववृते । किमपरं द्रविडपतिराकुलमतित्वेन पलायितः सोमदेवश्च बन्धनाऽगारे न्यविशत । ततश्च विक्रमस्तुङ्गभद्रां जगाम । अग्रजाय राज्यं वितरितुं कृतमतिः स शङ्करेण भूयोऽपि न्यषेधि । इत्थं चाऽनिच्छया स प्रतापाऽतिशयेन राजसिंहासनमारुरोह, स्वानुगतमनुजं च वनवासमण्डलाखण्डलं चकार ।

सप्तमसर्गे—

अथाऽसौ निर्वापितचोलप्रतापो विक्रमादित्यः कल्याणपुरं प्रविवेश । अत्रान्तरे शृङ्गारबन्धुर्मीनकेतनसचिवो वसन्त आविर्बभूव ।। वसन्ततोरभिनव-कल्पनोत्प्रेक्षाकृतवर्णनेनैव सप्तमोऽयं सर्गः समाप्तिमगात् । इति

राज्ञो विक्रमाङ्कदेवस्य सम्बन्धे यानि पुस्तकानि लिखितानि ये च लेखाः प्रकाशितास्तेषां सूची परिशिष्टे निबद्धा । एभिर्विक्रमाङ्कदेवविषये बहुज्ञातं भवति । परन्तु विक्रमाङ्कदेवसूनुना विदुषा सोमेश्वर-तृतीयेण, येनाऽभिलषितार्थचिन्तामणिर्मानसोल्लासापरनामको ग्रन्थो व्यरचि[१], तेन विक्रमाङ्काभ्युदयाख्यं चम्पूकाव्यमपि विरचितं यस्य हस्तलिखितं पुस्तकं पट्टनस्थजैनभाण्डारे वरीवर्ति । परञ्च पुस्तकमेतत् खण्डितमिति महद्दुःखास्पदम् । अन्यथा तदाधारेण समालोचकानां कवेर्वैतिहासिकादिकं मतं साधु दुष्टं वेति निर्णयः सुतरां सारल्येन सम्भाव्यः स्यात् । तत्पुस्तकावलोकनेन तत्र समाप्ति—सूचनं पार्श्वतोऽवलोक्याऽनुमातुं शक्यते यदस्य पुस्तकान्तरमपि कुत्रचिदवश्यं भवेदिति । आशासे यद्भविष्यत्काले कोऽपि गवेषणाकुशलो विद्वान् पुस्तकान्तरमस्याऽवाप्य प्रकाश्य च साधुवादाँल्लप्स्यतेति ।

अन्ते चाऽस्मिन्पुस्तकेऽस्मत्कृता प्रकाशनयन्त्रजाता वा ये दोषा गुणग्राहकाणां विदुषां लोचनपथे समागच्छेयुस्ते मर्षणीयास्तेषाञ्च सूचनयाऽनुग्राह्योऽयं जन इति सदर्थकमभ्यर्थनम् ।

यतो—

गच्छतस्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः । इति ।

—शुभं भूयात्—

---

[१] सोलंकियों का प्राचीन इतिहास पृष्ठ १२५-१२६ ।

॥ श्रीः ॥

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तिः
बहुष्वमर्त्येरद्यापि	वहुष्वमर्त्यैरद्यापि	१०	११
प्रन्यायकत्वेन	प्रत्यायकत्वेन	१२	२३
कर्त न	कर्तुं न	१३	२८
मत्सूक्तिरत्नाति	मत्सूक्तिरत्नानि	१५	२६
अन्वय	अन्वयः	१५	२५
बहदिक्षूणां	बृहदिक्षूणां	१६	२५
कष्ठवि	कण्ठवि	२४	१२
निसृतानीत्यर्थः	निःसृतानीत्यर्थः	२५	६
विख्यात अस्तीति	विख्यातोऽस्तीति	२५	१०
परवह्म	परब्रह्म	२६	१८
इत्यादिरमरः	इत्यमरः	२७	२८
यददर्शन	यददर्शनं	३०	१०
सून्दरस्त्रीत्वेन	सुन्दरस्त्रीत्वेन	४१	१४
पार्थिवैनृपैः	पार्थिवैर्नृपैः	४८	२
शीर्षऽपि	शीर्षेऽपि	४८	२१
द्विड्विपक्षाहिता	द्विड्विपक्षाहिता	५२	२३
निवारणादृढतया	निवारणाद्दृढतया	५४	७
खङ्ग एव	खड्ग एव	५७	१९
खङ्गरूपी	खड्गरूपी	५७	२६
तिकीर्तिधाराम्	पतिकीर्तिधाराम्	६८	२७
॥०१॥	॥१०॥	९५	२१
कान्तिवांरिभिः	कान्तिवारिभिः	९८	२
पितृणामपनेतु	पितॄणामपनेतु	११२	६
श्रोत्रपथप्रमाथिर्नि	श्रोत्रपथप्रमाथिनीं	११३	१४
गोद म	गोद में	११४	१७
दष्प्रसहम्	दुष्प्रसहम्	११९	९

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तिः
प्रभातपजासमये	प्रभातपूजासमये	१२१	२६
व्रतपारणाविधि	व्रतपारणाविधि	१२६	८
पूर्वंपाथिवमथ	पूर्वपार्थिवमथ	१४९	४
रासोद्गृहम्	रासीद्गृहम्	१४९	४
व्यघ्र के	व्याघ्र के	१६०	१२
क्षिपतोः	क्षिपतो	१६३	१६
मुञ्चतोः	मुञ्चतो	१६३	१७
नन	ननु	१७२	१६
कृतस्तेनाऽनचितकार्येण	कृतस्तेनाऽनुचितकार्येण	१७८	९
मलयाचल का,	मलयाचल को,	२०८	११
विद्रमेषु	विद्रुमेषु	२१६	८
पच्छन्तीनां	पृच्छन्तीनां	२३०	२६
पाण्ड्राजा को	पाण्ड्यराजा को	२३४	२
कीर्ति	कीर्ति	२३६	३
कीर्ति इव	कीर्तिम् इव (कीर्तिमिव)	२३६	६
दिशश एव	दिश एव	२३७	१४
प्रभृतप्रमोदावहेति	प्रभूतप्रमोदावहेति	२४०	२
जलविन्दवोऽपि	जलबिन्दवोऽपि	२४१	५
चित	चित्त	२४४	१९
स्नना करके	स्नान करके	२४६	१४
तद्दुःख	तद्दुःख	२५८	२७
तुल्यम	तुल्यम्	२६३	१२
स्तोमैस्समहै	स्तोमैस्समूहै	२७१	८
औषन है।	औषध है।	२७३	४
दुराचारेपि	दुराचारेऽपि	२७३	१३
लक्ष्म्याः सम्पात्याः	लक्ष्म्याः सम्पत्त्याः	२७३	१९
श्रवणरसणिं	श्रवणसरणिं	२७८	१३
मौक्तिततर्वाजिता	मौक्तिकवर्जिता	२७९	१५
वसम्तेन	वसन्तेन	२७९	२०
शभ	शुभं	२७९	२६

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तिः
मङ्गलध्वनि	मङ्गलध्वनि	२८२	९
शब्दशन्यत्वस्य	शब्दशून्यत्वस्य	२८२	१४
चमचक्षुषां	चर्मचक्षुषां	२८४	११
सङ्कऽटेप्यापत्ता	सङ्कटेऽप्यापत्ता	२८५	९
लब्धतोरतरु	लब्धतीरतरु	२९०	१९
तुष्यतिस्भ	तुष्यति स्म	३२७	९
वस्तुओं का	वस्तुओं को	३४१	१६
समेलनानन्तरं	सम्मेलनानन्तरं	३४३	११
गलदश्रजलश्चिरं	गलदश्रुजलश्चिरं	३४७	२२
पुरोऽत्रे	पुरोऽग्रे	३५०	७
चोलसूनाः	चोलसूनोः	३६०	१३
नृपयाऽऽहवमल्लदेवस्य	नृपस्याऽऽहवमल्लदेवस्य	३६९	१८
गिरिपक्षेऽअसंख्याका	गिरिपक्षेऽसंख्याका	३७३	२२
समुद्र कोरण	समुद्ररूपी रण को	३७३	२७
चल्न के समान	चलने के समान	३७४	२२
मथिता ये	मर्थिता ये	३७५	२१
अथिताः	अर्थिताः	३७५	२४
हआ	हुआ	३७८	११
प्रासपङ्क्तिः	प्रासपंक्तिः	३७८	१९
तदवल	तद्बलं	३७९	१२
यस्मात्तत	यस्मात्तत्	३७९	८
भ्रातृयद्ध	भ्रातृयुद्ध	३८१	८
प्रमोदमद्वहिष्यन्तीति	प्रमोदमुद्वहिष्यन्तीति	३८३	१०
त्रिविगतः	त्रिदिवंगतः	३८४	२६
बीरो के	वीरों के	३८९	२
प्रकट करन	प्रकट करने	३८९	२
द्रततरमाक्रममाणाभ्यां	द्रुततरमाक्रममाणाभ्यां	३८९	१५
कवचश्चवार	कवचश्चचार	३९५	५
कपालगुक्तिमध्ये	कपालशुक्तिमध्ये	३९९	२१
आतनात्	आतनोत	३९९	२५

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तिः
बहत	बहूत	४०३	५
महनोय	महनीय	४०३	२३
सर्व	सर्वं	४०५	४
हृष	हृर्ष	४०७	५
गजितेन	गर्जितेन	४०७	२३
तुरगात्तमानां	तुरगोत्तमानां	४१४	१९
चन्दानाद्रेः	चन्दनाद्रेः	४१९	१८
चन्द्रनान्द्रे	चन्दनाद्रे	४१९	२३
दोलालिलासः	दोलाविलासः	४२०	२०
नपुण्यमापुः	नैपुण्यमापुः	४२९	१९
सुहृद्वायु	सुहृद्वायु	४४१	७
कामाभिभूतस्सम्	कामाभिभूतस्सन्	४४३	१४
संगहीतो	संगृहीतो	४५३	८
पुसान्	पुमान्	४५७	१९
सम्प्रत्यधना	सम्प्रत्यधुना	४५७	२८
दुमना	दुर्मना	४५८	१५
अविनयपथवतिनं	अविनयपथवर्तिनं	परिशिष्ट (क) ४	१७

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

प्रथमः सर्गः ।

भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति ॥१॥

अन्वयः

यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनं व्यनक्ति इव, सः ऊर्ध्वगामी भुजप्रभादण्डः इव कंसरिपोः कृपाणः वः पातु ।

व्याख्या

नृत्यन्ती मुखकमले सुकवीनां रसतरङ्गमग्नानाम् ।
वाणी हंसीव सरो रमणीयं दर्शयति विश्वम् ॥

प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिप्राप्तं "आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्" इति मङ्गलाचरणं कर्त्तव्यमिति श्री बिल्हण-कविरादौ स्वेष्टदेवतां स्मरन्नाशीर्वादात्मकं मङ्गलमाचरति भुजप्रभादण्ड इति ।

यः पाञ्चजन्यस्य विष्णोः शङ्खस्य 'शङ्खो लक्ष्मीपतेः पाञ्च-जन्यश्चक्रं सुदर्शनम्' इत्यमरः । प्रतिबिम्बस्य प्रतिच्छायाया भङ्ग्या व्याजेन धारायाः कृपाणधाराया अम्भसो जलस्य फेनं डिण्डिरं "डिण्डिरोऽब्धिकफः फेनः" इत्यमरः । व्यनक्तीवि प्रकटयतीव सः प्रसिद्ध ऊर्ध्वगाम्युपरिष्टात्प्रसरणशीलो भुजप्रभादण्ड इव दण्डायमानबाहुकान्तिकलाप इव कंसरिपोः कृष्णस्य कृपाणः करवालो वो युष्मान् पातु रक्षतु । श्री कृष्ण सम्बन्धिनः कृपाणस्योर्ध्वप्रसरणशीलत्वरूप समानधर्मसम्बन्धनिमित्तकं भुजकान्तिदण्डत्वेनाऽऽहार्यसम्भावनमुत्प्रेक्षेव-पदवाच्या ।

कृष्णस्योन्नतकृपाणप्रतिबिम्बितपाञ्चजन्ये शुभ्रत्वात्फेनोत्प्रेक्षा, सा च विषयस्य भङ्गिपदेनाऽपन्हवादपन्हुतविषया । अत्र भगवतः साक्षाद्वर्णनं विहाय भगवत्सम्बन्धिकृपाणस्य वर्णनात्तस्याऽपि लोकोत्तरत्वमभिव्यज्यत इति वस्तुध्वनिरपि । प्रतिनायक-कंसालम्बनक-श्रीकृष्णनिष्ठोत्साहप्रतीतेस्तस्य च कविनिष्ठकृष्णविषयकभावेऽङ्गत्वात्प्रेयोऽलङ्कारः । वीररसस्याऽङ्गत्वाद्रसालङ्कारश्च । काव्येऽस्मिन्वीररसोऽङ्गीति मङ्गलेनैव सूच्यते । सर्गेऽस्मिन्नुपजातिवृत्तम् । पूर्वार्द्धे उपेन्द्रवज्राछन्द उत्तरार्द्धे चेन्द्रवज्रा-छन्दः । 'उपेन्द्रवज्रा जतजास्ततो गौ' 'स्यादिन्द्रवज्रा यदि तौ ज गौ गः' । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' ।

भाषा

पूण्य भूमि भारतवर्ष में ग्रन्थ की निर्विघ्न समाप्ति के ध्येय से ग्रन्थ के आदि में मङ्गलाचरण करने की प्रथा बहुत प्राचीन काल से चली आ रही है । इसको ध्यान में रखते हुए महाकवि श्री बिल्हण अपने ग्रन्थ के प्रारम्भ में मङ्गलाचरण करते हैं ।

कंस के शत्रु श्री कृष्ण के भुजा की, दण्डे के ऐसी सीधी ऊपर उठने वाली कान्ति के समान शोभायमान उनकी तलवार आप लोगों का संरक्षण करे, जो धार के पानी में प्रतिबिम्बित पाञ्चजन्य शंख की श्वेत परछाही के मिष से मानो जल के फेन को प्रकट करती है ।

मङ्गलाचरण में वीररस की झलक होने से यह काव्य वीर-रस वाला है ऐसा सूचित होता है ।

श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान्मुकुन्दः ॥२॥

अन्वयः

यः श्रीधाम्नि दुग्धोदधिपुण्डरीके चञ्चरीकद्युतिम् आतनोति सः नीलोत्पलश्यामलदेहकान्तिः भगवान् मुकुन्दः वः भूत्यै अस्तु ।

व्याख्या

यः श्रियो लक्ष्म्या धाम्नि निवासस्थाने 'धामतेजो गृहेमणौ' इत्यमरः । दुग्धोदधिरेव क्षीरसागर एव पुण्डरीकं सिताम्भोजं 'पुण्डरीकं सिताम्भोजम्'

इत्यमरः। तस्मिन् क्षीरसागराभिन्नसिताम्भोजे चञ्चरीकस्य भ्रमरस्य द्युतिं कान्तिं विष्णोः कृष्णवर्णत्वादातनोति विस्तारयति, स नीलञ्च तदुत्पलञ्च नीलोत्पलमिन्दीवरं 'इन्दीवरञ्च नीलेऽस्मिन्' इत्यमरः। तद्वच्छ्यामला कृष्णा देहस्य शरीरस्य कान्तिः शोभा यस्य 'शोभाकान्तिर्द्युतिच्छविः' इत्यमरः। स भगवान् मुकुन्दो विष्णुर्वो युष्माकं भूत्यै 'विभूतिर्भूतिरैश्वर्यम्' इत्यमरः। ऐश्वर्यायाऽस्तु भवतु। प्रसिद्ध्यनुरोधात्क्षीरोदधिर्भगवतो निवासस्थानं पद्मञ्च लक्ष्म्या निवासस्थानम्। शुक्लत्व-साम्याद्दुग्धोदधौ पुण्डरीकत्वारोपादेकस्थान एव लक्ष्मीनारायणयोर्वर्तमानत्वम्। अतो 'दुग्धोदधिपुण्डरीके' इत्यत्र रूपकालङ्कारः। चञ्चरीकद्युतिमिवद्युतिमित्यर्थावगमात्पदार्थ-निदर्शना। नीलोत्पलस्येव श्यामल-देहकान्तेः सद्भावादुपमा। अतस्तेषां संसृष्टिः।

भाषा

लक्ष्मी के निवास स्थान क्षीर सागर रूपी श्वेत कमल में जिनकी साँवली मूर्ति भौंरे के समान शोभित हो रही है, ऐसे नीले कमल के समान साँवली देहकान्ति वाले विष्णुभगवान् आप लोगों की ऐश्वर्यवृद्धि करें।

वक्षःस्थली रक्षतु सा जगन्ति जगत्प्रसूतेर्गरुडध्वजस्य।
श्रियोऽङ्गरागेण विभाव्यते या सौभाग्यहेम्नः कषपट्टिकेव ॥३॥

अन्वयः

या श्रियः अङ्गरागेण सौभाग्यहेम्नः कषपट्टिका इव विभाव्यते, सा जगत्प्रसूतेः गरुडध्वजस्य वक्षःस्थली जगन्ति रक्षतु।

व्याख्या

या श्रियो लक्ष्म्या अङ्गस्य शरीरस्य रागेण काञ्चनसमानवर्णेन प्रतिबिम्बितेन हेतुना सौभाग्यहेम्नः सौभाग्यमेव हेम सुवर्णं तस्य श्री-सौभाग्यरूपहिरण्यस्य शुद्ध्यशुद्धिपरिचायिका कषपट्टिकेव कषपाषाण इव विभाव्यते ज्ञायते सा जगतां विश्वेषां प्रसूतेः कारणस्य गरुडध्वजस्य गरुडवाहनस्य 'गोविन्दोगरुडध्वजः' इत्यमरः। विष्णोर्वक्षःस्थल्युरस्थलं जगन्ति लोकान् रक्षत्ववतु। सौभाग्यमेव हेम इति रूपकम्। तस्य कषपट्टिकेवेति उत्प्रेक्षा इत्यनयोरङ्गाङ्गि-भाव-सङ्करः।

भाषा

संसार को उत्पन्न करने वाले गरुडवाहन विष्णु भगवान् का वक्षःस्थल अनेक लोकों की रक्षा करे। जिसपर लक्ष्मी के शरीर की सोने के समान कान्ति की छाया पड़ने से, जो सौभाग्य रूपी सोना कसने की कसौटी के समान अवगत हो रहा है।

एक-स्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान्मुखाग्रम्।
यस्याः प्रियार्द्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ॥४॥

अन्वयः

प्रियार्द्धस्थितिम् उद्वहन्त्याः यस्याः एकः तुङ्गतरः स्तनः परस्य वार्तां प्रष्टुम् इव मुखाग्रम् अगात्, सा पर्वतराजपुत्री वः पातु।

व्याख्या

प्रियस्य शिवस्यार्द्धस्थितिमर्द्धे स्वदक्षिणाङ्गे स्थितिमुद्वहन्त्या धारयन्त्या यस्याः पार्वत्या एकस्तुङ्गतरोऽत्युच्चस्तनः कुचः परस्य द्वितीयार्द्ध-देहरूपप्रिय-सम्बन्धिनोऽर्द्धदेहस्थस्तनस्य वार्तां जीवनवृत्तान्तं स्नेहात्प्रष्टुमिव पार्वत्या मुखाग्रमाननसामीप्यमगात्प्राप्तः, सा प्रसिद्धा पर्वतराजस्य हिमाचलस्य पुत्री कन्या पार्वती वो युष्मान् पातु रक्षतु। वृत्तान्तप्रश्नस्य परस्तनकर्तृक-पार्वतीमुखाग्रकर्मकगमन सम्बन्धि-फलत्वेनोत्प्रेक्षणात्फलोत्प्रेक्षा। अत्राऽर्द्धनारीश्वरो व्यज्यते। उद्वहन्त्या इति पदसामर्थ्यात्पर्वतराजपुत्रीत्यत्र परिकरालङ्कारात्पार्वत्या उद्वहनक्षमत्वं गम्यते। तन्त्रशास्त्रदृष्ट्या पार्वत्या आद्य[१]शक्तित्वेन ग्रहणं कविसम्मतं प्रतिभाति।

भाषा

अपने प्रिय के आधे अङ्ग को अपने दक्षिण अङ्ग में धारण करने वाली हिमालय पर्वत की लड़की पार्वती तुमलोगों का रक्षण करे। जिसका ऊपर

---

[१] अर्धं स्त्रियस्त्रिभुवने सचराचरेऽस्मिन्नर्धं पुमांस इति दर्शयितुं भवत्या।
स्त्रिपुंसलक्षणमिदं वपुरादृतं यत्तेनाऽसि देवि विदिता त्रिजगच्छरीरा॥
श्री नीलकण्ठदीक्षितविरचिते 'आनन्द सागरस्तवे' श्लो० १००।
"कान्तार्द्धविग्रहे"त्यस्य व्याख्याऽपि भास्करराय-प्रणीते ललिता-सहस्रनाम-सौभाग्य-भास्कराख्यभाष्ये द्रष्टव्या।

उठा हुआ वामाङ्ग में का एक स्तन जाति के सौहार्द से मानो दक्षिणाङ्ग-स्थित (दबे हुए) दूसरे स्तन की जीवन संबन्धि दुःख सुख की घटना पूछने के लिए पार्वती के मुख के पास पहुँचा है ।

सान्द्रां मुदं यच्छतु नन्दको वः सोल्लासलक्ष्मीप्रतिबिम्बगर्भः ।
कुर्वन्नजस्रं यमुनाप्रवाह—सलीलराधा—स्मरणं मुरारेः ॥५॥

अन्वयः

सोल्लासलक्ष्मीप्रतिबिम्बगर्भः नन्दकः मुरारेः यमुनाप्रवाहसलीलराधा-स्मरणम् अजस्रं कुर्वन् वः सान्द्रां मुदं यच्छतु ।

व्याख्या

उल्लासेन सहिताया हर्षोत्फुल्लाया लक्ष्म्याः प्रतिबिम्बं प्रतिच्छाया गर्भेऽभ्यन्तरे यस्यैवम्भूतो नन्दको नन्दकनामा विष्णोः खड्गः 'शंखो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनम् । कौमोदकी गदा खड्गो नन्दकः कौस्तुभोमणिः' इत्यमरः । मुरारेः कृष्णस्य यमुनाप्रवाहे सलीलाया विहरन्त्या राधायाः स्मरणं स्मृतिमजस्रं सततं कुर्वन् मुरारिकर्तृकं यमुनाप्रवाहान्तर्गतविहरमाणराधाकर्मकस्मरणं निरन्तरं हेतुत्वेनोत्पादयन् कारयन्नित्यर्थः । अन्तर्भावितण्यर्थोऽयं कृ धातुः । सान्द्रां घनीभूतां मुदमानन्दं वो युष्मान् युष्मभ्यं वा यच्छतु ददातु । नन्दकस्य यमुनाप्रवाहेण लक्ष्म्याश्च राधया साम्यमिति श्री कृष्णस्य स्मृतिस्संगच्छते । प्रतिबिम्बित-लक्ष्मीके नन्दके दृष्टे सति भगवतः सादृश्याद्यमुनाप्रवाहान्तर्गत-लीलासक्तराधिकायाः स्मरणात्स्मरणालङ्कारः । सादृश्यज्ञानोद्बुद्धसंस्कारप्रयोज्यं स्मरणं स्मरणालङ्कारः ।

भाषा

प्रसन्नचित्त लक्ष्मी की परछाहीं से युक्त नन्दक नाम का विष्णु का खड्ग तुम लोगों को अधिक आनन्द दे । जो यमुना नदी में लीला करने वाली राधिका का भगवान् को निरन्तर स्मरण कराने वाला है । अर्थात् जो विष्णु को काले रंग के खड्गरूपी यमुना नदी में प्रसन्न लक्ष्मीरूपी कृष्णावतार में अनुभूत राधिका का सतत स्मरण करा रहा है ।

पार्श्वस्थपृथ्वीधरराजकन्या-प्रकोपविस्फूर्जितकातरस्य ।
नमोऽस्तुते मातरिति प्रणामाः शिवस्य सन्ध्याविषया जयन्ति ॥६॥

अन्वयः

पार्श्वस्थपृथ्वीधरराजकन्याप्रकोपविस्फूर्जितकातरस्य शिवस्य हे मातः ते नमः अस्तु इति सन्ध्याविषयाः प्रणामाः जयन्ति ।

व्याख्या

पार्श्वस्था समीपस्था या पृथ्वीधरराजस्य हिमाचलस्य कन्या पुत्री पार्वती तस्याः प्रकोपस्य क्रोधस्य विस्फूर्जितेन विलसितेन कातरस्य भीतस्य शिवस्य हे मातर्जगज्जननि ते तुभ्यं नमोऽस्त्विति सन्ध्याविषयाः सन्ध्याकालाधिष्ठातृ-देवताकर्मकाः प्रणामा जयन्ति सर्वोत्कर्षेण वर्तन्ते । अन्यनायिकायां स्नेहभ्रमा-त्पार्वत्याः प्रकोपोदयः । कदाचिच्छङ्करः सन्ध्यां प्रति ध्यानावस्थितत्वं प्रकटयन्, भवान्यां कथमयमन्यनायिकायामनुरक्त इति भावेन नितरां क्रुद्धायां हे मातस्तुभ्यं नम इति सन्ध्यां प्रणम्य पार्वतीगतसन्देहं निवारितवान् ।

भाषा

पास ही में बैठी हुई पार्वती के क्रोध के आविर्भाव से डरे हुए शंकर भगवान् के, हे माता मैं तुमको नमस्कार करता हूँ, ऐसा कह कर सन्ध्याकालीन देवता को किये हुए प्रणाम अत्यन्त महत्व के हैं । अर्थात् शंकर को सन्ध्यारूपी कामिनी में अनुरक्त समझ कर, पार्वती के अत्यन्त क्रुद्ध होनेपर, शंकर ने सन्ध्या की अधिष्ठातृ देवता को माता कह कर प्रणाम करके पार्वती का भ्रम दूर करते हुए उसके क्रोध को शान्त कर दिया ।

वचांसि वाचस्पति-मत्सरेण साराणि लब्धुं ग्रहमण्डलीव ।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः ॥७॥

अन्वयः

ग्रहमण्डली वाचस्पतिमत्सरेण साराणि वचांसि लब्धुम् इव यस्याः मुक्ताक्षसूत्रत्वम् उपैति सा सरस्वती वः सप्रसादा अस्तु ।

व्याख्या

ग्रहमण्डली वाचस्पत्यतिरिक्तग्रहा वाचस्पतौ गुरौ 'बृहस्पतिः सुराचार्यो गीःपतिर्धिषणो गुरुः इत्यमरः । वयं केवलं ग्रहा अयं खलु वचसां पतिरस्तीति मत्सरेणेर्ष्यया, अयं सुराचार्य इति मत्सरेण च साराणि श्रेष्ठानि तत्वरूपाणि

वचांसि ज्ञानप्रदविशिष्टवाक्यानि लब्धुमिव बृहस्पतितोऽप्यधिकं ज्ञानं प्राप्तुमिव यस्याः सरस्वत्या मुक्ताक्षसूत्रत्वं मौक्तिकजपमालात्वमुपैति प्राप्नोति, मुक्ताक्ष--सूत्रव्याजेन सरस्वतीमुपसेवते। सा सरस्वती शारदा वाग्देवता वो युष्मभ्यं सप्रसादा प्रसन्ना अस्तु। बृहस्पतिमात्सर्यहेतुकवचस्सारप्राप्तीच्छाया ग्रहमण्डल्यां मुक्ताक्षसूत्रत्वारोपे फलत्वेनोत्प्रेक्षणात्फलोत्प्रेक्षेव-पदवाच्या।

भाषा

बृहस्पति के अतिरिक्त अन्य ग्रहगण, बृहस्पति ग्रह होते हुए भी वाणी का पति और देवगुरु है, इस ईर्ष्या से, बृहस्पति से भी अधिक ज्ञान की विशिष्ट बातें जानने की इच्छा से, जिस सरस्वती की मोती की जपमाला में मानों मोती बन कर उसकी सेवा करते हैं, ऐसी सरस्वती तुम लोगों पर प्रसन्न हो।

अशेषविघ्नप्रतिषेधदक्ष-मन्त्राक्षतानामिव दिङ्मुखेषु।
विक्षेपलीला करशीकराणां करोतु वः प्रीतिमिभाननस्य ॥८॥

अन्वयः

इभाननस्य अशेषविघ्नप्रतिषेधदक्षमन्त्राक्षतानाम् इव करशीकराणां दिङ्मुखेषु विक्षेपलीला वः प्रीतिं करोतु।

व्याख्या

इभस्य गजस्याऽऽननं मुखमिवाऽऽननं मुखं यस्य तस्य गणेशस्याऽशेषाश्चते विघ्नाः प्रत्यूहाः 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। तेषां प्रतिषेधे निवारणे दक्षाणां समर्थानां मन्त्राक्षतानामिवाऽभिमन्त्रिताक्षतानामिव, करशीकराणां वमथूनां शुण्डोत्क्षिप्ताम्बुकणानां 'शीकरोऽम्बुकणाः स्मृताः'। वमथुः करशीकरः। इत्यमरः। दिङ्मुखेषु सर्वदिक्षु विक्षेपलीला गजानां स्वाभाविकीयं जलक्रीडा वो युष्मान् प्रीतिमानन्दं करोतु वितरतु। करशीकरेषु मन्त्राक्षतत्वस्योत्प्रेक्षणाद्व-स्तूत्प्रेक्षा।

भाषा

हाथी के ऐसे मुखवाले श्री गणेश जी के सम्पूर्ण विघ्नों को दूर करने में समर्थ अभिमन्त्रित अक्षतों के समान, समग्र दिशाओं में अर्थात् चारो ओर सूंड से छोड़े हुए जल कण तुम लोगों को आनन्द दें।

अथ प्रस्तावनामवतारयति कविः —

अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्म-भूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥९॥

अन्वयः

श्रवणामृतस्य अनभ्रवृष्टिः सरस्वतीविभ्रमजन्मभूमिः पदानां सौभाग्य-लाभप्रतिभूः वैदर्भरीतिः कृतिनाम् उदेति ।

व्याख्या

श्रवणस्य कर्णस्य यदमृतमानन्ददायिवस्तु तस्य श्रवणामृतस्य कर्ण-पीयूष-स्याऽभ्राणां मेघानां 'अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः' इत्यमरः । वृष्टि-र्वर्षणमभ्रवृष्टिर्नाभ्रवृष्टिरनभ्रवृष्टिर्मेघमन्तरैव वर्षणरूपा सरस्वत्या वाग्देवताया विभ्रमस्य विलासस्य जन्मभूमिरुत्पत्तिस्थानं 'स्त्रीणां विलास विव्वोकविभ्रमाल-लितं तथा' इत्यमरः । पदानां शब्दानां सौभाग्यलाभस्य सौन्दर्यप्राप्तेः प्रतिभूः प्रतिलग्निका वैदर्भरीतिः गौडीपाञ्चालीवैदर्भीति रीतित्रय एकतमा 'माधुर्य व्यञ्जकैर्वर्णै रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरुच्यते' । कृतिनां विशिष्टकाव्यरचनाकुशलानां पुण्यवतां कवीनामुदेति प्रादुर्भवति । केवलं भाग्यवन्तः कुशलाश्च तथाविधालौकिक-गुणविशिष्ट-वैदर्भरीतौ काव्यं रचयितुं प्रभवन्तीति भावः । वैदर्भरीतौ श्रवणामृतानभ्रवृष्टेर्वाणीविलासजन्मभूमेः सौभाग्यलाभप्रतिभूत्वस्य चाऽऽरोपाद्रूपकालङ्कारः । 'तद्रूपकमभेदो य उपमानो-पमेययोः ।

भाषा

वैदर्भीरीति का आविर्भाव उत्कृष्ट और अच्छे काव्य की रचना करने में कुशल, पुण्यात्मा कवियों में ही होता है । अर्थात् वैदर्भीरीति में रचना हर एक कवि नहीं कर सकता । यह वैदर्भीरीति श्रवणेन्द्रिय को आनन्द देनेवाले अमृत की बिना मेघ की वर्षा है, वाणी के विलास का जन्म स्थान है और पदों को यथोचित स्थान प्राप्त होकर उनके सौन्दर्यवृद्धि की जामिन है ।

जयन्ति ते पञ्चमनाद-मित्र-चित्रोक्तिसन्दर्भविभूषणेषु ।
सरस्वती यद्वदनेषु नित्यमाभाति वीणामिव वादयन्ती ॥१०॥

अन्वयः

सरस्वती पञ्चमनादमित्रचित्रोक्तिसन्दर्भविभूषणेषु यद्वदनेषु नित्यं वीणां वादयन्ती इव आभाति ते जयन्ति ।

व्याख्या

सरस्वती वागधिष्ठातृदेवता पञ्चमनादस्य पञ्चमस्वरस्य पिकस्य वा 'पिका गायन्ति पञ्चमम्' मित्राणि समानानि चित्राणां रसालङ्कारादिना चमत्कारिणीनामुक्तीनां काव्यानां सन्दर्भाः समूहाः सम्यग्विरचनानि वा विभूषणान्यलङ्करणानि येषां तेषु येषां कवीनां वदनेषु मुखेषु नित्यं निरन्तरं वीणां कच्छपीं वादयन्तीव सारयन्तीवाऽऽभाति चकास्ति ते कवीश्वरा जयन्ति सर्वोत्कर्षेण वर्तन्ते । कविवदने सरस्वत्या वीणावादनस्योत्प्रेक्षणात्क्रियास्वरूपधर्मोत्प्रेक्षा । अभेदसम्बन्धातिरिक्तसम्बन्धेन वीणावादनस्य कविवदने सम्भाव्यमानत्वात् ।

भाषा

वे कवीश्वर धन्य हैं, जिनके कोयल के शब्द के समान कर्णेन्द्रिय को सुख देने वाली, रस अलङ्कार आदि से युक्त, चमत्कार पैदा करने वाली उक्तियों से अथवा कविता समूहों से विभूषित मुखों में, सरस्वती अपनी कच्छपी बीन बजाती सी सदैव शोभित होती है ।

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ॥११॥

अन्वयः

हे कवीन्द्राः साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत । यत् अस्य लुण्ठनाय काव्यार्थचौराः दैत्याः इव प्रगुणीभवन्ति ।

व्याख्या

हे कवीन्द्राः कविश्रेष्ठाः साहित्यमेव साहित्यशास्त्रमेव पाथसामुदकानां 'कबन्धमुदकं पाथः' इत्यमरः । निधिः समुद्रस्तस्य मन्थनं चिराभ्यासस्तस्मादुत्तिष्ठतीति साहित्यपाथोनिधिमन्थनोत्थं साहित्यशास्त्ररूपसमुद्रालोडनोत्पन्नं कर्णयोः श्रोत्रयोरमृतं पीयूषं रक्षत विनाशात्परैर्हरणाद्वा गोपायत । यद्यस्मात्कारणादस्याऽमृतस्य लुण्ठनायाऽपहरणाय काव्यार्थस्य काव्यरूपद्रव्यस्य चौरास्त-

स्करा दैत्या इव समुद्रमन्थनाविर्भूतामृतापहरणचित्ता दैत्या इव प्रगुणीभवन्ति बहुलीभवन्ति सर्वतो वर्धन्ते तीव्रा लोलुपाश्च सन्तीत्यर्थः। काव्यार्थचौरेषु दैत्यसादृश्यादुपमा। 'साधर्म्यमुपमाभेदे' इतिलक्षणात्।

भाषा

हे कवियों में श्रेष्ठ कविगण, साहित्यरूपीसमुद्र के मंथन करने से अर्थात् चिरकाल तक अभ्यास करने से उत्पन्न और कान को सुख देनेवाले काव्यरूपी अमृत की सदैव रक्षा करते रहिए। क्योंकि इस काव्यरूपी अमृत की चोरी करने के लिए, समुद्रमन्थन के समय अमृत की चोरी करने में लालायित दैत्यों के समान बहुत से काव्य रूपी धन के चोर एकत्रित हो गए हैं।

गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम्।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥१२॥

अन्वयः

यदि वा सर्वे यथेष्टं गृह्णन्तु। कवीश्वराणां का अपि क्षतिः न अस्ति। अमर्त्यैः बहुषु रत्नेषु लुप्तेषु अद्य अपि सिन्धुः रत्नाकरः एव।

व्याख्या

यदि वा अथवा पक्षान्तरे सर्वे काव्यार्थचौरा यथेष्टमिष्टमनतिक्रम्य यथास्यात्तथा यथेष्टं यथेच्छं गृह्णन्तु काव्यरूपं कर्णामृतं स्वोपयोगे समानयन्तु। तथापि कवीश्वराणां कवीन्द्राणां काऽपि काचिदपि क्षतिर्हानिर्नास्ति न सम्भवति। अमर्त्यैर्देवैः "अमरानिर्जरादेवाः—आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः' इत्यमरः। बहुष्वसंख्यातेषु रत्नेषु लुप्तेषु अपहृतेषु सत्स्वप्यद्यापि साम्प्रतमपि सिन्धुः समुद्रः 'उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः' इत्यमरः। रत्नानां मणीनामाकरो निधिरेव प्रसिद्धः। देवैः प्रचुररत्नानि गृहीतानि तथापि समुद्रस्य रत्नाकरत्वप्रयुक्तं माहात्म्यं पूर्ववदेव। अत्र दृष्टान्तालङ्कारः 'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्'।

भाषा

अथवा काव्यार्थ चोर काव्य रूपी द्रव्य की चोरी यथेच्छ करते रहें, इसमें श्रेष्ठ कवियों की कोई क्षति नहीं है। देवताओं ने समुद्र में से बहुत से रत्न निकाल लिए तो भी समुद्र अभी भी रत्नाकर ही कहा जाता है।

सहस्रशः सन्तु विशारदानां वैदर्भलीलानिधयः प्रबन्धाः ।
तथापि वैचित्र्यरहस्यलुब्धाः श्रद्धां विधास्यन्ति सचेतसोऽत्र ॥१३॥

अन्वयः

(यद्यपि) विशारदानां वैदर्भलीलानिधयः प्रबन्धाः सहस्रशः सन्तु। तथापि वैचित्र्यरहस्यलुब्धाः सचेतसः अत्र श्रद्धां विधास्यन्ति ।

व्याख्या

यद्यपि विशारदानां काव्यनिर्माणकलाप्रवीणानां महाकवीनां वैदर्भी लीलेति वैदर्भलीला विदर्भदेशप्रसिद्धो दाक्षिणात्यानां कविताविलासस्तस्य निधय आकरभूताः प्रबन्धाः कृतयस्सहस्रशोऽगणितास्सन्तु नाम 'नामेति सम्भावनायाम्'। तथापि वैचित्र्यं चमत्कारो ध्वन्यलङ्कारसन्निवेशजन्यस्तस्य रहस्ये मर्मणि लुब्धा लोलुपास्सचेतसः काव्यानुभवानुकूलचेतसा सह वर्तमाना इति सचेतसः सहृदया विद्वांस अत्र विक्रमाङ्कदेवचरितनाम्नि काव्ये श्रद्धां संधां 'संधा प्रतिज्ञा मर्यादा श्रद्धा संप्रत्ययः स्पृहा' इत्यमरः । विशेषप्रीतिमित्यर्थः । विधास्यन्ति करिष्यन्ति ।

भाषा

यद्यपि काव्यनिर्माणकला में प्रवीण महाकवियों के विदर्भ देशीय दाक्षिणात्यो की वैदर्भीरीति के असंख्य काव्य भले ही विद्यमान हों तो भी ध्वनि, अलङ्कार आदि के सन्निवेश से उत्पन्न होनेवाली विचित्रता के मर्म को समझकर मोहित होनेवाले सहृदय विद्वद्गण, इस विक्रमाङ्कदेवचरित नामक काव्यपर विशेष प्रेम करेंगे ।

कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु ।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागरुधूपवासः ॥१४॥

अन्वयः

कवीनां गुणः साहित्यविद्याश्रमवर्जितेषु अनार्द्रेषु कुण्ठत्वम् आयाति । अङ्गनानाम् अनार्द्रेषु केशेषु कृष्णागरुधूपवासः किं कुर्यात् ।

व्याख्या

कवीनां काव्यरचयितॄणां गुणः प्रकर्षः साहित्यविद्यायां साहित्यविद्योपार्जने तदनुशीलने च यः श्रमो निरन्तराभ्यासस्तेन वर्जितेषु रहितेष्वनार्द्रेष्वरसिकेषु प्राणिषु कुण्ठत्वं स्वप्रभावराहित्यमायाति प्राप्नोति हृदयङ्गमो न भवतीत्यर्थः। सहृदयाः पण्डिताः साहित्यविद्यायां कृतभूरिश्रमा एव काव्यस्य यथार्थमाहात्म्यं जानन्ति न तु मतिहीना अविद्वांस इति भावः। अङ्गनानां कामिनीनामनार्द्रेषु तैलादि-स्निग्धपदार्थाननुलिप्तेषु केशेषु कचेषु कृष्णागरोश्चन्दनकाष्ठविशेषस्य कस्तूरी मिश्रितसुगन्धद्रव्यस्य वा धूपवासः सुगन्धः (अग्नौ सुगन्धद्रव्यं प्रक्षिप्य तद्धूमोपर्या-र्द्रकेशानामनार्द्रीकरणं लोके प्रसिद्धम्।) किं कुर्याद्विडम्बनायैवेत्यर्थः। न तस्य किञ्चिदुपयुक्तं फलम्। अत्र दृष्टान्तालङ्कारः।

भाषा

कवियों का गुण (वैशिष्ट्य) साहित्यविद्या का अभ्यास करने में परिश्रम न करने वाले तथा नीरस मनुष्यों पर अपना प्रभाव नहीं डाल सकता। स्त्रियों के स्निग्धता रहित सूखे हुए केशों में चन्दनविशेष या कस्तूरीमिश्रित सुगन्धित द्रव्यों का धूप क्या कर सकता है। अर्थात् सूखे हुए केशों को सुगन्धित धूप देने से उनमें सुगन्ध नहीं आ सकती।

प्रौ[१]ढिप्रकर्षेण पुराणरीति-व्यतिक्रमः श्लाघ्यतमः पदानाम्।
अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि[२]॥१५॥

अन्वयः

पदानां प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः। अत्युन्नति-स्फोटितकञ्चुकानि कान्ताकुचमण्डलानि वन्द्यानि।

---

१ "अत्र 'प्रौढि' पदं प्राचीनाऽलङ्कारिकस्वीकृतगुणविशेषमात्रपरमितिव्याख्या-तुं नोचितम्। तादृशार्थकरणे सङ्कुचितार्थप्रत्यायकत्वेन कवेरभिप्रायः स्फुटो न स्यात्। अत्र तु 'प्रौढि' शब्देन कविप्रतिभाविशेषस्तन्मूलको ध्वन्यलङ्कारादि-सन्निवेशश्च विवक्षित इति।"

२ भावोऽयमत्रापि प्रदर्शितः। अस्त्यप्रतिसमाधेयं स्तनद्वन्द्वस्य दूषणम्। स्फुटतां कञ्चुकानां यन्नायात्यावरणीयताम्॥ (सर्ग–८ श्लोकः ४५)

व्याख्या

पदानां शब्दानां रसगुणालङ्कारादिप्रत्यायकत्वेन चमत्कारित्वं प्रौढिस्तस्याः प्रकर्षेणोत्कटत्वेन पुराणी प्राचीना या रीतिरथवा पुराणानां कवीनां या रीतिः परिपाटी तस्या व्यतिक्रमः परित्यागः श्लाध्यतमः प्रशस्यतमो भवति। अत्युन्नत्या स्फोटितानि दार्ढ्यातिशयात्त्रोटितानि विदारितानीत्यर्थः कञ्चुकानि कुचावरणांशुकानि यैस्तानि कान्तानां प्रेयसीनां कुचमण्डलानि स्तनमण्डलानि वन्द्यानि स्तुत्यानि भवन्ति। अत्र दृष्टान्तालङ्कारः।

भाषा

प्रौढि प्रकर्ष से अर्थात् रस गुण अलङ्कार आदि की विशिष्ट चमत्कृति के प्राबल्य से, प्राचीनकाल से प्रचलित अथवा प्राचीन कवियों द्वारा प्रयुक्त पद-विन्यास का यदि त्याग किया जाए तो वह प्रशंसनीय है। अत्यन्त उच्चता तथा काठिन्य से चोली को फाड़ देने वाले रमणियों के स्तनमण्डल सराहना करने योग्य होते हैं।

व्युत्पत्तिरावर्जितकोविदाऽपि न रञ्जनाय क्रमते जडानाम्।
न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः॥१६॥

अन्वयः

आवर्जितकोविदा अपि व्युत्पत्तिः जडानां रञ्जनाय न क्रमते। मौक्तिकच्छिद्रकरी शलाका टङ्किकायाः कर्मणि न प्रगल्भते।

व्याख्या

आवर्जिता आकृष्टाः कोविदाः पण्डिताः 'विद्वान्विपश्चिद्दोषज्ञः सत्सुधीः कोविदो बुधः। धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः'। इत्यमरः। यया साऽऽवर्जितकोविदाऽपि पण्डितानामाकर्षिकाऽपि विशिष्टेत्यर्थः। व्युत्पत्तिर्नूतनकल्पना लौकिकरचनाकौशलं जडानां मूर्खाणां रञ्जनाय प्रसादार्थं न क्रमते न समर्था भवति। मौक्तिकेषु मुक्तासु च्छिद्रं रन्ध्रं 'छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा सुषिः' इत्यमरः। करोतीति रन्ध्रकरी शलाका सूची टङ्किकायाः पाषाणदारणलोहकीलस्य 'टङ्कः पाषाणदारणः' इत्यमरः। कर्मणि कठिनपाषाणविदारणं कर्तुं न प्रगल्भते न समर्था भवति। अत्र दृष्टान्तालङ्कारः।

भाषा

पण्डितों को भी आकर्षित करने वाली नवीन कल्पना या काव्यरचना की कुशलता मुर्खों को आनन्दित नहीं कर सकती। मोती में छेद करने की सुई टांकी का काम नही कर सकती। अर्थात् सूक्ष्म बातों को कुशाग्रबुद्धि ही समझ सकता है। स्थूल बुद्धिवालों को उनसे कोई सुख नहीं मिलता।

कथासु ये लब्धरसाः कवीनां ते नानुरज्यन्ति कथान्तरेषु।
न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥१७॥

अन्वयः

ये कवीनां कथासु लब्धरसाः ते कथान्तरेषु न अनुरज्यन्ति। ग्रन्थि-पर्णप्रणयाः कस्तूरिकागन्धमृगाः तृणेषु न चरन्ति।

व्याख्या

ये जनाः कवीनां क्रान्तदर्शिनां कवीनां कथासु रचनासु लब्धः प्राप्तो रस आनन्दो यैस्ते लब्धरसा अनुभूताल्हादास्ते कथान्तरेष्वन्यासु कुकविरचनासु नाऽनुरज्यन्ति नाऽनुरक्ता भवन्ति। ग्रन्थिपर्णोनाम सुगन्धिक्षुपविशेषः 'ग्रन्थिपर्णं शुकं बर्हपुष्पं स्थौणेयकुक्कुरे' इत्यमरः। 'गंठिवन' 'भटोरा' इति भाषायां ख्यातः। तस्मिन् प्रणयः स्नेहो येषां ते, कस्तूरिकाया गन्धो येषु ते मृगा हरिणाः कस्तूरिमृगास्तृणेषु घासेषु 'शष्पं बालतृणं घासः' इत्यमरः। न चरन्ति न भक्षणप्रीतिं जनयन्ति। अत्र दृष्टान्तालङ्कारः।

भाषा

जो लोग अच्छे कवियों के काव्यों को पढ़कर आनन्द प्राप्त कर चुके हैं वे अन्य छोटे मोटे कवियों के काव्यों में आनन्द नहीं प्राप्त कर सकते। गंठिवन नाम के सुगन्धित पौधे को खाने के प्रेमी कस्तूरिमृग अन्य घासपात नहीं चरते।

जडेषु जातप्रतिभाभिमानाः खलाः कवीन्द्रोक्तिषु के वराकाः।
प्राप्ताग्निनिर्वापणगर्वमम्बु रत्नांकुरज्योतिषि किं करोति ॥१८॥

अन्वयः

जडेषु जातप्रतिभाभिमानाः खलाः कवीन्द्रोक्तिषु वराकाः के। प्राप्ताग्निनिर्वापणगर्वम् अम्बु रत्नाङ्कुरज्योतिषि किं करोति।

व्याख्या

जडेषु ज्ञानरहितेषु मूर्खेषु जातस्समुत्पन्नः प्रतिभाया बुद्धिप्रागल्भस्याऽभिमानोऽहङ्कारो येषु ते सञ्जातवैदुष्याहङ्काराः खला नीचाः कवयः कवीन्द्राणां महाकवीनामुक्तिषु प्रतिस्पर्द्धिनीषु रचनासु वराकाः के गणनारहिता अकिञ्चित्कराश्चेत्यर्थः। सभासु प्रवर्तमानासु ते पराजिता एव भवन्तीति भावः। तेषां कवीन्द्राणां यथार्थतत्वं महत्वञ्च ते न जानन्तीति दिक्। प्राप्तो लब्धोऽग्निनिर्वापणस्य वन्हिप्रशामकत्वस्य गर्वो दर्पो 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः। दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' इत्यमरः। येन तदम्बु जलं रत्नस्य मणेरङ्कुर इव ज्योतिः प्रकाशस्तस्मिन् किं करोति न किमपीत्यर्थः। जलं वन्हिनिर्वापणे क्षममपि रत्नतेजसो निवारणाय नाऽलमिति। बुद्धिस्तात्कालिकीज्ञेया मतिरागामिगोचरा। प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः'। अत्र दृष्टान्तालङ्कारः। किं करोति न किमपि कर्तुं शक्नोतीत्यर्थाक्षेपादर्थापत्तिरलङ्कारश्च।

भाषा

मूर्खमण्डली में जिन खलों को नई नई उपज वाली बुद्धि से युक्त होने का गर्व हो गया है उन बिचारे मूर्ख कवियों की श्रेष्ठकवियों की कविताओं को समझने में या उनसे अपनी कविताओं की तुलना करने में कौन गिनती है। अर्थात् प्रसङ्ग आने पर अच्छे कवियों के सन्मुख उन्हें हार माननी पड़ती है। आग को बुझा देने का अभिमान रखने वाला जल, रत्न के अङ्कुर के समान तेज (किरणों) का क्या बिगाड़ सकता है। अर्थात् रत्न पर कितना ही पानी पड़े तो भी उसकी चमक दूर नहीं हो सकती, वैसे ही मूर्खों की प्रतिभा से श्रेष्ठ कवियों की प्रतिभा दब नहीं सकती।

उल्लेखलीला-घटनापटूनां सचेतसां वैकटिकोपमानाम्।
विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नान्यतिथीभवन्तु ॥१६॥

अन्वय

मत्सूक्तिरत्नानि उल्लेखलीला-घटनापटूनां वैकटिकोपमानां सचेतसां विचारशाणोपलपट्टिकासु अतिथीभवन्तु।

व्याख्या

मम सूक्तयः कविता एव रत्नानि मत्सूक्तिरत्नान्युल्लेखस्य कवितालेखनस्य वैकटिकपक्षे रत्नोत्कर्षणस्य या लीला वैशिष्ट्यं तस्या घटनायां सम्पादने पटूनां चतुराणां वैकटिकानामुपमा सादृश्यं येषु तेषां रत्नपरीक्षकतुल्यानां सचेतसां सहृदयानां महाकवीनां विचारा एव शाणोपला रत्नशुद्धिपरिचायकपाषाण विशेषाः "शाणस्तु निकषः कषः" इत्यमरः। तेषां पट्टिकास्वतिथीभवन्तु। अतिथि-रूपेणैकत्रीभवन्तु। शाणोपलपट्टिकासूल्लिखनेन रत्नकान्तिपरीक्षणदक्षाणां वैकटिकानामिवोत्तमकाव्यकरणे विचारणे च कुशलानां महाकवीनां विचारार्थ-मस्मत्काव्यं भवत्विति भावः। वैकटिकेन सहृदयस्य सादृश्यप्रतीत्योपमा। विचारेषु शाणोपलपट्टिकारोपाद्रूपकञ्च।

भाषा

सान पर चढ़ाकर रत्नों की परीक्षा करने में कुशल जौहरी लोगों के समान, उत्तम काव्य बनाने में कुशल सहृदय काव्यज्ञों की विचार रूपी सान पर परीक्षार्थ मेरे श्लोक या काव्य उपस्थित हों। अर्थात् मेरे काव्य की उच्चकोटि के सहृदय कविलोग परीक्षा कर देखें कि मेरा काव्य कैसा है।

न दुर्जनानामिह कोऽपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः।
द्वेष्यैव केषामपि चन्द्रखण्ड-विपाण्डुरा पुण्ड्रकशर्कराऽपि ॥२०॥

अन्वयः

दुर्जनानाम् इह कः अपि दोषः न। हि तेषां स्वभावः गुणासहिष्णुः। केषाम् अपि चन्द्रखण्ड-विपाण्डुरा पुण्ड्रकशर्करा द्वेष्या एव।

व्याख्या

दुर्जनानां खलानामिहाऽस्मिन्परेषां निन्दाकरणे कोऽपि दोषो नाऽस्ति। हि यस्मात्कारणात्तेषां खलानां स्वभावः प्रकृतिरेव गुणानां सद्गुणानामसहिष्णुरसहन-शीलो मात्सर्ययुक्त इत्यर्थः। केषामपि केषाञ्चिज्जनानां चन्द्रखण्ड इव कर्पूर-खण्ड इव विपाण्डुरा शुभ्रा पुण्ड्रकाणां बृहदिक्षूणां शर्करा बृहदिक्षुनिर्मितशर्करा प्रकृत्यैव सुमधुराऽपि द्वेष्यैवाऽरुचिकारिण्येव भवति। 'पित्तेन दूने रसने सिताऽपि तिक्तायते हंसकुलावतंस।' इति श्रीहर्षः। अत्र दृष्टान्तालङ्कारः।

भाषा

दुर्जनों में दुसरों की निन्दा करना यह दोष नहीं कहा जा सकता। क्यों कि दूसरों के अच्छे गुणों की निन्दा करना उनका स्वभाव ही होता है। कुछ लोग ऐसे भी हैं जिनको कपूर की डली के ऐसी पौंढे से बनी सफेद चीनी भी अच्छी नहीं लगती।

सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कवितविलासाः।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः ॥२१॥

अन्वयः

कविताविलासाः कुङ्कुमकेसरणां नूनं सहोदराः भवन्ति। यत् मया तेषां प्ररोहः शारदादेशम् अपास्य अन्यत्र न दृष्टः।

व्याख्या

कवितायाः सत्कवितायाः विलासा विभ्रमाः कुङ्कुमस्याऽग्निशिखस्य 'अथ कुङ्कुमम्। कश्मीरजन्माग्निशिखं वरं वाह्लीकपीतने' इत्यमरः। केसराः किञ्जल्काः 'किञ्जल्कः केसरोऽस्त्रियाम्' इत्यमरः। तेषां नूनं निश्चयेन सहोदरा एकदेशजन्यत्वाद्भ्रातरो भवन्ति सन्ति। यद्यस्मात्कारणान्मया कविना बिल्हणेन तेषां कविताविलासानां कुङ्कुमकेसराणाञ्च प्ररोहोऽङ्कुर उद्गम इत्यर्थः। शारदायाः सरस्वत्या आदेशं प्रसादं पक्षे शारदायाः सरस्वत्या देशं कश्मीरमपास्य विहायाऽन्यत्राऽन्यस्मिन् पुरुषे शारदाप्रसाद रहित इत्यर्थः पक्षेऽन्यस्मिन् देशे न दृष्टो नाऽवलोकितः। शारदाप्रसादं विना न कविताविलासोद्गमः। कश्मीरदेशं विहाय नान्यत्र कुङ्कुमकेसरोद्गम इति भावः।

भाषा

उत्तम कविता के विलास और केसर दोनों निश्चय ही सगे भाई हैं। शारदा के आदेश बिना अर्थात् सरस्वती की कृपा बिना अच्छी कविता की उत्पत्ति और शारदा देश बिना अर्थात् कश्मीर बिना केसर की उत्पत्ति, अन्यत्र होती हुई मैंने नहीं देखी है।

रसध्वनेरध्वनि ये चरन्ति संक्रान्तवक्रोक्तिरहस्यमुद्राः।
तेऽस्मत्प्रबन्धानवधारयन्तु कुर्वन्तु शेषाः शुकवाक्यपाठम् ॥२२॥

अन्वयः

संक्रान्तवक्रोक्तिरहस्यमुद्राः ये रसध्वनेः अध्वनि चरन्ति ते अस्मत्प्रबन्धान् अवधारयन्तु । शेषाः शुकवाक्यपाठं कुर्वन्तु ।

व्याख्या

संक्रान्ता सङ्गता वक्रोक्तीनां विचित्रोक्तीनां रहस्यस्य तत्वस्य मुद्राऽभिनिवेशो येषु ते, ये सहृदया रसध्वनेरध्वनि मार्गे चरन्ति विहरन्ति, वक्रोक्ति रहस्यज्ञातारो रसध्वनिमार्गाच्च ये न बहिर्भूता इत्यर्थः । तेऽस्मत्प्रबन्धानस्मद्विरचितकाव्यान्यवधारयन्तु मदीयकाव्यस्य यथार्थज्ञाने समर्था भवन्तु । अन्ये तदितरे शुकवत्तदर्थज्ञानमन्तरैव वाक्यपाठं शब्दोच्चारणमेव कुर्वन्तु । काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यमस्मत्काव्यतत्वमिति भावः ।

भाषा

जो विचित्र उक्तियों के सम्पूर्ण रहस्यों को अच्छी तरह जानने वाले हैं और रसध्वनि के मार्ग का अवलम्बन करने वाले हैं वे विद्वान् कविलोग मेरे काव्य को समझें । इनसे अतिरिक्त अन्य कवि सुग्गे के ऐसे (बिना अर्थ रहस्य समझे) इस काव्य का केवल पाठ किया करें ।

अनन्यसामान्यगुणत्वमेव भवत्यनर्थाय महाकवीनाम् ।
ज्ञातुं यदेषां सुलभाः सभासु न जल्पमल्पप्रतिभाः क्षमन्ते ॥२३॥

अन्वयः

महाकवीनाम् अनन्यसामान्यगुणत्वम् एव अनर्थाय भवति यत् सभासु सुलभाः अल्पप्रतिभाः एषां जल्पं ज्ञातुं न क्षमन्ते ।

व्याख्या

महाकवीनां कविश्रेष्ठानामन्येषु यत्सामान्यं साधारणत्वं सकलजनवृत्तित्वं तदन्यसामान्यं नास्त्यन्यसामान्यमनन्यसामान्य-मनन्यसामान्यञ्चतद्गुणत्वञ्चेत्यनन्यसामान्यगुणत्वं विशेषगुणवत्त्वमेवाऽनर्थायाऽनिष्टोत्पत्त्यर्थं भवति जायते । इष्टं तु महाकवीनामाशयज्ञानं तत आनन्दानुभूतिः सा तु साधारणबुद्धिमतां न भवतीत्येवाऽनर्थः । यद्यस्मात्कारणात्सभासु सर्वसभासु सुलभा, सुखेन लभ्याः स्वोद्योगेनैवाऽऽनन्दार्थमेकत्रीभूता इत्यर्थः । विशिष्टजनोपस्थितिः सभास्वनाया-

सेनैव सर्वत्र न भवति यतस्ते मानिनः अनाहूता यत्र तत्र न गच्छन्तीति। अल्पप्रतिभा मन्दमतयो जना एषां महाकवीनां जल्पं सारगर्भं वचो ज्ञातुं बोद्धुं न क्षमन्ते न समर्था भवन्ति। सकलमन्दजनाज्ञेयत्वं महाकविकृतीनामित्येव तेषां महाकवीनां महान्दोषः। अत्र व्याजस्तुतिरलङ्कारः 'व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा।'

भाषा

महाकवियों का विशिष्टगुण ही उनके लिए अनिष्टकारक हो जाता है। क्यों कि सभाओं में सुलभता से प्राप्त हो सकने वाले छोटी बुद्धि के कवि, इन महाकवियों की उक्तियों का अर्थ भी समझने में असमर्थ होते हैं।

अलौकिकोल्लेखसमर्पणेन विदग्धचेतः-कषपट्टिकासु।
परीक्षितं काव्यसुवर्णमेत-ल्लोकस्य कण्ठाभरणत्वमेतु ॥२४॥

अन्वयः

विदग्धचेतःकषपट्टिकासु अलौकिकोल्लेखसमर्पणेन परीक्षितम् एतत् काव्यसुवर्णं लोकस्य कण्ठाभरणत्वम् एतु।

व्याख्या

कषाणां निकषोपलानां 'शाणस्तु निकषः कषः' इत्यमरः। पट्टिकाः कषपट्टिका विदग्धानां पण्डितानां चेतांस्येव कषपट्टिकास्तासु विदग्धचेतःकषपट्टिकास्वलौकिका लोकोत्तरा य उल्लेखाश्चमत्कृतकृतयः पक्षे श्रेष्ठतासूचयित्र्यः सुवर्णरेखास्तेषां समर्पणेन प्रदानेन परीक्षितं निर्धारितमेतत्काव्यरूपसुवर्णं (सुन्दरवर्णयुक्त-काञ्चनं शोभनाक्षरसमेतं काव्यञ्च) लोकस्य सर्वजनस्य कण्ठाभरणत्वं कण्ठ-भूषणत्वमेतु प्राप्नोतु। यथा कषपट्टिकायां सुपरीक्षितं शुद्धमुत्तमं स्वर्णं जनस्य कण्ठस्थं सदलङ्कारत्वं प्राप्नोति तथैव विद्वच्चेतःसु परीक्षित-मिदकाव्यं जनस्य कण्ठस्थं सद् भूषणं भवत्विति भावः। काव्ये सुवर्णाभेदारोपस्य विदग्धचेतःसु कषपट्टिकारोपे कारणत्वात्परम्परितरूपकम्। 'यत्र कस्यचिदारोपः परारोपण-कारणम्। तत्परम्परितम्।'

भाषा

विद्वानों की चित्त रूपी कसौटी पर (कसे जान पर) असाधारण सदुक्ति रूपी अच्छे कस के आने से जांचा हुआ यह काव्य रूपी सुवर्ण (सोना या

सुन्दराक्षर युक्त काव्य) मनुष्यों के कण्ठ का आभूषण बने। अर्थात् जिस प्रकार जंचे हुए शुद्ध सोने का बना गोफ़ (गले का आभूषण) गले की शोभा बढ़ाता है वैसे ही विद्वानों द्वारा परीक्षित यह मेरा उत्तम काव्य साधारण लोगों द्वारा कण्ठस्थ किया जाकर उनकी कण्ठ की शोभा को बढ़ावे।

किं चारुचारित्रविलासशून्याः कुर्वन्ति भूपाः कविसंग्रहेण।
किं जातु गुञ्जाफलभूषणानां सुवर्णकारेण वनेचराणाम् ॥२५॥

अन्वयः

चारुचारित्रविलासशून्याः भूपाः कविसंग्रहेण किं कुर्वन्ति। गुञ्जाफल-भूषणानां वनेचराणां सुवर्णकारेण जातु किम्।

व्याख्या

चारु सुन्दरं सत्काव्यपरिचयेन सहृदयहृदयसंवादि चारित्रं चरितं तस्य विलास उत्कर्षस्तेन शून्या रहिताः काव्यमहत्वासंवेदिनो दुश्चरिता भूपा राजानः कवीनां संग्रहेणाऽऽश्रयप्रदानेनाऽऽश्रयं प्रदाय स्वराजसभायां स्थापनेनेत्यर्थः किं कुर्वन्ति न किमपीत्यर्थः। दुश्चरितानां राज्ञां कवि संग्रहेण न कोऽपि लाभः। ये कविमहत्वमेव न विदन्ति तेषां कृते कवयो निष्प्रयोजनका इति भावः। गुञ्जाफलं कृष्णलाफलं 'काकचिची गुंजे तु कृष्णला' इत्यमरः। एव भूषणमलङ्कारो येषां तेषां वनेचराणामारण्यकानां सुवर्णकारेण स्वर्णभूषणनिर्माणकेन जातु कदाचिदपि किं, किं प्रयोजनं, न किमपीत्यर्थः। सुवर्णकाराः सुवर्णस्य भूषणानि निर्मान्ति तानि तु वनेचरा न समाद्रियन्ते यतस्तेषां कृते गुञ्जैव महद्भूषणमिति सुवर्णकारास्तेषां कृते निष्प्रयोजनकास्तथैव कवयः सुचरित्रमेव राजानं भजन्ते न दुश्चरितम्। दुश्चरितानां राज्ञां कृते ते कवयो निष्प्रयोजनका इति भावः। अत्र दृष्टान्तालङ्कारः।

भाषा

जो राजा असच्चरित्र हैं वे अपने दरबार में कवियों का संग्रह कर क्या करेंगे। गुंज के गहनों को पहनने वाले जंगली लोगों को सोने के आभूषणों को बनाने में कुशल सोनारों का क्या काम पड़ सकता है अर्थात् जिस प्रकार गुंज के गहने पहनने वालों के लिये सोनार किसी काम का नहीं उसी प्रकार कुचरित्र राजा के लिये कवि भी किसी काम का नहीं। क्योंकि कवि सुचरित्र

राजा के यहाँ रह कर ही अपने काव्यों से उसका गुणगान कर उसकी यशः पताका फहराता है।

पृथ्वीपतेः सन्ति न यस्य पार्श्वे
कवीश्वरास्तस्य कुतो यशांसि ।
भूपाः कियन्तो न बभूवुरुर्व्यां जानाति
नामाऽपि न कोऽपि तेषाम्[१] ॥२६॥

अन्वयः

यस्य पृथ्वीपतेः पार्श्वे कवीश्वराः न सन्ति तस्य यशांसि कुतः। उर्व्यां कियन्तः भूपाः न बभूवुः तेषां नाम अपि कः अपि न जानाति।

व्याख्या

यस्य पृथ्वीपते राज्ञः पार्श्वे कवीश्वराः कवीन्द्रा न सन्ति न शोभन्ते तस्य भूपस्य यशांसि कीर्तयः 'यशः कीर्तिः समज्ञा च स्तवस्तोत्रं स्तुतिर्नुतिः' इत्यमरः। कुतो, न कुतोऽपीत्यर्थः। यशसः प्रख्यापकानामभावात्कुतो यशःप्रतिष्ठेतिभावः। उर्व्यां महीमण्डले कियन्तः कतिसंख्याका भूपा राजानो न बभूवुर्न जाताः (परं) तेषां नामाऽपि संज्ञामपि कोऽपि मनुष्यो न जानाति। काव्यैकनिबद्धमेव राज्ञां यशश्चिरस्थायि भवतीति राज्ञां यशसोऽपयशसो वा कवीश्वरा एव निदानमिति भावः।

भाषा

जिस राजा के पास में (दरबार में) अच्छे कवि नहीं हैं उसका यश कहाँ से फैल सकता है। इस पृथ्वी पर क्या कितने ही राजा ऐसे नहीं हुए हैं जिनका नाम भी कोई मनुष्य नहीं जानता है।

---

[१] भावोऽयमत्राऽपि प्रदर्शितः।
भुजवनतरुच्छायां येषां निषेव्य महौजसां,
जलधिरशना मेदिन्यासीदसावकुतोभया।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं,
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे॥ राजतरङ्गिण्याम्।

लङ्कापतेः सङ्कुचितं यशो यद् यत्कीर्तिपात्रं रघुराजपुत्रः ।
स सर्व एवाऽऽदिकवेः प्रभावो न कोपनीयाः कवयः क्षितीन्द्रैः ॥२७॥

अन्वयः

यत् लङ्कापतेः यशः सङ्कुचितं यत् रघुराजपुत्रः कीर्तिपात्रं, सः सर्वः एव आदिकवेः प्रभावः, क्षितीन्द्रैः कवयः न कोपनीयाः ।

व्याख्या

यल्लङ्कापते रावणस्य यशः कीर्तिः 'यशः कीर्तिः समज्ञा च स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यमरः । सङ्कुचितमविस्तृतं नष्टमित्यर्थः । यद्रघुराजस्य दशरथस्य पुत्रो रामः कीर्तिपात्रं यशोभाजनं जातः स सर्व एवाऽऽदिकवेर्वाल्मीकेः प्रभावः कौशलं कार्यमित्यर्थः । अतः क्षितीन्द्रै राजभिः कवयो न कोपनीया न क्रोधनीयाः नापमाननीया इतिभावः । यदिति वाक्यार्थपरामर्शकः ।

भाषा

रावण की कीर्ति जो न फैल सकी अर्थात् नष्ट हो गई और दशरथ जी के पुत्र राम जी, जो कीर्ति के पात्र हुए, यह सब आदि कवि बाल्मीकि का ही प्रताप है । इसलिए राजाओं को कभी भी कवियों को कुपित न करना चाहिये ।

गिरां प्रवृत्तिर्मम नीरसाऽपि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धु-सम्बन्धिनीं मूर्द्धनि धारयन्ति ॥२८॥

अन्वयः

मम नीरसा अपि गिरां प्रवृत्तिः नृपतेः चरित्रैः मान्या भवित्री । के वा शुष्काम् अभ्रसिन्धुसम्बन्धिनीं मृदं मूर्द्धनि न धारयन्ति ।

व्याख्या

मम मदीया नीरसाऽपि रसरहिताऽपि गिरां वाचां प्रवृत्तिः प्रवर्तनं व्यापारो वा नृपते राज्ञो विक्रमाङ्कदेवस्य चरित्रैश्चरितैर्हेतुभिर्मान्या पूज्या भवित्री भाविनी । प्रकृत्या चारु राज्ञश्चरितमत्र वर्णितमिति हेतोरिदं काव्यं विदुषां रसनीयत्वमुपयास्यत्वेवेति भावः । के वा मनुष्याः शुष्कां रसरहितामभ्रसिन्धोर्जान्हव्याः सम्बन्धिनीं तटगतां मृदं मृत्तिकां मूर्द्धनि शिरसि न धारयन्ति नाऽवतंसयन्ति ।

गङ्गासम्बन्धादेव मृदोऽप्यभ्यर्हितत्वं न तु स्वतः । अत्र दृष्टान्तालङ्कारः । अन्यसम्बन्धेन श्लाघ्यत्वकथनादुदात्तालङ्कारश्च । 'लोकातिशय-सम्पत्तिवर्णनोदात्तमुच्यते । यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्' ।

भाषा

मेरी नीरस वाणी का भी व्यापार (यह काव्य) राजा विक्रमाङ्कदेव के चरितों के कारण आदरणीय होगा । कौन मनुष्य गङ्गा की नीरस मिट्टी (सूखी मिट्टी) को अपने मस्तक पर धारण नहीं करते अर्थात् नहीं लगाते । अर्थात् गङ्गा का सम्बन्ध होने से सूखी मिट्टी भी जैसे आदरणीय होती है वैसे ही महाराज विक्रमाङ्कदेव का सन्बन्ध होने से मेरा नीरस काव्य भी आदरणीय होगा ।

कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान्खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टक-जालमेव ॥२९॥

अन्वयः

खलानां कर्णामृतं सूक्तिरसं विमुच्य दोषे सुमहान् प्रयत्नः । क्रमेलकः केलिवनं प्रविश्य कण्टकजालम् एव निरीक्षते ।

व्याख्या

खलानां पिशुनानां 'पिशुनो दुर्जनः खलः' इत्यमरः । कर्णयोरमृतं श्रुतिरसायनं सूक्तिरसं सुभाषितानन्दं विमुच्य परित्यज्य दोषे दोषान्वेषणे (एव) सुमहान्विशेषः प्रयत्नः प्रयासो भवति । क्रमेलक उष्ट्रः केलिवनं क्रीडोद्यानं प्रविश्य गत्वा कण्टकानां कण्टकीवृक्षाणां जालं समूहमेव निरीक्षते पश्यत्यन्विष्यतीत्यर्थः । तेषां कृते कण्टकीवृक्षाणामेव प्रियत्वं न तु सुगन्धिपुष्पादिभिरुद्यानरमणीयताया इति भावः । अत्र दृष्टान्तालङ्कारः ।

भाषा

खललोग कान को अमृत के समान सुख देने वाले अच्छे सुभाषितों के रस का आस्वादन छोड़कर उनमें दोष देखने में ही अत्यन्त प्रयत्न शील रहते हैं । सुन्दर बाग में जाकर उसकी पुष्पवृक्ष आदि की शोभा से आनन्द न प्राप्तकर ऊँट, काँटे की झाड़ियों की ही खोज में रहता है । अर्थात् ऊँट को जिस प्रकार अच्छे बाग में जाकर भी काँटे की झाड़ी ही प्रिय मालुम होती है वैसे खलों को

अच्छे काव्य सुनकर उनसे आनन्द न मिलकर केवल उनमें दोष निकालना ही प्रिय मालुम होता है।

एषास्तु चालुक्यनरेन्द्रवंश-समुद्गतानां गुणमौक्तिकानाम् ।
मद्भारती-सूत्रनिवेशितानामेकावली कण्ठविभूषणं वः ॥३०॥

अन्वयः

एषा चालुक्यनरेन्द्रवंशसमुद्गतानां मद्भारतीसूत्रनिवेशितानां गुणमौक्तिकानाम् एकावली वः कण्ठविभूषणम् अस्तु ।

व्याख्या

एषा वाक्यावली चालुक्यनरेन्द्राणां वंशः कुलमेव वंशो वेणुस्तस्मात्समुद्गतानां समुत्पन्नानां, वेणौ मुक्तास्समुद्भवन्ति बहुमूल्याश्च भवन्तीति प्रसिद्धिः । मद्भारती मदीयवाण्येव सूत्रं गुणस्तस्मिन्निवेशितानां गुम्फितानां, गुणा दयादाक्षिण्यादय एव मौक्तिकानि तेषामेकावल्येकावृतो हारो वो युष्माकं कण्ठविभूषणमस्तु । राज्ञां गुणाः कण्ठेनोच्चार्यमाणास्सन्तः कण्ठविभूषणानि मौक्तिकानि कण्ठे धार्यमाणानि कण्ठविभूषणानीति भावः । अत्र गुणेषु मौक्तिकारोपे, वंशे वेणुत्वारोपस्य कारणत्वात्परम्परितं रूपकम् । वाक्यावल्यामेकावल्यारोपे भारत्यां सूत्रत्वारोपस्य कारणत्वाच्च परम्परितं रूपकम् । 'नियता रोपणोपायः स्यादारोपः परस्य यः । तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा' इति ।

भाषा

चालुक्य राजाओं के वंश रूपी बांस में से उत्पन्न यह दया दाक्षिण्यादि गुण रूपी मोतियों का, मेरी वाणी रूपी डोरे में परोया हुआ, वाक्यावली रूपी एकलड़ा हार, आप लोगों के कण्ठ का आभूषण हो । अर्थात् चालुक्य वंशीय राजाओं के दयादाक्षिण्यादिगुणों की मेरी वाणी में वर्णित वाक्यावली आप लोगों के कण्ठ से उच्चरित होकर उसे सुशोभित करे जिस प्रकार बांस की मोतियों का डोरे मे परोया हुआ एकलड़ा हार कण्ठ को सुशोभित करता है ।

साम्प्रतं चालुक्यवंशमूलपुरुषोत्पत्तिं प्रस्तौति—

लोकेषु सप्तस्वपि विश्रुतोऽसौ सरस्वतीविभ्रमभूः स्वयम्भूः ।
चत्वारि काव्यानि चतुर्मुखस्य यस्य प्रसिद्धाः श्रुतयश्चतस्रः ॥३१॥

अन्वयः

चतुर्मुखस्य यस्य चत्वारि काव्यानि चतस्रः श्रुतयः प्रसिद्धाः। असौ सरस्वतीविभ्रमभूः स्वयम्भूः सप्तसु अपि लोकेषु प्रसिद्धः।

व्याख्या

चत्वारि मुखानि यस्य सः चतुर्मुखस्तस्य चतुर्मुखस्य यस्य ब्रह्मणः सम्बन्धीनि तन्मुखेभ्यो निसृतानीत्यर्थः। चत्वारि चतुः संख्याकानि काव्यानि काव्यरूपाणि चतस्रः श्रुतयो वेदाः प्रसिद्धाः ख्याता असौ प्रसिद्धः सरस्वत्या वाग्देव्या वाङ्मयस्य वा विभ्रमाणां विलासानां भूरुत्पत्तिस्थानमाश्रयो वा स्वयम्भूर्ब्रह्मा सप्तस्वपि भूर्भुवस्वर्महोजनस्तपःसत्येषु लोकेषु भुवनेषु 'लोकस्तु भुवने जने' इत्यमरः। प्रसिद्धो विख्यात अस्तीति। सरस्वती वेधसः कन्येति पत्नीतिचेत्युभयं लोक-प्रसिद्धम्। सरस्वत्याः पतिर्ब्रह्मेति हेतोः सरस्वती तस्मिन्स्वमञ्जुलविलासादि-चेष्टाभिस्सरसतामापादयति कन्यात्वेनाऽऽनन्दञ्च जनयति।

भाषा

जिस चार मुख वाले ब्रह्मा के चार मुखों से निकले हुए चार काव्य चार वेद हैं, ऐसी प्रसिद्धि है, वह सरस्वती के विलास का स्थान स्वयम्भू ब्रह्मा सातों लोकों में प्रसिद्ध है।

एकस्य सेवातिशयेन शङ्के पङ्केरुहस्यासनतां गतस्य।
आराधितो यः सकलं कुटुम्बं चकार लक्ष्मीपदमम्बुजानाम् ॥३२॥

अन्वयः

आसनतां गतस्य एकस्य पङ्केरुहस्य सेवातिशयेन आराधितः यः अम्बुजानां सकलं कुटुम्बं लक्ष्मीपदं चकार (इति) शङ्के।

व्याख्या

(ब्रह्मणः) आसनतामुपवेशनस्थानतां गतस्य प्राप्तस्यैकस्य कस्यचित्पङ्केरुहस्य सरसीरुहस्य 'पङ्केरुहं तामरसं सारसं सरसीरुहम्' इत्यमरः। सेवातिशयेन स्वपत्रस्योपर्यासनदानरूपसेवाप्रकर्षेणाऽऽराधितः सेवितो यो ब्रह्माऽम्बुजानां पद्मानां सकलं समग्रं 'समग्रं सकलं पूर्णम्' इत्यमरः। कुटुम्बं जातिं कमलजाति-मित्यर्थः। लक्ष्म्याः श्रियः पदं निवासस्थानं चकारेति शङ्के तर्कयामि। अतएव लक्ष्म्याः पद्मालयेति नाम लोके प्रसिद्धमिति भावः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

किसी एक कमल के, आसन बनकर अत्यधिक सेवा करने से प्रसन्न होकर ब्रह्मा ने सम्पूर्ण कमल जाति को ही लक्ष्मी का निवास स्थान बना दिया, ऐसा मैं सोचता हूँ।

ब्रह्मर्षिभिर्ब्रह्ममयीममुष्य सार्द्धं कथां वर्धयतः कदाचित्।
त्रैलोक्यबन्धोः सुरसिन्धुतीरे प्रत्यूपसन्ध्यासमयो बभूव ॥३३॥

अन्वयः

कदाचित् सुरसिन्धुतीरे ब्रह्मर्षिभिः सार्द्धं ब्रह्ममयीं कथां वर्धयतः त्रैलोक्यबन्धोः अमुष्य प्रत्यूषसन्ध्यासमयः बभूव।

व्याख्या

कदाचित्कस्मिंश्चित्समये सुरसिन्धोः स्वर्गङ्गायास्तीरे तटे ब्रह्मर्षिभिः श्रेष्ठ-मुनिभिस्सार्द्धं सह ब्रह्ममयीं परब्रह्मविषयिणीं कथां वार्ता वर्धयतो विकासं नयतस्त्रैलोक्यस्य बन्धुर्मित्रं तस्य त्रैलोक्यहितकारकस्याऽमुष्य ब्रह्मणः प्रत्यूषस्य प्रातःकालस्य 'प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि' इत्यमरः। सन्ध्यायाः सन्ध्यावन्दनादेस्समयः कालो बभूव जातः। कथारसे मग्नानां तेषां समयज्ञाना-भावात्प्रातःकालसन्ध्यावन्दनावसरः सम्प्राप्त इति भावः।

भाषा

किसी समय आकाशगङ्गा के किनारे ब्रह्मर्षियों के साथ परब्रह्मसम्बन्धि कथा का विस्तार करते करते तीनों लोकों के मित्र अर्थात् हित चाहने वाले ब्रह्मा जी का प्रातःकाल का सन्ध्यावन्दन करने का समय उपस्थित हो गया। अर्थात् परब्रह्म की चर्चा में इतने लीन हो गये थे कि बातें करते करते सब रात बीत गई।

मृणालसूत्रं निजवल्लभायाः समुत्सुकश्चाटुषु चक्रवाकः।
अन्योन्यविश्लेषणयन्त्रसूत्र-भ्रान्त्येव चञ्चुस्थितमाचकर्ष ॥३४॥

अन्वय

निजवल्लभायाः चाटुषु समुत्सुकः चक्रवाकः अन्योन्यविश्लेषणयन्त्रसूत्र-भ्रान्त्या इव चञ्चुस्थितं मृणालसूत्रम् आचकर्ष।

व्याख्या

(प्रत्यूषे) निजवल्लभायाः स्वप्रियायाश्चाटुषु चाटुकरणेषु प्रेमालापादिव्यवहारेषु समुत्सुकः समुत्कण्ठितश्चक्रवाकः कोकः 'कोकश्चक्रश्चक्रवाको रथाङ्गाह्वय नामकः, इत्यमरः। अन्योन्यस्य परस्परस्य यद्विश्लेषणं वियोगस्तस्य यन्त्रसूत्रं तद्घटकयन्त्रस्य सूत्रं तस्य भ्रान्त्या भ्रमेण इव परस्परारात्रिवियोगकारकयन्त्र-सूत्रभ्रमादिव चञ्चुस्थितं स्वप्रियायास्त्रोटिस्थितं 'चञ्चुस्त्रोटिरुभे स्त्रियौ' इत्यमरः। मृणालसूत्रं बिसतन्तुमाचकर्षाऽऽकृष्टवान्। रात्रौ चक्रवाक मिथुनस्य वियोगो जायत इति कविप्रसिद्धिः। प्रत्यूषे जाते चक्रवाकस्य स्व-प्रियया सह संयोगो जातः। स्वप्रियाचञ्चुस्थितं वार्तालापबाधकं मृणालतन्तुं निरीक्ष्यैतदेवाऽस्मद्रात्रिवियोगकारणमिति भ्रमादतःपरमपि सूत्रेणाऽनेन वियोगो न कृतः स्यादिति धिया तदाचकर्षेतिभावः। चक्रवाककर्तृकचञ्चुस्थितमृणाल-सूत्राकर्षणे मृणालसूत्रेऽन्योन्यविश्लेषणयन्त्रसूत्रस्य भ्रान्तेर्हेतुत्वेन सम्भावनप्रति-पादनादुत्प्रेक्षालङ्कारः।

भाषा

(प्रातःकाल हो जाने पर, रातभरके वियोग के अनन्तर संयोग होने से) अपनी स्त्री चकई से उत्सुकता से रस भरी मीठी मीठी बातें कहने और सुनने की अभिलाषा से, चकई की चोंच में विद्यमान कमल के डण्डे के डोरे को मानों परस्पर वियोग कराने वाले किसी यन्त्र विशेष का यह सूत्र है ऐसे भ्रम से, चकवे ने खींच लिया। (चकवा चकई का रातभर वियोग रहता है ऐसी कविप्रसिद्धि है।)

आरक्तमर्घ्यार्पणतत्पराणां सिद्धाङ्गनानामिव कुङ्कुमेन।
बिम्बं दधे बिम्बफलप्रतिष्ठां राजीविनीजीवितवल्लभस्य ॥३५॥

अन्वयः

अर्घ्यार्पणतत्पराणां सिद्धाङ्गनानां कुङ्कुमेन इव आरक्तं राजीविनीजीवितवल्लभस्य बिम्बं बिम्बफलप्रतिष्ठां दधे।

व्याख्या

अर्घ्यस्य पूजोपचारमिश्रितजलस्य 'षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं पादाय वारिणि' इत्यादिरमरः। अर्पणे प्रदाने तत्पराणां लग्नानां सिद्धाङ्गनानां देवयो-

निर्विशेषवनितानां कुङ्कुमेनेवाऽग्निशिखेनेव कुङ्कुममिश्रितजलरूपार्घ्यस्य रक्तकान्त्येवाऽऽरक्तमासमन्ताद्रक्तवर्णं राजीविन्याः कमलिन्या जीवितं जीवनं तस्य वल्लभः स्वामी तस्य सूर्यस्य बिम्बं मण्डलं 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः । बिम्बफलस्य कुन्द्रू इति लोके प्रसिद्धस्य रक्तवर्णशाकफलस्य प्रतिष्ठां सवर्णत्वात्सारूप्यं दधे दधार । कुङ्कुमसंयुक्ताम्बुरूपार्घ्यस्य सूर्यबिम्बे प्राप्त्याऽर्घ्यस्य रक्तत्वात्सूर्य-बिम्बस्याऽपि रक्तत्वं जातमिति भावः । प्रातः-कालिकसूर्यबिम्बस्य बिम्बफलस्य च सादृश्यदर्शनादुपमा । सूर्यबिम्बस्य रक्तत्वे कुङ्कुमस्य कारणत्वेन सम्भावनाद्धेतूत्प्रेक्षा ।

भाषा

अर्घ्य देने में तत्पर सिद्धाङ्गनाओं के अर्घ्य के केसर से मानों लाल भया हुआ कमलिनी के जीवन के स्वामी सूर्य का मण्डल (पके हुए) कुन्द्रू के समान लाल दिखाई देने लगा ।

सुधाकरं वार्धकतः क्षपायाः संप्रेक्ष्य मूर्द्धानमिवानमन्तम् ।
तद्विप्लवायेव सरोजिनीनां स्मितोन्मुखं पङ्कजवक्त्रमासीत् ॥३६॥

अन्वयः

क्षपायाः वार्धकतः आनमन्तं मूर्द्धानम् इव सुधाकरं संप्रेक्ष्य सरोजिनीनां पङ्कजवक्त्रं तद्विप्लवाय इव स्मितोन्मुखम् आसीत् ।

व्याख्या

क्षपाया रजन्या वृद्धस्य भावो वार्द्धकं तस्माद्वार्धकतो रजन्या गतप्रायत्वाद्वृ-द्धावस्थात आनमन्तमधोगच्छन्तं (अस्तोन्मुखत्वात्) मूर्द्धानमिव शिर इव सुधाकरं चन्द्रं सम्प्रेक्ष्य दृष्ट्वा सरोजिनीनां कमलिनीनां पङ्कजमेव वक्त्रं मुखं, तस्य चन्द्रस्य सरोजिनीरिपुत्वात् तस्याः क्षपायाश्च रिपुस्त्रीत्वात् विप्लवायेव विडम्बनाया इव स्मितोन्मुखमीषद्धास्ययुक्तं विकासयुक्तं वाऽऽसीद्बभूव । यथा काचिन्नायिका स्वरिपु-मस्तोन्मुखं स्वरिपुस्त्रियश्च वृद्धावस्थाप्रयुक्तां नमदाननत्वादिदुरवस्थां वीक्ष्य सुखमनुभवन्ती तद्विडम्बनाय स्मेरानना भवति तथैवेषा कमलिनी गतप्रायां रात्रिं अस्तोन्मुखं चन्द्रञ्च वीक्ष्य विकसिताभूदिति भावः । कमलिनी रात्रौ न विकसतीति प्रसिद्धम् । अत्राऽप्रस्तुत-व्यवहारस्य कमलिनीव्यवहारे समारोपात्समासोक्त्य-लङ्कारः । चन्द्रे च वार्धक्यप्रयुक्तनम्रीभूतरात्रिरूपनायिकाशीर्षस्योत्प्रेक्षणाद्वस्तू-त्प्रेक्षा । पङ्कजे वक्त्रत्वाभेदाद्रूपकम् । अत उत्प्रेक्षारूपकमूला समासोक्तिः । इति त्रयाणामङ्गाङ्गीभावसङ्करः ।

भाषा

वृद्धावस्था के कारण रात्रि रूपी कामिनी के चन्द्ररूपी मस्तक को लटका हुआ देखकर चन्द्र के अस्तोन्मुख होने से और उसकी (रात्रि की) वृद्धावस्था की बुरी हालत से प्रसन्न होकर कमलिनी मानो उसे चिढ़ाने के लिये मुस्कुराने लगी। अर्थात् रात समाप्त होने से और चन्द्रमा के अस्तोन्मुख होने के कारण नीचे लटक जाने से कमलिनी धीरे २ खिलने लगी। कमलिनी रात को नहीं खिलती यह बात प्रसिद्ध है।

ज्ञात्वा विधातुश्चुलुकात्प्रसूतिं तेजस्विनोऽन्यस्य समस्तजेतुः।
प्राणेश्वरः पङ्कजिनीवधूनां पूर्वाचलं दुर्गमिवारुरोह ॥३७॥

अन्वयः

पङ्कजिनीवधूनां प्राणेश्वरः विधातुः चुलुकात् समस्तजेतुः अन्यस्य तेजस्विनः प्रसूतिं ज्ञात्वा इव दुर्गं पूर्वाचलम् आरुरोह।

व्याख्या

पङ्कजिन्यो नलिन्यस्ता एव वध्वस्तासां प्राणेश्वरो जीवितेश्वरस्सूर्यो विधातुर्ब्रह्मणश्चुलुकाज्जलपूरिताञ्जलेः समस्तस्य राजवर्गस्य जेतुर्जयशीलस्याऽन्यस्य कस्यचित्तेजस्विनः प्रतापिनश्चालुक्यवंशमूलपुरुषस्य प्रसूतिमुत्पत्तिं ज्ञात्वेव विज्ञायेव सकलजेतुरन्यतेजस्विनो भयादात्मरक्षार्थं दुर्गं दुष्प्राप्यस्थानं दुर्गरूपं वा पूर्वाचलमुदयाचलमारुरोह गतवानिति। सूर्योदयो जात इति भावः। अत्र पद्मिन्यां वधूतादात्म्यारोपः सूर्ये प्राणेश्वरस्याऽभेदारोपे कारणत्वात्परम्परितं रूपकम्। पूर्वाचले दुर्गाभेदाद्रूपकम्। सूर्यस्य दुर्गारोह अन्यतेजस्विन उत्पत्तिज्ञानस्य कारणत्वेनोत्प्रेक्षणादुत्प्रेक्षा। सूर्यवृत्तान्ते तादृशाप्रकृतान्यपुरुषवृत्तान्ताभेदसमारोपात्समासोक्तिः। अत एतेषां सङ्करः।

भाषा

ब्रह्मा के चुल्लू से सबको जीतने वाले चालुक्य वंश के मूल पुरुष रूपी किसी दूसरे तेजस्वी की उत्पत्ति होने वाली है ऐसा मानो जानकर कमलिनी रूपी ललनाओं के पति सूर्य भय से पूर्वाचल रूपी अगम्य किले पर चढ़ गये। अर्थात् जिस प्रकार प्रतापी, वीर और सबको जीतने वाले योद्धा के आने पर कोई प्रतापी भय से दुर्गाश्रय कर लेता है उसी प्रकार चालुक्य वंश के प्रतापी मूल पुरुष की ब्रह्मा जी के चुल्लू से उत्पत्ति होने वाली है ऐसा मानो जान कर

प्रतापी सूर्य ने उदयाचल रूपी अभेद्य किले का आश्रय लिया। अर्थात् सूर्य पूर्वाचल पर उदित हुआ।

जगाम याङ्गेषु रथाङ्गनाम्नां परस्परादर्शनलेपनत्वम् ।
सा चन्द्रिका चन्दनपङ्ककान्तिः शीतांशुशाणाफलके ममज्ज ॥३८॥

अन्वयः

या रथाङ्गनाम्नाम् अङ्गेषु परस्परादर्शनलेपनत्वं जगाम सा चन्दनपङ्क-कान्तिः चन्द्रिका शीतांशुशाणाफलके ममज्ज ।

व्याख्या

या रथस्याऽङ्गं चक्रं नाम येषां तेषां रथाङ्गनाम्नां चक्रवाकपक्षिणामङ्गेष्ववयवेषु परस्परस्याऽन्योन्यस्य यददर्शन तदेव लेपनं तस्य भावस्तत्वमन्योन्यादर्शनप्रयोज-कलेपनद्रव्यत्वं जगाम प्राप्तवती, रात्रौ चन्द्रिकया निखिललोके नितान्तं धवलितेऽपि चक्रवाकयुगलस्याऽन्योन्यदर्शनं न सम्भवतीति कविलोकप्रसिद्धम् । तत्रोत्प्रेक्ष्यते तेषां पक्षिणामङ्गेषु चन्द्रिकारूपविलेपनद्रव्यविशेषेण लेपस्य जायमानत्वाद्विवि-क्तत्वेनाऽङ्गानामविभावनम् । सा चन्दनपङ्कस्य कान्तिरिव कान्तिर्यस्याः सा चन्द्रिका (प्रातःकालसमये) शीतांशुश्चन्द्रः शाणाफलकमिवेत्युपमितसमासः, चन्द-नघर्षणोपलमिव तस्मिन् ममज्ज तिरोहिता बभूव । जाते प्रत्यूषे चन्द्रस्य निष्प्रभ-त्वात्तस्य शरीरे चन्द्रिका समाविष्टा सती नाऽन्यत्र परिदृश्यते । चन्दनस्य यथा शाणोपरि घर्षणेन चन्दनाऽभावेऽपि तत्कान्तिः शाणोपरि दृश्यते तथैव साम्प्रतं चन्द्रिकायाः सर्वत्राऽभावः संजातः किन्तु तत्स्वरूपं शाणफलकसदृशवर्तुलाकार-चन्द्रोपरि केवलं परिदृश्यते । अत इदं ज्ञायते यच्चन्द्रिकाऽस्मिन्सुधांशावेव प्रविष्टा सती निमग्ना जाताऽदृश्यत्वं गतेत्यर्थः । चन्द्रिकायाश्चन्दनपङ्केन सह सादृश्यादुपमा ।

भाषा

रात को चकवा और चकई का वियोग होता है और वे परस्पर देख नहीं सकते ऐसी कविप्रसिद्धि है। अतः कवि कल्पना करते हैं कि चकवा और चकई के अङ्गों को अदृश्य कर देने वाले लेप के समान एक दूसरे को परस्पर देखने में बाधक, चन्दन के द्रव के समान शोभावाली चांदनी, चन्दन घिसने के गोल होरसा के सदृश चन्द्र में प्रविष्ट हो गई अर्थात् प्रातःकाल में चाँदनी अन्यत्र कहीं न दिखाई

देकर केवल चन्द्र में दिखाई देती थी जैसे चन्दन हटा लिये जाने पर भी होरसे पर चन्दन की आभा दिखाई पड़ती ही है ।

सन्ध्यासमाधौ भगवाँस्थितोऽथ शक्रेण बद्धाञ्जलिना प्रणम्य ।
विज्ञापितः शेखरपारिजात-द्विरेफनादद्विगुणैर्वचोभिः ॥३६॥

अन्वयः

अथ सन्ध्यासमाधौ स्थितः भगवान् बद्धाञ्जलिना शक्रेण प्रणम्य शेखरपारिजातद्विरेफनादद्विगुणैः वचोभिः विज्ञापितः ।

व्याख्या

अथाऽनन्तरं 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ' इत्यमरः । सन्ध्या-समाधौ सन्ध्याकालिकध्यानयोगे स्थितो लग्नो भगवान् ब्रह्मा बद्धोऽञ्जलिर्यस्य तेन कृताञ्जलिना शक्रेणेन्द्रेण प्रणम्य नमस्कृत्य शेखरे शिरसि शिरोभूषणरूपो यः पारिजातो देवकुसुमविशेषस्तस्मिन्ये द्विरेफा भ्रमराः 'द्विरेफपुष्पलिड्भृङ्गषट्पद-भ्रमरालयः' इत्यमरः । तेषां नादेन झङ्कारेण द्विगुणैर्द्विगुणीभूतैरुपचीयमानैर्व-चोभिर्वचनैर्विज्ञापितो निवेदितः ।

भाषा

इस के अनन्तर सन्ध्याकाल के ध्यान में मग्न ब्रह्मा जी को इन्द्र ने हाथ जोड़कर प्रणाम कर के, अपने मस्तक पर शोभा के लिये धारण किये हुए पारि-जात के फूलों पर गूँजने वाले भौंरों की झङ्कार से प्रतिध्वनित, दूने ऊँचे स्वर में निवेदन किया ।

इतः परं शक्रश्चतुर्भिः श्लोकैः स्वीयमैश्वर्यं निरूपयन् ब्रह्माणं स्तौति—

आस्ते यदैरावणवारणस्य मदाम्बुसङ्गान्मिलितालिमाला ।
साम्राज्यलक्ष्मीजयतोरणाभे दन्तद्वये वन्दनमालिकेव ॥४०॥

अन्वयः

यत् ऐरावणवारणस्य साम्राज्यलक्ष्मीजयतोरणाभे दन्तद्वये मदाम्बु-सङ्गात् मिलितालिमाला वन्दनमालिका इव आस्ते । (अत्र यच्छब्दो

वाक्यार्थं परामृशन् तच्छब्देन सह नित्यसाकाङ्क्षत्वात् 'स्वामिन् स सर्वोऽपी'त्यादि-त्रिचत्वारिंशत्तमे पद्ये तच्छब्देन सहाऽन्वेति ।)

व्याख्या

यदैरावणनाम्नो वारणस्येन्द्रहस्तिनः 'ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः' इत्यमरः । साम्राज्यलक्ष्म्याः सार्वभौमश्रियो जयसूचकं तोरणं बहिर्द्वारं तस्याऽऽभा कान्तिरिवाऽऽभा यस्य तत्तस्मिन् दन्तद्वये रदनयुग्मे 'रदना दशना दन्ता रदाः' इत्यमरः । मदाम्बुसङ्गान्मदजलसंसर्गान्मिलिता समागताऽलिमाला भ्रमरपङ्क्तिर्वन्दनमालिकेव चूताशोकादिपत्रमालेव' वन्दनवार इति लोके प्रसिद्धा । आस्ते शोभते—स सर्व एव त्वत्पादसेवारजसां प्रभाव इत्यग्रिमेण श्लोकेनाऽन्वयः । आम्राऽशोकपल्लवैः संग्रथिता माला मङ्गलकार्येषु द्वारोपरि निबध्यते । दन्तद्वये विजयतोरणसाम्यादलिमालिकायाश्च वन्दनमालिकासाम्यादुपमा ।

भाषा

यह जो (मेरे) ऐरावण नामक हाथी के, सब भुवनों की विजय श्री के बाहरी फाटक के समान शोभा देने वाले दोनों दातों पर, मदजल के चूने से एकत्रित भौंरे बन्दनवार से दिखाई देते हैं (वह आपकी चरण सेवा की धूलि का ही प्रभाव है) इसका ४३ वें श्लोक से सम्बन्ध है ।

यदातपत्रं मम नेत्रपद्म-सहस्रलोलालिकदम्बनीलम् ।
कुरङ्गनाभीतिलकप्रतिष्ठां मुखे समारोहति राजलक्ष्म्याः ॥४१॥

अन्वयः

यत् मम नेत्रपद्मसहस्रलोलालिकदम्बनीलम् आतपत्रं राजलक्ष्म्याः मुखे कुरङ्गनाभीतिलकप्रतिष्ठां समारोहति (स त्वत्पादसेवारजसां प्रभाव इत्यग्रिमेण श्लोकेनाऽन्वितम्) ।

व्याख्या

यच्छब्दो वाक्यार्थपरामर्शकः । मम मदीयं नेत्राण्येव नयनान्येव पद्मानि कमलानि तेषां सहस्रमिन्द्रस्य सहस्राक्षत्वात् । तस्मिन्यल्लोलालीनां चञ्चलभ्रमराणां लोलालित्वेनाध्यवसितकृष्णवर्णकनीनिकानां च कदम्बं समूहस्तद्वन्नीलं, आतपत्रञ्छत्रं राजलक्ष्म्या राज्यश्रियो मुखे वक्त्रे कुरङ्गनाभी कस्तूरी तस्यास्तिलकस्य भालभूषणाङ्कविशेषस्य प्रतिष्ठां स्थितिसमतां समारोहति प्राप्नोति ।

(स त्वत्पादसेवारजसां प्रभाव इत्यग्रे सम्बन्धः) नीलभ्रमरसमूहेन नीलच्छत्रस्य साम्याद्उपमा। नेत्रेषु पद्मत्वारोपाद्रूपकम्। कृष्ण चञ्चलताराणां लोलालित्वेनाध्यवसितत्वादतिशयोक्तिः। अत्रैतेषामङ्गाङ्गिभावसङ्करः।

भाषा

यह जो मेरे सहस्रनेत्र रूपी सहस्र कमलों में स्थित चञ्चल पुतलियों के स्वरूप चञ्चल भ्रमर समूह की नीलिमा के समान नीले रंग का छत्र, राज्य श्री के मुखपर कस्तूरी के तिलक की शोभा दे रहा है। (वह आपकी चरण सेवा की धूली का प्रभाव है। यह ४३ वें श्लोक से सम्बन्धित है।)

यन्नन्दने कल्पमहीरुहाणां छायासु विश्रम्य रतिश्रमेण।
गायन्ति मे शौर्यरसोर्जितानि गीर्वाणसारङ्गदृशो यशांसि ॥४२॥

अन्वयः

यत् गीर्वाणसारङ्गदृशः रतिश्रमेण नन्दने कल्पमहीरुहाणां छायासु विश्रम्य मे शौर्यरसोर्जितानि यशांसि गायन्ति (स त्वत्पादसेवारजसां प्रभाव इत्यग्रिमेण श्लोकेन सम्बन्धः)

व्याख्या

यदिति वाक्यार्थपरामर्शकः, "स्वामिन् स सर्वोपी"त्यत्र तच्छब्देनाऽन्वेति। सारङ्गस्य मृगस्य दृगिव दृग् नेत्रं यासां ता गीर्वाणानां देवानां सारङ्गदृशो मृगनयन्यः कान्ता रतिश्रमेण सम्भोगजनितपरिश्रमेण खिन्नाः सत्यो नन्दने नन्दननामकेन्द्रोद्याने 'हय उच्चैः श्रवासूतो मातलिर्नन्दनं वनम्' इत्यमरः। कल्पमहीरुहाणां कल्पवृक्षाणां छायासु विश्रम्य श्रमं निवार्य मे ममेन्द्रस्य शौर्यरसेन वीररसेनोर्जितानि प्रवृद्धानि यशांसि स्तोत्राणि गायन्ति भजन्तीत्यर्थः।

भाषा

यह जो सम्भोग से थकी हुई मृगनयनी देवियाँ नन्दन वन में कल्पवृक्षों की छाया में विश्राम कर मेरे वीररस से परिवर्द्धित यशों का गान करती हैं (वह आपकी चरण सेवा की धूलि का प्रभाव है—यह ४३ वे श्लोक से सम्बन्धित है।)

किं वा बहूक्तैः पुरुहूत एष पात्रं महिम्नो यदनङ्कुशस्य ।
स्वामिन् स सर्वोऽपि शिरोधृतानां त्वत्पादसेवारजसां प्रभावः ॥४३॥

अन्वयः

वा बहूक्तैः किम् । यत् एषः पुरुहूतः अनङ्कुशस्य महिम्नः पात्रं, स्वामिन्, सः सर्वः अपि शिरोधृतानां त्वत्पादसेवारजसां प्रभावः (अस्ति) ।

व्याख्या

वाऽथवा बहून्युक्तानि कथितानि तै बहुकथनैः किं, किं प्रयोजनम् न किमपीत्यर्थः । यदिति वाक्यार्थपरामर्शकः । एष सन्मुखस्थः पुरुहूत इन्द्रो 'इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः । वृद्धश्रवाः सुनाशीरः पुरुहूतः पुरन्दरः' इत्यमरः । नास्त्यङ्कुशः प्रतिबन्धको यस्य तस्याऽप्रतिहतस्य महिम्नो महत्वस्य पात्रं भाजनमस्तीत्यर्थः । हे स्वामिन् हे निग्रहानुग्रहसमर्थ ब्रह्मन् स सर्वोऽपि शिरोधृतानां मस्तकोपरि धारितानां सेवाया रजांसि धूलिकणानि सेवासम्बन्धि-रजांस्यर्चनीयधूलिकणानीत्यर्थः, त्वत्पादयोस्तव चरणयोस्सेवारजांसि तेषां प्रभावः प्रतापः कार्यमित्यर्थः, अस्ति ।

चक्कलकमर्थात् कलापकम्[१] । शब्दोऽयं कलापकार्थे कश्मीरे रूढः ।

भाषा

अथवा अधिक कहने से क्या लाभ । हे स्वामिन् यह मैं इन्द्र जो असीम महिमा का पात्र हुआ हूँ, यह सब सिर पर धारण की हुई आपकी चरण सेवा की धूलि का ही प्रताप है ।

(जहां चार श्लोकों में अर्थ की पूर्ति होती है उसे कलापक कहते हैं । कश्मीर में कलापक को चक्कलक कहते हैं ।)

---

[१] छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सदानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।
अत्र पञ्चभिरिति न्यूनसंख्या व्यवच्छेदः । पञ्चभिः पञ्चाधिकैश्चेत्यर्थः ।
संदानितकं विशेषकं तिलकं वा ।

निवेदितश्चारजनेन नाथ तथा क्षितौ सम्प्रति विप्लवो मे ।
मन्ये यथा यज्ञविभागभोगः स्मर्तव्यतामेष्यति निर्जराणाम् ॥४४॥

अन्वयः

नाथ, चारजनेन सम्प्रति क्षितौ तथा विप्लवः मे निवेदितः यथा निर्जराणां यज्ञविभागभोगः स्मर्तव्यताम् एष्यति (इति) मन्ये ।

व्याख्या

हे नाथ हे स्वामिन् ब्रह्मन् ! चर एव चारश्चार एव जनस्तेन गुप्तचरेण सम्प्रत्यधुना क्षितौ पृथिव्यां तथा तादृशो विप्लवो डिम्बो 'डिम्बे डमरविप्लवौ' इत्यमरः । नरलुण्ठनाद्युपसर्गविशेष इत्यर्थः । मे मह्यं निवेदितो विज्ञापितो यथा येन प्रकारेण निर्जराणां देवानां 'अमरा निर्जरा देवाः' इत्यमरः । यज्ञेषु क्रतुषु विभागा देवेभ्योऽर्पणीयद्रव्यविभागास्तेषां भोगो ग्रहणमुपभोगश्च स्मर्तव्यतां स्मरणीयतामेष्यति प्राप्स्यतीति मन्ये जानामि तर्कयामीत्यर्थः । विप्लवैरग्रे देवेभ्यो यज्ञभागा नार्पिता भविष्यन्तीति तर्कयामीतिभावः ।

भाषा

हे नाथ ब्रह्मा जी ! गुप्तचर ने पृथ्वीपर होनेवाले ऐसे उपद्रवों की मुझे सूचना दी है जिनसे देवताओं का, यज्ञों में मिलने वाले भागों का उपभोग, केवल स्मरण करने का ही विषय हो जाएगा, ऐसा मैं अनुमान करता हूँ । अर्थात् ऐसे उपद्रवों से भविष्य में यज्ञों में देवताओं को भाग नहीं दिया जाएगा ऐसा मेरा अनुमान है ।

धर्मद्रुहामत्र निवारणाय कार्यस्त्वया कश्चिदवार्यवीर्यः ।
रवेरिवांशुप्रसरेण यस्य वंशेन सुस्थाः ककुभः क्रियन्ते ॥४५॥

अन्वयः

अत्र धर्मद्रुहां निवारणाय त्वया अवार्यवीर्यः कश्चित् कार्यः । रवेः अंशुप्रसरेण इव यस्य वंशेन ककुभः सुस्थाः क्रियन्ते ।

व्याख्या

अत्र क्षितौ धर्मद्रुहां धर्मद्वेषिणामधर्मपरायणानां निवारणाय विनाशाय त्वया ब्रह्मणाऽवार्यमप्रतिहतं वीर्यं पराक्रमो यस्यैवम्भूतः कश्चित् कोऽप्यप्रतिहतशक्तिमान्वीरः कार्यः समुत्पादनीयः। रवेः सूर्यस्यांशुप्रसरेण प्रभासन्ताननेनेव (यथा सर्वा दिशस्तमोविनाशेन प्रकाशिता भवन्ति तत्स्थाश्च प्राणिनः सुखेन स्वकार्यकरणेन जीवनमतिवाहयन्ति तथैव) यस्याऽवार्यवीर्यस्य वीरस्य वंशेन कुलेन ककुभः सर्वा दिशः 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। तत्स्थाः प्राणिन इत्यर्थः। सुखेन तिष्ठन्तीति सुस्था निरुपद्रवाः क्रियन्ते सम्पाद्यन्ते। राज्ञि सूर्यस्य साम्यात्तद्वंशे चांऽशुप्रसरस्य साम्यादुपमा।

भाषा

(इसलिये) इस पृथ्वी पर अधर्मियों का नाश करने के लिये आप किसी अप्रतिहतशक्तिशाली वीर की उत्पत्ति करिए, जिसके वंश के फैलने से सब दिशाओं में रहने वाले लोग, उपद्रवों से दूर होकर, प्रसन्न हों, जिस प्रकार सूर्य की किरणों के फैलने से अन्धःकार दूर होकर सब दिशाएँ प्रसन्न हो जाती हैं।

पुरन्दरेण प्रतिपाद्यमान-मेवं समाकर्ण्य वचो विरिञ्चिः।
सन्ध्याम्बुपूर्णे चुलुके मुमोच ध्यानानुविद्धानि विलोचनानि ॥४६॥

अन्वयः

विरिञ्चिः पुरन्दरेण एवं प्रतिपाद्यमानं वचः समाकर्ण्य सन्ध्याम्बुपूर्णे चुलुके ध्यानानुविद्धानि विलोचनानि मुमोच।

व्याख्या

विरिञ्चिर्धाता 'धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः' इत्यमरः। विरिञ्चिर्विरञ्चिरित्युभयमपि साधु। पुरन्दारयतीति पुरन्दरस्तेनेन्द्रेणैवं पूर्वोक्तं प्रतिपाद्यमानं कथ्यमानं वचो वाणीं समाकर्ण्य श्रुत्वा सन्ध्या-सम्बन्ध्यम्बु जलं तेन पूर्णे पूरिते चुलुकेऽञ्जलौ ध्यानेनाऽनुविद्धानि ध्यानप्रसक्तानि विलोचनानि नयनानि, चतुर्मुखत्वाद्बहुवचनम्। मुमोच निक्षिप्तवान्।

भाषा

ब्रह्माने, इन्द्र द्वारा इस प्रकार कहे हुए वचनों को सुन कर, सन्ध्या सम्बन्धि जल से भरी अँजुली पर अपने ध्यानयुक्त नेत्रों को डाला अर्थात् उसे ध्यान पूर्वक देखा।

[१]कुलकारम्भः—

प्रकोष्ठपृष्ठस्फुरदिन्द्रनील—रत्नावलीकङ्कणडम्बरेण ।
बन्धाय धर्मप्रतिबन्धकानां वहन्सहोत्थानिव नागपाशान् ॥४७॥

अन्वयः

प्रकोष्ठपृष्ठस्फुरदिन्द्रनीलरत्नावलीकङ्कणडम्बरेण धर्मप्रतिबन्धकानां बन्धाय सहोत्थान् नागपाशान् वहन् इव। (सुभटो विधातुश्चुलुकादाविरासीदिति पञ्चपञ्चाशत्संख्याकश्लोकेन सम्बन्धः।)

व्याख्या

प्रकोष्ठस्य कूर्पराधोभागस्य पृष्ठे पृष्ठभागे स्फुरन्ती देदीप्यमाना येन्द्रनील-रत्नानामिन्द्रनीलमणीनां रत्नविशेषाणामावली पङ्क्तिस्तस्याः कङ्कणङ्करभूषणं 'कंकणं करभूषणम्' इत्यमरः। तस्य डम्बरेण मिषेण प्रकोष्ठस्थितेन्द्रनीलमणि-घटित-करभूषण-मिषेण धर्मप्रतिबन्धकानां धर्मप्रतिरोधकानामधर्मिणामित्यर्थः। बन्धाय नियन्त्रणाय जन्मना सहोत्तिष्ठन्तीति प्रादुर्भवन्तीति सहोत्थास्तान्, राज्ञो जन्मकालादेव समुत्पन्नान् नागपाशान् सर्परज्जूर्वहन्निव धारयन्निव—सुभटो धातु-श्चुलुकादाविरासीदिति सम्बन्धः। इन्द्रनीलरत्नावलीकङ्कणे नागपाशस्य संभावनादुत्प्रेक्षा। सा च 'डम्बरेण' इत्यपन्हुतिमूलत्वात्सापन्हवा।

भाषा

कलाई पर बंधे हुए इन्द्रनीलमणि के कंगन के मिष से, धर्म द्रोहियों को बांधने के लिए मानों साथ ही में उत्पन्न भये हुए नागफांस को धारण करता हुआ (एक वीर ब्रह्मा जी की अंजुली से उत्पन्न हुआ।) (इसका सम्बन्ध ५५ वें श्लोक से है।)

---

[१] कुलकलक्षणं त्रिचत्वारिंशत्तमश्लोकटिप्पण्यां द्रष्टव्यम्।

उत्तर्जनीकेन मुहुःकरेण कृताकृतावेक्षणबद्धलक्षः ।
रुषा निषेधन्निव चेष्टितानि दिक्पालवर्गस्य निरर्गलानि ॥४८॥

अन्वयः

कृताकृतावेक्षणबद्धलक्षः (सः) उत्तर्जनीकेन करेण दिक्पालवर्गस्य निरर्गलानि चेष्टितानि रुषा मुहुः निषेधन् इव (विधातुश्चुलुकादाविरासीदित्यग्रिमेण श्लोकेन सम्बन्धः ।)

व्याख्या

कृतमुचितसमाचरणमकृतमनुचितसमाचरणञ्च कृताकृते तयोः किमुचितं समाचरितं किं वाऽनुचितमाचरितं लोकैरेतयोरवेक्षणे पर्यालोचने बद्धं व्यापृतं लक्षं ध्यानं यस्य स धर्माधर्माचरणसमीक्षणैकचित्तः स सुभट उर्ध्वीकृता तर्जनी यस्यैवम्भूतेन तेन करेण हस्तेन दिशां पालाः पालकास्तेषां दिक्पालानां वर्गस्य समूहस्य निरर्गलानि निष्प्रतिबन्धानि चेष्टितानि कार्याणि रुषा क्रोधेन मुहुर्वारं-वारं निषेधन्निव निवारयन्निव (विधातुश्चुलुकादाविरासीदित्यनेन सम्बन्धः ।) उत्तर्जनीककरे दिक्पालचेष्टितकर्मकनिषेधक्रियायास्समुत्प्रेक्षणात्क्रियोत्प्रेक्षा ।

भाषा

उचित और अनुचित कार्यो के परीक्षण में दत्तचित्त वह वीर, दिक्पाल लोगों के निरङ्कुश कार्यों का, खड़ी की हुई तर्जनी अंगुली से युक्त हाथ से मानो क्रोध से बार २ निषेध करता हुआ (ब्रह्मा जी की अंजुली से उत्पन्न हुआ ।)

भोगाय वैपुल्यविशेषभाजं कर्तुं धरित्रीं निजवंशजानाम् ।
केयूरसङ्क्रान्तविमानभङ्ग्या भुजोद्धृतक्ष्माभृदिवेक्ष्यमाणः ॥४९॥

अन्वयः

निजवंशजानां भोगाय धरित्रीं वैपुल्यविशेषभाजं कर्तुं केयूरसङ्क्रान्तविमानभङ्ग्या भुजोद्धृतक्ष्माभृत् इव ईक्ष्यमाणः (विधातुश्चुलुकादाविरासीदित्यन्वयः ।)

व्याख्या

निजवंशजानां स्वकुलोत्पन्नानां राज्ञां भोगायोपभोगाय धरित्रीं पृथ्वीं वैपुल्य-विशेषं भजतीति वैपुल्यविशेषभाक् तां विशालक्षेत्रां कर्तुं सम्पादयितुं केयूरेऽङ्गदे 'केयूरमंगदं तुल्ये' इत्यमरः। संक्रान्तानि प्रतिबिम्बितानि विमानानि गगन उड्डीयमानानि व्योमयानानि 'व्योमयानं विमानोऽस्त्री' इत्यमरः। तेषां भङ्ग्या व्याजेन भुजाभ्यामुद्धृता क्ष्माभृतः पर्वता राजानश्च येन स भुजोपरि समुत्क्षिप्त-महीधर इवेक्ष्यमाणो दृश्यमानः सुभटः प्रादुरासीदित्यग्रे सम्बन्धः। पर्वतैरथवा राजभिराक्रान्तां पृथ्वीं स्ववंशजानां भोगायाऽल्पतरां मत्वा तानुत्क्षिप्य समतलां निष्कण्टकां विशालाञ्च धरां चिकीर्षुरित्यर्थः। नेमे विमानाः किन्तु क्ष्माभृत इति भङ्गि शब्देन प्रतिपादनादार्थ्यपन्हुतिस्तन्मूला विमानोपरि क्ष्माभृतामुत्प्रेक्षा। अत द्वयोरङ्गाङ्गीभावसंकरः।

भाषा

अपने वंश में होने वाले राजाओं के उपभोग के लिये पृथ्वी पर अधिक स्थान बढ़ाने के ध्येय से, भुजा के आभूषण विजायट में प्रतिबिम्बित, आकाश में उड़ने वाले विमानों की परछाहीं के मिष से मानों भुजाओं से पहाड़ों को या विपक्षी राजाओं को हटाकर दूर फेक देने के लिये उठाए हुए के ऐसा दिखाई देने वाला (वीर ब्रह्मा जी की अंजुली से उत्पन्न हुआ।)

अखर्वगर्वस्मितदन्तुरेण विराजमानोऽधरपल्लवेन।
समुत्थितः क्षीरविपाण्डुराणि पीत्वेव सद्यो द्विषतां यशांसि ॥५०॥

अन्वयः

अखर्वगर्वस्मितदन्तुरेण अधरपल्लवेन विराजमानः क्षीरविपाण्डुराणि द्विषतां यशांसि सद्यः पीत्वा समुत्थितः इव।

व्याख्या

अखर्वो महान् गर्वो दर्पस्तेन यत्स्मितं शुभ्रवर्ण-गर्वहेतुक-मीषद्धास्यं तेन दन्तुर उन्नतानतः 'खर्वो ह्रस्वश्च वामनः इति। 'दन्तुरं तून्नतानतम्' इति चाऽमरः। तेनाऽधरः अधरोष्ठः पल्लव इवेत्यधरपल्लवस्तेन विराजमानः सुशोभितः क्षीरवद्दुग्धवद्विपाण्डुराणि शुभ्राणि द्विषतां शत्रूणां यशांसि सद्यः पीत्वा

पानं कृत्वा, नवजातशिशुः पूर्वं दुग्धमेव पिबतीत्याशयः। समुत्थित इव विद्यमान इव सुभटः प्रादुरासीदित्यन्वयः। यशः स्मितञ्च शुभ्रं भवतीति कविसम्प्रदायः। तस्मिन् जातमात्र एव शत्रुयशांसि विनश्यन्ति स्मेति भावः। अधरे पल्लवाभेदाद्रूपकम्। क्षीरेण यशसः साम्यादुपमा। क्षीररूपयशः पानानन्तरं समुत्थानस्योत्प्रेक्षणात्क्रियोत्प्रेक्षा। अत एतेषां संकरः।

भाषा

अधिक अभिमान से उत्पन्न भई हुई (श्वेत) मुस्कुराहट से विकसित अधरोष्ठ से शोभित (वह वीर) मानो दूध के समान शत्रुओं के उज्वल यशों को पीकर प्रकट भया हुआ (ब्रह्मा जी की अंजुली से उत्पन्न हुआ।)

सुवर्णनिर्माणमभेद्यमस्त्रैः स्वभावसिद्धं कवचं दधानः।
जयश्रियः काञ्चनविष्टराभं समुद्वहन्नुन्नतमंसकूटम् ॥५१॥

अन्वयः

अस्त्रैः अभेद्यं सुवर्णनिर्माणं स्वभावसिद्धं कवचं दधानः जयश्रियः काञ्चनविष्टराभम् उन्नतम् अंसकूटं समुद्वहन् (सुभटो विधातुश्चुलुकादाविरासीदित्यनेन सम्बन्धः।)

व्याख्या

अस्त्रैर्बाणैरन्यास्त्रैर्वाऽभेद्यं भेत्तुमशक्यं सुवर्णस्य काञ्चनाभस्य सुन्दरदेहवर्णस्य निर्माणं निर्मितमेव स्वभावसिद्धं प्राकृतिकं कवचं तनुत्रं 'अथ तनुत्रं वर्म दंशनम्। उरच्छदः कंकटको जगरः कवचोऽस्त्रियाम्' इत्यमरः। दधानो धारयन्, पक्षे सुवर्णेन हेम्ना निर्माणं यस्यैवम्भूतं कवचम्। श्लिष्टरूपकम्। जयश्रियो विजयलक्ष्म्या उपवेशनाय काञ्चनस्य स्वर्णस्य विष्टरमासनं तदाभेवाऽऽभा कान्तिर्यस्य तं सुवर्णसिंहासनसदृशमुन्नतं प्रशस्तमंसकूटं स्कन्धशिखरं समुद्वहन् धारयन् 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः। सुभटः प्रादुरासीदित्यन्वयः। काञ्चनाभदेहप्रभायां स्वभावसिद्धकवचत्वस्योत्प्रेक्षणादुत्प्रेक्षा। वाचकाभावाच्च तस्या व्यङ्ग्यत्वम्। अंसकूटे काञ्चनविष्टरस्य साम्यप्रतीत्योपमा। देहस्य सुवर्णे स्वभावसिद्धस्वर्णनिर्मितकवचस्य तादात्म्यारोपाद्रूपकमपीत्युत्प्रेक्षारूपकयोः सन्देहसंकरः।

भाषा

सोने के समान शरीर के स्वाभाविक रंग के कारण मानो बाणों या अन्य अस्त्रों से न छिद सकने वाले सोने से बने हुए कवच को धारण करने वाला, विजयलक्ष्मी के (बैठने के) सोने के आसन के समान उन्नत स्कन्धप्रदेशों को धारण करने वाला (एक वीर प्रकट हुआ।)

स्वःसुन्दरीबन्दिपरिग्रहाय दत्तोऽञ्जलिः सम्प्रति दानवेन्द्रैः।
इति प्रहर्षादमराङ्गनानां नेत्रोत्पलश्रेणिभिरर्च्यमानः ॥५२॥

अन्वयः

सम्प्रति दानवेन्द्रैः स्वःसुन्दरीबन्दिपरिग्रहाय अञ्जलिः दत्तः इति प्रहर्षात् अमराङ्गनानां नेत्रोत्पलश्रेणिभिः अर्च्यमानः (सुभटः प्रादुरासीत्।)

व्याख्या

सम्प्रत्यधुना राज्ञः समुत्पत्त्यनन्तरं दानवेन्द्रैर्दैत्यधुरन्धरैः स्वः स्वर्गस्य सुन्दर्य एव बन्दिनो वशीकृताः स्त्रियः स्तुतिपाठिका वा 'बन्दिनः स्तुतिपाठकाः' इत्यमरः। तासां परिग्रहाय सुन्दरस्त्रीत्वेन स्तुतिपाठिकात्वेन वा हरणायाऽञ्जलिर्दत्तः। अस्य राज्ञो भयात्सुरसुन्दरीबन्दिकरणाय तासां हठापहरणस्य साहसस्तैः परित्यक्त इति प्रहर्षादितत्कार्यजनिताऽऽनन्दोद्रेकेणाऽमराङ्गनानां देवाङ्गनानां नेत्राणि नयनान्युत्पलानीव कमलानीव तेषां श्रेणिभिः पङ्क्तिभिरर्च्यमानः पूज्यमानो दृश्यमान इत्यर्थः। न दानवा इतः परमस्य कृपयाऽस्मान्बन्दीकरिष्यन्तीति देवाङ्गनाभिः प्रसन्नाभिर्दृग्भिरवलोक्यमान इति भावः। कमलपङ्क्तिभिरर्च्यमाने प्रहर्षस्य हेतुत्वेनोत्प्रेक्षणादुत्प्रेक्षा। नेत्रयोः कमलसाम्यादुपमा। नेत्राण्येव कमलानीति रूपकमपि। अतस्तेषां सङ्करः।

भाषा

इस वीर के उत्पन्न हो जाने पर अब दानवेन्द्रों ने भय से, स्वर्गीय ललनाओं को, अपनी स्तुति करने के लिये अथवा सुन्दर स्त्री होने के नाते अपने वश में करने के हेतु से, उनका अपहरण करने से मुँह मोड़ लिया है, इस हर्ष से देवाङ्गनाओं के नेत्र रूपी कमलों से पूजित (एक वीर उत्पन्न हुआ।) अर्थात्

उन देवाङ्गनाओं का इस वीर के कारण भय दूर हो जाने से वे इसे हर्ष से टकटकी बांध कर देखने लगी थीं ।

अपि स्वयं पङ्कजविष्टरेण देवेन दृष्टश्चिरमुत्सुकेन ।
वाञ्छाधिकप्रस्तुतवस्तुसिद्धि—सविस्मयस्मेरमुखाम्बुजेन ॥५३॥

अन्वयः

वाञ्छाधिकप्रस्तुतवस्तुसिद्धिसविस्मयस्मेरमुखाम्बुजेन उत्सुकेन पङ्कजविष्टरेण देवेन अपि स्वयं चिरं दृष्टः सुभट आविरासीदित्यनेन सम्बन्धः ।

व्याख्या

वाञ्छाया मनोरथादप्यधिका विशेषा या प्रस्तुतवस्तुनोऽतिप्रभावशालिनो राज्ञः सिद्धिर्निर्माणं तया सविस्मयमाश्चर्ययुक्तं स्मेरमीषद्धास्यं तेन युक्तं मुखाम्बुजं वदनारविन्दं यस्य तेनोत्सुकेनोत्कण्ठितेन पङ्कजं कमलं विष्टरमासनं यस्य तेन कमलासनेन देवेन ब्रह्मणाऽपि स्वयं चिरं चिराय दृष्टः संवीक्षितः । न केवलं देवाङ्गनाभिरपि तु ब्रह्मणाऽपि साश्चर्यं स्वयं चिरं दृष्टः । मुखेऽम्बुजाभेदाद्रूपकम् ।

भाषा

अपने मनोरथ से भी अधिक प्रभावशाली नई वस्तु अर्थात् राजा के बन जाने से आश्चर्य युक्त मुस्कुराहट वाले मुखकमल को धारण करने वाले, कमल के आसन पर विराजित उत्सुक ब्रह्मा से भी स्वयं चिरकाल तक अवलोकित (एकवीर उत्पन्न हुवा ।)

कषोपले पौरुषकाञ्चनस्य पङ्के यशः-पाण्डुसरोरुहाणाम् ।
व्यापारयन्दृष्टिमतिप्रहृष्टा—मवाप्तपाणिप्रणये कृपाणे ॥५४॥

अन्वयः

पौरुषकाञ्चनस्य कषोपले यशःपाण्डुसरोरुहाणां पङ्के अवाप्तपाणिप्रणये कृपाणे अतिप्रहृष्टां दृष्टिं व्यापारयन् सुभट आविरासीदित्यनेन सम्बन्धः ।

व्याख्या

पौरुषं पुरुषार्थं एव काञ्चनं सुवर्णं तस्य कषोपले शुद्धयशुद्धिपरिचायक-नीलपाषाणरूपे, यशःपाण्डुसरोरुहाणां यशस्स्वरूपशुभ्रपद्मानामुत्पत्तिस्थानरूपे पङ्के कृष्णवर्णपङ्काभिन्नेऽवाप्तः प्राप्तः पाणेर्हस्तस्य प्रणयस्संग्रहणस्नेहो यस्मिन्नेवं भूते कृपाणे खड्गेऽतिप्रहृष्टामतिप्रसन्नां दृष्टिं व्यापारयन् कुर्वन्--सुभट आविरासीदि-त्यनेनाऽन्वयः । पौरुषे काञ्चनाभेदारोपस्य कृपाणे कषोपलत्वारोपेकारणत्वाद्य-शसि श्वेतपद्मारोपस्य च खड्गे पङ्कत्वारोपे कारणत्वात्परम्परितरूपकद्वयम् ।

भाषा

पुरुषार्थरूपी सोने की काली कसौटी स्वरूप तथा यशरूपी श्वेत कमलों को उत्पन्न करने वाली तालाव की काली मिट्टी स्वरूप अपने हाथ को प्रिय लगने वाली तलवार को अत्यन्त हर्ष युक्त दृष्टि से देखता हुवा—एक वीर उत्पन्न हुवा ।

हेमाचलस्येव कृतः शिलाभिरुदारजाम्बूनदचारुदेहः ।
अथाऽऽविरासीत्सुभटस्त्रिलोक-त्राणप्रवीणश्चुलुकाद्विधातुः ॥५५॥

अन्वयः

अथ उदारजाम्बूनदचारुदेहः हेमाचलस्य शिलाभिः कृतः इव त्रिलोक-त्राणप्रवीणः सुभटः विधातुः चुलुकात् आविरासीत् ।

व्याख्या

अथ ब्रह्मणः स्व-चुलुके दृष्टिपातादनन्तरं उदारं शुद्धं महत् 'उदारो दातृ-महतोः' इत्यमरः । जाम्बूनदमिव सुवर्णमिव 'रुक्मं कार्तस्वरं जाम्बूनदमष्टा-पदोऽस्त्रियाम्' इत्यमरः । चारुः सुन्दरो देहः शरीरं यस्य स अतएव हेमाचलस्य सुमेरोश्शिलाभिः कृत इव निर्मित इव त्रिलोकस्य त्रैलोक्यस्य त्राणे रक्षणे समुद्धरणे च प्रवीणो निपुणः सुभटः सुयोद्धा राजा ब्रह्मणो विधातुश्चुलुकादञ्जलेराविरासीत्प्रादुर्बभूव । देहस्य जाम्बूनदेन सादृश्यादुपमा । सुभटशरीरे सुवर्णाचल-शिलानिर्मितत्वस्योत्प्रेक्षणात्क्रियोत्प्रेक्षा ।

इति नवभिः श्लोकैः कुलकम् ।[1]

---

[1] कुलकादिलक्षणमस्मिन्सर्गे त्रिचत्वारिंशत्तमश्लोकटिप्पण्यां द्रष्टव्यम् ।

भाषा

ब्रह्मा जी के अपनी जल पूरित अंजुली पर दृष्टिपात करने के बाद शुद्ध सोने के समान सुन्दर देहवाला मानों सुमेरुपर्वत की सोने की चट्टानों से बनाया हुवा और तीनों लोकों का रक्षण तथा उद्धार करने में निपुण एक महा योद्धा ब्रह्मा के चुल्लू में से प्रकट हुआ।

(जहाँ पांच से अधिक श्लोकों में वाक्यपूर्ति हो उसे कुलक कहते हैं।)

प्रस्थाप्य शक्रं धृतिमान्भवेति हर्षाश्रुपारिप्लवदृक्सहस्रम्।
स शासनात्पङ्करुहासनस्य मरुद्विपक्षक्षयदीक्षितोऽभूत् ॥५६॥

अन्वयः

सः हर्षाश्रुपारिप्लवदृक्सहस्रं शक्रं धृतिमान् भव इति प्रस्थाप्य पङ्करुहासनस्य शासनात् मरुद्विपक्षक्षयदीक्षितः अभूत्।

व्याख्या

स राजा हर्षाश्रुभिरानन्दाश्रुभिः पारिप्लवं चञ्चलं 'चञ्चलं चपलञ्चैव पारिप्लवपरिप्लवे' इत्यमरः। दृशां नेत्राणां सहस्रं यस्य तं शक्रं सहस्राक्षं त्वं धृतिमान् भव धैर्यं धारयेत्याश्वास्येति शेषः प्रस्थाप्य पुनस्स्वस्थाने निवर्तनाय नियोज्य पङ्करुहासनस्य पद्मासनस्य ब्रह्मणः 'पङ्केरुहं तामरसं सारसं सरसीरुह-मित्यमरः। शासनादाज्ञया मरुतां देवानां विपक्षाः शत्रवो दैत्यास्तेषां क्षये नाशे दीक्षितः गृहीतदीक्षः कृतसङ्कल्पोऽभूत् जातः।

भाषा

उस वीर ने हर्ष जनित अश्रुओं से चंचल हजार आँखवाले इन्द्र को 'धैर्य रक्खो' ऐसा कह कर और उसको बिदा कर ब्रह्मा की आज्ञा से दैत्यों के नाश करने का बीड़ा उठाया।

क्ष्माभृत्कुलानामुपरिप्रतिष्ठामवाप्य रत्नाकरभोगयोग्यः।
क्रमेण तस्मा[illegible]य वंशः शौरेः पदादाङ्ग इव प्रवाहः ॥५७॥

अन्वयः

तस्मात् क्रमेण क्ष्माभृत्कुलानाम् उपरि प्रतिष्ठाम् अवाप्य रत्नाकर भोगयोग्यः वंशः शौरेः पदात् गाङ्गः प्रवाहः इव उदियाय ।

व्याख्या

तस्मात् राज्ञः क्रमेण क्रमशः क्ष्मां पृथ्वीं बिभ्रतीतिक्ष्माभृतो राजानः पर्वताश्च तेषां कुलानि वंशाः समूहाश्च तेषामुपरि प्रतिष्ठां सर्वातिशायिनीं स्थितिमवाप्य लब्ध्वा रत्नानामाकरस्य निधेः पक्षे समुद्रस्य भोगे सुखानुभवे पक्षे संयोगे योग्यः समर्थो वंशः कुलं शौरेर्विष्णोः पदाच्चरणाद्गाङ्गो गङ्गासम्बन्धी प्रवाह इव उदियायोदितोऽभूत् । यथा शौरेः पदात् गाङ्गः प्रवाहः पर्वतानामुपरि स्थितिं लब्ध्वा रत्नाकरसङ्गमयोग्य उदेति तथैव तस्माद्राज्ञः पार्थिवानामुपरि स्थानं लब्ध्वा रत्ननिधेर्भोगे समर्थो वंश उदियायेति भावः । अत्र पूर्णोपमालङ्कारः ।

भाषा

उस राजा से, अन्य राजकुलों से अधिक कीर्तिशाली, रत्नों के खजानों का उपभोग करने के योग्य, विष्णु के चरण से पर्वत समूहों पर अपना स्थान बनाता हुआ, समुद्र से जा मिलने में समर्थ गङ्गाप्रवाह के समान, एक वंश आगे चल पड़ा ।

विपक्षवीराद्भुतकीर्तिहारी हारीत इत्यादिपुमान्स यत्र ।
मानव्यनामा च बभूव मानी मानव्ययं यः कृतवानरीणाम् ॥५८॥

अन्वयः

यत्र विपक्षाद्भुतकीर्तिहारी हारीतः इति आदिपुमान् बभूव । यः अरीणां मानव्ययं कृतवान् सः मानी मानव्यनामा च बभूव ।

व्याख्या

यत्र चालुक्यराजवंशे विपक्षाणामरीणामद्भुताऽऽश्चर्यकारिणी या कीर्तिर्यशः 'यशः कीर्तिः समज्ञाचेत्यमरः । तस्या हारी विनाशकारी हारीत इति नाम्ना प्रसिद्धो राजाऽऽदिपुरुषः कुलप्रवर्तको बभूव । यः प्रसिद्धोऽरीणां शत्रूणां मानस्याऽहङ्कारस्य व्ययं नाशं कृतवान् चकार स मानी मानयुक्तो मानव्यनामा

तन्नाम राजा च बभूव । हारीतो मानव्यश्च तद्वंशमूलपुरुषौ बभूवतुरित्यर्थः । मानं व्ययत इति मानव्यो, विपूर्वक अय् गतौ धातोर्विचि लोपोव्योर्वलीति यकारस्य लोपे सिद्धम् ।

भाषा

जिस चालुक्य वंश में आदि पुरुष हारीत नाम का हुवा जो विपक्षी राजाओं की आश्चर्यजनक कीर्ति का अपहरण करने वाला था । अभिमानी मानव्य नाम का राजा भी उसी वंश में हुवा जिसने शत्रुओं के अभिमान को तोड़ दिया था ।

मीलद्विलासालकपल्लवानि विशीर्णपत्रावलिमण्डनानि ।
मुखानि वैरिप्रमदाजनस्य यद्भूपतीनां जगदुः प्रतापम् ॥५६॥

अन्वयः

मीलद्विलासालकपल्लवानि विशीर्णपत्रावलिमण्डनानि वैरिप्रमदाजनस्य मुखानि यद्भूपतीनां प्रतापं जगदुः ।

व्याख्या

मीलद्विलासा विलासशून्याः संस्कारशून्या अलकपल्लवा केशपाशा येषां तानि विशीर्णानि जीर्णानि [१]पत्रावलिरूपमण्डनानि शोभावर्द्धकानि येषु तानि वैरिणां शत्रूणां प्रमदाजनस्य स्त्रीसमूहस्य मुखान्याननानि (कर्तृ) यस्य चालुक्य-वंशस्य भूपतिनां राज्ञां प्रतापं प्रभावं जगदुरूचुः । वैरिस्त्रीणामलङ्काराभावात्पतीनां मरणं सूच्यते ।

भाषा

शत्रुओं की स्त्रियों के संस्कार शून्य केशपाशों से युक्त तथा खण्डित पत्रावलि से युक्त मुख, उस चालुक्य वंश के राजाओं के प्रताप को कह रहे थे । अर्थात् प्रकट कर रहे थे । अर्थात् निकट भूत में पतियों के मारे जाने से विधवा हो

---

[१] शोभा के लिये रंगबिरंगी वस्तुओं से मुखादि अंगों पर निकाली हुई चित्रकारी ।

जाने के कारण फिर अपने को विभूषित करने का अवसर न आने से उनके केशपाश पति की जीवितावस्था के संस्कारों से रहित थे और पत्रावलि रूप मण्डन भी फिर से न ठीक किये जाने से खण्डित हो गया था ।

उत्खातविश्वोत्कटकण्टकानां यत्रोदितानां पृथिवीपतीनाम् ।
क्रीडागृहप्राङ्गणलीलयैव बभ्राम कीर्तिर्भुवनत्रयेऽपि ॥६०॥

अन्वयः

यत्र उदितानाम् उत्खातविश्वोत्कटकण्टकानां पृथिवीपतीनां कीर्तिः क्रीडागृहप्राङ्गणलीलया एव भुवनत्रये अपि बभ्राम ।

व्याख्या

यत्र चालुक्यवंशे उदितानां समुत्पन्नानामुत्खातानि समूलमुच्छेदितानि विश्वस्य संसारस्योत्कटाः प्रकाण्डाः कण्टका विघ्नभूता दुष्टा राजान (क्षुद्रशत्रवः) यैस्तेषां पृथिवीपतीनां महीपतीनां कीर्तिर्यशः क्रीडागृहस्य लीलागृहस्य यत्प्राङ्गणमाभ्यन्तरभूमिस्तस्मिन्या लीलाऽधिकपरिश्रमं विना सञ्चरणादिविलासस्तयैवाऽनायासेनैव भुवनत्रयेऽपि लोकत्रयेऽपि बभ्राम सञ्चचाल ।

भाषा

संसार के अत्यन्त भयङ्कर उपद्रव रूपी क्षुद्र राजाओं को समूल नष्ट करने वाले, चालुक्य वंश में उत्पन्न राजाओं की कीर्ति, क्रीडागृह के अंगने में रहने के समान ही तीनों लोकों में आनायास से ही फैल गई । अर्थात् विरोधी राजाओं का नाश कर देने पर तीनों लोकों में निष्कण्टक राज्य हो जाने से विरोधियों के अभाव में सर्वत्र अनायास ही कीर्ति फैल गई । क्योंकि तीनों लोक उनके लिये निर्भय घर के अँगने के समान हो गया था ।

यत्पार्थिवैः शत्रुकठोरकण्ठ-पीठास्थिनिर्लोठन-कुण्ठधारः ।
निन्ये कृपाणः पटुतां तदीय-कपालशाणोपलपट्टिकासु ॥६१॥

अन्वयः

यत्पार्थिवैः शत्रुकठोरकण्ठपीठास्थिनिर्लोठनकुण्ठधारः कृपाणः तदीयकपालशाणोपलपट्टिकासु पटुतां निन्ये ।

व्याख्या

यस्य चालुक्यवंशस्य पार्थिवैर्नृपैः शत्रूणामरीणां कठोराः कठिनाः ये कण्ठपीठा ग्रीवास्थलानि तेषामस्थीनि तेषां निर्लोठनेन खण्डनेन कुण्ठा कुण्ठीभूता धारा तीक्ष्णाग्रभागो यस्य सः कृपाणः खड्गः तेषामिदं तदीयं तानि शत्रुसम्बन्धीनि कपालान्येव शिरोस्थीन्येव शाणोपलपट्टिकाः तीक्ष्णताप्रवर्धकयन्त्रविशेषाः 'सान' इति लोके प्रसिद्धम् । तासु पटुतां तीक्ष्णतां निन्ये प्रापितः । कपालोपरि शाणोपलपट्टिकात्वारोपाद्रूपकम् । कण्ठे पीठाभेदाच्चरूपकम् ।

भाषा

जिस वंश के राजाओं ने, शत्रुओं की कड़ी २ गले की हड्डियों के काटने से कुन्द धार वाली तलवार की धार, शत्रुओं के सिर की हड्डी रूपी सान पर चढ़ा कर तेज की ।

निरादरश्चन्द्रशिखामणौ यः प्रीतेऽपि लोकत्रितयैकवीरः ।
क्षिपन्कृपाणं दशमेऽपि मूर्ध्नि स्वयं धृतः क्ष्माधरराजपुत्र्या ॥६२॥

अन्वयः

यः लोकत्रितयैकवीरः चन्द्रशिखामणौ प्रीते अपि निरादरः (सन्) दशमे मूर्ध्नि अपि कृपाणं क्षिपन् क्ष्माधरराजपुत्र्या स्वयं धृतः ।

व्याख्या

यः प्रसिद्धो लोकानां भुवनानां 'लोकस्तु भुवने जने' इत्यमरः । त्रितयं त्रयं तस्मिन्नेकोऽद्वितीयो वीरो रावणश्चन्द्रएव शिखामणिः शिरोभूषणं यस्य सः शिवस्तस्मिन् प्रीतेऽपि प्रसन्नेऽपि निरादरस्सन् शिवस्य प्रसन्नतामगणयन्दशमे मूर्ध्न्यपि शीर्षेऽपि कृपाणं चन्द्रहासं क्षिपन्प्रहरन् क्ष्माधरस्य हिमाचलस्य राजपुत्र्या राजकन्यया पार्वत्या स्वयमेव धृतो निवारितोऽभूत् ।

भाषा

तीनों लोकों में अद्वितीय वीर रावण, जिसको, शंकर के प्रसन्न होने पर भी, उनकी प्रसन्नता की परवाह न कर अपने दसवें सिर पर तलवार चलाने से पार्वती जी ने स्वयं रोका था ।

प्रसाध्य तं रावणमध्युवास यां मैथिलीशः कुलराजधानीम् ।
ते क्षत्रियास्तामवदातकीर्तिं पुरीमयोध्यां विदधुर्निवासम् ॥६३॥

अन्वयः

मैथिलीशः तं रावणं प्रसाध्य यां कुलराजधानीम् अध्युवास ताम् अवदातकीर्तिम् अयोध्याम् पुरीं ते क्षत्रियाः निवासं विदधुः ।

व्याख्या

मैथिल्यास्सीताया ईशः पतिः श्रीरामचन्द्रस्तम्प्रसिद्धं रावणं लङ्केशं प्रसाध्य निहत्य यां प्रसिद्धां कुलस्य वंशस्य राजधानीं प्रधाननगरं कुलपरम्परागतराजधानीमित्यर्थः । अध्युवास यस्यां निवासं चकार 'अधिशीङस्थासां कर्मेत्याधारभूताया राजधान्याः कर्मत्वम् । तां प्रसिद्धामवदाता धवला 'अवदातः सितो गौरोऽवलक्षोधवलोऽर्जुनः' इत्यमरः । कीर्तिर्यशो यस्याः तामयोध्यामयोध्यानाम्नीं पुरीं, ते क्षत्रियास्तच्चालुक्यवंशीयाः क्षत्रिया राजानो निवासं निवासस्थानं विदधुश्चक्रुः ।

भाषा

उस रावण को मार कर श्री रामचन्द्र ने जिस कुलपरम्परागत राजधानी में निवास किया था, उसी शुभ्रयशवाली अयोध्या नगरी में ये चालुक्यवंशीय क्षत्रिय राजा लोग रहने लगे ।

जिगीषवः केऽपि विजित्य विश्वं विलासदीक्षारसिकाः क्रमेण ।
चक्रुः पदं नागरखण्डचुम्बि-पूगद्रुमायां दिशि दक्षिणस्याम् ॥६४॥

अन्वयः

जिगीषवः के अपि विश्वं विजित्य क्रमेण विलासदीक्षारसिकाः (सन्तः) नागरखण्डचुम्बिपूगद्रुमायां दक्षिणस्यां दिशि पदं चक्रुः ।

व्याख्या

जेतुमिच्छवो जिगीषवो विजयेच्छवः केऽपि केचन चालुक्यवंशीया राजानो विश्वं सम्पूर्णं भूमण्डलं विजित्य स्वायत्तीकृत्य क्रमेण तदनन्तरं विलासस्य विलासिताया

दीक्षाऽभिनिवेशस्तस्यां रसिका आकृष्टमनसस्सन्तो विलासेच्छया मनोविनोदाभि-लाषेण नागरखण्डचुम्बिनो नागवल्लीलग्नाः पूगद्रुमाः क्रमुकवृक्षा यस्यां तस्यां दक्षिणस्यां दिशि पदं स्वनिवासस्थानं चक्रुः रचयामासुः ।

भाषा

इस चालुक्य वंश के विजय की इच्छा रखने वाले कुछ राजा लोग सम्पूर्ण जगत् को जीत कर विलासिता के रस में पड़कर, पान की बँवर से सटकर जहाँ सुपाड़ी के पेड़ लगे रहते हैं, ऐसी दक्षिण दिशा में राज्य करने लगे ।

तदुद्भवैर्भूपतिभिः सलीलं चोलीरहःसाक्षिणि दक्षिणाब्धेः ।
करीन्द्रदन्ताङ्कुरलेखनीभिरलेखि कूले विजय-प्रशस्तिः ॥६५॥

अन्वयः

तदुद्भवैः भूपतिभिः चोलीरहस्साक्षिणि दक्षिणाब्धेः कूले करीन्द्रदन्ता-ङ्कुरलेखनीभिः विजयप्रशस्तिः सलीलम् अलेखि ।

व्याख्या

तस्माद्दक्षिणचालुक्यवंशादुद्भव उत्पत्तिर्येषां तैर्भूपतिभिर्नृपै-श्चोलदेशोद्भूतानां स्त्रीणां रहस एकान्तविलासस्य साक्षिणि साक्षिभूते दक्षिणाब्धेर्दक्षिणसमुद्रस्य कूले तटे 'कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु' इत्यमरः । करीन्द्राणां महागजानां दन्ता रदनाः 'रदना दशना दन्तारदा' इत्यमरः । तेषामङ्कुरा अग्रिमसूक्ष्मभागा एव लेखन्यस्ताभिर्विजयस्य जयस्य प्रशस्तिः प्रशंसा सलीलं सविलासं यथास्यात्त-थाऽलेखि लिखिता । करीन्द्रदन्ताङ्कुरेषु लेखनीत्वारोपाद्रूपकालङ्कारः । तदा दक्षिणाब्धेस्तटे चोलवंशीयनृपाणां राज्यमासीदितीतिहासः । तेषां महती गजसे-नाऽपि प्रसिद्धाऽऽसीत् ।

भाषा

उस दक्षिण चालुक्य वंश में पैदा भए हुए राजाओं ने चोल-देशीय स्त्रियों के रहस्य पूर्ण विलासों से परिचित दक्षिण सागर के तट पर बड़े २ हाथियों के दांतों की नोक रूपी कलमों से अपने विजय की प्रशंसा खेलवाड़ में ही लिख दी । अर्थात् हाथी की सेना ले जाकर सबको परास्त करने से वहाँ उनकी कीर्ति फैल गई ।

द्वीपक्ष्मापालपरम्पराणां दोर्विक्रमादुत्खननोन्मुखास्ते ।
विष्णोः प्रतिष्ठेति विभीषणस्य राज्ये परं सङ्कुचिता बभूवुः ॥६६॥

अन्वयः

दोर्विक्रमात् द्वीपक्ष्मापालपरम्पराणां उत्खननोन्मुखाः ते विभीषणस्य राज्ये विष्णोः प्रतिष्ठा इति परं सङ्कुचिताः बभूवुः ।

व्याख्या

दोष्णां भुजानां 'भुजबाहू प्रवेष्टो दोः इत्यमरः । विक्रमात् पराक्रमात् द्वीपानां क्ष्मा पृथ्वी तस्याः पालाः पालका द्वीपक्ष्मां पालयन्तीति वा तेषां परम्परास्तासामुत्खनने समूलमुन्मूलने उन्मुखास्तत्परास्ते विभीषणस्य राज्ये लङ्कायां विष्णोः प्रतिष्ठा विभीषणस्य रामभक्तत्वाद्विष्णुसाक्षादवतारस्य रामस्य स्थितिस्तत्र वर्तत इति हेतोस्तस्याः पूज्यत्वं न तु नाश्यत्वमिति लङ्कापुरीनाशन परं केवलं सङ्कुचिता बभूवुस्तत्र न जग्मुरित्यर्थः । एतेन तेषां राज्ञां विष्णुभक्तत्वं सनातनधर्मित्वञ्च सूचितम् । केवलं विभीषणराज्यद्वीपं विहाय सर्वे द्वीपास्तैः स्वायत्तीकृता इति भावः । एतेन लङ्कातः पूर्वः सकलोऽपि भूभागस्तैर्विजित आसीदिति सूच्यते ।

भाषा

अपनी भुजा के पराक्रम से टापुओं के राजाओं को नष्ट कर देने में प्रवृत्त ये दक्षिण चालुक्यवंशीय राजा, लङ्का में रामभक्त विभीषण के राज्य में श्री रामचन्द्र की स्थिति है ऐसा सोचकर केवल उसपर आक्रमण करने में अग्रसर न हुए । अर्थात् केवल विभीषण के टापू लंका को छोड़कर अन्य सब टापुओं को उन्होंने जीत लिया ।

द्वीपेषु कर्पूरपरागपाण्डु-ष्वास्वाद्य लीलापरिवर्तनानि ।
भ्रान्त्या तुषाराद्रितटे लुठन्तः शीतेन खिन्नास्तुरगा यदीयाः ॥६७॥

अन्वयः

यदीयाः तुरगाः कर्पूरपरागपाण्डुषु द्वीपेषु लीलापरिवर्तनानि आस्वाद्य तुषाराद्रितटे भ्रान्त्या लुठन्तः शीतेन खिन्नाः ।

व्याख्या

येषामिमे इति यदीया यन्नृपसम्बन्धिनस्तुरगा अश्वा कर्पूरस्य परागश्चूर्णं तद्वत्पाण्डुषु शुक्लेषु द्वीपेषु लीलया क्रीडया परिवर्तनानि परिभ्रमणान्यास्वाद्याऽनुभूय, भूमावुपविश्य परिश्रान्तिनिरासायाऽङ्गानिप्रसार्य धूलिधूसरास्सन्तोऽङ्गत्रोटनानि वाऽनुभूय कृत्वा तुषाराद्रितटे हिमाचलप्रान्ते (शुक्लवर्णद्वीपस्य) भ्रान्त्या कर्पूरद्वीप-भ्रमेण लुठन्तश्चलन्तः परिश्रान्तिनिवारणायाऽङ्गपरिवर्तनं कुर्वन्तो वा सन्तः शीतेन शैत्येन खिन्ना दुःखिता बभूवुः। तुषाराद्रितटे कर्पूरवच्छुभ्रवर्णद्वीप भ्रान्तिनिरूपणाद्भ्रान्तिमानलङ्कारः। 'साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान्प्रतिभोत्थितः।' एतेन हिमाचलपर्यन्तमेतेषां विजयः सूच्यते।

भाषा

इन राजाओं के घोड़े, कपूर के चूर्ण के समान सफेद कर्पूर द्वीप के टापुओं में टहलने का सौख्य प्राप्त कर या थकावट हटाने के लिये लोटपोट करने का सौख्य प्राप्त कर, उसी भ्रम से बरफ़ से ढके हुए सफेद हिमालय पर्वत पर चलने से या लोटने से शीत से बहुत पीड़ित हुए।

इतः परं षड्भिः श्लोकैस्तैलपं नृपं वर्णयति—

श्रीतैलपो नाम नृपः प्रतापी क्रमेण तद्वंशविशेषकोऽभूत्।
क्षणेन यः शोणितपङ्कशेषं संख्ये द्विषां वीररसश्चकार ॥६८॥

अन्वयः

यः संख्ये द्विषां वीररसं क्षणेन शोणितपङ्कशेषं चकार (एवम्भूतः) श्री तैलपः नाम प्रतापी नृपः क्रमेण तद्वंशविशेषकः अभूत्।

व्याख्या

यः संख्ये युद्धे 'मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्' इत्यमरः। द्विषां शत्रूणाम् 'द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः' इत्यमरः। वीररसमुत्साहं जलञ्च क्षणेनाऽल्पकालेन शोणितस्य रुधिरस्य पङ्कः कर्दम एव शेषोऽवशिष्टांशो यस्य तं चकार प्रकटयाञ्चकारैवम्भूतः श्री तैलपो नाम प्रतापी प्रभाववान्नृपो राजा क्रमेण क्रमशः स चाऽसौ वंशश्च तद्वंशस्तस्य विशेषकस्तिलकोऽभूत्। "तमालपत्रतिलकचित्रकाणि विशेषकम्" इत्यमरः। यस्य प्रतापोष्मणा वीररसरूपे जले शोषिते रुधिरपङ्कमेवाऽवशिष्टमिति भावः।

भाषा

क्रम से उस वंश का तिलकरूप प्रतापी श्री तैलप नाम का राजा हुवा, जिसने युद्ध में देखते २ शत्रुओं के वीररस रूपी जल को अपने प्रताप की गर्मी से सुखा कर खून के कीचड के रूप में परिणत कर दिया। अर्थात् शत्रुओं की वीरता नष्ट करते हुए युद्धभूमि को खून से भर दिया।

विश्वम्भराकण्टकराष्ट्रकूट-समूलनिर्मूलनकोविदस्य।
सुखेन यस्यान्तिकमाजगाम चालुक्यचन्द्रस्य नरेन्द्रलक्ष्मीः ॥६९॥

अन्वयः

नरेन्द्रलक्ष्मीः विश्वम्भराकण्टकराष्ट्रकूटसमूलनिर्मूलनकोविदस्य चालुक्यचन्द्रस्य यस्य अन्तिकं सुखेन आजगाम।

व्याख्या

नरेन्द्राणां प्रतिपक्षभूपानां लक्ष्मी राज्यश्रीर्विश्वम्भराया भूमेः कण्टकभूतः कष्टदायको यो राष्ट्रकूटस्तन्नाम-राजवंशस्तस्य समूलं यथास्यात्तथा निर्मूलने विनाशकरणे कोविदो निपुणस्तस्य चालुक्यचन्द्रस्य चालुक्यवंशे चन्द्रोपमस्य यस्य श्रीतैलपस्याऽन्तिकं समीपं सुखेन प्रेम्णाऽऽजगाम प्राप्ता। राष्ट्रकूटराजवंशे नष्टे सति तस्य राज्यश्रीरेनं वृतवती।

भाषा

पृथ्वी पर कण्टक रूप राठौर वंश के राजाओं को समूलनष्ट करने में प्रवीण, चालुक्य वंश के चन्द्ररूप उस तैलप राजा के पास विपक्षी राजाओं की राज्यश्री सुख से आ गई।

शौर्योष्मणा स्विन्नकरस्य यस्य संख्येषु खड्गः प्रतिपक्षकालः।
पुरन्दरप्रेरितपुष्पवृष्टि-परागसङ्गान्निबिडत्वमाप ॥७०॥

अन्वयः

संख्येषु शौर्योष्मणा स्विन्नकरस्य यस्य प्रतिपक्षकालः खड्गः पुरन्दरप्रेरितपुष्पवृष्टिपरागसङ्गात् निबिडत्वम् आप।

व्याख्या

संख्येषु युद्धेषु शूरस्य भावः शौर्यं तद्रूपेणोष्मणा पराक्रमोष्मणा स्विन्नः स्वेदेनार्द्रः करो हस्तो यस्य तस्य यस्य श्री तैलपस्य प्रतिपक्षाणां शत्रूणां कालः यमरूपो नाशकरखड्गः पुरन्दरेणेन्द्रेण 'पुरुहूतः पुरन्दरः' इत्यमरः। प्रेरिता कृता या पुष्पाणां कुसुमानां वृष्टिर्वर्ष तस्याः परागस्य सुमनोरजसः 'परागः सुमनोरजः' इत्यमरः। सङ्गात्सम्पर्कान्निबिडत्वं घनत्वमाप प्राप। परागसम्पर्कात्खड्गे स्वेदजलार्द्रत्वस्य निवारणादृढतया हस्तेन खड्गधारणं जातमतः खड्गहस्तयोर्विरलसम्बन्धस्याभावाद् घनसम्बन्धो जात इति भावः। शौर्ये ऊष्माभेदात्खड्गे प्रतिपक्षकालाभेदाच्च रूपकम्।

भाषा

युद्धों में पराक्रमरूपगर्मी से, पसीने से भरे हाथ वाले राजा का, शत्रुओं का कालरूप खड्ग, इन्द्र द्वारा की हुई पुष्पवृष्टि के पराग के सम्बन्ध से गाढ़ापन आ जाने से, हाथ में अधिक दृढ़ हो गया। अर्थात् हाथ में पसीना आ जाने से कोई वस्तु दृढ़ता से नहीं पकड़ी जा सकती। मिट्टी लगा लेने से फिर दृढ़ता आ जाती है।

यस्याञ्जनश्यामलखड्गपट्ट-जातानि जाने धवलत्वमापुः।
अरातिनारीशरकाण्डपाण्डु-गण्डस्थलीनिर्लुठनाद्यशांसि ॥७१॥

अन्वयः

यस्य अञ्जनश्यामलखड्गपट्टजातानि यशांसि अरातिनारीशरकाण्डपाण्डुगण्डस्थलीनिर्लुठनात् धवलत्वम् आपुः (इति) जाने।

व्याख्या

यस्य राज्ञस्तैलपस्याऽञ्जनवत्कज्जलवच्छ्यामलः कृष्णः खड्ग एव पट्टस्तस्माज्जातानि प्रादुर्भूतानि यशांसि कीर्तय अरातीनां शत्रूणां नार्यः स्त्रियस्तासां शरकाण्डवत् गुन्द्रदण्डवत् 'गुन्द्रस्तेजनकः शरः' इत्यमरः। 'सरहरी' इति भाषायां प्रसिद्धम्। पाण्डुवर्णा श्वेता गण्डस्थल्यः कपोलास्तासु निर्लुठनात्सम्पर्काद्धवलत्वं शुक्लत्वमापुर्जग्मुः। इति जाने तर्कयामि। अञ्जनेन सह खड्गस्य श्यामलत्वेन सादृश्य दर्शनाद्गण्डस्थल्याः पाण्डुत्वेन शरकाण्डेन सादृश्याच्चोपमा।

भाषा

जिस राजा तैलप के कज्जल के समान काली तलवार रूपी पट्टी से समुत्पन्न यश, शत्रुओं की स्त्रियों के सरहरी के डण्डे के समान सफेद पड़े हुवे कपोलस्थलों के सम्पर्क से श्वेतवर्ण हो गये थे—ऐसा मैं समझता हूँ। अर्थात् काले रङ्ग के खड्ग से शुभ्रवर्ण यश की उत्पत्ति असम्भव है। इसलिये यह यश का श्वेतवर्ण शत्रुओं की स्त्रियों के सफेद पड़ गए हुए गण्डस्थलों की सफेदी के सम्बन्ध से प्राप्त हुआ होगा ऐसा मैं समझता हूँ।

स्फूर्जद्यशोहंसविलासपात्रं निस्त्रिंशनीलोत्पलमुत्प्रभं यः।
उत्तंसहेतोरिव वीरलक्ष्म्याः संग्रामलीलासरसश्चकर्ष ॥७२॥

अन्वयः

यः संग्रामलीलासरसः स्फूर्जद्यशोहंसविलासपात्रम् उत्प्रभं निस्त्रिंशनीलोत्पलं वीरलक्ष्म्याः उत्तंसहेतोः इव चकर्ष।

व्याख्या

यः श्रीतैलपः संग्रामो युद्धमेव लीलासरः क्रीडातडागस्तस्मात्स्फूर्जत् प्रवर्धमानं यश एव हंसस्तस्य विलासपात्रं क्रीडास्थानमुत्कृष्टा प्रभा कान्तिर्यस्य तदुत्प्रभं निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्य इति निस्त्रिंशः खड्ग एव नीलोत्पलं नीलकमलं वीराणां लक्ष्मीः श्रीस्तस्या उत्तंसहेतोरिव कर्णपूररचनार्थमिव चकर्ष कृष्टवान्। 'उत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे' इत्यमरः। संग्रामे लीलासरोभेदः। यशसि हंसाभेदः, शुक्लत्व साम्यात्। एतावुभावभेदौ निस्त्रिंशाभेदापन्न-नीलोत्पले हंसविलासपात्रत्वारोपे कारणत्वेन परिगृहीताविति परम्परित-रूपकम्। खड्ग-कर्षणे लक्ष्म्या उत्तंसकरणस्य हेतुत्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा।

भाषा

जिस राजा तैलप ने युद्धभूमि रूपी क्रीडासर के फैलने वाले यश रूपी हंस के क्रीडास्थान भूत चमकने वाले खड्गरूपी नीलकमल को मानो वीर लक्ष्मी के शिरोभूषण बनाने के लिये खींचा। अर्थात् जिस प्रकार क्रीडावापी से हंस को आनन्दित करने वाले चमकदार नीले कमल को निकाल कर कोई अपनी प्रेयसी को भूषित करता है उसी प्रकार युद्ध भूमि से फैलने वाले यश के विलासस्थानरूप चमकने वाले खड्ग को वीरता की शोभा के लिये उसने खींचा।

विधाय सैन्यं युधि साक्षिमात्रं दासीकृतायाः प्रतिपक्षलक्ष्म्याः ।
यः प्रातिभाव्यार्थमिवाजुहाव महाभुजः शत्रुनरेन्द्रकीर्तिम् ॥७३॥

अन्वयः

महाभुजः यः युधि सैन्यं साक्षिमात्रं विधाय दासीकृतायाः प्रतिपक्ष-लक्ष्म्याः प्रातिभाव्यार्थम् इव शत्रुनरेन्द्रकीर्तिम् आजुहाव ।

व्याख्या

महान् भुजो बाहुर्यस्य स दीर्घबाहुर्यस्तैलपो नाम नृपो युधि युद्धे सैन्यं सेनां साक्षिमात्रं विधाय केवलं साक्षितामापाद्य स्वयमेव दासीकृताया वशीकृतायाः प्रतिपक्षाणां शत्रूणां लक्ष्म्याः श्रियः प्रतिभूः प्रतिलग्नकः (जामिन इति भाषायाम्) तस्य भावः प्रातिभाव्यं तदर्थं शत्रवश्चते नरेन्द्राश्च राजानस्तेषां कीर्तिर्यश आजुहावाऽऽहूतवान् । शत्रुनरेन्द्रकीर्तेराह्वाने प्रातिभाव्यस्य फलत्वेनोत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

उस तैलप राजा ने युद्ध में सेना को केवल साक्षिमात्र बना कर स्वयं अपने पराक्रम से शत्रुओं की राजलक्ष्मी को दासी बनाकर उसकी जमानत करने के लिये विपक्षी राजाओं की कीर्ति को अपने पास बुला लिया । अर्थात् शत्रुओं की राजलक्ष्मी के साथ ही उनकी कीर्ति भी छीन ली ।

अथ पञ्चभिः श्लोकैः सत्याश्रयं वर्णयति कविः—

चालुक्यवंशामलमौक्तिकश्रीः सत्याश्रयोऽभूदथ भूमिपालः ।
खड्गेन यस्य भ्रुकुटिक्रुधेव द्विषां कपालान्यपि चूर्णितानि ॥७४॥

अन्वयः

अथ यस्य भ्रुकुटिक्रुधा इव खड्गेन द्विषां कपालानि अपि चूर्णितानि (सः) चालुक्यवंशामलमौक्तिकश्रीः सत्याश्रयः भूमिपालः अभूत् ।

व्याख्या

अथ श्री तैलपानन्तरं यस्य राज्ञो भ्रुकुटेः क्रुद् तेनेव भ्रुकुटि-प्रदर्शित-क्रोधरूपधारिणा खड्गेनाऽसिना द्विषां शत्रूणां कपालान्यपि शिरांस्यपि चूर्णितानि चूर्णी-

कृतानि स चालुक्यस्य वंशः कुलमेव वंशोवेणुस्तस्याऽमलं विशुद्धं मौक्तिकं तस्य श्रीः शोभा यस्मिन्स सत्याश्रयो नाम भूमिपालो राजाऽभूत् । खड्गोपरि भ्रुकुटि-क्रोधस्योत्प्रेक्षणाद्वस्तूत्प्रेक्षा । वंशे वेणुत्वारोपो राजनि मौक्तिकत्वारोपे कारण-मिति परम्परितरूपकम् ।

भाषा

श्री तैलप राजा के अनन्तर चालुक्य कुल में बांस के स्वच्छ मोती की कान्ति के समान तेजस्वी सत्याश्रय नाम का राजा हुवा जिसकी क्रुद्धावस्था की भ्रुकुटी के क्रोध स्वरूप तलवार ने शत्रुओं के मस्तकों को भी चूर २ कर दिया ।

यस्येषवः संयुगयामिनीषु प्रोतप्रतिक्ष्मापतिमौलिरत्नाः ।
गृहीतदीपा इव विन्दते स्म खड्गान्धकारे रिपुचक्रवालम् ॥७५॥

अन्वयः

संयुगयामिनीषु यस्य प्रोतप्रतिक्ष्मापतिमौलिरत्नाः इषवः गृहीतदीपाः इव खड्गान्धकारे रिपुचक्रवालं विन्दते स्म ।

व्याख्या

संयुगा युद्धान्येव यामिन्यो रात्रयस्तासु युद्धरात्रिषु 'संप्रहाराभि-सम्पातकलि संस्फोटसंयुगाः' इत्यमरः । यस्य राज्ञः सत्याश्रयस्य प्रोतान्यनुस्यूतानि प्रतिक्ष्मा-पतीनां प्रतिपक्षभूपतीनां मौलिनां मुकुटानां रत्नानि मणयो येषु त इषवो बाणा गृहीता दीपा यैस्ते गृहीत-दीपा इव. बाणेषु शत्रूणां शिरोरत्नान्यनुस्यूतानि, रत्नकिरणैश्चान्धकाराभावः । खड्ग एवाऽन्धकारः श्यामलत्वात्तस्मिन् रिपूणां शत्रूणां चक्रवालं मण्डलम् । 'चक्रवालन्तु मण्डलम्' इत्यमरः । विन्दते स्म जानन्ति स्म अथवा विचारयन्ति स्म 'विद विचारणे' इति रुधादिस्थस्य विद धातोरात्मने पदे लटि प्रथमपुरुषस्य बहुवचने 'विन्दते' इति रूपम् । अनुस्यूत-राजमौलिरत्नेषु बाणेषु गृहीतदीपकस्य सम्भावनादुत्प्रेक्षा ।

भाषा

युद्धरूपी रात्रियों में, उस सत्याश्रय राजा के, विपक्षी राजाओं के मस्तक के मणियों से नथे बाण, खड्गरूपी अन्धकार में शत्रु समूह की, मानो दीपक लेकर पहचान कर रहे थे । अर्थात् उसके बाण इतने तीखे थे कि मणियों में भी छिद्र कर देते थे और वे मणी उनमें नथ जाते थे ।

अवन्ध्यपातानि रणाङ्गणेषु सलीलमाकृष्टधनुर्गुणस्य ।
यस्यानमत्कोटितया व्यराज-दस्त्राणिचुम्बन्निव चापदण्डः ॥७६॥

अन्वयः

रणाङ्गणेषु सलीलम् आकृष्टधनुर्गुणस्य यस्य चापदण्डः आनमत्कोटितया अवन्ध्यपातानि अस्त्राणि चुम्बन् इव व्यराजत् ।

व्याख्या

रणा एव युद्धान्येवाऽङ्गणान्यजिराणि 'अङ्गणं चत्वराजिरे' इत्यमरः । तेषु युद्धाजिरेषु लीलया विलासेन सहितं सलीलमाकृष्टो धनुषश्चापस्य गुणो ज्या येन सः तस्य यस्य सत्याश्रयनृपस्य चापदण्डो धनुर्दण्डः 'धनुश्चापौ धन्वशरासन कोदण्डकार्मुकम्' इत्यमरः । आसमन्तान्नमन्त्यौ कोटी प्रान्तभागौ 'स्त्रियः पाल्यश्रिकोटयः' इत्यमरः । यस्य तस्य भावस्तत्ता तया प्रव्हीभूताग्रतयाऽवन्ध्योऽमोघः पातो घातो येषां तानि सफलसञ्चलनान्यस्त्राणि चुम्बन्निव प्रेम्णा स्पृशन्निव रराज शुशुभे । चापदण्डेऽस्त्रचुम्बनरूप क्रियाया उत्प्रेक्षणात्क्रियोत्प्रेक्षा ।

भाषा

युद्धरूपी आंगनों में सरलता से धनुष की डोरी को खींचने वाले उस सत्याश्रय राजा का धनुष दोनों नोकों के झुक आने से मानो अमोघ मार वाले अस्त्रों का चुम्बन करता हुआ शोभित होता था ।

भूभृत्सहस्रार्पितदेहरन्ध्रैः [१]क्रौञ्चाचलच्छिद्रविशारदानाम् ।
सेहे न गर्वः पृथुसाहसस्य यस्येषुभिर्भार्गवमार्गणानाम् ॥७७॥

अन्वयः

पृथुसाहसस्य यस्य भूभृत्सहस्रार्पितदेहरन्ध्रैः इषुभिः क्रौञ्चाचलच्छिद्रविशारदानां भार्गवमार्गणानां गर्वो न सेहे ।

---

[१] हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रमिति मेघदूते कालिदासः

व्याख्या

पृथुर्विशालस्साहसः पराक्रमो यस्य तस्य यस्य राज्ञः सत्याश्रयस्य भूभृतां राज्ञां पक्षे पर्वतानां सहस्राणि तेभ्योऽर्पितानि दत्तानि देहेषु शरीरेषु रन्ध्राणि-च्छिद्राणि यैस्तैरिषुभिर्बाणैः क्रौञ्चाचलस्य क्रौञ्चपर्वतस्य छिद्रे बिले बिलकरणे वा विशारदा निपुणास्तेषां भार्गवस्य परशुरामस्य मार्गणा बाणास्तेषां गर्वो दर्पो 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः । दर्पोऽपलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' इत्यमरः । न सेहे न सोढः । भार्गवेण केवलमेकस्मिन्क्रौञ्चभूभृति च्छिद्रं कृतमनेन तु बहुषु भूभृत्स्वति भार्गवादस्य वैशिष्ट्यम् । तस्माद्व्यति-रेकध्वनिः ।

भाषा

उस बड़े साहसी राजा सत्याश्रय के हजारों भूभृतों (राजाओं) पक्ष में (पहाड़ों) के शरीरों में छिद्र करने वाले बाणों ने क्रौञ्च भूभृत् (पर्वत) में छिद्र करने में प्रवीण परशुराम के बाणों का घमण्ड नहीं सहन किया । अर्थात् परशुराम के बाणों ने केवल एक क्रौंच पर्वत में छेद किया था किन्तु इसके बाणों ने हजारों भूभृतों (राजाओं) को छेदा था इसलिए इनका कार्य उनसे अधिक महत्व का था ।

दृप्तारिदेहे समरोपमर्द-सूत्रावशेषस्थितहारदाम्नि ।
यज्ञोपवीतभ्रमतो बभूव यस्य प्रहर्तुः क्षणमन्तरायः ॥७८॥

अन्वयः

प्रहर्तुः यस्य समरोपमर्दसूत्रावशेषस्थितहारदाम्नि दृप्तारिदेहे यज्ञो-पवीतभ्रमतः क्षणम् अन्तरायः बभूव ।

व्याख्या

प्रहर्तुः प्रहारं कुर्वतो यस्य राज्ञः सत्याश्रयस्य समरे रणे 'अस्त्रियां समरानी-करणाः कलहविग्रहौ' इत्यमरः । य उपमर्दो जनानां परस्परसंघट्टस्तेन सूत्रमेव तन्तुरेवावशेषस्थितो मौक्तिकादीनां भग्नत्वात्सूत्रमेवाऽवशिष्टं यस्यैवम्भूत हार एव दाम माला यस्मिन् तस्मिन् दृप्ता मदान्धा अरयः शत्रवस्तेषां देहे शरीरे यज्ञो-पवीतस्य भ्रमतो भ्रान्त्याऽयं यज्ञोपवीती ब्राह्मणः किमिति धिया, क्षणं क्षणमात्र-

मन्तरायो विघ्नोऽभूत् । 'विघ्नोन्तरायः प्रत्यूहः' इत्यमरः । हारसूत्रे यज्ञोपवीतस्य भ्रान्तिप्रतिपादनाद् भ्रान्तिमानलङ्कारः ।

भाषा

प्रहार करने वाले उस सत्याश्रय राजा को, युद्ध की धिगाधिगी में मोती के हार में से मोतियों के टूटकर गिर पड़ने से केवल डोरा मात्र अवशेष धारण करने वाले मदान्ध शत्रुओं के शरीर पर वार करने में, यह डोरा ब्राह्मणों का यज्ञोपवीत तो नहीं है, इस भ्रम से क्षणमात्र के लिए रुकावट हो जाया करती थी । अर्थात् यह ब्राह्मण तो नही है ऐसा भ्रम हो जाता था ।

अथाऽष्टभिः श्लोकैर्जयसिंहदेवं वर्णयति कविः—

प्राप्तस्ततः श्रीजयसिंहदेवश्चालुक्यसिंहासनमण्डनत्वम् ।
यस्य व्यराजन्त गजाहवेषु मुक्ताफलानीव करे यशांसि ॥७६॥

अन्वयः

ततः यस्य गजाहवेषु यशांसि करे मुक्ताफलानि इव व्यराजन्त, (सः) श्री जयसिंहदेवः चालुक्यसिंहासनमण्डनत्वं प्राप्तः ।

व्याख्या

ततः सत्याश्रयानन्तरं यस्य राज्ञो गजानां हस्तिनामाहवाः संग्रामास्तेषु 'अभ्यामर्दसमाघात संग्रामाभ्यागमाहवाः' इत्यमरः । यशांसि कीर्तयः करे हस्ते मुक्ताफलानीव गजमौक्तिकानीव व्यराजन्त विरेजुः सुशोभितानिजातानीत्यर्थः । सः श्रीजयसिंहदेवस्तन्नामा राजा चालुक्यानां चालुक्यवंशीयानां राज्ञां सिंहासनं तस्य मण्डनत्वं शोभाविधायकत्वं प्राप्तः । तत्सिंहासनस्यालङ्कारभूतो जात इत्यर्थः । शुक्लवर्णसादृश्याद्यशस्सु मुक्ताफलत्वस्योत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

राजा सत्याश्रय के अनन्तर श्री जयसिंह देव ने चालुक्य वंशीय राजाओं की राजगद्दी को सुशोभित किया, जिसके, हाथी की सेना के युद्ध में प्राप्त यश मानो हाथ में पहिने हुवे गजमौक्तिक के समान शोभित होते थे ।

यस्य प्रतापेन कदर्थ्यमानाः प्रत्यर्थिभूपालमहामहिष्यः ।
अन्वस्मरंश्चन्दनपङ्किलानि प्रियाङ्कपालीपरिवर्तनानि ॥८०॥

अन्वयः

यस्य प्रतापेन कदर्थ्यमानाः प्रत्यर्थिभूपालमहामहिष्यः चन्दनपङ्किलानि प्रियाङ्कपालीपरिवर्तनानि अन्वस्मरन् ।

व्याख्या

यस्य राज्ञो जयसिंहदेवस्य प्रतापेन प्रभावेण कदर्थ्यमानाः पीडिताः प्रत्यर्थिनः प्रतिपक्षाश्चते भूपाला राजानः 'द्विड्विपक्षाहितामित्र दस्यु शात्रव शत्रवः । अभिघाति परारति प्रत्यर्थि परिपन्थिनः' इत्यमरः । तेषां महा-महिष्यः कृताभिषेकाः स्त्रियश्चन्दनेन पङ्किलानि पङ्कः कर्दमस्सञ्जात एषु इति पङ्किलानि चन्दनकर्दमयुक्तानि प्रियाणां स्वपतीनामङ्कपालीष्वङ्कश्रेणिषु परिवर्तनानि तत्र स्वाङ्ग-परिवर्तन-जनित-सुखान्यन्वस्मरन् । साम्प्रतं प्रतापोष्मणा सन्तप्ता अरिमहिष्यो भूतकालिकचन्दनपङ्कलिप्तस्वपत्यङ्कशैत्यानुभव-सुखं स्मरन्ति स्मेत्यर्थः । महिषीशब्दस्य श्लिष्टत्वाद्यथा महिष्यो निदाघे शैत्यार्थं पङ्के लुठन्ति तथैवैता राजस्त्रियः पराजयात्पूर्वं शैत्यार्थं स्वपत्यङ्क-लिप्तचन्दन-पङ्केषु लुठन्ति स्मेति । चिन्तामूलकस्य स्मरणस्य सद्भावान्न स्मरणालङ्कारः । यतः सादृश्य-मूलकस्यैव तस्याऽलङ्कारत्वम् ।

भाषा

जिस राजा जय सिंह देव के प्रताप को गर्मी से संतप्त विपक्षी राजाओं की रानियाँ ठंडक पाने की इच्छा से अपने प्रिय पति के चन्दन से लिप्त गीली गोदों में पड़कर करवटें लेने का स्मरण करती थीं । (गर्मी में जैसे भैंसें किचड़ों में लोट पोट करना पसन्द करती हैं वैसे ये रानियाँ भी गर्मी में अपने पतियों की चन्दन के अधिक लेप से गीली गोदों में ठंढक पाने के लिये लोट पोट किया करती थीं । परन्तु अब पतियों के मर जाने से ये रानियाँ इस राजा की प्रताप की गर्मी से संतप्त होकर उसका केवल स्मरण करती थीं । (महिषी शब्द के श्लिष्ट होने से यह अर्थ निकलता है । महिषी माने रानी तथा भैंस ।)

प्रतापभानौ भजति प्रतिष्ठां यस्य प्रभातेष्विव संयुगेषु ।
सूर्योपलानामिव पार्थिवानां केषां न तापः प्रकटीबभूव ॥८१॥

अन्वयः

प्रभातेषु इव संयुगेषु यस्य प्रतापभानौ प्रतिष्ठां भजति (सति) सूर्योपलानाम् इव केषां पार्थिवानां तापः न प्रकटीबभूव ।

व्याख्या

प्रभातेषु प्रत्यूषेषु 'प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि प्रभातं' चेत्यमरः । इव संयुगेषु युद्धेषु यस्य राज्ञो जयसिंहदेवस्य प्रताप एव भानुस्सूर्यस्तस्मिन् प्रतिष्ठां भजति विद्योतमाने सति सूर्योपलानामिव सूर्यकान्तमणीनामिव केषां पार्थिवानां विपक्षिनृपाणां तापस्सन्तापः संज्वलनं न प्रकटीबभूव किन्तु समेषां विपक्षिणां सन्तापो जात एव । अत्र प्रतापे भानुत्वारोपाद्रूपकम् । प्रभात संयुगयोः सूर्योपलपार्थिवयोश्चोपमा । केषां न प्रकटीबभूवेत्यर्थापत्तिश्चेति परस्परसापेक्षत्वादेतेषां सङ्करः ।

भाषा

प्रातः काल के सदृश युद्ध में, सूर्य के सदृश उस राजा जयसिंहदेव के प्रताप के विद्यमान होने पर सूर्य मणियों के समान किन राजाओं में सन्ताप प्रकट न हुवा । अर्थात् सब राजा इसके प्रताप से सन्तप्त हो गये ।

यात्रासु यस्य ध्वजिनीभरेण दोलायमाना सकला धरित्री ।
आर्द्रव्रणाधिष्ठितपृष्ठपीठ-मकर्मठं कूर्मपतिं चकार ॥८२॥

अन्वयः

यस्य यात्रासु ध्वजिनीभरेण दोलायमाना सकला धरित्री आर्द्रव्रणाधिष्ठितपृष्ठपीठं कूर्मपतिं अकर्मठं चकार ।

व्याख्या

यस्य राज्ञो जयसिंहदेवस्य यात्रासु युद्धयात्रासु ध्वजिन्याः सेनायाः 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः' इत्यमरः । भरेण भारेण दोला इवाऽऽचरतीति दोलायमाना सञ्चालिता सकला समग्रा 'समग्रं सकलं पूर्णम्' इत्यमरः ।

धरित्री पृथ्व्याऽऽर्द्रव्रणेन पृथिवी-सञ्चलनजन्य-सङ्घर्षणोत्पन्ननूतनव्रणेनाऽधिष्ठितं युक्तं पृष्ठपीठं पृष्ठभागो यस्य तं कूर्माणां पतिं श्रेष्ठं विष्णुद्वितीयावतारं पृथिव्या आधारभूतेन स्थितं कच्छपपतिमकर्मठं निष्क्रियं 'कर्मशूरस्तु कर्मठः' इत्यमरः। किं-कर्तव्यता-विमूढं चकार कृतवती।

भाषा

जिस राजा जयसिंहदेव की युद्धयात्राओं में, चली सेना के बोझे से डगमगाने वाली समग्र पृथ्वी ने, (अपनी रगड़ से उत्पन्न) ताजे घावों से भरी पीठवाले विष्णु भगवान् के दूसरे अवतार कच्छपराज को घबड़ाहट में डाल दिया।

किरीटमाणिक्यमरीचिवीचि-प्रच्छादिता यस्य विपक्षभूपाः।
चिताग्निभीत्या समराङ्गणेषु न संगृहीताः सहसा शिवाभिः ॥८३॥

अन्वयः

यस्य किरीटमाणिक्यमरीचिवीचिप्रच्छादिताः विपक्षभूपाः समराङ्गणेषु शिवाभिः चिताग्निभीत्या सहसा न संगृहीताः।

व्याख्या

यस्य राज्ञः, किरीटेषु मुकुटेषु माणिक्यानि मणयस्तेषां मरीचीनां किरणानां वीचिभिस्तरङ्गैः प्रच्छादिता आवृता विपक्षभूपा विपक्षनृपाः समराङ्गणेषु युद्ध-भूमिषु शिवाभिः शृगालीभिः देदीप्यमानत्वाच्चिताग्निभीत्या चिताग्निबुद्ध्या भयेन सहसा झटिति न संगृहीता न भक्षणार्थं परिगृहीताः। माणिक्यमरीचिषु चिताग्निप्रतिपादनाद्भ्रान्तिमानलङ्कारो व्यङ्ग्यः।

भाषा

किरीट में लगे हुए मणियों की किरणों की लहरों से आच्छादित, उस जयसिंह देव राजा के विपक्षी मृत राजाओं को, युद्धभूमि में सियारियों ने, उस चमक को चिता की आग समझ कर, डर से शीघ्र ग्रहण नहीं किया अर्थात् नहीं खाया।

यात्रासु दिक्पालपुरीं विलुण्ठ्य न दिग्गजान्केवलमग्रहीद्यः।
पलायितास्ते जयसिन्धुराणां गन्धेन सप्तच्छदबान्धवेन ॥८४॥

अन्वयः

यः यात्रासु दिक्पालपुरीं विलुण्ठ्य दिग्गजान् केवलं न अग्रहीत् । (यतः) ते जयसिन्धुराणां सप्तच्छदबान्धवेन गन्धेन पलायिताः ।

व्याख्या

यो नृपो जयसिंह देवो यात्रासु युद्धयात्रासु दिक्पालानां दिगीशानां पुरीं नगरीं, अत्र वचनमविवक्षितम् । विलुण्ठ्य लुण्ठयित्वा दिग्गजान् केवलं नाऽग्रहीत् । दिग्गजान्विहाय सर्वाणि वस्तुजातान्यग्रहीदित्यर्थः । यतस्ते दिग्गजा जयसिन्धुराणां विजयहस्तिनां सप्तच्छदस्य वृक्षविशेषस्य 'सप्तपर्णो विशालत्वक् शारदो विषमच्छदः' इत्यमरः । बान्धवस्समानस्तेन गन्धेन मदगन्धेन पलायिताः कान्दिशीका जाताः । जयसिन्धुराणां मदगन्धसहनेऽसमर्था दिग्गजा दूरत एव पलायिता इति भावः ।

भाषा

वह राजा अपनी दिगन्त युद्ध यात्राओं में दिक्पालों की पुरियों को लूटकर केवल दिग्गजों को नहीं पा सका । क्योंकि वे दिग्गज इस राजा के विजयी हाथियों के सप्तपर्ण वृक्ष के समान गन्धवाले मद की गन्ध से डरकर भाग गये थे ।

अपारवीरव्रतपारगस्य पराङ्मुखा एव सदा विपक्षाः ।
अधिज्यचापस्य रणेषु यस्य यशः परं सम्मुखमाजगाम ।।८५।।

अन्वयः

अपारवीरव्रतपारगस्य अधिज्यचापस्य यस्य रणेषु विपक्षाः सदा पराङ्मुखाः एव परं यशः सम्मुखम् आजगाम ।

व्याख्या

अपारं दुर्गमं यत् वीराणां व्रतं तस्य पारं गच्छतीत्यपारवीरव्रतपारगस्तस्य पूर्णवीरव्रतधारिणो ज्यामधिगत इति अधिज्यश्चापो धनुर्यस्य स तस्य यस्य राज्ञो जसंसिहदेवस्य रणेषु युद्धेषु विपक्षाः शत्रवस्सदा नित्यं पराङमुखा एव जाताः पराजिता एवेति न सन्मुखा जाता इति भावः । परं किन्तु यशः कीर्तिः सम्मुखमाजगाम । केवलं कीर्तिस्तु सम्मुखा शत्रवस्तु पराङमुखा एव ।

भाषा

युद्धक्षेत्र में असीम वीरव्रत में पारङ्गत, चढ़ी कमानवाले धनुष को धारण करने वाले उस राजा के सामने से शत्रु लोग पराङमुख होते थे किन्तु कीर्ति उसके सम्मुख आती थी।

यशोवतंसं नगरं सुराणां कुर्वन्नगर्वः समरोत्सवेषु।
न्यस्तां स्वहस्तेन पुरन्दरस्य यः पारिजातस्रजमाससाद ॥८६॥

अन्वयः

समरोत्सवेषु अगर्वः यः सुराणां नगरं यशोवतंसं कुर्वन् पुरन्दरस्य स्वहस्तेन न्यस्तां पारिजातस्रजं आससाद।

व्याख्या

समरा रणा 'अस्त्रियां समरानीक-रणाः कलहविग्रहौ' इत्यमरः। एवोत्स-वास्तेष्वगर्वो दर्परहितो यो जयसिंहदेवः सुराणां देवानां नगरममरावतीसंज्ञकं यश एवावतंसः शिरोभूषणं यस्य 'उत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे' इत्यमरः। तम् कुर्वन् सम्पादयन्, स्वर्गपर्यन्तं यशोविस्तृतमिति भावः। पुरन्दरस्येन्द्रस्य स्वहस्तेन निजकरेण न्यस्तां परिधापितां पारिजातस्य देवपुष्पविशेषस्य स्रजं मालामाससाद प्राप्तवान्।

भाषा

युद्ध रूपी उत्सवों में निरभिमानी, देवों की नगरी अमरावती को अपने यश रूपी शिरोभूषण से सुशोभित करने वाले अर्थात् अपने यश का मुख्य स्थान बनाने वाले राजा ने इन्द्र द्वारा अपने हाथ से पहिनाई हुई पारिजात पुष्प की माला प्राप्त की।

इतः परं सर्गान्तमाहवमल्लदेवनामकं राजानं वर्णयति—

तस्मादभूदाहवमल्लदेवस्त्रैलोक्यमल्लापरनामधेयः।
यन्मण्डलाग्रं न मुमोच लक्ष्मीर्धाराजलोत्था जलमानुषीव ॥८७॥

अन्वयः

तस्मात् यन्मण्डलाग्रं धाराजलोत्था लक्ष्मीः जलमानुषी इव न मुमोच (एवम्भूतः) त्रैलोक्यमल्लापरनामधेयः आहवमल्लदेवः अभूत्।

व्याख्या

तस्माज्जयसिंहदेवात् यस्य मण्डलाग्रं कृपाणं 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्' इत्यमरः। धारा जलेन कृपाणधाराजलेनोत्तिष्ठतीति धाराजलोत्था लक्ष्मीः विजयलक्ष्मीः कृपाणसञ्चालनद्वारा युद्धेषु सर्वनृपान्पराजित्य प्राप्ता विजयश्री जलमानुषीव जलोत्पन्नमानुषी यथा जलधारायामेव प्रकटीभवति (तां कदापि न जहाति) तथैव न मुमोच न त्यक्तवती। एवम्भूतः स त्रैलोक्यमल्ल एवाऽपरं नामधेयं यस्य स आहवमल्लदेवो नाम राजा अभूत्। धाराजलोत्थलक्ष्म्या जलमानुषीसादृश्यप्रतिपादनादुपमा।

भाषा

जयसिंह देव राजा से आहवमल्लदेव जिसका दूसरा नाम त्रैलोक्यमल्ल था, उत्पन्न हुवा। जिसकी तलवार को, तलवार की धार के पानी से उत्पन्न विजयलक्ष्मी, धारा के जल में प्रकट होने वाली जलमानुषी के समान कभी त्याग नहीं करती थी। अर्थात् जल मानुषी जैसे धारा के जल में ही प्रकट होती है वैसे विजय लक्ष्मी उस राजा की तलवार की धार के तेज पानी में से शत्रुओं का नाश करने पर प्रकट होती थी।

आख्यायिकासीम्नि कथाद्भुतेषु यः सर्गबन्धे दशरूपके च।
पवित्रचारित्रतया कवीन्द्रैरारोपितो राम इव द्वितीयः ॥८८॥

अन्वयः

यः कवीन्द्रैः आख्यायिकासीम्नि कथाद्भुतेषु सर्गबन्धे दशरूपके च पवित्रचारित्रतया द्वितीयः रामः इव आरोपितः।

व्याख्या

य आहवमल्लदेवः कवीन्द्रैः कविश्रेष्ठैराख्यायिकासीम्नि गद्यकाव्य-द्वितीयभेदाख्यायिकामध्ये कथाद्भुतेषु गद्यकाव्यप्रथमभेदरूपाद्भुतकथासु सर्गबन्धे महाकाव्ये दशसु रूपकेषु 'नाटकं सप्रकरणं भाणः प्रहसनं डिमः। व्यायोग-समवकारौ वीथ्यङ्केहामृगा' इति दशरूपकाणि। च पवित्रं पुण्यं चारित्रं चरितं यस्य स तस्य भावः पवित्रचारित्रता तयोज्वलचरित्रत्वेन द्वितीयोऽन्यो राम इव दाशरथिरिवाऽऽरोपितो व्याख्यातः। राज्ञि द्वितीयरामत्वेनसंभावनयोत्प्रेक्षा। महाकविभिरस्य विषये बहवो ग्रन्था लिखिता इति ध्वन्यते।

भाषा

जिस आहवमल्लदेव राजा के चरित्र को, पवित्र अतएव निष्कलङ्क होने से महाकवियों ने दूसरे दशरथ के पुत्र राम के समान आख्यायिका, अद्भुत कथा, महाकाव्य और नाटकादि दस रूपकों में ग्रथित किया था। अर्थात् जैसे रामचन्द्र का चरित्र महाकवियों ने विभिन्न प्रकार के काव्यों में वर्णित किया है वैसे ही इसका भी चरित्र महाकवियों ने विभिन्न प्रकार के काव्यों में वर्णित किया था।

भूपेषु कूपेष्विव रिक्त-भावं कृत्वा प्रपापालिकयेव यस्य।
वीरश्रिया कीर्तिसुधारसस्य दिशां मुखानि प्रणयीकृतानि ॥८९॥

अन्वयः

यस्य प्रपापालिकया इव वीरश्रिया कूपेषु इव भूपेषु कीर्तिसुधारसस्य रिक्तभावं कृत्वा दिशां मुखानि प्रणयीकृतानि।

व्याख्या

यस्य राज्ञ आहवमल्लदेवस्य प्रपा पानीयशालिका 'प्रपा पानीयशालिका' इत्यमरः। तस्याः पालिकयेव जलप्रदानरतया नार्येव वीरश्रिया वीरलक्ष्म्या कूपेष्विव भूपेषु राजसु कीर्तिर्यशः सुधारस इवामृतरस इव तस्य रिक्तभावं शून्यत्वं विधाय कृत्वा दिशां मुखानि प्रणयीकृतानि स्नेहार्द्रीकृतानि। यथा प्रपापालिका कूपस्थसम्पूर्णजलं सर्वदिक्स्थजनान् पाययित्वा तेषां मुखानि प्रसादयति, कूपानि च जलरहितानि करोति तथैव वीरश्रीः सर्वान् विपक्ष-भूपान् कीर्तिशून्यान् विधायाऽस्य कीर्त्या सर्वा दिशो धवलयतिस्म तत्स्थाञ्जनानाऽऽनन्दयतिस्मेतिभावः। वीरलक्ष्म्याः प्रपापालिकासादृश्याद्भूपेषु कूपसादृश्याच्चोपमा। दिगन्त-विश्रान्त-यशा असौ वीर इति भावः।

भाषा

जिस राजा आहवमल्लदेव की वीरश्री ने पोसरा चलाने वाली स्त्री के समान कूपों के समान भूपों में से अमृत जल के समान यश को निकालते २ उन्हें खाली कर पोसरे पर पानी पीने वालों के मुखों के समान सब दिशाओं के मनुष्यों के मुखों को प्रसन्न कर दिया। अर्थात् आहवमल्लदेव ने वीरता से

समग्र दुष्ट राजाओं का नाश कर और उन राजाओं की कीर्त्ति नष्ट कर चारों दिशाओं में रहने वाले मनुष्यों को प्रसन्न कर दिया ।

कौक्षेयकः क्ष्मातिलकस्य यस्य पीत्वातिमात्रं द्विषतां प्रतापम् ।
आलोड्य बाष्पाम्बुभिराचचाम चोलीकपोलस्थलचन्दनानि ॥६०॥

अन्वयः

क्ष्मातिलकस्य यस्य कौक्षेयकः द्विषतां प्रतापम् अतिमात्रं पीत्वा चोलीकपोलस्थलचन्दनानि बाष्पाम्बुभिः आलोड्य आचचाम ।

व्याख्या

क्षमायाः पृथिव्यास्तिलकस्य भूषणस्य यस्य राज्ञः कौक्षेयकः कृपाणः 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्' इत्यमरः । द्विषतां शत्रूणां प्रतापं तेजोऽतिमात्रमत्यधिकं पीत्वा, शत्रूणां प्रतापं विनाश्येत्यर्थः । चोलीनां चोलदेशीयनारीणां कपोलस्थलेषु गण्डस्थलेषु शोभार्थं सुखार्थञ्च लिप्तान्यर्पितानि चन्दनानि बाष्पाम्बुभिस्तदीयाश्रुजलैरालोड्य संमथ्याऽऽचचाम पीतवान् । कृपाणः प्रतापोष्मणः शान्त्यर्थं चोलस्त्रीबाष्पाम्बुमिश्रितचन्दनं पीतवान् । कश्चिदुष्णतानिवारणाय चन्दनमिश्रितं जलं शैत्याय सेवत इत्यप्रकृतव्यवहारस्य कृपाणव्यवहारे समारोपात्समासोक्तिरलङ्कारः । 'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः' ॥

भाषा

जिस पृथ्वीभूषण राजा के खड्ग ने शत्रुओं के प्रताप को पीकर गर्मी होने से चोल देश की नारियों के कपोलों में लगे हुए चन्दन को उनके आँसुओं में घोल कर ठंढक प्राप्त करने के लिए पी लिया । अर्थात् पतियों के मर जाने से उनके कपोलों पर पहिले का लगा चन्दन उनके आसुओं से धुल गया ।

दीप्रप्रतापानलसन्निधानाद् बिभ्रत्पिपासामिव यत्कृपाणः ।
प्रमारपृथ्वीपतिकीर्तिधारां धारामुदारां कवलीचकार ॥६१॥

अन्वयः

यत्कृपाणः दीप्रप्रतापानलसन्निधानात् पिपासां बिभ्रद् इव प्रमारपृथ्वीपतिकीर्तिधाराम् उदारां धारां कवलीचकार ।

व्याख्या

यस्य राज्ञः कृपाणः खड्गो यत्कृपाण आहवमल्लदेवस्य राज्ञः कृपाणः दीप्रो दीप्तिमान्यः प्रतापानलः प्रतापरूपाग्निस्तस्य सन्निधानात्सामीप्यात्पिपासां जलं पातुमिच्छां बिभ्रद्धारयन्निव प्रमारस्य पारमारसंज्ञकराजवंशस्य ये पृथ्वीपतयो राजानस्तेषां कीर्तिधारां यशःप्रवाहरूपामुदारां महतीं धारां धारानगरीरूपां जलधारां कवलीचकार जग्राह। धाराशब्देनोभयार्थबोधात् श्लेषालङ्कारः। धाराकवलीकरणे प्रतापानलसन्निधानप्रयुक्तपिपासाधारणस्य हेतुत्वेनोत्प्रेक्षणा-द्धेतूत्प्रेक्षा।

भाषा

जिसकी तलवार ने राजा के तीव्र प्रताप रूपी अग्नि के पास रहने से मानो प्यासी होकर परमारवंश के राजाओं की कीर्ति की जलधारा रूपी उन्नत धारानगरी को जलधारा के समान पी लिया अर्थात् जीत लिया। अर्थात् पारमार वंशीय राजाओं की कीर्ति रूपी प्रसिद्ध राजधानी धारा नगरी को अपने हाथ कर लिया।

अगाधपानीयनिमग्नभूरि–भूभृत्कुटुम्बोऽपि यदीयखड्गः।
भाग्यक्षयान्मालवभर्तुरासीदेकां न धारां परिहर्तुमीशः ॥६२॥

अन्वयः

अगाधपानीयनिमग्नभूरिभूभृत्कुटुम्बः अपि यदीयखड्गः भाग्यक्षयात् मालवभर्तुः एकां धारां परिहर्तुम् ईशः न आसीत्।

व्याख्या

अगाधेऽपरिमितेऽत्यन्ततीक्ष्णे च पानीये जले खड्गधाराजले च निमग्नमन्तर्गतं नष्टं च भूरिभूभृतां बहुपर्वतानामनेकेषाञ्च राज्ञां कुटुम्बं समूहो वंशश्च यस्यैवं भूतोऽपि यदीयखड्गो भाग्यक्षयाद्दौर्भाग्याद्धारानगर्या मालवभर्तुर्मालवाधीशस्य भोजस्यैकां केवलामद्वितीयां वा धारां जलधारां धारानगरीं च परिहर्तुं त्यक्तुं क्षमस्समर्थो नाऽऽसीत्। यथेन्द्रवज्रप्रहारभीताः पर्वताः समुद्रस्याऽगाधपानीये निमग्नास्तथैव यदीयखड्गागाधधाराजले भूरि राजानो निमग्नाः संहृता इत्यर्थः। एवमगाधजलधारासमृद्धोऽपि खड्गो धारानगर्या दौर्भाग्याल्लुब्ध इवैकजलधारा-रूपामद्वितीयधारानगरीं त्यक्तुं समर्थो नाऽभवदित्यर्थः। बहुमुद्रासम्पन्न एकमुद्रार्थं न प्रयतते इति लोके प्रसिद्धम्। तथापि दौर्भाग्यात्सर्वं सम्भवति।

भाषा

जिस राजा के खड्ग के तीक्ष्ण और अथाह धारा जल में समुद्र में इन्द्र के वज्र के भय से खूब नीचे डुबकी लगाकर छिपे हुवे पर्वतों के समान अन्य राजाओं के कुटुम्बों के निमग्न अर्थात् नष्ट हो जाने पर भी धारा नगरी के दुर्भाग्य से वह खड्ग एक छोटे धारा प्रवाह के समान मालवा के राजा भोज की राजधानी धारा नगरी को न छोड़ सका। अर्थात् अनेक बड़े २ राजाओं को जीत लेने पर भी छोटी सी धारा नगरी को जीतने से वह अपने को न रोक सका।

निःशेषनिर्वासितराजहंसः खड्गेन बालाम्बुदमेचकेन।
भोजक्ष्माभृद्भुजपञ्जरेऽपि यः कीर्तिहंसीं विरसीचकार ॥९३॥

अन्वयः

बालाम्बुदमेचकेन खड्गेन निःशेषनिर्वासितराजहंसः यः भोजक्ष्माभृद्भुजपञ्जरे अपि कीर्तिहंसीं विरसीचकार।

व्याख्या

बालाम्बुदः नूतनमेघो कृष्णवर्णमेघस्तद्वन्मेचकेन श्यामेन खड्गेन कृपाणेन निश्शेषं यथा स्यात्तथा निर्वासिता स्वनिवासाद्बहिः कृता राजहंसा राजानो हंसा इवेति राजहंसा राजश्रेष्ठा पक्षे मानसं प्रापिता राजहंसपक्षिणो येन सः। य आहवमल्लदेवो नाम राजा भोजनामा क्षमाभृद्राजा तस्य भुजः पञ्जर इव तस्मिन् सर्वसुखसामग्रीनिधानेऽपि कीर्तिरूपिणीं हंसीं पतिवियोगाद्विरसीचकार दुःखसागर-निमग्नां चकार। भोजराज कीर्तिरपि निराधारा सती दुःखिता जाता। वर्षा काले मानसं यान्ति हंसा इति प्रसिद्ध्यनुरोधान्मेघान्विलोक्य हंसाः स्वस्थानं त्यजन्ति मानसञ्च गच्छन्ति। बालाम्बुदेन खड्गस्य सादृश्यादुपमा। राजसु राजहंसपक्षिणामभेदारोपात्कीर्तौ हंस्या अभेदारोपाद्भोजराजभुजे पञ्जराभेदा-रोपाच्च सावयवरूपकम्।

भाषा

जिसने नवीन मेघ के समान कृष्णवर्ण खड्ग से समस्त राजारूपी राजहंसों को भगा दिया था (मेघों को देखकर हंसपक्षी मानस सरोवर चले जाते हैं ऐसी प्रसिद्धि है) उसने भोजराजा के भुजारूपी पिंजड़े में सुरक्षित उसकी कीर्तिरूपी

हंसी को (पति वियोग से) उदास कर दिया। अर्थात् भोजराजा की कीर्ति को भी कलङ्कित कर दिया।

भोजक्षमापालविमुक्तधारा-निपातमात्रेण रणेषु यस्य।
कल्पान्तकालानलचण्डमूर्तिश्चित्रं प्रकोपाग्निरवाप शान्तिम् ॥६४॥

अन्वयः

यस्य रणेषु कल्पान्तकालानलचण्डमूर्तिः प्रकोपाग्निः भोजक्षमापाल-विमुक्तधारानिपातपात्रेण शान्तिम् अवाप (इति) चित्रम्।

व्याख्या

यस्य राज्ञो रणेषु युद्धेषु कल्पान्तस्य प्रलयस्य यः कालानलः सर्वभस्मसात्कारिप्रचण्डाग्निस्तद्वच्चण्डोग्रा मूर्तिः स्वरूपं यस्य सः 'संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः। प्रकोपाग्निः क्रोधानलो भोजएव क्षमापालो नृपस्तेन विमुक्ता त्यक्ता पक्षे प्रवाहिता धारानगरी खड्गधारा जलधारा च तस्या निपातेन पतनेन प्रवाहेण च शान्तिमवाप प्रापेति चित्रमद्भुतम्। यथा जलधारयाऽग्निः शान्तिमेति तथैव धारानगरीविजयेन राज्ञः क्रोधः शान्तिमगादित्यर्थः। कल्पान्तकालानलेन प्रकोपाग्नेस्सादृश्यादुपमालङ्कारः। श्लिष्टेन धारापदेन जलधाराया धारानगर्याः खड्गधारायाश्च ग्रहणादत्र श्लेषोऽलङ्कारः। यथा प्रलयाग्निर्भोजनृपविसृष्टजलधारानिपातमात्रेण शान्तिमाप्तुं कदापि न शक्नोति तथैव प्रलयाग्निसदृशप्रचण्डकोपाग्निरपि भोजप्रयुक्त खड्ग-धारारूपधाराजलेन न शान्तिमाप्तुं प्रभवति परञ्चाऽत्र स शान्तिमाप इति विरोधः। धारापदेन धारानगर्या विमर्शेन विरोधपरिहार इति विरोधाभासालङ्कारः।

भाषा

जिस राजा की, युद्धों में प्रलय कालीन आग के भयङ्कर स्वरूप वाली क्रोधाग्नि, राजा भोज द्वारा चलाई हुई तलवार की धार रूपी जलधारा के पड़ते ही ठंडी हो गई, यह अचम्भे की बात है। यथार्थ में उसका क्रोध, राजा भोज द्वारा त्यक्त धारा नगरी के अधः पतन से अर्थात् उसको जीत लेने से शान्त हुवा।

यः कोटिहोमानलधूमजालैर्मलीमसीकृत्य दिशां मुखानि।
तत्कीर्तिभिः क्षालयति स्म शश्व-दखण्डतारापतिपाण्डुराभिः ॥६५॥

अन्वयः

यः कोटिहोमानलधूमजालैः दिशां मुखानि मलीमसीकृत्य अखण्डतारापतिपाण्डुराभिः तत्कीर्तिभिः शश्वत् क्षालयति स्म ।

व्याख्या

य आहवमल्लदेवः कोटिसंख्याका होमा यज्ञास्तेषामनलोऽग्निस्तस्य धूमजालैर्धूमसमूहैर्दिशां काष्ठानां 'दिशस्तु ककुभः काष्ठा आशाश्चहरितश्चता' इत्यमरः, मुखानि मलीमसीकृत्य 'अभूततद्भावे च्विः प्रत्ययः' मलिनीकृत्य 'मलीमसन्तु मलिनं कच्चरं मलदूषितम्' इत्यमरः । अखण्डः परिपूर्णस्तारापतिश्चन्द्रस्तद्वत्पाण्डुराभिः शुक्लाभिस्तत्कीर्तिभिः यज्ञयशोभिः शश्वत्पुनः क्षालयतिस्म पुनरपि श्वेततामानयतिस्म । तारापतेः पाण्डुरत्वेन कीर्तौ सादृश्यादुपमा । दिङ्मुखमलिनीकरणपटुभ्यो यज्ञेभ्य एव पाण्डुरकीर्तिजननाद्विषमालङ्कारोऽप्यत्र ।

भाषा

जिसने करोड़ों यज्ञों की अग्नियों से उत्पन्न धूएं से दिशाओं के मुखों को मैलाकर पूर्ण चन्द्र के समान शुभ्रवर्ण अपनी यज्ञजन्य कीर्ति से उनके मुखों को फिर से धो डाला । अर्थात् उसने करोड़ों यज्ञ किये जिससे उसका यश चारों दिशाओं में फैल गया ।

ध्रुवं रणे यस्य जयामृतेन क्षीबः क्षमाभर्तुरभूत्कृपाणः ।
एका गृहीता यदनेन धारा धारासहस्रं यशसोऽवकीर्णम् ॥६६॥

अन्वयः

यस्य क्षमाभर्तुः कृपाणः रणे जयामृतेन ध्रुवं क्षीबः अभूत् । यत् अनेन एका धारा गृहीता यशसः धारासहस्रम् अवकीर्णम् ।

व्याख्या

यस्य प्रसिद्धस्य क्षमाभर्तुः पृथ्वीपतेः कृपाणः खड्गो रणे युद्धे जयामृतेन विजयरूपामृतपानेन ध्रुवं निश्चयेन क्षीबो मदान्धोऽभूत् । यद्यस्मात्कारणादनेनैका धारा धारानगरी खड्गधारा च गृहीता स्वायत्तीकृता धारिता च परञ्च तेन कार्येण यशसः कीर्तेर्धारासहस्रं प्रवाहसहस्रमवकीर्णं विस्तारितम् । इदमेव मत्तत्वं यदेकस्या धाराया धारासहस्रेण विनिमयः कृत इति परिवृत्तिरलङ्कारः । परिवृ-

र्त्तिविनिमयो योऽर्थानां स्यात्समासमैरिति लक्षणात् । धारा शब्दस्य धारानगरी, खड्गधारा जलधारा चेत्यर्थत्रयबोधाच्छ्लेषोऽलङ्कारः, अतः संकरः ।

भाषा

जिस राजा की तलवार, युद्ध में विजयरूपी अमृत का पान कर अवश्य मदोन्मत्त हो गई थी । क्यों कि उसने केवल एक धारा नगरी को लेकर या एक धारा रखते हुवे कीर्ति की हजारों धाराओं को बहाया ।

शतक्रतोर्मध्यमचक्रवर्ती क्रमादनेकक्रतुदीक्षितोऽपि ।
ऐन्द्रात्पदादभ्यधिके पदे यस्तिष्ठन्न शङ्कास्पदतामयासीत् ॥६७॥

अन्वयः

मध्यमचक्रवर्ती क्रमात् अनेकक्रतुदीक्षितः यः ऐन्द्रात् पदात् अभ्यधिके पदे अपि तिष्ठन् शतक्रतोः शङ्कास्पदतां न अयासीत् ।

व्याख्या

मध्यमचक्रवर्ती मध्यमलोकस्य भूलोकस्य चक्रवर्ती सार्वभौमः क्रमात्परिपाट्याऽनेकेष्वसंख्येषु क्रतुषु यज्ञेषु दीक्षितः सञ्जातदीक्षः यो राजा ऐन्द्रात्पदादिन्द्रपदापेक्षयाऽभ्यधिकेऽधिकगुणे पदेऽपि स्थानेऽपि तिष्ठन्समासीनः शतक्रतोरिन्द्रस्य शङ्कास्पदतां सन्देहस्थानं नाऽयासीन्न प्राप्तः । तस्याऽसंख्यक्रतुसम्पादनेनाऽपि शतक्रतुर्भयभीतो न बभूव यतस्तेनैव तदुत्पादनार्थं ब्रह्मा प्रार्थित आसीत् । शङ्काकारणसत्वेऽपि शङ्कास्वरूपकार्याभावप्रतिपादनाद्विशेषोक्तिरलङ्कारः ।

भाषा

पृथ्वी के सम्राट् आहवमल्लदेव के धीरे २ अनेक यज्ञों के करने से इन्द्र पद से भी उच्चपद पाने की योग्यता हो जाने पर भी इन्द्र के मन में उसके सम्बन्ध में कोई शङ्का उत्पन्न न हुई । (क्योंकि इन्द्र की प्रार्थना से ही यह चालुक्य वंश ब्रह्माने उत्पन्न किया था ।)

चिन्तामणिर्यस्य पुरो वराकस्तथाहि वार्ता जनविश्रुतेयम् ।
यत्तत्र सौवर्णतुलाधिरूढे चक्रे स पाषाणतुलाधिरोहम् ॥६८॥

अन्वयः

यस्य पुरः चिन्तामणिः वराकः तथाहि इयं वार्ता जनविश्रुता यत् तत्र सौवर्णतुलाधिरूढे (सति) सः पाषाणतुलाधिरोहं चक्रे।

व्याख्या

यस्य राज्ञः पुरः समतायां चिन्तामणिर्नामाऽनर्घ्यं रत्नं वराकोऽगण्यो दैन्यमेवाऽवलम्बते। राजापेक्षया नातिशयचमत्कारित्वेन प्रभावशून्यत्वात्। तथाहि यत इयं वार्ता जनेषु विश्रुता विख्याताऽऽसीत्। यदित्यनेनोत्तरार्द्धोक्तवाक्यार्थपरामर्शः। तत्र राजनि सुवर्णतुलापुरुषदानार्थं सौवर्णी तुलेति सौवर्णतुला तस्यामधिरूढे स्थिते सति स चिन्तामणिः पाषाणेन सह तुला साम्यं तस्यामधिरोहं स्थितिं, रत्न-तोलन-तुलायां वा स्थितिं चक्रे। अस्य राज्ञः सुवर्णेन तुलना चिन्तामणेस्तु पाषाणेन तुलनेत्यर्थपरामर्शाच्चिन्तामणेर्दैन्यमेव। अथ च स चिन्तामणिरभीष्टवस्तुचिन्तयाऽभीष्टवस्तुप्रदाता। अयं राजा तु चिन्तां विनैव सर्वाभीष्ट दातेति भावः। उपमानस्य चिन्तामणे राजरूपोपमेयापेक्षयाऽपकर्षप्रतिपादनाद्व्यतिरेकालङ्कारः। 'उपमानाद्यदन्यस्य व्यतिरेकस्सएव सः'।

भाषा

जिस राजा की समता में चिन्तामणि रत्न भी किसी महत्व का नहीं था। इसीलिये यह बात लोक प्रसिद्ध है कि सुवर्ण पुरुष के दान में राजा सोने की तुला पर चढ़ता था किन्तु चिन्तामणि पत्थर (रत्न) तौलने की तुला पर तौला जाता था अर्थात् चिन्तामणि की तौल पत्थरों से होती थी और राजा की सोने से। (चिन्तामणि अभीष्टवस्तु की याचना करने पर अभीष्ट वस्तु देता है किन्तु यह राजा विना याचना के ही अभीष्ट वस्तु देता था)।

विधाय रूपं मशकप्रमाणं भयेन कोणे क्वचन स्थितस्य।
कलेरिवोत्सारणकारणेन यो यागधूमैर्भुवनं रुरोध ॥६६॥

अन्वयः

यः भयेन मशकप्रमाणं रूपं विधाय क्वचन कोणे स्थितस्य कलेः उत्सारणकारणेन इव यागधूमैः भुवनं रुरोध।

व्याख्या

यो नृपो भयेन राज्ञो भीत्या मशकसमानं मशकवदल्परूपं विधाय निर्माय क्वचन कस्मिंश्चित्कोणे स्थितस्याऽऽत्मानमपावृत्य विद्यमानस्य कलेः कलियुगस्योत्सारणकारणेनाऽपसारणार्थं दूरीकरणार्थमिव यागधूमैर्यज्ञजनितधूमैर्भुवनं जगद्रुरोधाऽऽच्छादितवान् । कलिजनितपापनिवारणार्थं यज्ञा मशकनिवारणार्थं धूमश्च क्रियत इत्याचारः । अत्र कलेरुत्सारणस्य यज्ञधूमकरणकभुवनरोधप्रयोजनत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ।

भाषा

जिस राजा ने, मच्छर के इतना छोटा रूप धारण कर, किसी कोने में भय से छिपकर बैठे हुए कलियुग को भगाने के लिए ही मानों यज्ञों के धूएँ से पृथ्वी को छा दिया । (मच्छरों को भगाने के लिए धूवाँ किया जाता है ।)

स्वभाविकादुष्णगभस्तिभासः क्षत्रोष्मणो दृष्टिविघातहेतोः ।
यस्मिन्परित्रस्त इति क्षितीन्द्रे क्षणं न चिक्षेप कलिः कटाक्षम् ।।१००।।

अन्वयः

कलिः यस्मिन् छितीन्द्रे स्वाभाविकात् उष्णगभस्तिभासः क्षत्रोष्मणः दृष्टिविघातहेतोः परित्रस्तः इति क्षणं कटाक्षं न चिक्षेप ।

व्याख्या

कलिः कलियुगो यस्मिन्प्रसिद्धे राजन्याहवमल्लदेवे स्वाभाविकात्प्राकृतिकादुष्णा गभस्तयो यस्य स उष्णगभस्तिः सूर्यस्तस्य भास इव भासः प्रभाः 'स्युः प्रभारुग्रुचिस्त्विड्भा भाश्छविद्युतिदीप्तयः' इत्यमरः । यस्य तस्य क्षतात्त्रायत इति क्षत्रं क्षत्रियकुलं तस्योष्मा तेजस्तस्य क्षत्रोष्मणः क्षात्रतेजसो दृष्टेर्विघात इति दृष्टिविघात दृष्टिविनाशस्तस्य हेतोः कारणात् परित्रस्तो भयभीत इति हेतुना क्षणं क्षणमात्रमपि कटाक्षं स्वापाङ्गदर्शनं 'अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने' इत्यमरः । न चिक्षेप न प्रसारयामास । अत्र क्षत्रोष्मण उष्णगभस्तिना सूर्येण सादृश्यप्रतिपादनादुपमालङ्कारः ।

भाषा

'स्वाभाविक सूर्य के समान तेज वाले क्षत्रिय तेज से, दृष्टिनाश होने के भय

से भयभीत कली, एक क्षण के लिये भी इस राजा पर अपनी कुटिल दृष्टि नहीं डालता था।

अन्यायमेकं कृतवान् कृती यश्चालुक्यगोत्रोद्भववत्सलोऽपि।
यत्पूर्वभूपालगुणान्प्रजानां विस्मारयामास निजैश्चरित्रैः ॥१०१॥

अन्वयः

चालुक्यगोत्रोद्भववत्सलः अपि कृती यः एकं अन्यायं कृतवान् यत् निजैः चरित्रैः प्रजानां पूर्वभूपालगुणान् विस्मारयामास।

व्याख्या

चालुक्यगोत्रे चालुक्यवंशे उद्भव उत्पत्तिर्येषां राज्ञां तेषु वत्सलः स्निग्धो भक्त इत्यर्थः स्वकुलोत्पन्नपूर्ववर्तिनृपाणां भक्तोऽपि 'लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमान् स्निग्धस्तु वत्सलः' इत्यमरः। कृती कार्यकुशलः पुण्यवांश्च यो राजाऽऽहवमल्लदेव एकमन्यायमनुचितकार्यं कृतवान् यद्यस्मात्कारणान्निजैस्स्वीयैश्चरित्रैरुत्कृष्टगुणैः प्रजानां जनानां षष्ठी 'शेषे—इत्यनेन' प्रजानामित्यत्र सम्बन्धसामान्ये षष्ठी। पूर्वभूपालगुणान्स्ववंशजपूर्ववर्तिनृपगुणान् विस्मारयामास। अस्य गुणोत्कर्षेण भूतपूर्वनृपा विस्मृता इत्यर्थः। एकस्याऽन्यायकार्यस्य विधानादादौ निन्दायाः प्रतीतिः पर्यवसाने तु राज्ञः प्रभावप्रशंसा प्रतीयते। अत्र व्याजस्तुतिरलङ्कारः। 'व्याजस्तुतिर्मुखे निन्दास्तुतिर्वा रूढिरन्यथेति'।

भाषा

पुण्यात्मा, कार्यकुशल उस राजा ने चालुक्यवंशीय प्राचीन राजाओं में श्रद्धा भक्ति रखते हुवे भी एक यह अन्याय किया था कि अपने उत्कृष्ट गुणों से प्रजाओं को पूर्ववर्ती राजाओं के गुणों का विस्मरण करा दिया था। अर्थात् पूर्ववर्ती राजाओं से यह आहवमल्लदेव अधिक गुणी था।

विशीर्णकर्णा कलहेन यस्य पृथ्वीभुजङ्गस्य निरर्गलेन।
संगच्छतेऽद्यापि न डाहलश्रीः कर्पूरताडङ्कनिभैर्यशोभिः ॥१०२॥

अन्वयः

यस्य पृथ्वीभुजङ्गस्य निरर्गलेन कलहेन विशीर्णकर्णा डाहलश्रीः कर्पूरताडङ्कनिभैः यशोभिः अद्यापि न सङ्गच्छते।

व्याख्या

पृथ्व्या भूमेर्भुजङ्गः पतिः कामुकश्च तस्य पृथिवीश्वरस्य निरर्गलेन निष्प्रतिबन्धेन कलहेन विवादेन युद्धेन च विशीर्णौ कर्णौ यस्याः सा, विशीर्णो नष्टः कर्णस्तन्नामधेयो नृपो यस्याः सा च च्छिन्नकर्णा डाहलानां डाहलदेशीयनृपाणां (डाहलदेशश्चेदीदेशादभिन्नः ।) श्री राजलक्ष्मीः कर्पूरस्य यत्ताडङ्कं कर्णभूषणं 'ताटङ्कमपि पाठः' तन्निभैस्तत्समानैर्यशोभिः कीर्तिभिरधुनाप्यद्य यावन्न सङ्गच्छते न मिलति न शोभत इत्यर्थः। कर्णाभावात्तद्भूषणाभावस्तत्कीर्त्यभावश्च । यशसः कर्पूरताटङ्केनसादृश्यादुपमा ।

भाषा

उस राजा के या कामुक के बिना रोक टोक के युद्ध से अथवा अत्यधिक झगड़ा हो जाने से डाहल के राजा कर्ण के मर जाने के कारण या दोनों कान कट जाने के कारण, डाहल देश की राजलक्ष्मी, कपूर के बने हुए या कपूर के ऐसे श्वेत कर्णभूषण के समान यशों से अभीतक शोभित नहीं होती है ।

पाठान्तरम्-भङ्ग्यन्तरेण तदेव वर्णनं, न तु पाठ भेदः—

उसी भाव को कवि दूसरे प्रकार से वर्णित करते हैं ।

कर्णे विशीर्णे कलहेन यस्य पृथ्वीभुजङ्गस्य निरर्गलेन ।
कीर्तिः समाश्लिष्यति डाहलोर्वीं न दन्तताडङ्कनिभाधुनापि ॥१०३॥

अन्वयः

यस्य पृथ्वीभुजङ्गस्य निरर्गलेन कलहेन कर्णे विशीर्णे (सति) दन्तताडङ्कनिभा कीर्तिः अधुना अपि डाहलोर्वीं न समाश्लिष्यति ।

व्याख्या

यस्य प्रसिद्धस्य पृथ्वीभुजङ्गस्य पृथ्वीपतेः कामुकस्य वा निरर्गलेन कोलाहलसम्पन्नेन कलहेन विवादेन युद्धेन वा कर्णे तन्नामके डाहलनृपे श्रोत्रे वा विशीर्णे मृते वा त्रुटिते सति दन्तताडङ्कनिभा गजदन्तनिर्मितकर्णभूषणवच्छुभ्रा कीर्तिरधुनाऽपि डाहलोर्वीं डाहलदेशं न समाश्लिष्यति नाऽऽलिङ्गति । गजदन्तताडङ्केन कीर्तेर्धावल्येन साम्यादुपमा । भुजङ्गकर्णपदयोः श्लिष्टत्वात्कामिनीरूपाप्रकृतार्थेन डाहलोर्वीरूपप्रकृतार्थस्योपमानोपमेयभावो व्यङ्ग्यः । एवं भुजङ्गपदवाच्ययोरपि । तथा च शब्दशक्तिमूलध्वनिः समासोक्तिर्वा ।

भाषा

जिस कामुक के समान राजा के (व कामिनी के समान डाहलोर्वी के) अत्यधिक युद्ध से या कलह से कर्ण राजा के मरने पर या कान के कट जाने पर हांथी दांत के बने हुवे कान के आभूषण के समान श्वेत कीर्ति अभी भी डाहलदेश को नहीं प्राप्त हो रही है। (कान कट जाने से कर्ण भूषण पहनने का सौभाग्य ही अप्राप्य हो जाता है। कर्ण राजा के ऐसे प्रतापी राजा के मर जाने से कीर्ति कहाँ से आ सकती है)।

यस्यासिरत्युच्छलता रराज धाराजलेनेव रणेषु धाम्ना ।
दृप्तारिमातङ्गसहस्रसङ्गामभ्युक्ष्य गृह्णन्निव वैरिलक्ष्मीम् ॥१०४॥

अन्वयः

यस्य असिः रणेषु अत्युच्छलता धाराजलेन इव धाम्ना दृप्तारिमातङ्ग सहस्रसङ्गां वैरिलक्ष्मीम् अभ्युक्ष्य गृह्णन् इव रराज ।

व्याख्या

यस्य भूपतेरसिः खड्गो रणेषु युद्धेष्वत्युच्छलतोर्ध्वं गच्छता धाराजलेन खड्ग-धाराजलेनेव धाम्ना तेजसा, दृप्ता मदान्धा अरिमातङ्गाः शत्रुहस्तिनो विपक्ष-चाण्डालाश्च तेषां सहस्रं तस्य सङ्गः संसर्गो यस्याः सा तां वैरिलक्ष्मीं शत्रुश्रिय मभ्युक्ष्य प्रक्षाल्य 'उक्ष् सेचने' इत्यस्माद्धातोरभ्युपसर्गाल्ल्यप्यभुक्ष्येतिनिष्पन्नम्।' गृह्णन्निवाऽऽसादयन्निव रराज शुशुभे। यथा चाण्डालसङ्गादशुद्धं वस्तु जलेन संप्रोक्ष्य शुद्धं विधाय गृह्यते तथैवाऽत्राऽपि मातङ्गसहस्रसंगजनिताशुद्धियुक्ता वैरिलक्ष्मी धाराजलेन पवित्रीकृत्य गृहीता। धाराजलेन सह धाम्नस्सादृश्यप्रती तिरित्युपमा। मातङ्गशब्देन गजानां चाण्डालनाञ्चप्रतीत्या श्लेषोऽलङ्कारः। खड्गे वैरिलक्ष्मीकर्मकग्रहणक्रियाया उत्प्रेक्षणादुत्प्रेक्षा। अतस्तेषां सङ्करः।

भाषा

जिस राजा की तलवार, युद्धों में ऊपर उठने वाले अपनी धार के जल के समान तेज से मदोन्मत्त हजारों शत्रुरूपी हाथियों के अथवा हजारों शत्रु चाण्डालों के संसर्ग दोष से अपवित्र शत्रुओं की लक्ष्मी का मानों प्रोक्षण कर ग्रहण करती हुई शोभित हुई। अर्थात् अपवित्र शत्रुलक्ष्मी पर अपनी तेज धार का पानी छिड़क, उसे पवित्र कर उसका ग्रहण किया। (अपवित्र वस्तु पर गङ्गाजल छिड़क कर पवित्र करने की परिपाटी है)।

यद्वैरिसामन्तनितम्बिनीनामश्रान्तसन्तापकदर्थ्यमाने ।
पराङ्मुखं शोषविशङ्कयेव कुचस्थले कुङ्कुमपङ्कमासीत् ॥१०५॥

अन्वयः

यद्वैरिसामन्तनितम्बिनीनाम् अश्रान्तसन्तापकदर्थ्यमाने कुचस्थले शोष-विशङ्कया इव कुङ्कुमपङ्कं पराङ्मुखम् आसीत् ।

व्याख्या

यस्याऽऽहवमल्लदेवस्य वैरिसामन्ताः शत्रुनृपास्तेषां नितम्बिनीनामङ्गनाना मश्रान्तो निरन्तरश्चासौ सन्तापश्च संज्वरश्च 'सन्तापः संज्वरः समौ' इत्यमरः । तेन कदर्थ्यमाने दुर्दशामापन्ने तप्ते इत्यर्थः । कुचस्थले स्तने शोषस्य शोषणकर्मणो विशङ्कयेव सन्देहेनेव, कुचयोः शुष्कत्वं कुङ्कुमलेपजन्योष्णत्वेन माभूदिति हेतोः कुङ्कुमपङ्कं पराङ्मुखमासीत् नोपलिप्तमित्यर्थः । पतिविरहात्कुङ्कुमलेपादीनामभावः । अत्र कुचस्थले कुङ्कुमलेपस्य पराङ्मुखत्वे स्तनयोः शोषशङ्काया हेतुत्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा ।

भाषा

जिस राजा के विपक्षी सामन्तों की नारियों के निरन्तर दुःख से दुर्दशा को प्राप्त, स्तन, कहीं सूख न जाँय इस सन्देह से मानों उन पर केसर का लेप नहीं किया गया था । अर्थात् पतियों के मर जाने से केसर का लेप आदि शृङ्गार बन्द हो गया था ।

एकत्र वासादवसानभाजस्ताम्बूललक्ष्म्या इव संस्मरन्ती ।
वक्त्रेषु यद्वैरिविलासिनीनां हासप्रभा तानवमाससाद ॥१०६॥

अन्वयः

यद्वैरिविलासिनीनां वक्त्रेषु हासप्रभा एकत्र वासात् अवसानभाजः ताम्बूललक्ष्म्याः संस्मरन्ती इव तानवम् आससाद ।

व्याख्या

यस्य राज्ञो वैरिविलासिनीनां विपक्षाङ्गनानां वक्त्रेषु वदनेषु विद्यमाना हासस्य हास्यस्य प्रभा कान्तिरेकत्रवासात्तत्रैव वदनेषु विद्यमानत्वात्ताम्बूललक्ष्म्या

स्ताम्बूलशोभायाः संस्मरन्तीव स्मरन्ती सतीव ताम्बूललक्ष्मीः पत्युर्विरहवेदनया समाप्तिं गतेति सहवासात्सखीवृत्तान्तं स्मरन्ती सतीव तानवं कृशत्वमाससाद प्राप। पतिविरहात्ताम्बूलभक्षणेन सह हास्यमपि लुप्तमितिभावः। अत्र हासप्रभायाः ताम्बूललक्ष्मीसमाप्तिस्मरणस्य हासप्रभानिष्ठतनुत्व-प्राप्तौ हेतुत्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा। अप्रस्तुतसखीवृत्तान्तस्य हासप्रभावृत्तान्तेऽभेदसमारोपात्समासोक्तिरलङ्कारः।

भाषा

जिस राजा के शत्रुओं की स्त्रियों के मुखों की हास्यशोभा, एकत्र वास होने से शीघ्र समाप्त होनेवाली ताम्बूल शोभा को स्मरण करती हुई, कम होने लगी। अर्थात् पतियों के मर जाने से वैधव्य प्राप्त होने पर आनन्दजनित हंसी और ताम्बूलभक्षण दोनों ही न रहा।

यं वारिधिः प्रज्वलदस्त्रजालं वेलावनान्तेषु नितान्तभीतः।
भूयः समुत्सारणकारणेन समागतं भार्गवमाशशङ्के ॥१०७॥

अन्वयः

नितान्तभीतः वारिधिः वेलावनान्तेषु प्रज्वलदस्त्रजालं यं समुत्सारणकारणेन भूयः समागतं भार्गवम् आशशङ्के।

व्याख्या

नितान्तमत्यन्तं भीतो भयाकुलो वारिधिस्समुद्रो वेलावनान्तेषु तटगतारण्यभूमिषु प्रज्वलज्जाज्वल्यमानमस्त्रं यस्य तं यं नृपं समुत्सारणस्याऽपसारणस्य कारणेन हेतुना भूयः पुनरपि समागतं सम्प्राप्तं भार्गवं परशुराममाशशङ्के शङ्कितवान्। अत्र नृपे परशुरामस्य संभावनादुत्प्रेक्षा[१]।

भाषा

अत्यधिक भयभीत समुद्र, तट के जंगलों में चमकते हुवे अस्त्रों से शोभित इस राजा को देखकर अपने को हटाने के लिये फिर से परशुराम आये हैं क्या, ऐसा सन्देह करने लगा।

---

[१] कोंकणदेशः पूर्वं समुद्राभ्यन्तरे वर्तमानो भार्गवेण समुद्रं समुत्सार्य स्वनिवासार्थं निर्मित इति पौराणिकीकथाऽत्राऽनसन्धेया।

रत्नोत्करग्राहिषु यद्भटेषु तटत्रुटन्मौक्तिकशुक्तिभङ्ग्या।
अस्फोटयत्तीरशिलातलेषु रोषेण मूर्धानमिवाम्बुराशिः ॥१०८॥

अन्वयः

अम्बुराशिः यद्भटेषु रत्नोत्करग्राहिषु (सत्सु) तटत्रुटन्मौक्तिकशुक्तिभङ्ग्या तीरशिलातलेषु रोषेण मूर्धानम् अस्फोटयत् इव ।

व्याख्या

अम्बूनां जलानां राशिस्समुद्रो यस्य राज्ञो भटेषु योद्धृषु रत्नानामुत्कराः समूहास्तेषां ग्राहिषु सत्सु स्वायत्तीकृतवत्सु सत्सु तटेषु त्रुटन्ति स्फुटितानि मौक्तिकानि याभ्यस्ताः शुक्तयस्तासां भङ्ग्या व्याजेन तीरे तटे यानि शिलातलानि प्रस्तरभूमयस्तेषु रोषेण कोपेन मूर्धानं शिरसमस्फोटयदिवाऽखण्डयदिव । अत्राऽपन्हुतिमूलकोत्प्रेक्षालङ्कारः । समुद्रे शिरस्फोटनस्य क्रियाया उत्प्रेक्षणादुत्प्रेक्षा । नेमा स्फुटितमुक्ताशुक्तयः किन्तु समुद्रकर्तृकशिरस्फोटनमिति प्रतीत्या प्रतीयमानाऽऽर्थापन्हुतिरुत्प्रेक्षाङ्गम् । 'प्रकृतं यन्निषिध्यान्यत्साध्यते सात्वपन्हुतिः ।'

भाषा

जिस राजा के योद्धाओं के, समुद्र के रत्न समूहों को ले लेने पर, तट पर पड़ी हुई मोती निकाली, सीपों के मिष से मानो समुद्र ने क्रोध से किनारे पर के पत्थरों पर माथा पटक २ कर अपना सिर टुकड़े २ कर डाला ।

यं वीक्ष्य पाथोधिरधिज्यचापं शोणाश्मभिः शोणितशोणदेहैः ।
क्षोभादभीक्ष्णं रघुराजबाण-जीर्णव्रणस्फोटमिवाचचक्षे ॥१०९॥

अन्वयः

पाथोधिः अधिज्यचापं यं वीक्ष्य शोणितशोणदेहैः शोणाश्मभिः अभीक्ष्णं क्षोभात् रघुराजबाणजीर्णव्रणस्फोटम् इव आचचक्षे ।

व्याख्या

पाथांसि जलानि धीयन्तेऽस्मिन्निति पाथोधिः समुद्रो ज्यां मौर्वीमधिगतोऽधिज्यश्चापो धनर्यस्य तं यं नपं वीक्ष्याऽऽलोक्य शोणितवद्रुधिरवत् 'रुधिरेऽसृक्-

लोहिताख्ररक्तक्षतजशोणितम्' इत्यमरः । शोणा रक्ता देहा येषां तै रुधिरक्तदेहैः शोणाश्मभी रक्तवर्णपाषाणैः समुद्रान्तस्तलस्थितैस्तद्दर्शनव्याजेनेत्यर्थः । अभीक्ष्णं शश्वत् 'युक्ते द्वे साम्प्रतं स्थानेऽभीक्ष्णं शश्वदनारते' इत्यमरः । क्षोभात् दुःखात् रघुराजस्य रामस्य बाणास्तेषां तत्प्रहारजनिता जीर्णाः पुरातना व्रणाः क्षतास्तेषां स्फोटं विघटनमाचचक्ष इव संदर्शयामासेवेत्यर्थः । रामचन्द्रबाणजनितक्षता नाऽद्याऽपि गता अतो भवद्भिर्न बाणसंधानं कार्यमिति प्रार्थयामासेति भावः । अत्र रक्तपाषाणेषु जीर्णव्रणस्फोटस्य संभावनादुत्प्रेक्षालङ्कारः ।

भाषा

मौर्वी चढ़े धनुष को लिये हुवे उस राजा को देखकर सतत दुःख से समुद्र, अपने भीतर के रक्त के सदृश लाल रंग के लाल पत्थरों के द्वारा मानों रामचन्द्र के बाणों के पुराने घाव फट रहे हों ऐसा दिखाने लगा । अर्थात् रामचन्द्र के बाणों से भये घाव अभी तक भरे नहीं हैं अब तुम बाण मत मारो ऐसी प्रार्थना करने लगा ।

राशीकृतं विश्वमिवावलोक्य वेलावने यस्य चमूसमूहम् ।
अम्भोविभूतेरपरिक्षयेण क्षारत्वमब्धिर्बहुमन्यते स्म ॥११०॥

अन्वयः

अब्धिः वेलावने राशीकृतं यस्य चमूसमूहं विश्वम् इव अवलोक्य अम्भोविभूतेः अपरिक्षयेण क्षारत्वं बहुमन्यते स्म ।

व्याख्या

अब्धिः समुद्रो वेलावने तटारण्ये राशीकृतमेकत्रीकृतं यस्य राज्ञश्चमूसमूहं सैन्यसङ्घमेकत्रीभूतं सम्पूर्णं विश्वमिव जगदिवाऽवलोक्य दृष्ट्वाऽम्भसो जलानां विभूतेः सम्पदोऽपरिक्षयेण वैरस्येन पानादिकर्मणि व्ययाभावात् क्षारत्वं लवणरसाधिक्यं बहुमन्यते स्म प्रशंसितवान् । अत्राऽपरिक्षयरूपकार्ये क्षारत्वं कारणमिति प्रशंसाहेतुः । सेनासमूहस्य विश्वेन सह साम्यादुपमालङ्कारः ।

भाषा

सम्पूर्ण जगत् एकत्रित हो गया है ऐसा दिखाई पड़ने वाले जिस राजा के सेनासमूह को अपने तट पर एकत्रित देखकर जलसम्पत्ति का जरा भी खर्च न

होने से, समुद्र, अपने जल के खारेपन की सराहना करने लगा। अर्थात् यदि जल निमकीन न होता तो उस राजा की सेना उसका सब जल पी जाती।

उत्तम्भयामास पयोनिधेर्यस्तीरे जयस्तम्भमदम्भवीरः।
असूयितं स्वैरविहारशीलैरालानभीत्या जलवारणेन्द्रैः ॥१११॥

अन्वयः

अदम्भवीरः यः पयोनिधेः तीरे स्वैरविहारशीलैः जलवारणेन्द्रैः आलानभीत्या असूयितं जयस्तम्भम् उत्तम्भयामास।

व्याख्या

नास्ति दम्भः कपटो यस्मिन्स अदम्भ आडम्बररहितश्चाऽसौ वीरो योद्धा यो राजा पयोनिधेः समुद्रस्य तीरे तटे स्वैरं स्वच्छन्दं विहारस्य विहरणस्य शीलं स्वभावो येषां तैर्जलवारणेन्द्रैस्समुद्रहस्तिभिरालानस्य करिबन्धस्तम्भस्य 'तोत्रं वेणुकमालानं बन्धस्तम्भेऽथ शृंखले' इत्यमरः। भीत्या भयेनाऽसूयितं दोषाविष्करणेन निन्दितं जयस्तम्भं विजयसूचकस्तम्भमुत्तम्भयामास निचखान। जयस्तम्भे समुद्रगजानामालानस्य भ्रान्त्याऽसूयेति प्रतीत्या भ्रान्तिमानलङ्कारो व्यङ्ग्यः।

भाषा

दम्भरहित वीर, उस राजा ने, स्वच्छन्द विहार करने वाले जल हाथियों द्वारा हाथी बांधने के खूंटे के भय से ईर्ष्या युक्त दृष्टि से देखे जानेवाले विजय-स्तम्भ को समुद्र के तट पर गाड़ दिया।

लब्ध्वा यदन्तःपुरसुन्दरीणां लावण्यनिष्यन्दमुपान्तभाजाम्।
गृहीतसारस्त्रिदशैः पयोधिः पीयूषसंदर्शनसौख्यमाप ॥११२॥

अन्वयः

त्रिदशैः गृहीतसारः पयोधिः उपान्तभाजां यदन्तःपुरसुन्दरीणां लावण्यनिष्यन्दं लब्ध्वा पीयूषसंदर्शनसौख्यम् आप।

व्याख्या

त्रिदशैर्देवैः 'अमरानिर्जरा देवास्त्रिदशा विबुधाः सुराः' इत्यमरः। गृहीतः स्वायत्तीकृतः सारस्तत्वममृतं यस्य सः पयोधिः समुद्र उपान्तं सामीप्यं भजन्ति

तास्तासां तटप्रान्तविहारिणीनां यस्य नृपस्याऽन्तःपुरसुन्दरीणामन्तः-पुरपुरन्ध्रीणां लावण्यनिष्यन्दं लावण्यरसं लब्ध्वा प्राप्य पीयूषस्याऽमृतस्य संदर्शनं चिरकालानन्तरं प्रत्यक्षीकरणं तज्जन्यं सौख्यमानन्दं सुधादर्शनजन्यामोदसमानमानन्दमाप लेभे। देवैरमृतस्य गृहीतत्वात्स्वसमीपे तस्याऽभावात्साम्प्रतं तल्लावण्यामृतं दृष्ट्वा पूर्वमानन्दं प्रापेति भावः। स्त्रीणां लावण्यस्य पीयूषेण साम्यदर्शनादुपमालङ्कारः।

भाषा

देवों ने, जिसमें से अमृत जैसी सारभूत वस्तु निकाल ली है, ऐसे समुद्र ने अपने तट पर घूमने वाली उस राजा की रानियों के लावण्य रूपी अमृत रस को प्राप्त कर अमृत को प्रत्यक्ष देखने का सौख्य पाया। अर्थात् अपनी गई हुई प्रिय वस्तु के फिर मिल जाने पर जैसा आनन्द होता है वैसा आनन्द समुद्र को प्राप्त हुआ।

जयैकरागी विजयोद्यमेषु दृष्ट्वा प्रयाणावधिमम्बुधिं यः।
उत्कण्ठितोऽभूद्दशकण्ठशत्रु—सेतौ समस्यापरिपूरणाय ॥११३॥

अन्वयः

जयैकरागी यः विजयोद्यमेषु अम्बुधिं प्रयाणावधिं दृष्ट्वा दशकण्ठशत्रुसेतौ समस्यापरिपूरणाय उत्कण्ठितः अभूत्।

व्याख्या

जयस्य विजयस्यैवैको रागी प्रेमी विजयैकरतिर्यो नृपो विजयोद्यमेषु विजययात्रास्वम्बुधिं समुद्रं प्रयाणस्य गमनस्याऽवधिं चरमां सीमां दृष्ट्वा विज्ञायाऽग्रेगमनस्य प्रतिरोधकं मत्वा दशकण्ठस्य रावणस्य शत्रू रामस्तस्य सेतुस्तस्मिन् समस्यापरिपूरणाय राम-निर्मितार्धनष्टसेतोः पुनर्निर्माणायोत्कण्ठितः समुत्सुकोऽभूत्।

भाषा

केवल विजय ही प्राप्त करने का प्रेमी वह राजा विजय-यात्राओं की चरमसीमा समुद्र को देखकर रावण के शत्रु राम जी के बनाये हुए टूटे पुल को पूरा बनाने के लिये उत्कण्ठित हुआ।

दोर्दण्डदर्पाद्द्रविडप्रकाण्डं यः सम्मुखं धावितमेकवीरम्।
अभाजनं वीररसस्य चक्रे बाणोत्कराच्छिन्नपराक्रमाभिः ॥११४॥

अन्वयः

यः दोर्दण्डदर्पात् सम्मुखं धावितं द्रविडप्रकाण्डम् एकवीरं बाणोत्कर‍च्छिद्रपरम्पराभिः वीररसस्य अभाजनं चक्रे ।

व्याख्या

यो राजा दोर्दण्डयोर्भुजदण्डयोर्दर्पादभिमानात्सम्मुखमभिमुखं धावितं वेगेनाऽऽगतं द्रविडेषु द्रविडदेशीयनृपेषु प्रकाण्डं श्रेष्ठमेकवीरमप्रतिमभटं चोलदेशेश्वरं बाणानामिषूणामुत्करस्समूहस्तैः कृताभिश्छिद्रपरम्पराभिः शरवर्षजनितच्छिद्रैर्वीररसस्योत्साहरूपजलस्याऽभाजनमनाश्रयं चक्रे । जलपात्रे च्छिद्रसत्वाद्यथा जलं तत्र न तिष्ठति तथैव तस्मिन् राज्ञि शरवर्षजनितच्छिद्रैर्वीररसस्याऽभावो जात इति भावः ।

भाषा

जिस राजा ने, अपने भुजबल के अभिमान से सामने दौड़ पड़े हुए द्रविड़ देशीय योद्धाओं में अप्रतिम वीर चोल देश के राजा को बाणों की वर्षा से छिद्रमय बनाकर उसमें वीररस रूपी जल का अभाव कर दिया। अर्थात् उसका सब वीररस, छेद वाले बर्तन में से जैसे पानी चू कर वह बर्तन खाली हो जाता है वैसे उन छिद्रों से बाहर चू गया और वह वीररसहीन हो गया । अर्थात् हार गया ।

पृथ्वीभुजङ्गः परिकम्पिताङ्गीं यशःपटोल्लुण्ठनकेलिकारः ।
विधृत्य काञ्चीं भुजयोर्बलेन यश्चोलराज्यश्रियमाचकर्ष ॥११५॥

अन्वयः

यः यशःपटोल्लुण्ठनकेलिकारः पृथ्वीभुजङ्गः भुजयोः बलेन काञ्चीं विधृत्य परिकम्पिताङ्गीं चोलराज्यश्रियम् आचकर्ष ।

व्याख्या

यः प्रसिद्धो यशश्चोलकीर्तिरेव पटस्तस्योल्लुण्ठनमुत्क्षेपणमपहरणमेव केलिस्तां करोतीति यशःपटोल्लुण्ठनकेलिकारः पृथ्व्याः पृथिव्या भुजङ्गः पतिः कामुकश्च भुजयोर्बलेन काञ्चीं तन्नाम्नीं नगरीं रशनाञ्च विधृत्य जित्वा प्रगृह्य च परिकम्पितमङ्गं यस्या सा भयेन प्रेम्णा च कम्पयुक्तां चोलराजस्य श्रियं लक्ष्मीं ललनाञ्चाऽऽचकर्षाऽऽकृष्टवान् । अत्र नृपराज्यलक्ष्मीव्यवहारेऽप्रकृतस्य

विटकर्तृकस्य काञ्चीपरिग्रहेण हठादन्यसाधारणनायिकासमाकर्षणरूपस्याप्रकृत-व्यवहारस्याऽभेदसमारोपात्समासोक्तिरलङ्कारः ।

भाषा

चोलराज की कीर्ति रूपी वस्त्र को उतार लेने की अर्थात् अपहरण करने की क्रीडा करने वाले उस राजा या कामुक ने अपनी भुजाओं के बल से काञ्ची-नगरी को जीत कर या करधनी पकड़ कर भय से या प्रेम से कांपने वाली चोल राजा की राज्यलक्ष्मी को या कामिनी को अपनी ओर खींचा । अर्थात् जिस प्रकार कोई कामुक किसी कांपती हुई कामिनी की साड़ी छोड़कर अपने हाथों से उसकी करधनी पकड़ कर उसे अपनी ओर खींचता है उसी प्रकार उस राजाने यश कमाने की इच्छा से अपने भुजबल से काञ्चीनगरी को जीत कर भय से कम्पित चोलराज की लक्ष्मी को अपनी ओर खींच लिया ।

चोलस्य यद्भीतिपलायितस्य भालत्वचं कण्टकिनो वनान्ताः ।
अद्यापि किं वानुभविष्यतीति व्यपाटयन्द्रष्टुमिवाक्षराणि[1] ॥११६॥

अन्वयः

वनान्ताः कण्टकिनः यद्भीतिपलायितस्य चोलस्य भालत्वचम् अद्यापि (अयं) किं वा अनुभविष्यति इति अक्षराणि द्रष्टुम् इव व्यपाटयन् ।

व्याख्या

वनान्ता वनप्रान्तस्थाः कण्टकिनः कण्टकाकीर्णा वृक्षा यस्माद्राज्ञ आहवमल्ल-देवाद्भीत्या भयेन पलायितस्य सुतरां दूरं गतस्य चोलस्य चोलदेशनृपस्य भालत्वचं ललाटचर्म, अद्याप्यतःपरमपि चोलराजाऽयं किं वा कीदृशाण्यन्यदुःखान्यनु-भविष्यतीत्यक्षराणि ललाटलिखितानि द्रष्टुमिव व्यपाटयन् विदारितवन्तः । अत्र वनान्तकण्टकवृक्ष-कर्तृकभालत्वग्विपाटने 'अद्यापि किं वाऽयमनुभविष्यतीत्यक्षर-दर्शनस्य प्रयोजनत्वेनोत्प्रेक्षणात्फलोत्प्रेक्षा ।

भाषा

जंगल के कण्टकी वृक्षों ने इस आहवमल्ल देव राजा के भय से भागने वाले चोल देश के राजा के ललाट के चमड़े को मानों इसके भाग्य में अब और

---

[1] श्लोकोऽयं बहुष्वलङ्कारग्रन्थेषूदाहरणार्थमुद्धृतः ।

कौन २ दुःख लिखे हैं इन अक्षरों को पढ़ने के लिये चीर डाला। अर्थात् भय से कांटों में से भागते २ उसके ललाट का चमड़ा कट गया।

दहत्यशेषं प्रतियोगिवर्गमनर्गले यद्भुजशौर्यवन्हौ।
प्रत्यर्थिपृथ्वीपतिचिन्त्यमानो न कोऽपि मन्त्रः प्रतिबन्धकोऽभूत्।११७।

अन्वयः

अनर्गले यद्भुजशौर्यवन्हौ अशेषं प्रतियोगिवर्गं दहति(सति) प्रत्यर्थिपृथ्वीपतिचिन्त्यमानः कः अपि मन्त्रः प्रतिबन्धकः न अभूत्।

व्याख्या

नास्त्यर्गलं प्रतिबन्धकं यस्मिन्तस्मिन् यस्य राज्ञो भुजस्य शौर्यरूपाग्नौ वीर्यरूपवन्हावशेषं समग्रं प्रतियोगिवर्गं शत्रुसमूहं दहति भस्मसाद्भवति सति प्रत्यर्थिपृथ्वीपतिभिः शत्रुभूतराजभिश्चिन्त्यमानो विचार्यमाणः स्मृतः कोऽपि मन्त्रः काऽपि मन्त्रशक्तिः 'षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः' इत्यमरः। वन्हिशामकमन्त्रश्च यथा-उत्तरस्मिश्च दिग्भागे मरीचो नाम राक्षसः। तस्य मूत्रपुरीषाभ्यां हुतस्तम्भः प्रजायते'। प्रतिबन्धकः प्रतिरोधको नाऽभूत्। मन्त्रेण वन्हिः प्रतिबध्यते मन्त्रशक्त्या च राज्यं रक्ष्यते। भुजशौर्ये वन्हित्वारोपाद्रूपकम्। शौर्यव्यवहारे वन्हिव्यवहारस्याऽप्यभेदप्रतिपत्तिः।

भाषा

जिस राजा की अप्रतिहत भुजबल रूपी अग्नि में सब शत्रुओं के जलते रहने पर अर्थात् उसके भुजबल से शत्रुओं का नाश होते रहने पर, विपक्षी राजाओं द्वारा प्रयुक्त षाड्गुण्यादि उपाय या "उत्तरस्मिँश्चदिग्भागे मरीचो नाम राक्षसः। तस्य मूत्रपुरीषाभ्यां हुतस्तम्भः प्रजायते" सदृश अग्निस्तम्भक मन्त्र उस अग्नि का शामक न हुवा। अर्थात् उस राजाको विपक्षी राजाओं को परास्त करते रहने से रोकने में विपक्षियों का कोई उपाय सफल न हुआ।

ब्रूमस्तस्य किमस्त्रकौशलविधौ देवस्य विक्रामतः
पुष्पेषोरिव यस्य दुष्परिहराः सर्वैरखर्वाः शराः।
राज्ञामप्रतिभानमेव विदधे युद्धेषु यस्योर्जित-
ज्यानिष्ठ्यूतनितान्तनिष्ठुररवप्राप्ताग्रवादो भुजः ॥११८॥

अन्वयः

यस्य पुष्पेषोः इव अखर्वाः शराः सर्वैः दुष्परिहराः यस्य ऊर्जितज्या-निष्ठ्यूतनितान्तनिष्ठुररवप्राप्ताग्रवादः भुजः युद्धेषु राज्ञाम् अप्रतिभानम् एव विदधे, तस्य विक्रामतः देवस्य अस्त्रकौशलविधौ किं ब्रूमः ।

व्याख्या

यस्य राज्ञः पुष्पेषोः कुसुमबाणस्य कामस्य इवाऽखर्वाः प्रबलाः शरा बाणास्सर्वैर्वीरैर्दुष्परिहरा दुःखेन परिहर्तुं शक्याः कृच्छ्रेण प्रतिरोधनीया निवारणीया इत्यर्थः । यस्योर्जितया बलवत्या ज्यया मौर्व्या निष्ठ्यूतो निस्सृतो नितान्तमत्यन्तं निष्ठुरः कठोरो रवः शब्दस्तेन प्राप्तो लब्धोऽग्रवादो युद्धाव्हानाय प्रथमध्वानो यस्य स भुजो युद्धेषु रणेषु राज्ञां नृपाणामप्रतिभानं प्रतिभाराहित्यं विवेकशून्यत्वं मूकत्वं वा किं कर्तव्यताविमूढत्वमित्यर्थः । विदधे चक्रे, तस्य विक्रामतः पराक्रमशालिनो देवस्याऽऽहवमल्लदेवस्य, 'नामैकदेशग्रहणे नामग्रहणम् ।' अस्त्राणां कौशलविधौ संचालनप्रावीण्यविधौ शस्त्रास्त्रविद्यानैपुण्यविषये किं ब्रूमः किमपि कथनीयं नाऽस्ति । अवाग्गोचरत्वमेवेत्यर्थः । अत्र शार्दूलविक्रीडितच्छन्दः । 'सूर्याश्वैर्मसजास्ततस्सततगाः शार्दूलविक्रीडितमिति' ।

भाषा

उस पराक्रमी राजा आहवमल्लदेव की अस्त्र चलाने की प्रवीणता के सम्बन्ध में विशेष क्या कहा जाय, जिसके कामदेव के समान प्रबल बाणों को कोई भी टाल नहीं सकता था और जिसकी शक्तियुक्त मौर्वी के अत्यन्त कठोर शब्दों द्वारा सर्व प्रथम ललकार ने वाली भुजा, युद्धों में शत्रुओं को किं कर्तव्यता-विमूढ अतएव मूक बना देती थी ।

इति श्री त्रिभुवनमल्लदेव-विद्यापति-काश्मीरकभट्ट श्री बिल्हणविरचिते विक्रमाङ्कदेवचरिते महाकाव्ये प्रथमः सर्गः ।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाज-बुधोत्तमात्समुदितः श्रीविश्वनाथः सुधीः ।
चक्रे रामकुबेरपण्डितवरात्संप्राप्तसाहाय्यकः
सर्गेऽस्मिन्प्रथमे रमाकरुणया टीकाद्वयं निर्मलम् ॥

ॐ शान्तिः शान्तिः शान्तिः

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

द्वितीयः सर्गः ।

अथ कल्याणनाम्नीं चालुक्यराजधानीं पञ्चविंशतिश्लोकैर्वर्णयति महाकविः ।

चकार कल्याणमिति क्रमादसौ पुरं परार्ध्यं पृथिवीपुरन्दरः ।
यदुच्चहर्म्यावलिदीपसंपदां विभाव्यते कज्जलसंनिभं नभः ॥१॥

अन्वयः

असौ पृथिवीपुरन्दरः क्रमात् कल्याणम् इति परार्ध्यं पुरं चकार यदुच्चहर्म्यावलिदीपसंपदां कज्जलसनिभं नभः विभाव्यते ।

व्याख्या

असावाहवमल्लदेवनामा पृथिव्याः पृथ्व्याः पुरन्दर इन्द्रः क्रमात् कियता कालेन कल्याणमिति कल्याणनामकं परार्ध्यं श्रेष्ठं 'परार्घ्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम्' इत्यमरः । पुरं नगरं चकार निर्मापयामास यस्य पुरस्य हर्म्याणि प्रासादास्तेषामावलिः पंक्तिः 'वीथ्यालिरावलिः पंक्तिः श्रेणीत्यमरः' । तस्या दीपसंपदां दीपजालानां कज्जलसंनिभं कज्जलसदृशं नभोऽन्तरिक्षं 'नभोन्तरिक्षं-गगनमनन्तं सुरवर्त्म खम्' इत्यमरः । विभाव्यते ज्ञायतेस्म । उत्प्रेक्षालङ्कारः । सर्गेऽस्मिन्वंशस्थच्छन्दः 'जतौतु वंशस्थमुदीरितं जरौ' ।

भाषा

इस आहवमल्लदेव राजा ने धीरे २ कल्याण नामका एक श्रेष्ठ नगर बसाया

जिसके धनियों के ऊँचे २ मकानों की कतार पर जलने वाले असंख्य दीयों के कज्जल के समान आकाश दिखाई देता था। अर्थात् काला आकाश उन दीयों का धूवाँ मालुम होता था।

निवर्तिताश्चन्दनलेपपाण्डुभिर्नतभ्रुवां यत्र समुन्नतैः स्तनैः।
मुखानिला एव कदर्थनक्षमा भवन्ति माने मलयाद्रिवायवः ॥२॥

अन्वयः

यत्र नतभ्रुवां चन्दनलेपपाण्डुभिः स्तनैः निवर्तिता मुखानिलाः एव माने कदर्थनक्षमाः मलयाद्रिवायवः भवन्ति।

व्याख्या

यत्र पुरे नते वक्रे भ्रुवौ दृग्भ्यामूर्ध्वभागौ 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ' इत्यमरः। यासां तास्तासामङ्गनानां चन्दनस्य लेपेन पाण्डुभिः शुक्लवर्णैः समुन्नतैस्तुङ्गैः स्तनैः पयोधरैर्निवर्तिता मुखान्निसृत्य स्तनैस्संघटच्य पुनः परावृत्ता मुखानिला एव माने मानावस्थायां कदर्थने व्यथोत्पादने मानभङ्गकरणे च क्षमाः समर्था मलयाद्रेर्वायवो दक्षिणानिला भवन्ति। मलयाद्रिवायुवद्विरहव्यथासंदीपनक्षमा भवन्तीति भावः। अत्र रूपकालङ्कारः।

भाषा

जिस नगर की नारियों के मुख से निकलने वाले वायु ही चन्दन के लेप से श्वेत वर्ण उच्च कुचों से टकरा कर फैलते हुए, मानावस्था में विरह व्यथा को उत्पन्न करने में समर्थ मलयानिल ही हो जाते हैं। मलयानिल जिस प्रकार चन्दन वृक्षों के सम्पर्क से सुगन्धित होकर पहाड़ों से टकरा कर फैलते हुए अपनी सुगन्ध और शैत्य से विरह व्यथा कारक होते है वैसे ही नारियों के मुखानिल स्तन पर के चन्दन लेप से सुवासित व शीत होकर ऊँचे कठोर स्तनों से टकरा कर मन्दगति से फैलते हुए मानावस्था में उनके पतियों को विरह व्यथा कारक होकर उनका मान भङ्ग करने में समर्थ होते थे।

क्षपाकरः कातररश्मिमण्डलः पुरन्ध्रिगण्डस्थलकान्तिसम्पदा।
विकीर्णसंमार्जनभस्मरेणुना बिभर्ति यस्मिन्मुकुरेण तुल्यताम् ॥३॥

अन्वयः

यस्मिन् पुरन्ध्रिगण्डस्थलकान्तिसम्पदा कातररश्मिमण्डलः क्षपाकरः विकीर्णसंमार्जनभस्मरेणुना मुकुरेण तुल्यतां बिभर्ति ।

व्याख्या

यस्मिन्नगरे पुरन्ध्रीणां पतिव्रतास्त्रीणां 'पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता' इत्यमरः । गण्डस्थलस्य कपोलस्थलस्य कान्तीनां रुचीनां संपदा समूहेन कातरं हतप्रभं रश्मिमण्डलं किरणजालं यस्य सः 'किरणप्रग्रहौ रश्मी-' त्यमरः । क्षपाकरश्चन्द्रः 'नक्षत्रेशः क्षपाकरः' इत्यमरः । विकीर्णः पतितः संमार्जनस्य गृहसंमार्जनस्य भस्मरेणुर्धूलिर्यस्मिन्स तेन मुकुरेण दर्पणेन 'दर्पणे मुकुरादर्शौ' इत्यमरः । सह तुल्यतां समानतां बिभर्ति धारयति । उपमा-लङ्कारः ।

भाषा

जिस नगर में सती स्त्रियों के कपोलस्थल की कान्ति के आधिक्य से हतप्रभ किरण समूह वाला चन्द्रमा, झाड़ू देने में उड़ी हुई धूली के कणों से आच्छादित शीशे के समान दिखाई देता था ।

विलासदोलायितदन्तपत्रयोः क्षपासु यत्रेन्दुरलक्ष्यमण्डलः ।
प्रविश्य संक्रान्तिमिषेण योषितां कपोलयोः कान्तिजलं विलुम्पति ॥४॥

अन्वयः

यत्र क्षपासु संक्रान्तिमिषेण प्रविश्य विलासदोलायितदन्तपत्रयोः योषितां कपोलयोः अलक्ष्यमण्डलः इन्दुः कान्तिजलं विलुम्पति ।

व्याख्या

यत्र पुरे क्षपासु रात्रिषु विलासे स्वैरक्रीडायां दोलायिते दोलावदाचरिते पुरःपश्चाद्गतागते दन्तपत्रे ताटङ्कौ ययोस्तयोर्योषितां नारीणां 'स्त्रीयोषिदबला योषा नारी सिमन्तिनी वधुः' इत्यमरः । कपोलयोर्गण्डस्थलयोरलक्ष्यमविज्ञातं मण्डलं बिम्बं यस्य स इन्दुश्चन्द्रः संक्रान्तिमिषेण प्रतिबिम्बव्याजेन प्रविश्य गत्वा कान्तिजलं लावण्यामृतं विलुम्पति पिबति । चन्द्रतोऽधिककान्तिमत्वात्कपोलयोः पतितस्य चन्द्रप्रतिबिम्बस्य व्याजेनेन्दुः कामिनीनां स्वकान्तिविवृद्धचर्थं लावण्या-

मृतपानं करोतीत्यर्थः। चन्द्रतोऽप्यधिककान्तिमन्मुख्यः स्त्रिय इति भावः। अत्र सापन्हवा गम्योत्प्रेक्षा तत उपमानापेक्षयोपमेयस्य गुणाधिक्यप्रतीत्या व्यतिरेकध्वनिश्च।

भाषा

जिस नगर में रात्रियों में विलास में हिलने वाले कर्ण के आभूषणों से युक्त स्त्रियों के कपोल स्थलों में चन्द्रमा अप्रत्यक्ष रूप से, प्रतिविम्ब के बहाने से प्रविष्ट होकर उनके लावण्यामृत का पान करता है। अर्थात् उन स्त्रियों के मुख, चन्द्रमा से अधिक कान्तियुक्त थे।

गतोऽपि यत्र प्रतिबिम्बवर्त्मना समीपतां वञ्चयितुं प्रगल्भते।
मुखानि जाग्रन्मदनानि सुभ्रुवां सयामिकानीव न यामिनीपतिः ॥५॥

अन्वयः

यत्र यामिनीपतिः प्रतिबिम्बवर्त्मना समीपतां गतः अपि जाग्रन्मदनानि सयामिकानि इव सुभ्रुवां मुखानि वञ्चयितुं न प्रगल्भते।

व्याख्या

यत्र पुरे यामिन्या रात्रेः पतिः स्वामी चन्द्रः 'विभावरीतमस्विन्यौ रजनी यामिनी तमी' इत्यमरः। प्रतिबिम्बवर्त्मना प्रतिबिम्बमार्गेण प्रतिबिम्बव्याजेन वा समीपतां सामीप्यं गतोऽपि प्राप्तोऽपि जाग्रन्मदनः कामो येषु तानि समुद्दीप्त-मन्मथानीति भावः। अतएव यामिकैः प्रहररक्षकैः सहितानि युक्तानीव सुभ्रुवां कामिनीनां मुखान्यास्यानि वञ्चयितुं प्रतारयितुं न प्रगल्भते न समर्थो भवति। अत्र नूतनहेतुकल्पनया काव्यलिङ्गमलङ्कारः 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते।'

भाषा

जिस पुर में, चन्द्रमा, प्रतिविम्ब के बहाने से समीप आने पर भी कामोद्दीपन से मस्त कामिनियों के मुखों को, पहरा देने वालों के समान कामदेव के वहाँ जागते रहने के कारण, ठग नहीं सकता था। अर्थात् अपनी सौभाग्यसम्पत्ति तथा सौन्दर्य से उन कामिनीयों के मुखों को नीचा नहीं दिखा सकता था।

जलाशया यत्र हसन्ति सन्ततं नवेन्द्रनीलद्रवनिर्मलोदराः ।
शरत्समुत्सारितमेघकर्दमं कलिन्दकन्याह्रदमेचकं नभः ॥६॥

अन्वयः

यत्र नवेन्द्रनीलद्रवनिर्मलोदराः जलाशयाः शरत्समुत्सारितमेघकर्दमं कलिन्दकन्याह्रदमेचकं नभः सन्ततं हसन्ति ।

व्याख्या

यत्र कल्याणकटकनामकनगरे नवो नूतन इन्द्रनीलमणीनां द्रवो द्रुतपदार्थस्तद्वन्निर्मलं मलरहितमुदरं मध्यं येषां ते जलाशयाः सरांसि शरदा शरदृतुना समुत्सारिता दूरीकृता मेघा एव कर्दमाः पङ्काः यस्मात्तत् कलिन्दकन्याया यमुनाया ह्रदोऽगाधपयस्तद्वन्मेचकं कृष्णवर्णं नभ आकाशं सन्ततं सततं हसन्ति स्वशोभया तिरस्कुर्वन्ति । शरदृतौ नभसि मेघा न दृश्यन्ते जले च पङ्कराहित्यान्नैर्मल्यं जायते । अत्र जलाशयानां नभसा सादृश्यप्रतीत्योपमाया हसन्तीति पदेन व्यङ्ग्यत्वम् ।

भाषा

जिस कल्याणकटक नगर में नये इन्द्रनील मणियों के द्रव के समान स्वच्छ स्तर वाले जलाशय, शरद ऋतु के आने पर मेघ रूपी कीचड़ से रहित और यमुनानदी के अगाध जल के समान नीले रंग के आकाश की हँसी उड़ाते हैं । अर्थात् उन जलाशयों की नीलिमा आकाश की नीलिमा से सुन्दर थी ।

प्रकर्षवत्या कपिशीर्षमालया यदुद्भटस्फाटिकवप्रसंहतिः ।
विलोकयत्यम्बरकेलिदर्पणे विलासधौतामिव दन्तमण्डलीम् ॥७॥

अन्वयः

यदुद्भटस्फाटिकवप्रसंहतिः प्रकर्षवत्या कपिशीर्षमालया विलासधौतां दन्तमण्डलीम् अम्बरकेलिदर्पणे विलोकयति इव ।

व्याख्या

यस्य कल्याणपुरस्योद्भटा बृहती स्फाटिका स्फटिकमणिशिलानिर्मिता वप्रस्य प्राकारस्य संहतिः सन्ततिः श्रेणिः प्रकर्षवत्याऽत्युन्नतया कपिशीर्षाणि प्राकारस्यो-

च्चतमभागाः (बुर्जियां इतिलोके प्रसिद्धाः) तेषां माला पंक्तिस्तया विलासेनाऽ-प्रयासेन सुगन्धिमञ्जनेन वा धौतां क्षालितामत एव शुभ्रां दन्तानां रदानां मण्डलीं समूहमम्बरमेवाऽऽकाशमेव केलिदर्पणस्तस्मिन्नवलोकयतीव पश्यतीव । आकाशरूपदर्पणे वप्रस्य स्वकपिशीर्षरूपदन्तानामवलोकनमुत्प्रेक्ष्यते । अत उत्प्रेक्षालङ्कारः ।

भाषा

जिस कल्याण नगरी की स्फटिक की चट्टानों से बनी दीवारों की कतार, उन्नत श्वेत गुम्बजों के बहाने से मानों सुगन्धित मञ्जन से अप्रयास से ही दतुवन किए हुए अपने श्वेत दाँतों को आकाशरूपी क्रीडादर्पण में देखती है ।

पुराङ्गनावक्त्रसहस्रकान्तिभिस्तिरोहिते रात्रिषु तारकापतौ ।
क्व रौप्यकर्पूरकरण्डपाण्डुरः शशीति यत्र भ्रममेति रोहिणी ॥८॥

अन्वयः

यत्र रात्रिषु रोहिणी तारकापतौ पुराङ्गनावक्त्रसहस्रकान्तिभिः तिरोहिते (सति) रौप्यकर्पूरकरण्डपाण्डुरः शशी क्व इति भ्रमम् एति ।

व्याख्या

यत्र रात्रिषु निशासु 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः । रोहिणी चन्द्रप्रिया तारकाणां ताराणां 'नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्' इत्यमरः । पतिश्चन्द्रस्तस्मिन् पुरस्य कल्याणपुरस्याऽङ्गना ललनास्तासां वक्त्राणि मुखानि तेषां सहस्राणि तेषां कान्तिभिरत्युत्कटप्रभाभिस्तिरोहिते पिहिते सति रूप्येण रजतेन निर्मितो रौप्यो यः कर्पूरकरण्डः कर्पूराधानपात्रविशेषस्तद्वत्पाण्डुरः शुभ्रः शशी चन्द्रः क्व कुत्र वर्तत इति भ्रमं भ्रान्तिमर्थात्सन्देहमेति समासादयति । अङ्गनामुखानां चन्द्रसादृश्यातिशयमूलकचन्द्राभेदप्रतीत्या पार्थक्येन चन्द्रप्रतीतिरेव नास्तीति भावः । अथवा पुराङ्गना मुखचन्द्रसहस्रकान्तिभिस्तिरोहिते चन्द्रेऽस्मत्पतिश्चन्द्रः क्वेति रोहिणी भ्रममेति । अत्रसन्देहालङ्कारो व्यङ्ग्यः । मीलितालङ्कारश्च । 'मीलितं वस्तुनो गुप्तिः केनचित्तुल्यलक्ष्मणा ।'

भाषा

जिस पुर में रात को हजारों स्त्रियों के मुखों की कान्ति से चन्द्रमा के न

पहिचाने जाने पर चांदी की कपूर की डिबिया के सदृश शुभ्रवर्ण चन्द्रमा कहाँ है, ऐसा चन्द्रपत्नी रोहिणी को सन्देह हुआ करता था।

यदीयलीलास्फटिकस्थलीभुवाममुग्धदुग्धाब्धिसमत्विषां पुरः।
दवाग्निनिर्दग्धवनस्थलोपमं विलोक्यते कज्जलकश्मलं नभः ॥९॥

अन्वयः

अमुग्धदुग्धाब्धिसमत्विषां यदीयलीलास्फटिकस्थलीभुवां पुरः कज्जलकश्मलं नभः दवाग्निनिर्दग्धवनस्थलोपमं विलोक्यते।

व्याख्या

अमुग्धः स्वच्छश्चासौ दुग्धाब्धिः क्षीरसागरस्तेन समाः समानास्त्विषः कान्तयो यासां ता यदीयाः कल्याणपुरसम्बन्धिन्यो लीलाया विलासस्य क्रीडार्थमारचिताः स्फटिकस्थल्यः स्फटिकमणिनिर्मितभूमयस्तासां पुरोऽग्रे कज्जलवत्कश्मलं श्यामवर्णं नभ आकाशं दवाग्निना दावानलेन निर्दग्धं भस्मीकृतं वनस्थलमरण्यप्रान्तस्तस्योपमासादृश्यं यस्य तद्वद्विलोक्यते दृश्यते। स्फटिकस्थल्याकाशयोर्नैर्मल्यसामान्यत्वेऽपि स्फटिकस्थल्याः शुभ्रवर्णत्वादधिकसौन्दर्यमिति भावः। ततश्च व्यतिरेकध्वनिः।

भाषा

निर्मल क्षीर सागर के समान शुभ्र कान्ति वाले जिस कल्याण पुर के स्फटिक के बने हुवे क्रीडाङ्गणों के सामने कज्जल के ऐसा काला आकाश दावानल से जले हुए वनस्थल के समान दिखाई देता था।

तटद्रुमाणां प्रतिबिम्बमालया सपारिजातामिव दर्शयञ्छ्रियम्।
स यत्तडागः कुरुते विडम्बनां गृहीतसारस्य सुरैः पयोनिधेः ॥१०॥

अन्वयः

सः यत्तडागः तटद्रुमाणां प्रतिबिम्बमालया सपरिजातां श्रियं दर्शयन् सुरैः गृहीतसारस्य पयोनिधेः विडम्बनाम् इव कुरुते।

व्याख्या

सः प्रसिद्धो यस्य कल्याणपुरस्य तडागस्सरस्तटद्रुमाणां तीरस्थवृक्षाणां

तडागे प्रतिबिम्बानां प्रतिच्छायानां मालया पंक्त्या पारिजातैरनेककल्पवृक्षैः सहितां युक्तां श्रियं शोभां दर्शयन् विज्ञापयन् सुरैर्देवैर्गृहीतसारस्याऽपहृतकल्पवृक्षस्य पयोनिधेः समुद्रस्य विडम्बनामुपहासमिव कुरुते । समुद्रात्तु पारिजातस्यैकस्यैवोत्पत्तिः सोऽपि देवैरपहृत इति समुद्रो निस्सारः । अस्मिन्तडागेत्वनेके-कल्पवृक्षाः परिदृश्यन्ते केनाऽपि हृताश्च नेति समुद्रात्स्वोत्कर्षं परिहासस्य बीजम् । अत्रोत्प्रेक्षालङ्कारो गम्यः ।

भाषा

जिस कल्याणपुर का तालाव, तटपर के वृक्षों की परछांहीं पड़ने से अपन भीतर अनेक कल्पवृक्ष होने की शोभा दिखाता हुआ, देवताओं द्वारा कल्पवृक्ष निकाल लिए गए हुए समुद्र की मानों हँसी उड़ा रहा है ।

प्रतिक्षणं क्षालितमन्युना रणे प्रयुक्तरक्षस्य नृपेण मानिना ।
न यस्य कक्षां शतमन्युरक्षिता पुरी पुरप्राग्रहरस्य गाहते ॥११॥

अन्वयः

शतमन्युरक्षिता पुरी रणे प्रतिक्षणं क्षालितमन्युना मानिना नृपेण प्रयुक्तरक्षस्य पुरप्राग्रहरस्य यस्य कक्षां न गाहते ।

व्याख्या

शतं मन्यवो क्रतवो कोपाश्च यस्य सः शतमन्युरिन्द्रः 'मन्युर्दैन्ये क्रतौ क्रुधि ।' इत्यमरः । 'जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।' इत्यमरः । तेन रक्षिता पालिता पुरी अमरावतीनगरी रणे युद्धे प्रतिक्षणं निरन्तरं क्षालितो दूरीकृतो मन्युः क्रोधो येन स तेन निर्मन्युना क्रतुरहितेन वा मानिना सगर्वेण, 'गर्वोभिमानोऽहङ्कारोमानश्चित्तसमुन्नतिः ।' इत्यमरः । नृपेण राज्ञाऽऽहवमल्लदेवेन प्रयुक्ता कृता रक्षा यस्य तस्य पुराणां 'निर्धारणे षष्ठी' नगराणां मध्ये प्राग्रहरस्य श्रेष्ठस्य यस्य कल्याणपुरस्य कक्षां साम्यं न गाहते न प्राप्नोति । शतक्रतुकारिणा शतकोपकारिणा चेन्द्रेण यत्कार्यं क्रियते तत्कार्यमनेनाऽऽहवमल्लदेवराजेन निर्मन्युनैव यज्ञरहितेनाऽपि यज्ञानुष्ठानादिकं विनैव साध्यत इतिभावः । अत्र व्यतिरेकालङ्कारः । 'अधिक्यमुपमेयस्योपमानान्न्यूनता तथा ।'

भाषा

एक सौ यज्ञ करने वाले और सैकड़ों बार क्रोध करने वाले इन्द्र से रक्षित

अमरावती पुरी, युद्धों में लगातार शत्रुओं का संहार करने से प्रशान्त क्रोध वाले, या यज्ञों से अपनी कार्य-सिद्धि की अपेक्षा न करने वाले, अभिमानी आहवमल्लदेव राजा से रक्षित, पुरों में श्रेष्ठ कल्याणपुर की बराबरी नहीं कर सकती है।

करोति गण्डस्थलचन्द्रमण्डले विलासवेल्लन्मणिकुण्डलातिथौ ।
न यत्र वित्रस्तकुरङ्गचक्षुषां निघर्षभीत्येव पदं कुरङ्गकः ॥१२॥

अन्वयः

यत्र वित्रस्तकुरङ्गचक्षुषां विलासवेल्लन्मणिकुण्डलातिथौ गण्डस्थलचन्द्रमण्डले कुरङ्गकः निघर्षभीत्या इव पदं न करोति ।

व्याख्या

यत्र कल्याणपुरे वित्रस्तानि स्त्रीणां विशालनेत्रकान्त्या भीतानि कुरङ्गाणां मृगाणां चक्षूंषि नयनानि याभ्यस्तासां पुराङ्गनानां विलासेन विभ्रमेण वेल्लन्तीतस्ततः परिकम्पमानानि मणिनिर्मितकुण्डलानि कर्णभूषणान्येवाऽतिथयो यस्य तस्मिन्, क्रीडाचञ्चलमणिनिर्मितकर्णावतंसविभूषिते गण्डस्थलमेव चन्द्रमण्डलं शुभ्रत्वाद्वर्तुलत्वादतिशयशोभास्पदत्वाद्वा तस्मिन् कुरङ्गकश्चन्द्रमण्डलस्थितकलङ्करूपो मृगो निघर्षस्य कुण्डलसंघर्षजन्याङ्गच्छेदस्य भीत्या भयेन पदं स्थानं न करोति तत्र न गच्छति। पुराङ्गनानां मुखानि निष्कलङ्कानीति भावः। अत्रोत्प्रेक्षालङ्कारः ।

भाषा

जिस नगर में, अपनी बड़ी २ सुन्दर आंखों से मृगों के नेत्रों को त्रस्त करने वाली स्त्रियों के, खेल में हिलने वाले कान के आभूषणों से शोभित गण्ड-स्थल (गाल) रूपी चन्द्रमण्डल में चन्द्रमा का कलङ्क रूप मृग, कर्णभूषणों की रगड़ के भय से नहीं आता। अर्थात् चन्द्र सदृश कपोल होने पर भी चन्द्र सकलङ्क है किन्तु उनका गण्डस्थल निष्कलङ्क है।

समुच्छलन्मौक्तिककान्तिवारिभिः सुवर्णकुम्भैः सुरसद्ममूर्धगैः ।
प्रपा पिपासापरितापशान्तये नभश्चरीणामिव येन निर्मिता ॥१३॥

अन्वयः

येन नभश्चरीणां पिपासापरितापशान्तये समुच्छलन्मौक्तिककान्तिवारिभिः सुरसद्ममूर्धगैः सुवर्णकुम्भैः प्रपा निर्मिता इव (प्रतीयते)।

व्याख्या

येन कल्याणपुरेण नभश्चरीणामाकाशविहरणशीलानामप्सरसां देवाङ्गनानां वा पातुमिच्छा पिपासा तृषा तस्याः परितापः सन्तापस्तस्य शान्तये दूरीकरणाय समुच्छलन्त्य ऊर्ध्वं प्रसारिण्यो मौक्तिकानां मुक्तानां कान्तय इव वारीणि जलानि स्वच्छत्वाद्येषु तैः सुराणां देवानां सद्मानि मन्दिराणि तेषां मूर्ध्नि गच्छन्तीति सुरसद्ममूर्धगास्तैर्देवमन्दिरशिरोग्रधार्यमाणैः सुवर्णकुम्भैः स्वर्णनिर्मितघटैः 'कुम्भौ घटेऽत्र मूर्धांशौ डिम्भौ तु शिशुबालिशौ' इत्यमरः। प्रपा पानीयशालिका 'प्रपा पानीयशालिकेत्यमरः'। निर्मितेव सम्पादितेव प्रतीयते। उत्प्रेक्षालङ्कारोऽतिशयोक्तिश्च।

भाषा

जिस नगर ने आकाश में उडने वाली अप्सरा या देवाङ्गनाओं की प्यास के कष्ट को दूर करने के लिये देवताओं के मन्दिरों के ऊपर रक्खे हुए, ऊपर फैलने वाली मोतियों की कान्ति के सदृश कान्ति वाले जल से युक्त, सोने के घड़ों से मानों पोसरा बैठाया था।

जगत्त्रयीकार्मणकर्मणि क्षमं निरीक्ष्य लीलायितमेणचक्षुषाम्।
स्मरेण यत्र स्मरता पराभवं भवाय भूयः परिबोध्यते धनुः ॥१४॥

अन्वयः

यत्र पराभवं स्मरता स्मरेण एणचक्षुषां लीलायितं जगत्त्रयीकार्मणकर्मणि क्षमं निरीक्ष्य भवाय भूयः धनुः परिबोध्यते।

व्याख्या

यत्र पुरे शिवात्पराभवं पराजयं स्मरता स्मरेण कामेन 'कामः पञ्चशरः स्मरः' इत्यमरः। एणानां मृगानां चक्षूंषीव चक्षूंषि नेत्राणि यासां तासां 'गोकर्ण पृषतैणर्श्यरोहिताश्चमरो मृगाः' इत्यमरः। लीलायितं विभ्रमं 'कार्मणमोषधिप्रयोगेण वशीकरणकर्म,' जगतां त्रयी जगत्त्रयी तस्याः कार्मणं वशीकरणकर्म तस्य

कर्मणि विषये क्षमं समर्थं निरीक्ष्य विलोक्य भवाय शिवाय शिवेन सह युद्धकरणार्थं तस्य वशीकरणार्थं वा भूयः पुनः धनुः कार्मुकं परिबोध्यते सज्जीक्रियते। एण चक्षुषां साहाय्येन साफल्यं निश्चितमिति धियेति भावः। अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः।

भाषा

जिस नगरी की मृगनयनी स्त्रियों के हावभावों को तीनों लोकों को वश कर लेने में समर्थ समझ, शंकर की हार का स्मरण रखने वाला कामदेव मानो शिव को हराने या वश में करने के लिये फिर अपना धनुष तयार कर रहा है। अर्थात् इन मृगनयनियों की सहायता से अब शंकर को वश में कर लेना सरल है, ऐसे विचार से फिर से धनुष तयार किया।

स्मर–प्रशस्तिप्रतिवस्तुतां गताः सलीलदात्यूहसमूहनिस्वनाः।
भवन्ति यत्र क्षणमात्रविश्रम–प्रदायिनः कण्ठरवेषु योषिताम् ॥१५॥

अन्वयः

यत्र स्मरप्रशस्तिप्रतिवस्तुतां गताः सलीलदात्यूहसमूहनिस्वनाः योषितां कण्ठरवेषु क्षणमात्रविश्रमप्रदायिनः भवन्ति।

व्याख्या

यत्र पुरे स्मरस्य कामस्य प्रशस्तिः कीर्तिप्रशंसा तस्याः प्रतिवस्तुतां तत्पर्यायरूपत्वं गताः प्राप्ता लीलया विलासेन सहितास्सलीला दात्यूहा जलकाकाः पक्षिविशेषाः 'दात्यूहः कालकण्ठकः' इत्यमरः। तेषां समूहस्य निःस्वनाः शब्दा योषितां स्त्रीणां कण्ठरवेषु भाषणकार्येषु गीतेषु वा क्षणमात्रमीषत्कालपर्यन्तं विश्रमं शान्तिं प्रददतीतिविश्रमप्रदायिनो शान्तिदातारो भवन्ति। तत्रत्यानां नारीणां शब्दो दात्यूहकूजितवन्मधुर इति व्यज्यते। उपमाध्वनिः।

भाषा

जिस नगरी में कामदेव की विरुदावलिस्वरूप पिहकने वाले पपीहों के शब्द, स्त्रियों के बोलने या गाने में उनकी आवाज थोड़े देर के लिये बन्द कर उन्हें विश्राम देते हैं। अर्थात् पपीहों के शब्द के समान मनोहर उन स्त्रियों की कण्ठध्वनि थी।

निराकृते यत्र रुषां समुद्गमे भुजङ्गसौभाग्यगुणेन सुभ्रुवाम् ।
वनान्तपुंस्कोकिलपञ्चमोर्मयो भवन्ति मानज्वरशेषभेषजम् ॥१६॥

अन्वयः

यत्र सुभ्रुवां रुषां समुद्गमे भुजङ्गसौभाग्यगुणेन निराकृते (सति) वनान्तपुंस्कोकिलपञ्चमोर्मयः मानज्वरशेषभेषजं भवन्ति ।

व्याख्या

यत्र पुरे सुभ्रुवां सुन्दरभ्रुकुटियुक्तानामङ्गनानां रुषां कोपानां 'कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ' इत्यमरः । समुद्गमे उत्पत्तौ भुजङ्गा विटजनाः कामुका वा तेषां यत्सौभाग्यं स्त्रीप्रसादानुकूलकलाप्रावीण्यं तस्य गुणेन प्रभावेणोत्कर्षेण वा निराकृते दूरीकृते सति वनान्तस्यारण्यमध्यस्य पुंस्कोकिलाः पिकास्तेषां पञ्चमोर्मयः पञ्चमस्वरतरङ्गाः, (कोकिलाः पञ्चमस्वर एव शब्दायन्त इति लोकप्रसिद्धिः) । मानज्वरस्य प्रणयकोपरूपज्वरस्य शेषोऽवशिष्टांशस्तस्य भेषजं तच्छामकौषधिः 'भेषजौषधभैषज्यान्यगदोजायुरित्यपि' इत्यमरः । भवन्ति जायन्ते । रूपकालङ्कारः । 'रूपकं रूपितारोपाद्विषये निरपन्हवे' ।

भाषा

जिस नगरी में अच्छी भौवों वाली नारियों में प्रणयकोप उत्पन्न होने पर कामुकों या विटों द्वारा अपनी प्रणयकोप को दूर करने की चातुरी से उनका कोप शान्त होने पर, वन में बोलने वाली कोयलों के पञ्चम स्वर की लहरें उनके अवशिष्ट मान रूपी ज्वर को मिटाने के लिये औषध का काम करती हैं। अर्थात् कोयल के शब्दों को सुनकर उनका सम्पूर्ण प्रणयकोप दूर हो जाता था।

प्रविष्य यद्वेश्मसु रोहिणीपतिर्गुणं महान्तं लभते न संशयः ।
यदेष राहोरुपयात्यलक्ष्यतां पुरन्ध्रिवक्त्रेन्दुसहस्रमध्यगः ॥१७॥

अन्वयः

रोहिणीपतिः यद्वेश्मसु प्रविश्य महान्तं गुणं लभते, न संशयः । यत् एषः पुरन्ध्रिवक्त्रेन्दुसहस्रमध्यगः सन् राहोः अलक्ष्यताम् उपयाति ।

व्याख्या

रोहिणीपतिश्चन्द्रो यस्य पुरस्य वेश्मसु गृहेषु 'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्' इत्यमरः। प्रविश्य गत्वा महान्तं विशिष्टं गुणं चमत्कारं लाभमित्यर्थः प्राप्नोति अत्र संशयः सन्देहो नास्ति। यद्यस्मात्कारणादेष चन्द्रः पुरन्ध्रीणां नारीणां वक्त्रेन्दूनां मुखचन्द्राणां सहस्रस्य मध्यं गच्छतीति पुरन्ध्रिवक्त्रेन्दुसहस्र-मध्यगः सन् स्त्रीमुखेन्दुसहस्रमध्यवर्तित्वाद्राहोरलक्ष्यतामपरिभाव्यतामुपयाति प्राप्नोति। चन्द्रबाहुल्याद्वास्तविकचन्द्रपरिचयाभावादपरिभाव्यतामुपयातीति भावः। अत्र सामान्यं नाम अलङ्कारः। 'सामान्यं प्रकृतस्याऽन्यतादात्म्यं सदृशैर्गुणैः।'

भाषा

रोहिणी के पति चन्द्रमा को इस नगर के घरों में प्रवेश कर बहुत लाभ होता था इसमें सन्देह नहीं। क्योंकि राहू, हजारों स्त्रियों के मुखचन्द्रों के बीच में इसके रहने से, इसको नहीं पहचान पाता था।

यदीयसौधध्वजपट्टपट्टिकाः समुच्चलन्मौक्तिककान्तिनिर्भरैः।
नभस्तलान्दोलनविभ्रमाहृतं विनिक्षिपन्तीव सुरापगापयः ॥१८॥

अन्वयः

यदीयसौधध्वजपट्टपट्टिकाः समुच्चलन्मौक्तिककान्तिनिर्भरैः नभस्तलान्दोलनविभ्रमाहृतं सुरापगापयः विनिक्षिपन्ति इव।

व्याख्या

यदीयेषु यत्पुरसम्बन्धिषु सौधेषु राजसदनेषु 'सौधोऽस्त्रि राजसदनम्' इत्यमरः। ध्वजाः पताकाः 'पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्' इत्यमरः। तेषां पट्टस्य कौशेयस्य पट्टिका वस्त्राणि समुच्चलन्ति प्रकम्पमानानि ध्वजपटप्रान्तभागविनिविष्टानि मौक्तिकानि तेषां कान्तिनिर्झरैः प्रभाप्रवाहैः 'प्रवाहो निर्झरो झरः' इत्यमरः नभस्तले व्योम्नि आन्दोलनस्येतस्ततः संचलनस्य विभ्रमेण विलासेनाऽऽहृतं समाकृष्टं सुरापगायाः स्वर्गङ्गायाः पयो जलं विनिक्षि-पन्तीव सिञ्चन्तीव। अत्रोत्प्रेक्षालङ्कारः।

भाषा

जिस नगर के प्रासादों पर के झण्डों की रेशम की पट्टियों में लग हुए मोतियों की कान्ति रूपी जल के झरनों से मालूम होता था कि पट्टियों के आकाश में सतत हिलते रहने से उनकी झड़प से खींचे गए हुए आकाश गंगा के जल को मानो वे पट्टियाँ छिड़क रही थीं।

अविस्मृतत्र्यम्बकनेत्रपावकः स्मरः स्मितेन्दीवरदीर्घचक्षुषाम्।
विलासपीयूषनिधानकुम्भयोर्न यत्र पार्श्वं कुचयोर्विमुञ्चति ॥१९॥

अन्वयः

यत्र अविस्मृतत्र्यम्बकनेत्रपावकः स्मरः स्मितेन्दीवरदीर्घचक्षुषां विलासपीयूषनिधानकुम्भयोः कुचयोः पार्श्वं न मुञ्चति।

व्याख्या

यत्र पुरे न विस्मृतस्त्र्यम्बकस्य शिवस्य नेत्रपावको नयनाग्निदाहो येन सः स्मरः कामदेवः स्मितानि विकसितानीन्दीवराणि कमलानीव चक्षुंषि नेत्राणि यासां तासामङ्गनानां विलासरूपं यत्पीयूषममृतं तस्य निधानं निक्षेपणं ययोस्तौ कुम्भौ तयोस्तद्रूपयोः कुचयोः स्तनयोः पार्श्वं सामीप्यं न मुञ्चति न परित्यजति। दाहजन्यमृत्युनिवारक, भेषजस्यामृतस्य स्तनयोः स्थितत्वात्तत्रैव नियतस्थितिं समाचकाङ्क्ष काम इति भावः। काव्यलिङ्गमलङ्कारः, तेन उत्प्रेक्षा व्यज्यते।

भाषा

जिस नगर में, महादेव के तृतीय नेत्र की अग्नि के दाह को न भूलने वाला कामदेव खिले हुए कमल के समान बड़े२ नेत्र वाली नारियों के, विलास रूपी अमृत का खजाना स्वरूप दो घड़ों से अभिन्न स्तनों से दूर नहीं होता है।

स्मरस्य यत्राद्भुतमस्त्रकौशलं तथाह्यसौ चारुदृशां विलोचनैः।
उपागतैरुत्पलपत्रमित्रतां शिलाकठोराणि मनांसि विध्यति ॥२०॥

अन्वयः

यत्र स्मरस्य अस्त्रकौशलम् अद्भुतम्, तथाहि असौ उत्पलपत्रमित्रताम् उपागतैः चारुदृशां विलोचनैः शिलाकठोराणि मनांसि विध्यति।

व्याख्या

यत्र पुरे स्मरस्य कामस्याऽस्त्राणां कौशलं नैपुण्यमद्भुतमाश्चर्यकारि परिदृश्यते। तथाह्यसौ स्मर उत्पलपत्राणां कमलपत्राणां मित्रतां साम्यमुपागतैः प्राप्तैरतिकोमलैरित्यर्थः। चारुदृशां रम्यनयनानां नारीणां विलोचनैरक्षिभिः शिलावत्पाषाणवत्कठोराणि कठिनानि धैर्यातिशययुक्तान्यपि मनांसि यूनां चेतांसि विध्यति भिनत्ति। कार्यकारणयोर्गुणभेदादत्र विषमालङ्कारः। 'गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः। यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः। विरूपयोः संघटना या च तद्विषमं मतम्'।

भाषा

इस नगर में कामदेव का अस्त्रप्रयोग का कौशल आश्चर्य जनक था। इसीलिये वह कमल के पत्तों की समानता अर्थात् कोमलता को प्राप्त, सुन्दर नेत्रवाली नारियों के नेत्रों से पत्थर के ऐसे कड़े युवकों के हृदयों को वेध देता था।

समुद्रवेला रतिरत्नसम्पदा वधूतडित्ताण्डवमेघमण्डली।
नभःस्थली विभ्रमतारकस्रजा विभाति यत्र स्मरतल्पकल्पना॥२१॥

अन्वयः

यत्र स्मरतल्पकल्पना रतिरत्नसम्पदा समुद्रवेला, वधूतडित्ताण्डवमेघमण्डली, विभ्रमतारकस्रजा नभःस्थली, विभाति।

व्याख्या

यत्र पुरे स्मरस्य कामस्य तल्पस्य शय्यायाः कल्पना रचना 'तल्पं शय्याट्टदारेषु स्तंबेऽपि विटपोऽस्त्रियाम्' इत्यमरः। रतिः कामस्त्री तत्स्वरूपा या रत्नसम्पत् तया सर्वजनहृद्यत्वाद्रते रत्नसम्पद्यभेदारोपः। समुद्रवेला सागरतटभूमिः, स्मरतल्पकल्पनायां समुद्रवेलाया आरोपः, रतिस्वरूपरत्नसम्पदस्समुद्रवेलायां स्थितत्वात्। वधूस्वरूपतडितस्ताण्डवं नृत्यं यत्रैवम्भूता मेघमण्डली, अस्या स्मरतल्पकल्पनायामारोपः। अत्र स्मरपत्नीरतिस्थानीया वधूरूपा तडित्। विभ्रमेण विलासेन युक्तानां तारकाणां स्रजा मालया नभःस्थली व्योमभूमिः। अत्र रतिस्थानीया तारकस्रक्। स्मरतल्पकल्पनायां नभःस्थल्याश्चारोपः। विभाति शोभते। रतिस्वरूप रत्नसम्पत्तडित्तारकस्रग्भिः समुद्रवेलामेघमण्डलीनभःस्थलीनां स्मरतल्पकल्पनेति भावः। अत्रोत्प्रेक्षा गम्या।

भाषा

जहाँ कामदेव की शय्या रचना, रति स्वरूप रत्नसम्पत्ति होने से समुद्रतट, रतिस्वरूप बिजली से युक्त होने से मेघमण्डली, और रति स्वरूप विलास युक्त ताराओं की माला होने से आकाश स्थली शोभित है।

त्यजन्ति हंसाः सरसीगुणैः स्थितिं न यत्र वर्षास्वपि हर्षगद्गदाः।
अलङ्घनीयस्य निकाममुन्नतेर्दिशन्ति वप्रस्य यशस्तु दुर्जनाः ॥२२॥

अन्वयः

यत्र हर्षगद्गदाः हंसाः सरसीगुणैः वर्षासु अपि स्थितिं न त्यजन्ति। दुर्जनाः तु अलङ्घनीयस्य वप्रस्य निकामं उन्नतेः यशः दिशन्ति।

व्याख्या

यत्र पुरे हर्षेणाऽऽनन्देन गद्गदाः पुलकिता हंसाः सरसीनां कासाराणां 'पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः' इत्यमरः। गुणैर्नैर्मल्यादिगुणैर्वर्षास्वपि वर्षर्तावपि स्थितिं निवासं न त्यजन्ति न मुञ्चन्ति। वर्षाकाले मानसं यान्ति हंसा इति नियमान्मानसं न यान्तीति भावः। दुर्जना अलङ्घनीयस्य पारं कर्तुमयोग्यस्य वप्रस्य प्राकारस्य निकाममत्यन्तमुन्नतेरुच्छ्रायस्य यशः कीर्तिं दिशन्ति कुर्वन्त्यारोपयन्तीत्यर्थः। दुर्जनाः परनिन्दाकुशलाः सरसीगुणान्विहाय वर्षासु हंसानां मानसाऽगमने प्राकाराणामौन्नत्यमेव कारणमुद्घोषयन्तीति भावः। अत्राऽतिशयोक्त्यलङ्कारः।

भाषा

जहां आनन्द मग्न हंसगण वर्षाऋतु में भी तलावों का पानी गदला न होने से, अन्य स्थानों के हंसों के सदृश मानससरोवर को न जाकर वहीं रहते थे। दुर्जन लोग जो कभी किसी के गुण की प्रशंसा नहीं करते वे हंसों के अन्यत्र न जाने में इस नगर की चहार दिवारी की उंचाई का यश गाते थे। अर्थात् उस नगरी के अत्यन्त रमणीय सरोवर की प्रशंसा न कर वप्र की ऊँचाई की प्रशंसा करते थे।

निशासु यत्रोन्नतसौधसङ्गतिं विगाहमानस्य विधोः कुरङ्गकः।
वतंसदूर्वाङ्कुरमेणचक्षुषां ग्रहीतुमाकाङ्क्षति वक्रकन्धरः ॥२३॥

अन्वयः

यत्र निशासु उन्नतसौधसंगतिं विगाह्मानस्य विधोः कुरङ्कः वक्रकन्धरः (सन्) एणचक्षुषां वतंसदूर्वाङ्कुरं ग्रहीतुम् आकाङ्क्षति ।

व्याख्या

यत्र पुरे निशासु रात्रिषु उन्नता अत्युच्चाः प्रासादा राजसदनानि तेषां सङ्गतिं समागमं विगाहमानस्य विदधतो विधोश्चन्द्रस्य कुरङ्गकः कलङ्करूपमृगो वक्रा वक्रीकृता कन्धरा ग्रीवा येन स एवम्भूतस्सन् एणचक्षुषां मृगनयनानामङ्गनानां वतंस आभूषणरूपश्चासौ दूर्वाङ्कुरश्च तं "वतंस अवतंसः । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा" इति । कर्णावतंसरूपं दूर्वाङ्कुरं ग्रहीतुं भक्षणार्थं स्वीकर्तुमाकाङ्क्षत्यभिलषति । अत्रातिशयोक्त्यलङ्कारः

भाषा

जहाँ रात्रियों में, चन्द्र के, बहुत ऊँचे राजसदनों के समीप आने से, चन्द्रमा में का मृग, टेढ़ी गर्दन करके, मृगनयनी नारियों के कानों पर आभूषण के रूप में खोंसे हुवे दूब के अंकुर को खाने की इच्छा करता था ।

अवागुरं नेत्रकुरङ्गबन्धनं निरक्षरं पञ्चशरस्य शासनम् ।
गृहे गृहे यत्र विचित्रमन्वहं वितन्वते नृत्तमधीरलोचनाः ॥२४॥

अन्वयः

यत्र अधीरलोचनाः गृहे गृहे अन्वहम् अवागुरं नेत्रकुरङ्गबन्धनं पञ्चशरस्य निरक्षरं शासनं विचित्रं नृत्तं वितन्वते ।

व्याख्या

यत्र पुरेऽधीरे चञ्चले लोचने नेत्रे यासां ताश्चञ्चलनयनाः कामिन्यो गृहे गृहे प्रतिगृहमन्वहं प्रतिदिनं नास्ति वागुरा मृगबन्धनी यस्मिन्तदवागुरं नेत्राण्येव युवकजननयनान्येव कुरङ्गा मृगास्तेषां बन्धनं बन्धनस्वरूपं पञ्चशरस्य कामस्य निरक्षरमक्षरोच्चारणरहितं शासनमाज्ञास्वरूपं विचित्रमाश्चर्यकरं नृत्तं नृत्यं 'नृत्तं ताललयाश्रयम्' वितन्वते कुर्वन्ति । तासां नृत्यं दृष्ट्वा सर्वे युवानः काममोहिता भवन्तीति भावः । अधिकारूढवैशिष्ट्यं रूपकमलङ्कारः ।

भाषा

जिस नगर में रोज, घर २, चञ्चलनेत्रवाली कामिनियाँ, बिना जाल के कामुकों के नेत्र रूपी मृगों को फँसाने वाला और कामदेव की अलिखित व अनुच्चारित आज्ञा स्वरूप ताल लय से युक्त विचित्र नाच किया करती थीं ।

अमुष्य लोकत्रितयाद्भुतैर्गुणैरतीत्य मार्गं मनसोऽपि तिष्ठतः ।
असौ सदा मानसगोचरस्थिता कथं तुलायामलका प्रगल्भते ॥२५॥

अन्वयः

असौ सदा मानसगोचरस्थिता अलका लोकत्रितयाद्भुतैः गुणैः मनसः अपि मार्गम् अतीत्य तिष्ठतः अमुष्य तुलायां कथं प्रगल्भते ।

व्याख्या

असौ प्रसिद्धा सदा नित्यं मानसं सरश्चित्तञ्च तस्य मानससरसो मनसश्च गोचरो देशो हिमालयप्रदेशो दृष्टिश्च तत्र स्थिता विद्यमानाऽलका कुबेरनगरी, लोकत्रितये त्रिषु भुवनेषु 'त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्' इत्यमरः । अद्भुता आश्चर्यकारिणो गुणास्तैर्मनसोऽपि चित्तस्याऽपि मार्गं पन्थानमतीत्याऽतिक्रम्य तिष्ठतो वर्तमानस्याऽचिन्त्यरूपस्याऽमुष्याऽस्य पुरस्य तुलायां साम्ये कथं प्रगल्भते समर्था भवति । अत्राऽर्थापत्तिरलङ्कारः । 'दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ।'

भाषा

मानस सरोवर के आसपास हिमालय प्रदेश में स्थित अथवा मन से जानी जा सकने वाली अलका नामक कुबेर की नगरी तीनों लोकों में अद्भुत गुणों से युक्त और मन से भी कल्पना न की जा सकने वाले, इस कल्याण नगर की कैसे बराबरी कर सकती है ।

अतःपरमाहवमल्लदेवनृपं स्तौति ।

विजित्य सर्वाः ककुभः स भार्गव-प्रचण्डकोदण्डपरिश्रमो नृपः ।
उवास तत्रार्थिशतानि पूरयन् फलं हि पात्रप्रतिपादनं श्रियः ॥२६॥

अन्वयः

तत्र सः भार्गवप्रचण्डकोदण्डपरिश्रमः नृपः सर्वाः ककुभः विजित्य अर्थिशतानि पूरयन् उवास। हि श्रियः फलं पात्रप्रतिपादनम्।

व्याख्या

तत्र कल्याणपुरे सः प्रसिद्धो भार्गवस्य परशुरामस्य प्रचण्डो भयङ्करः कोदण्डो धनुः 'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमरः। तस्य परिश्रम इव परिश्रमः संप्रहारकार्यं यस्य स नृप आहवमल्लदेवः सर्वास्समग्राः ककुभो दिशो विजित्य स्वायत्तीकृत्वाऽर्थिशतानि याचकशतमनोरथान् पूरयन्सफलयन्नुवास। हि यस्मात्कारणाच्छ्रियो लक्ष्म्यास्सम्पदश्च फलं सार्थक्यं पात्रेषु योग्यस्थानेषु प्रतिपादनं दानम्। अत्राऽर्थान्तरन्यासालङ्कारः।

भाषा

परशुराम के भयंकर धनुष के संहार के समान संहार करने वाला वह प्रसिद्ध राजा आहवमल्लदेव, समग्र दिशाओं को जीतकर और सैकड़ों अर्थिजनों को दान देकर कल्याणपुर में रहने लगा। क्योंकि लक्ष्मी का सार्थक्य योग्य आर्थियों को दान देना ही है।

जगत्यनर्घेषु समस्तवस्तुषु क्षितीश्वरः पादतलस्थितेष्वपि।
अभूद्विना पुत्रमुखेन्दुदर्शनं प्रभातनीलोत्पलदीनलोचनः ॥२७॥

अन्वयः

क्षितीश्वरः जगति अनर्घेषु समस्तवस्तुषु पादतलस्थितेषु अपि पुत्रमुखेन्दु-दर्शनं विना प्रभातनीलोत्पलदीनलोचनः अभूत्।

व्याख्या

क्षितेः पृथ्व्या ईश्वरः प्रभुर्जगति लोके 'त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्' इत्यमरः। अनर्घेष्वमूल्येषु समस्तवस्तुषु सकलपदार्थेषु पादतलेष्वेव समीप एव स्थिता विद्यमानास्तेष्वतिसुलभेषु सत्स्वपि पुत्रस्याऽऽत्मजस्य यन्मुखमाननं तदेवेन्दुश्चन्द्रस्तस्य दर्शनमवलोकनं विना प्रभाते प्रातःकाले सूर्योदयानन्तरं निष्प्रभे नीलोत्पल इव दीने कान्तिरहिते लोचने नेत्रे यस्य स अभूत्। चन्द्रदर्शन-

समये नीलोत्पलस्य विकासो दृश्यते न तु सूर्योदयानन्तरम्। अत्र विनोक्त्यलङ्कारः। 'विनोक्तिर्यद्विनान्येन नासाध्वन्यदसाधु वा'।

भाषा

राजा को संसार की समस्त अमूल्य वस्तुएँ सुलभ होने पर भी पुत्र के चन्द्रसदृश मुख को देखे बिना वह प्रातः कालीन नीलकुमुद के सदृश दीन नेत्रों से युक्त था अर्थात् उदास रहा करता था। जैसे चन्द्रदर्शन बिना नीलकुमुद विकसित नहीं होता वैसे ही पुत्र दर्शन बिना राजा की आखें दीन थीं। अर्थात् राजा उदास रहते थे।

उवाच कण्ठागतबाष्पगद्गदैः पदैः कदाचित्सहधर्मचारिणीम्।
सरस्वतीहारलतामिवोज्ज्वलां प्रकाशयन्दन्तमयूखचन्द्रिकाम् ॥२८॥

अन्वयः

(सः)कदाचित् सरस्वतीहारलताम् इव उज्ज्वलां दन्तमयूखमालिकां प्रकाशयन् कण्ठागतबाष्पगद्गदैः पदैः सहधर्मचारिणीम् उवाच।

व्याख्या

सः नृपः कदाचित् सरस्वती वाणी वाग्देवता तस्या मौक्तिकनिर्मिता या हारलता तामिवोज्वलां शुभ्रवर्णां दन्तानां रदनानां मयूखानां किरणानां 'किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः' इत्यमरः। चन्द्रिका ज्योत्स्ना 'चन्द्रिका कौमुदीज्योत्स्ना' इत्यमरः। तां प्रकाशयन् विस्तारयन् कण्ठे गले आगतानि यानि बाष्पाण्यूष्माश्रुणि 'बाष्पमूष्माश्रु कशिपु त्वन्नमाच्छादनं द्वयम्' इत्यमरः। तैर्गद्गदैर्नातिस्पष्टमुच्चारितैः पदैः शब्दविन्यासैस्सहधर्मचारिणीं स्वपत्नीमुवाच। अत्रोपमालङ्कारः।

भाषा

किसी समय उस राजा ने सरस्वती की मोती की माला के समान दातों की शुभ्र किरणों की चांदनी को प्रकाशित करते हुए, भरे गले से अपनी पत्नी से कहा।

फलेन शून्यः सुतरां दुनोति मामयं गृहस्थाश्रमधर्मपादपः।
विलोकयामि प्रतिबिम्बमात्मनः सुताभिधानं त्वयि नाधुनापि यत् ॥२९॥

अन्वयः

अयं फलेन शून्यः गृहस्थाश्रमपादपः मां सुतरां दुनोति यत् अधुना अपि त्वयि सुताभिधानम् आत्मनः प्रतिबिम्बं न विलोकयामि ।

व्याख्या

अयं फलेन पुत्ररूपफलेन शून्यो रहितो गृहस्थाश्रमरूपो गार्हस्थ्यस्वरूपो धर्मपादपो धर्मवृक्षो मां सुतरामत्यन्तं दुनोति परितापयति । यथा वृक्षः फलेन शून्यो निष्फलत्वाय कल्पते तथैवाऽयं गृहस्थाश्रमोऽपि । यद्यस्मात्कारणादधुनाऽप्यद्यावध्यपि त्वयि भवत्यां सुतः पुत्र अभिधानं नाम यस्य तं पुत्रनामकमात्मनः प्रतिबिम्बं प्रतिफलं न विलोकयामि न पश्यामि । 'आत्मा वै जायते पुत्रः' इति वचनात् । अद्यापि पुत्रोत्पत्तिर्न जातेत्यर्थः । अत्ररूपकालङ्कारः ।

भाषा

यह फलरहित गृहस्थाश्रमरूपीवृक्ष मुझे अत्यन्त पीड़ित करता है । क्यों कि अभीतक तुमसे मेरा प्रतिबिम्ब स्वरूप पुत्र उत्पन्न भया हुवा नहीं दीख पडता है । अर्थात् तुम को मेरा प्रतिबिम्ब स्वरूप पुत्र नहीं हुआ है ।

अलक्षणं बालमृगाक्षि लक्ष्यते[१] न किञ्चिदङ्गेषु तवेदृशः परम् ।
पुराकृतः पुण्यविपर्ययो मम ध्रुवं फलर्द्धिप्रतिबन्धकस्त्वयि ॥३०॥

अन्वयः

(हे)बालमृगाक्षि तव अङ्गेषु किञ्चित् अलक्षणं न लक्ष्यते परं त्वयि ईदृशः फलर्द्धिप्रतिबन्धकः मम पुराकृतः पुण्यविपर्ययः ध्रुवम् ।

व्याख्या

हे बालमृगाक्षि बालकुरङ्गनयने तव अङ्गेषु शरीरावयवेषु किञ्चिद्यत्किञ्चिदप्यलक्षणं कुलक्षणं पुत्रोत्पत्तिप्रतिबन्धकं वन्ध्यात्वलक्षणं न लक्ष्यते दृश्यते । परं किन्तु त्वयि भवत्यामीदृश इत्थम्भूतः फलर्द्धिप्रतिबन्धकः पुत्ररूपफलसम्पत्तिबाधको ममैव पुराकृतः पूर्वजन्मकृतः पुण्यविपर्ययः सुकृतवैपरीत्यं पापमित्यर्थः । ध्रुवं निश्चयेन वर्तते ।

---

[१] 'मृग्यते' इत्यपि पाठः ।

भाषा

हे मृगशावकनयनि ! तुम्हारे शरीर के अवयवों में कोई कुलक्षण नहीं दीख पड़ता है। किन्तु तुम्हारे में इस प्रकार की पुत्र रूपी फल की समृद्धि में प्रतिबन्धक मेरे ही पूर्वजन्म का पाप है, यह बात निश्चित है।

अवीक्षमाणा सदृशं गुणैर्मम क्रमागता श्रीरियमाश्रयं पुरः।
पयोधिमध्यस्थितपोतकूपक-स्थिता शकुन्तीव मुहुः प्रकम्पते ॥३१॥

अन्वयः

क्रमागता इयं श्रीः मम गुणैः सदृशम् आश्रयं पुरः अवीक्षमाणा पयोधिमध्यस्थितपोतकूपकस्थिता शकुन्ती इव मुहुः प्रकम्पते।

व्याख्या

क्रमेण कुलक्रमेणाऽऽगता प्राप्तेयं श्री राज्यलक्ष्मी मम गुणैः शौर्यादिभिः सदृशं समानमत एव योग्यमाश्रयमाश्रयभूतं स्थानं पुरोऽग्रेऽवीक्षमाणाऽनवलोकयन्ती पयोधेः समुद्रस्य मध्ये मध्यभागे स्थितो विद्यमानः पोतो यानपात्रं 'यानपात्रे शिशौ पोतः' इत्यमरः। तस्य कूपको गुणवृक्षको नौमध्यस्थितरज्जुबन्धनदण्डः तस्मिन् स्थितोपविष्टा शकुन्तीव पक्षिणीव मुहुरभीक्ष्णं 'मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः। प्रकम्पते बिभेति। स्थिरमाश्रयमपश्यमाणा स्वस्थितेस्सन्देहास्पदत्वाद्भीतेत्यर्थः। अत्रोपमालङ्कारः।

भाषा

कुल परम्परागत यह राज्य श्री, मेरे गुणों के ऐसे गुण वाले आश्रय को आगे न देखकर बीच समुद्र में विद्यमान जहाज के मस्तूल पर बैठी चिड़िया के समान रह रह कर काँपती है। अर्थात् स्थिर आश्रय न देखकर अपने अस्तित्व के सन्देह से भयभीत होती है।

प्रियप्रसादेन विलाससम्पदा तथा न भूषाविभवेन गेहिनी।
सुतेन निर्व्याजमलीकहासिना यथाङ्कपर्यङ्कगतेन शोभते ॥३२॥

अन्वयः

गेहिनी यथा निर्व्याजम् अलीकहासिना अङ्कपर्यङ्कगतेन सुतेन शोभते तथा प्रियप्रसादेन विलाससम्पदा भूषाविभवेन (वा) न शोभते ।

व्याख्या

गेहिनी गृहिणी गृहधर्मरता स्त्री यथा निर्व्याजं निष्कपटं यथास्यात्तथाऽलीक हासिनाऽनृतहासिना कारणमन्तरेव प्रकृत्या हासं कुर्वता 'अलीकं त्वप्रियेऽनृते' इत्यमरः । अङ्क उत्सङ्ग एव पर्यङ्कः खट्वा 'अङ्को रूपकभेदाङ्कचिन्हरेखाजिभूषणे । रूपकांशांतिकोत्सङ्गस्थानेऽङ्कं पापदुःखयोरिति' मेदिनी । 'शयनं मंचपर्यङ्क-पल्यङ्काः खट्वया समाः' इत्यमरः । तद्गतेन सुतेन पुत्रेण शोभते सौभाग्यमालम्बते तथा प्रियस्य पत्युः प्रसादेन प्रसन्नताप्रदर्शनेन विलासस्य भोगस्य सम्पदा विभवेन, भोग्यसुखसमृद्धिसामग्र्या भूषाया भूषणस्य विभवेन वैशिष्ट्येन वा न शोभते ।

भाषा

गृहिणी जिस प्रकार कपट रहित स्वाभाविक हास्य करने वाले गोद रूपी पलङ्ग पर लेटे हुए पुत्र से शोभित होती है वैसे न तो पती की प्यारी होने से, न उपभोग योग्य सुख समृद्धि की वस्तुओं से, न गहना कपड़ा पहनने से शोभित होती है ।

वहन्ति हिंस्राः पशवः कमात्मनो गुणं वितर्क्यात्मजरक्षणश्रमम् ।
पदार्थसामर्थ्यमचिन्त्यमीदृशं यदत्र विश्राम्यति निर्भरं मनः ॥३३॥

अन्वयः

हिंस्राः पशवः आत्मनः कं गुणं वितर्क्य आत्मजरक्षणश्रमं वहन्ति । ईदृशम् अचिन्त्यं पदार्थसामर्थ्यं यत् अत्र मनः निर्भरं विश्राम्यति ।

व्याख्या

हिंस्रा हिंसकाः पशवो व्याघ्रादय आत्मनो स्वस्य कं विशिष्टं गुणं प्रयोजनं वितर्क्य विमृश्याऽऽत्मजस्य पुत्रस्य रक्षणस्य भरणपोषणादिभिः पालनस्य श्रमं खेदं वहन्ति धारयन्ति । ईदृशमित्थंभूतमचिन्त्यमवर्णनीयमनुभवैकगम्यं पदार्थसामर्थ्यं पुत्रपदार्थाकर्षकत्वं यदत्र पुत्रे मनश्चित्तं 'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । निर्भरमत्यन्तं विश्राम्यति सन्तोषसुखं शान्तिञ्च लभते ।

भाषा

हिंसक व्याघ्रादि पशु अपने किस प्रयोजन के विचार से अपने बच्चे के संरक्षण के लिये परिश्रम करते हैं। पुत्र, इस वस्तु में ऐसी अवर्णनीय शक्ति है जिससे मन अत्यन्त शान्ति प्राप्त करता है।

किमश्वमेधप्रभृतिक्रियाक्रमैः सुतोऽस्ति चेन्नोभयलोकबान्धवः ।
ऋणं पितृणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभम् ॥३४॥

अन्वयः

उभयलोकबान्धवः सुतः न अस्ति चेत् अश्वमेधप्रभृतिक्रियाक्रमैः किम्। पितृणां ऋणम् अपनेतुम् अक्षमाः गृहमेधिनः कथं शुभं लभन्ते।

व्याख्या

उभयलोकस्येहलोकस्य परलोकस्य च बान्धवस्सुखकारी सहायक इत्यर्थः। सुतः पुत्रो नास्ति चेत्तर्हि अश्वमेधस्तन्नाम यज्ञः प्रभृतिरादिर्यासां क्रियाणां तासां क्रमैः सम्पादनैः किम् किम्फलम्। पुत्रोत्पत्त्यभावेऽश्वमेधादिसदृशानां स्वालौकिक-शक्तिप्रदर्शकानां कर्मणां सुतरामेव वैयर्थ्यं समायाति। पितृणां पूर्वपुरुषाणामृण-मपनेतुं दूरीकर्त्तुमक्षमा असमर्था गृहमेधिनो गृहस्थाः कथं शुभं मङ्गलं लभन्ते प्राप्तुं शक्नुवन्ति।

भाषा

यदि इस लोक और परलोक दोनों में साथ देनेवाला पुत्र न हुआ तो अश्वमेध आदि यज्ञों के करने से क्या लाभ है। पितृऋण से मुक्त होने में असमर्थ गृहस्थ लोगों का कैसे कल्याण हो सकता है।

प्रतापशौर्यादिगुणैरलङ्कृतोऽप्युपैति तावन्न कृतार्थतां नृपः ।
सुतेन दोर्विक्रमलब्धकीर्तिना न यावदारोहति पुत्रिणां धुरि ॥३५॥

अन्वयः

नृपः प्रतापशौर्यादिगुणैः अलङ्कृतः अपि तावत् कृतार्थतां न उपेति यावत् दोर्विक्रमलब्धकीर्तिना सुतेन पुत्रिणां धुरि न आरोहति।

व्याख्या

नृपो राजा प्रतापेन प्रभावेण 'स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्' इत्यमरः। शौर्यादिगुणैर्वीरतादिगुणैश्चाऽलङ्कृतः सम्भूषितोऽपि कृतार्थतां जन्मसाफल्यं तावन्नोपेति प्राप्नोति यावत् दोष्णोर्भुजयोर्विक्रमेण पराक्रमेण लब्धोपार्जिता कीर्तिर्यशो येन तेन सुतेन पुत्रेण पुत्रिणां पुत्रवतां धुरि प्राधान्ये नाऽऽरोहति न परिनिष्ठितो भवति।

भाषा

राजा, प्रताप वीरता आदि गुणों से विभूषित होने पर भी तब तक अपने जन्म की सफलता को प्राप्त नहीं करता जब तक भुजबल के पराक्रम से कीर्ति को कमाने वाले पुत्र से पुत्रवान् लोगों में अग्रणी नहीं होता।

निशम्य देवस्य नितान्तदुःखिता कथामिति श्रोत्रपथप्रमाथिनीम्।
जगाद किञ्चिन्न नरेन्द्रसुन्दरी परं निशश्वास तरङ्गितालका ॥३६॥

अन्वयः

इति श्रोत्रपथप्रमाथिनिं देवस्य कथां निशम्य नितान्तदुःखिता नरेन्द्रसुन्दरी किञ्चित् न जगाद परं तरङ्गितालका (सती) निशश्वास।

व्याख्या

इतीत्थं श्रोत्रयोः कर्णयोः पन्था मार्गस्तस्य प्रमाथिनीं तां कर्णकुहरदुःखदायिनीं देवस्य राज्ञः कथां वार्तां निशम्य श्रुत्वा नितान्तमत्यन्तं दुःखिता पीड़िता नरेन्द्रनन्दिनी राजमहिषी किञ्चित्किमपि न जगाद नोवाच परं केवलं तरङ्गिता इतस्ततः प्रक्षिप्ताः कुन्तलाः केशा यस्या सा सती निशश्वास दीर्घमुष्णञ्च श्वासं प्रवाहितवती। केशस्य स्थानच्युतिर्दीर्घनिश्वासश्च दुःखचिन्हम्। परमदुःखिताऽभूदित्यर्थः।

भाषा

इस प्रकार राजा की कर्णकटू बातें सुनकर अत्यन्त दुःखी रानी ने कोई उत्तर नहीं दिया। केवल बिखरे बालों वाली उस रानी ने जोर से साँस भरा। अर्थात् अत्यन्त दुःखी हुई।

स धीरमुर्वीन्दुरधीरलोचनामथाङ्कमारोप्य कृपार्द्रमानसः ।
हरन्निवातङ्ककलङ्कमुज्वल-द्विजावलीकान्तिजलैरवोचत ॥३७॥

अन्वयः

अथ सः उर्वीन्दुः कृपार्द्रमानसः सन् अधीरलोचनां धीरम् अङ्कम् आरोप्य उज्ज्वलद्विजावलीकान्तिजलैः आतङ्ककलङ्कं हरन् इव अवोचत ।

व्याख्या

अथाऽनन्तरं स्वपत्न्या दुःखितदशानिरीक्षणानन्तरं सः प्रसिद्ध उर्व्याः पृथिव्या इन्दुश्चन्द्रः पृथिवीशोभाधायको राजा कृपया दययाऽऽर्द्रं परिप्लुतं मानसं मनो यस्य स एवम्भूतस्सन् अधीरे चञ्चले लोचने नेत्रे 'लोचनं नयनं नेत्रमीक्षणञ्चक्षुरक्षिणि' इत्यमरः । यस्याः सा तां दुःखेन चञ्चललोचनां धीरं यथास्यात्तथा धैर्यमवलम्ब्याऽङ्कं स्वोत्सङ्गमारोप्य प्रतिष्ठाप्योज्वला शुभ्रा द्विजानां दन्तानां 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । आवली पंक्तिस्तस्य कान्तयः एव जलानि तैरातङ्क एव व्यथैव कलङ्को मालिन्यं तं हरन्निवाऽपमृजन्निवाऽवोचतोक्तवान् । हास्येन स्वभावं गोपयन् पत्न्याः सान्त्वनमकरोत् । अत्रोत्प्रेक्षाऽलङ्कारः ।

भाषा

अपनी पत्नी को दुःखी देखने के अनन्तर राजा के हृदय में दया का संचार होकर उसने चंचल नेत्र वाली रानी को, धीरज के साथ अपनी गोद म बैठाकर मानों सफेद दांतों की कतार की कान्ति रूपी जल से पीड़ा रूपी धब्बे को धोते हुए कहा अर्थात् हँसते हुए रानी से कहा ।

अलं विषादेन करोषि किं मुखं कवोष्णनिःश्वासविधूसराधरम् ।
अभीष्टवस्तुप्रतिबन्धिनामहं कृताग्रहो निग्रहणाय कर्मणाम् ॥३८॥

अन्वयः

विषादेन अलं, मुखं कवोष्णनिःश्वासविधूसराधरं किं करोषि । अहं अभीष्टवस्तुप्रतिबन्धिनां कर्मणां निग्रहणाय कृताग्रहः (अस्मि) ।

व्याख्या

विषादेनाऽलं शोकः परिहर्तव्यः । 'अलं भूषणपर्याप्तिशक्तिवारणवाचकः'

इत्यमरः । मुखं स्वाननं कवोष्णः कोष्णः 'कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति' इत्यमरः । चाऽसौ निश्वासस्तेन विधूसरो मलिनोऽधर अधरोष्ठो यस्मिन् तत् किं किमर्थं करोषि विदधासि । अहमभोष्टमीप्सितं यद्वस्तु पुत्रप्राप्तिरूपं तत्प्रतिबध्नन्ति प्रतिरुद्धन्ति तेषां कर्मणामिहजन्मनि पूर्वजन्मनि वा कृतानां दुष्कर्मणां निग्रहाय समूलमुन्मूलनाय कृत आग्रह अभिनिवेशो येन स बद्धपरिकरोऽस्मि ।

भाषा

अब दुःख दूर करो । अपने मुख को गरम श्वास से सूखे अधरोष्ठ वाला क्यों बनाती हो । मैं पुत्र रूपी अभीष्ट सिद्धि के प्रतिबन्धक सम्पूर्ण इस जन्म के या पूर्व जन्म के कर्मों को नष्ट करने के लिये कटिबद्ध हो गया हूँ ।

अधीतवेदोऽस्मि कृतः[१] श्रुतागमः श्रमोऽस्ति भूयानितिहासवर्त्मसु ।
गुरुष्ववज्ञाविमुखं सदा मनस्तदभ्युपायोऽत्र मया न दुर्लभः ॥३९॥

अन्वयः

(अहं) श्रुतागमः (सन्) अधीतवेदः अस्मि । इतिहासवर्त्मसु भूयान् परिश्रमः कृतः । मनः गुरुषु सदा अवज्ञाविमुखम् अस्ति । तत् मया अत्र अभ्युपायः न दुर्लभः ।

व्याख्या

अहं श्रुता गुरुमुखादाकर्णिता आगमाः शास्त्राणि येन एवम्भूतस्सन् अधीताः सम्यगभ्यस्ता वेदा ऋग्यजुस्सामाथर्ववेदा येन सोऽस्मि । इतिहासानां रामायण-महाभारतादीनां वर्त्मसु तत्प्रतिपादितमार्गेष्वपि भूयान्महान्परिश्रमः कृतः । मम मनः गुरुषु पूज्येषु सदा सर्वदैवाऽवज्ञाया अपमानात्पराङ्मुखं विमुखमस्ति । तत्तस्मात्कारणादत्र पुत्रवस्तुनि मयाऽभ्युपायो न दुर्लभः किन्तु सुलभस्सु-साध्यश्चेति भावः ।

भाषा

मैंने गुरुमुख से सब शास्त्रों का श्रवण कर वेदों को पढ़ा है । रामायण-महाभारतादि इतिहास प्रतिपादित मार्गों का परिश्रम से पालन किया है ।

---

[१] कृतश्रुतागमः—इत्यपि पाठः ।

मेरा मन सदैव बड़ों का अपमान करने से विरत रहा है। ऐसी परिस्थिति में मेरे लिये पुत्ररूपी वस्तु प्राप्त करने का उपाय दुर्लभ नहीं हो सकता।

किमस्ति दुष्प्रापमसौ निषेव्यते कुलप्रभुर्बालमृगाङ्कशेखरः।
करस्थितस्यापि चकोरलोचने न पात्रमालस्यहतास्तपस्विनः ॥४०॥

अन्वयः

असौ कुलप्रभुः बालमृगाङ्कशेखरः (यदि) निषेव्यते (तर्हि) किं दुष्प्रापम् अस्ति। हे चकोरनयने आलस्यहताः तपस्विनः करस्थितस्य अपि पात्रं न।

व्याख्या

असौ प्रसिद्धः कुलस्य वंशस्य प्रभुरिष्टदेवता बालोऽर्द्धो मृगाङ्कश्चन्द्रः शेखरं शिरोभूषणं यस्य स शिवो यदि निषेव्यते सेवया प्रसन्नीक्रियते तर्हि किं वस्तु दुष्प्रापं दुर्लभमस्ति, न किमपीत्यर्थः। हे चकोरवच्चपले नेत्रे नयने यस्यास्तत्सम्बुद्धौ हे चकोरनयने चकोरचपलनयने आलस्येनाऽकर्मणा हता आलस्यवशीभूतास्तपस्विनो वराकाः करे करतले स्थितस्य विद्यमानस्याऽपि वस्तुनः पात्रं भाजनं न भवन्ति। कर्मशीलानामुद्योगिनां पुरुषाणां किमपि दुस्साध्यं नेत्यर्थः। अत्राऽर्थापत्त्यलङ्कारः।

भाषा

अपने वंश के इष्टदेव चन्द्रशेखर शंकर की यदि उपासना की जाय तो कोई वस्तु दुर्लभ नहीं है। हे चकोर के समान चञ्चल नेत्र वाली! आलस से भरे अकर्मण्य लोगों को, पास की वस्तु भी प्राप्त नहीं हो सकती है।

तदेष तावत्तपसे सह त्वया प्रभूतभावः प्रयते यतेन्द्रियः।
विभावरीवल्लभखण्डमण्डनः स यावदायाति दयां जगद्गुरुः ॥४१॥

अन्वयः

तत् प्रभूतभावः एषः (अहं) यतेन्द्रियः सन् त्वया सह तावत् तपसे प्रयते यावत् विभावरीवल्लभखण्डमण्डनः जगद्गुरुः सः दयां आयाति।

व्याख्या

तत्तस्मात्कारणात्प्रभूतो बहुलो भावो भक्तिभावो यस्य स एष अहं जितानि वशीकृतानीन्द्रियाणीन्द्रियसमूहो येन स वशीकृतेन्द्रियसमूहस्सन् त्वया सह भवत्या सह तावत्कालपर्यन्तं तपसे तपश्चरणाय प्रयते महोद्योगं करिष्ये यावत्कालं विभावर्या रजन्याः 'विभावरीतमस्विन्यौ रजनी यामिनी तमी' इत्यमरः। वल्लभः प्रियश्चन्द्रस्तस्य खण्ड एव कलैव मण्डनं भूषणं यस्य स जगतां भुवनानां 'विष्टपं भुवनं जगत्' इत्यमरः। गुरुः श्रेष्ठः सः शंकरो दयां कृपामायाति प्राप्नोति। करुणार्द्रमानसस्सन्नभीष्टवरप्रदानं करोतीत्यर्थः।

भाषा

इसलिये दृढ़ भक्ति से युक्त, मैं तुम्हारे साथ इन्द्रियों को वश में करके अर्थात् संयम से तब तक तप करने में प्रयत्नशील रहूँगा जब तक अर्धचन्द्र से शोभित जगत्प्रभु शंकर को मेरे ऊपर दया न आजाए।

विधाय शान्त्यै कलुषस्य कर्मणस्तदेष सर्वेन्द्रियतापनं तपः।
नयामि भक्त्या झटिति प्रसन्नतामखण्डया खण्डशशाङ्कशेखरम् ॥४२॥

अन्वयः

तत् एषः (अहं) कलुषस्य कर्मणः शान्त्यै सर्वेन्द्रियतापनं तपः विधाय अखण्डया भक्त्या खण्डशशाङ्कशेखरं झटिति प्रसन्नतां नयामि।

व्याख्या

तत्तस्मात्कारणादेषोऽहं कलुषस्य दुष्कृतस्य 'कलुषं वृजिनैनोऽघमंहो दुरित-दुष्कृतम्' इत्यमरः। कर्मणः क्रियाकलापस्य शान्त्यै विनाशाय सर्वेन्द्रियाणां नेत्रादीनां तापनं पीडनं यस्मिन्तत्तपो दुष्करतपस्यां विधाय कृत्वाऽखण्डयाऽविच्छिन्न-सन्तानया भक्त्या दृढभक्त्येत्यर्थः। खण्डश्चासौ शशाङ्कश्चन्द्रश्च सः शेखरं शिरोभूषणं यस्य तं शिवं झटिति द्राक् 'स्राक् झटित्यंजसान्हाय द्राङ् मंक्षु सपदि द्रुते' इत्यमरः। प्रसन्नतां प्रसादं नयामि प्रापयामि। अत्रानुप्रासोऽलङ्कारः।

भाषा

इसलिये मैं पुत्रप्राप्ति के बाधक पापकर्मों का नाश कर डालने के लिये समग्र इन्द्रियों को कष्टप्रद, घोर तपस्या कर, अविच्छिन्न दृढ़भक्ति से चन्द्रशेखर भगवान् शङ्कर को शीघ्र ही प्रसन्न करूंगा।

तथेति देव्या कृतसम्मतिस्ततः समस्तचिन्तां विनिवेश्य मन्त्रिषु ।
अभूदनुष्ठानविशेषतत्परः स पार्थिवः प्रार्थितवस्तुसिद्धये ॥४३॥

अन्वयः

ततः देव्या इति तथा कृतसम्मतिः सः पार्थिवः समस्तचिन्तां मन्त्रिषु विनिवेश्य प्रार्थितवस्तुसिद्धये अनुष्ठानविशेषतत्परः अभूत् ।

व्याख्या

ततस्तदनन्तरं देव्या पत्न्येतीदं भवदुक्तं पुत्रोत्पत्तिरूपं कार्यं तपस्साधनेन स्या-दिति हेतोस्तथैवाऽस्तु, इति कृता सम्मतिर्येन स कृतनिश्चयस्स पार्थिवो राजा समस्तां सम्पूर्णां चिन्तां राज्यभारचिन्तां मन्त्रिष्वमात्येषु विनिवेश्य विनिक्षिप्य प्रार्थितस्याऽभीष्टस्य वस्तुनः पुत्रस्य सिद्धये प्राप्तयेऽनुष्ठानविशेषे विशिष्टानुष्ठाने तत्पर आसक्तोऽभूत् । 'तत्परे प्रसितासक्तौ' इत्यमरः ।

भाषा

इसके अनन्तर, अपनी रानी की सम्मति मिलने पर, उस राजाने राजकाज का बोझ मन्त्रियों को सौंपकर अभीष्ट पुत्रप्राप्ति की सिद्धि के लिये विशिष्ट अनुष्ठान करना प्रारम्भ कर दिया ।

तपः स्वहस्ताहृतपुष्पपूजित-त्रिलोचनः स्थण्डिलवासधूसरः ।
तथा स राजर्षिरसाधयद्यथा महर्षयोऽस्मादपकर्षमाययुः ॥४४॥

अन्वयः

सः राजर्षिः स्वहस्ताहृतपुष्पपूजितत्रिलोचनः स्थण्डिलवासधूसरः (सन्) तथा तपः असाधयत् यथा अस्मात् महर्षयः अपकर्षम् आययुः ।

व्याख्या

स राजर्षि ऋषिव्रतगृहीतो नृपः स्वहस्ताभ्यां स्वकराभ्यामाहृतानि समानीतानि च तानि पुष्पाणि कुसुमानि तैः पूजितोऽभ्यर्चितस्त्रिलोचनः शंकरो येन सः स्थण्डिले भूमिविशेषे वासेन शयनादिना 'यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ' इत्यमरः । धूसरः सरजस्कस्सन् तथोग्रं तपस्तपश्चरणमसाधयत् कृतवान्

यथा येन कारणेनाऽस्मान्नृपान्महर्षयोऽपि ब्रह्मर्षयोऽप्यपकर्षं निम्नकोटिमाययुः प्राप्ताः। स्थण्डिलं चत्वरं, यागार्थं परिष्कृता भूमिस्तत्र शयनादिकं महद्व्रतम्।

भाषा

अपने हाथों से तोड़े हुए फूलों से शंकर की पूजा करने वाले उस राजर्षि ने स्थण्डिल पर ही निवास करने से धूली से धूसरित होकर ऐसी उग्र तपस्या की जिससे महर्षि लोग भी तपस्या में इससे नीचे हो गये।

स सौकुमार्यैकधनोऽपि सोढवाँस्तपोधनैर्दुष्प्रसहं परिश्रमम्।
रराज तीव्रे तपसि स्थितो नृपः शशीव चण्डद्युतिमण्डलातिथिः ॥४५॥

अन्वयः

सौकुमार्यैकधनः अपि सः तपोधनैः दुष्प्रसहं परिश्रमं सोढवान्। तीव्रे तपसि स्थितः नृपः चण्डद्युतिमण्डलातिथिः शशी इव रराज।

व्याख्या

सुकुमारस्यभावस्सौकुमार्यं तदेव धनं द्रव्यं यस्य सः परमकोमलाङ्गोऽपि तप एव धनं येषां तैस्तपस्विभिर्दुःखेन यथाकथञ्चित्प्रकर्षेण सोढुं शक्यं सहनायोग्य-मित्यर्थः परिश्रमं क्लेशं सोढवानसहत। तीव्रेऽत्युग्रे तपसि तपस्यायां स्थितो वर्तमानो नृपो भूपतिश्चण्डद्युतिस्सूर्यस्तस्य मण्डलस्य चक्रवालस्य 'चक्रवालं तु मण्डलम्' इत्यमरः। अतिथिस्समीपस्थः शशी चन्द्र इव रराज शुशुभे। यथा सूर्यमण्डल-गतश्चन्द्रः कान्तिहीनो भवति तथैव परिश्रमाधिक्येन स नृपो म्लानस्संजात इति भावः। अत्रोपमालङ्कारः।

भाषा

स्वभाव से ही अत्यन्त सुकुमार होने पर भी उसने तपस्वियों से भी अत्यन्त कठिनता से सहने योग्य क्लेश सहन किया। घोर तपस्या में लगा हुआ वह राजा सूर्यमण्डल के निकट आए हुए चन्द्रमा के समान म्लान दिखाई पड़ने लगा।

नृपं कठोरव्रतचर्यया कृशं समाहिता सा नरनाथसुन्दरी।
निशातशाणोल्लिखितं समन्वगात् प्रभेव माणिक्यमतीव निर्मला ॥४६॥

अन्वयः

कठोरव्रतचर्यया कृशं नृपं सा समाहिता नरनाथसुन्दरी निशातशाणोल्लिखितं माणिक्यम् अतीव निर्मला प्रभा इव समन्वगात् ।

व्याख्या

कठोरं कठिनञ्चतद्व्रतञ्च तपस्यारूपं कठोरव्रतं तस्य चर्याऽऽचरणं तया कृशं कृशतनुं नृपं राजानं सा प्रसिद्धा समाहिता समाधौ स्थिता, निश्चलचित्तेन तपःपरायणा नरनाथस्य राज्ञः सुन्दरी पत्नी निशातस्तीक्ष्णः शाणः कषोपलं 'शाणस्तु निकषः कषः" इत्यमरः । तेनोल्लिखितं घर्षितमत एव कृशं माणिक्यं मणिमतीवाऽत्यन्तं निर्मला स्वच्छा प्रभेव कान्तिरिव समन्वगादनुसृतवती । यथा माणिक्यस्य कषे घर्षणेन कृशता प्रभा चाऽनुसरति तथैव कठोरव्रतेन कृशं नृपं तस्य राज्ञी समनुसृतवतीति भावः । अत्रोपमालङ्कारः ।

भाषा

जिस प्रकार तेज सान पर चढ़ाए हुए माणिक्य में कृशता के साथ अत्यन्त उज्वल चमक भी आजाती है उसी प्रकार कठोर तपस्या से कृश उस राजा का, तपस्या में लगी रानी बराबर निश्चल चित्त से साथ देती रही ।

मृगाङ्कचूडस्य किरीटनिम्नगा-तरङ्गवातैरिव वारितश्रमा ।
उपाचरत्सम्यगसौ नराधिपं स्वहस्तलिप्तेश्वरमन्दिराजिरा ॥४७॥

अन्वयः

स्वहस्तलिप्तेश्वरमन्दिराजिरा मृगाङ्कचूडस्य किरीटनिम्नगातरङ्गवातैः वारितश्रमा इव असौ नराधिपं सम्यक् उपाचरत् ।

व्याख्या

स्वहस्तेन निजकरेण लिप्तं गोमयादिनोपलिप्तमीश्वरस्य शिवस्य मन्दिरस्याऽजिरमङ्गणं यया सा मृगाङ्कश्चन्द्रश्चूडे ललाटे यस्य तस्य शिवस्य किरीटरूपा मुकुटरूपा 'मुकुटं किरीटं पुन्नपुंसकम्' इत्यमरः । या निम्नगा गङ्गानदी तस्यास्तरङ्गवातैर्वीचिपवनैर्वारितोऽपनीतः श्रमः क्लेशो यस्याः सा वारितश्रमेवाऽसौ नृपपत्नी राजमहिषी नराधिपं राजानं सम्यक् प्रकारेण सिषेवे सेवितवती । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

अपने हाथों से शङ्कर के मन्दिर के आँगन को लीपपोत कर सफा करने वाली रानी, शङ्कर का मुकुट स्वरूप गङ्गानदी की लहरों के वायु से मानो अपना श्रम दूर करती हुई, राजा की अच्छी तरह सेवा करती थी।

तथाविधायाः सदृशं यदुन्नतेर्मतं यदौदार्यधनस्य चेतसः।
तदद्रिकन्यादयितस्य पूजने जितेन्द्रियः कल्पयति स्म पार्थिवः ॥४८॥

अन्वयः

जितेन्द्रियः पार्थिवः तथाविधायाः उन्नतेः यत् सदृशं, औदार्यधनस्य यत् मतं तत् अद्रिकन्यादयितस्य पूजने कल्पयति स्म।

व्याख्या

जितानि वशीकृतानीन्द्रियाणि येन स यतेन्द्रियः पार्थिवो राजा 'राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः' इत्यमरः। तथाविधायास्तादृश्याः पुत्रप्राप्तिरूपाया उन्नतेरभ्युदयस्य यत् सदृशं योग्यं कार्यमौदार्यमेव धनं यस्य तस्य चेतसश्चित्तस्य यन्मतमिष्टमुदारचित्तेन च यत्सम्पादनीयं स्यात्तत्सर्वं सेवाकार्यं तत्सामग्री च 'वित्तशाठ्यविवर्जित' इति स्मरणात्। अद्रिकन्यायाः पार्वत्या दयितस्य पत्युः शिवस्य पूजने पूजायां कल्पयति स्म रचयति स्म। यक्षानुकूलो बलिरिति न्यायाद्यथाकार्यं सर्वमकल्पयदिति भावः।

भाषा

जितेन्द्रिय राजा, वैसी पुत्र प्राप्ति के सदृश उच्च कामना के अनुरूप और उदारचित्त की प्रेरणा के अनुसार शंकर के पूजन में सब उत्तम वस्तुओं का प्रयोग करता था।

इति क्षितीन्द्रश्चिरमिन्दुशेखर-प्रसादनाय व्रतमुग्रमाश्रितः।
कदाचिदाकर्णयति स्म भारतीं प्रभातपूजासमये नभश्चरीम् ॥४९॥

अन्वयः

इति इन्दुशेखरप्रसादनाय चिरम् उग्रं व्रतम् आश्रितः क्षितीन्द्रः कदाचित् प्रभातपूजासमये नभश्चरीं भारतीम् आकर्णयति स्म।

व्याख्या

इति पूर्वोक्तरीत्येन्दुशेखरस्य शिवस्य प्रसादनाय प्रसन्नतासम्पादनार्थं चिरं चिरकालमुग्रं कठिनं व्रतं नियमं 'नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम्' इत्यमरः । आश्रितस्समाश्रितः क्षितीन्द्रो राजा कदाचित्कस्मिंश्चित्समये प्रभाते प्रातःकाले या पूजाऽर्चनं तस्या अवसरे नभसि गगने चरतीति नभश्चरी तामाकाशगामिनीं भारतीं वाणीं 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः । आकाशवाणीमित्यर्थः । आकर्णयति स्म श्रुतवान् ।

भाषा

इस प्रकार शंकर भगवान् को प्रसन्न करने में चिरकाल तक कठोर व्रत पालन करने वाले राजा ने किसी दिन सवेरे की पूजा के काल में आकाशवाणी सुनी ।

अलं चुलुक्यक्षितिपालमण्डन-श्रमेण विश्राम्यतु कर्कशं तपः ।
कमप्यपूर्वं त्वयि पार्वतीपतिः प्रसादमारोहति भक्तवत्सलः ॥५०॥

अन्वयः

हे चुलुक्यक्षितिपालमण्डन श्रमेण अलं, कर्कशं तपः विश्राम्यतु, भक्तवत्सलः पार्वतीपतिः त्वयि कम् अपि अपूर्वं प्रसादम् आरोहति ।

व्याख्या

हे चुलुक्यस्य चुलुक्यवंशस्य क्षितिपाला नृपास्तेषां मण्डनमाभूषणं तत्सम्बुद्धौ हे चुलुक्यवंशक्षितिपालमण्डन ! राजन् ! श्रमेणाऽलमतः परं व्रतादिषु परिश्रमो न कर्तव्यः । कर्कशं कठिनं तपो नियमो विश्राम्यतु विश्रान्तिमेतु भक्तानां प्रपन्नानां वत्सलः स्निग्धः 'स्निग्धस्तु वत्सलः' इत्यमरः । पार्वत्याः पतिः शिवस्त्वयि त्वद्विषये कमप्यपूर्वं कमप्यनिर्वचनीयं प्रसादं प्रसन्नतां कृपामारोहति करोति ।

भाषा

हे चालुक्य वंशीय राजाओं के भूषण ! अब परिश्रम मत करो । कठोर तप बन्द करो । भक्तवत्सल शंकर ने तुम्हारे ऊपर एक अवर्णनीय कृपा की है ।

इयं त्वदीया दयिता भविष्यति क्षितीन्द्र पुत्रत्रितयस्य भाजनम् ।
चुलुक्यवंशः शुचितां यदर्जितैर्यशोभिरायास्यति मौक्तिकैरिव ॥५१॥

अन्वयः

हे क्षीतीन्द्र इयं त्वदीया दयिता पुत्रत्रितयस्य भाजनं भविष्यति। मौक्तिकैः इव यदर्जितैः यशोभिः चुलुक्यवंशः शुचिताम् आयास्यति।

व्याख्या

हे क्षितीन्द्र हे राजन्! इयं त्वदीया तव दयिता महिषी पुत्राणां सुतानां त्रितयस्य त्रयस्य त्रिसंख्याकसुतानां वा भाजनं पात्रं भविष्यति। मौक्तिकैरिव मुक्तामणिभिरिवाऽतिस्वच्छैः शुक्लवर्णैर्यैस्तवपुत्रैरर्जितानि निष्पादितानि यशोभिः कीर्तिभिः 'यशः कीर्तिः समज्ञा च' इत्यमरः। चुलुक्यवंशश्चुलुक्यनृपाणां कुलं शुचितामुज्वलतां पवित्रतां वाऽऽयास्यति गमिष्यति। 'शृङ्गारः शुचिरुज्वलः' इत्यमरः। ते त्रयः पुत्राः कुलभूषणा भविष्यन्तीति भावः। अत्रोपमालङ्कारः।

भाषा

हे राजा तुम्हारी इस धर्मपत्नी से तुम्हें तीन पुत्र होंगे। उनके द्वारा उपार्जित मोतियों की ऐसी स्वच्छ और शुभ्र कीर्ति से यह चालुक्यवंश उज्वल या पवित्र हो जाएगा।

निधिः प्रतापस्य पदं जयश्रियः कलालयस्ते तनयस्तु मध्यमः।
दिलीपमान्धातृमुखादिपार्थिव-प्रथामतिक्रम्य विशेषमेष्यति ॥५२॥

अन्वयः

ते मध्यमः तनयः तु प्रतापस्य निधिः जयश्रियः पदं कलालयः (सन्) दिलीपमान्धातृमुखादिपार्थिवप्रथाम् अतिक्रम्य विशेषम् एष्यति।

व्याख्या

ते तव मध्यमो द्वितीयस्तनयः पुत्रस्तु 'आत्मजस्तनयः सूनुः सुतः पुत्रः' इत्यमरः। प्रतापस्य प्रभावस्य 'सः प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्' इत्यमरः। विधिर्निधानं जयश्रियो जयलक्ष्म्याः पदं स्थानं कलानाञ्चतुःषष्ठिकलानामालयो गृहं सन् दिलीपश्चमान्धाता च दिलीपमान्धातारौ सुर्यवंशसमुत्पन्नौ प्रतापिनौ राजानौ मुखं आदौ येषां ते दिलीपमान्धातृमुखा आदिपार्थिवाः प्राचीननृपास्तेषां प्रथां ख्यातिमतिक्रम्य समुत्क्रम्य विशेषं विशेषतामधिकोत्कृष्टतामेष्यति प्राप्स्यति।

भाषा

तुम्हारा मङ्गल। लड़का बड़ा प्रतापी, विजय लक्ष्मी का पात्र तथा चौंसठों कलाओं का ज्ञाता होकर सूर्यवंशी दिलीप मान्धाता आदि प्राचीन राजाओं की ख्याति से भी अधिक प्रतिष्ठा प्राप्त करेगा।

सुतद्वयं ते निजकर्मसम्भवं मम प्रसादात्तनयस्तु मध्यमः।
पयोनिधेः पारगतामपि श्रियं स दोर्बलाद्राम इवाहरिष्यति ॥५३॥

अन्वयः

सुतद्वयं ते निजकर्मसम्भवं, मध्यमः तनयः तु मम प्रसादात्, सः रामः इव दोर्बलात् पयोनिधेः पारगताम् अपि श्रियम् आहरिष्यति।

व्याख्या

सुतद्वयं द्वौ पुत्रौ ते तव निजेन स्वकीयेन कर्मणा तपसा सुकृतेन वा सम्भव उत्पत्तिर्ययोस्तत्। द्वौ पुत्रौ तव कठिनव्रतफलरूपाविति भावः। मध्यमो द्वितीयस्तनयः पुत्रस्तु मम शिवस्य प्रसादादनुग्रहविशेषाद्भविष्यति। स राम इव दाशरथिरिव दोष्णोर्भुजयोर्बलं शक्तिस्तस्मात् 'भुजबाहू प्रवेष्टो दोः' इत्यमरः। पयोनिधेः समुद्रस्य पारगतां पारे गतां श्रियं राज्यलक्ष्मीं रामपक्षे सीतामाहरिष्यति समानेष्यति। अत्रोपमालङ्कारः।

भाषा

दो पुत्र तुम्हारे किये हुवे कठिन अनुष्ठानादि कर्मों से प्राप्त होंगे। किन्तु तुम्हारा मध्यम पुत्र तो मेरी विशेष कृपा से तुम्हें प्राप्त होगा। वह रामचन्द्र के समान समुद्र के पार गई हुई सीता रूपी लक्ष्मी को अपने भुजबल से ले आएगा।

गिरं निपीय श्रुतिशुक्तिमागतां सुधामिव व्योमपयोनिधेरिति।
उदञ्चिरोमाञ्चतया समन्ततः स शैत्यसम्पर्कमिव न्यवेदयत् ॥५४॥

अन्वयः

सः व्योमपयोनिधेः श्रुतिशुक्तिम् आगतां सुधाम् इव इति गिरं निपीय समन्ततः उदञ्चिरोमाञ्चतया शैत्यसम्पर्कम् इव न्यवेदयत्।

व्याख्या

स आहवमल्लदेवो व्योमैवाऽभ्रमेव 'द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्करमम्बरम्' इत्यमरः। पयसां जलानां निधिस्समुद्रस्तस्माच्छ्रुतिरेव कर्ण एव शुक्तिर्मुक्तास्फोटः 'मुक्तास्फोटःस्त्रियां शुक्तिः' इत्यमरः। तां समागतां प्राप्तां सुधामिव पीयूषमिवेतीत्थं पूर्वोक्तां गिरमाकाशवाणीं निपीय श्रुत्वा समन्ततः परित उदञ्ची उद्गतो रोमाञ्च रोमहर्षणं यस्य स उदञ्चिरोमाञ्चस्तस्य भावस्तत्ता तया 'रोमाञ्चो रोमहर्षणम्' इत्यमरः। शैत्यस्य शीततायास्सम्पर्कः सम्बन्धस्तमिव न्यवेदयत् प्रकटयाञ्चकार। अत्राऽऽकाशे समुद्रतादात्म्यारोपः श्रुतौ शुक्तित्वारोपे वाण्यां सुधात्वारोपे च कारणमिति परम्परितरूपकम्। अत्रोपमोत्प्रेक्षयोः संकरः।

भाषा

राजा आहवमल्लदेव, आकाशरूपी समुद्र से कर्णरूपी सीप में अमृत रूपी आकाशवाणी पड़ने से हर्ष के कारण रोमाञ्चित होकर अपने को मानों जाड़ा लग रहा है ऐसा प्रकट करने लगा। (जाड़ा लगने से भी रोंगटे खड़े हो जाते हैं।)

उदश्रुदानन्दजलप्लुतेक्षणस्ततः प्रमोदालसलोचनोत्पलाम्।
स वल्लभामन्यपुरन्ध्रिदुर्लभैर्गुणैरुपेतां गुणवानतोषयत् ॥५५॥

अन्वयः

ततः गुणवान् सः उदश्रुदानन्दजलप्लुतेक्षणः (सन्) अन्यपुरन्ध्रिदुर्लभैः गुणैः उपेतां प्रमोदालसलोचनोत्पलां वल्लभाम् अतोषयत्।

व्याख्या

ततस्तदनन्तरं गुणवान्दयादाक्षिण्यादिगुणोपेतः स आहवमल्लदेवनृप उदञ्चदुद्गच्छदानन्दजलमानन्दाश्रुजलं तेन प्लुते व्याप्ते ईक्षणे नेत्रे 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणि' इत्यमरः। यस्यैवम्भूतस्सन्नन्याश्चपुरन्ध्रयश्च नार्यश्च तासु दुर्लभैरप्राप्यैर्गुणैस्सौजन्यलज्जापातिव्रत्यादिगुणैरुपेतां युक्तां प्रमोदेनाऽऽनन्देनाऽलसे निस्पन्दे लोचन एवोत्पले कमले यस्यास्तां वल्लभां प्रियामतोषयत् समाश्वासितवान्। अत्ररूपकमलङ्कारः।

भाषा

इसके अनन्तर उस गुणी राजा ने उत्कट आनन्द जनित अश्रुओं से भरी आँखों से अन्य स्त्रियों में अप्राप्य गुणों से युक्त तथा आनन्द से निर्निमेष नेत्र कमल वाली अपनी रानी की सान्त्वना की ।

शनैर्विधाय व्रतपारणाविधिं धनैः कृतार्थीकृतविप्रमण्डलः ।
अखण्डसौभाग्यविलासया पुनस्तया समं राज्यसुखेष्वरज्यत ॥५६॥

अन्वयः

(सः) शनैः व्रतपारणाविधि विधाय धनैः कृतार्थीकृतविप्रमण्डलः (सन्) अखण्डसौभाग्यविलासया तया समं पुनः राज्यसुखेषु अरज्यत ।

व्याख्या

स राजा शनैः स्वस्थचित्तेन व्रतस्य पूर्वाचरितानुष्ठानस्य पारणाविधिं समाप्ति-कृत्यं ब्राह्मणभोजनादिपूर्वकं स्वभोजनादिकं विधाय कृत्वा कृतार्थीकृतं दान-भोजनादिना सन्तुष्टमनोरथीकृतं विप्रमण्डलं ब्राह्मणसमुदायो येनैवम्भूतस्सन्नखण्डं निरन्तरं यत्सौभाग्यं सधवत्वं तस्य विलासः सौख्यं यस्यास्सा तया स्ववल्लभया सह राज्यसुखेषु राजकीयसुखोपभोगेष्वरज्यत संरक्तो बभूव । मन्त्रिविनिविष्ट राज्यकार्यभारमुररीकृत्य पूर्ववत्प्रजापालनतत्परोऽभूदिति भावः ।

भाषा

वह राजा, स्वस्थ चित्त से व्रत का पारण कर और ब्राह्मणों को दान भोजन आदि से सन्तुष्ट करते हुए राज्य कार्य का भार लेकर अखण्ड सौभाग्यवती होने के सौख्य से युक्त अपनी रानी के साथ राज्य सुख के उपभोग करने में प्रवृत्त हुआ ।

क्रमेण तस्यां कमनीयमात्मजं शुभे मुहूर्ते पुरुहूतसन्निभः ।
अवाप्य सम्पादितमांसलोत्सवः परामगान्निर्वृतिमीश्वरः क्षितेः ॥५७॥

अन्वयः

पुरुहूतसन्निभः क्षितेः ईश्वरः क्रमेण शुभे मुहूर्ते तस्यां कमनीयम् आत्मजम् अवाप्य सम्पादितमांसलोत्सवः (सन्) परां निर्वृतिम् अगात् ।

व्याख्या

पुरुहूतसन्निभ इन्द्रसदृशः 'वृद्धश्रवाः शुनाशीरः पुरुहूतः पुरन्दरः' इत्यमरः । क्षितेः पृथिव्या ईश्वरः स्वामी क्रमेण किञ्चित्कालानन्तरं शुभे माङ्गलिके 'कल्याणं मङ्गलं शुभम्' इत्यमरः । मुहूर्ते काले तस्यां स्ववल्लभायां कमनीयं सुन्दरमात्मजं पुत्रं 'आत्मा वै जायते पुत्रः' इति श्रुतेः । अवाप्य लब्ध्वा सम्पादितः कृतो मांसलोऽतिबहुलोऽतिसमृद्धश्चोत्सवो महो येन सः 'मह उद्धव उत्सवः' इत्यमरः । एवम्भूतस्सन् परां समुत्कृष्टां निर्वृतिं सुखमगात् प्राप ।

भाषा

आगे चलकर इन्द्र के समान प्रतापी पृथ्वीपति आहवमल्लदेव ने उस रानी से सुमुहूर्त में एक सुन्दर पुत्र प्राप्त कर और उस उपलक्ष्य में एक बड़ा उत्सव मना कर बहुत आनन्द प्राप्त किया ।

स सोमवन्नेत्रचकोरपारणां चकार गोत्रस्य यदुज्वलाननः ।
यथोचितं सोम इति क्षमापतेस्ततः प्रसन्नादभिधानमाप्तवान् ॥५८॥

अन्वयः

यत् उज्ज्वलाननः सः गोत्रस्य सोमवत् नेत्रचकोरपारणां चकार ततः प्रसन्नात् क्षमापतेः यथोचितं सोमः इति अभिधानम् आप्तवान् ।

व्याख्या

यद्यस्मात्कारणादुज्ज्वलं विशिष्टशोभान्वितमाननं मुखं यस्य स नूतनजातशिशुर्गोत्रस्य चुलुक्यवंशस्य सोमवच्चन्द्र इव नेत्राणि नयनान्येव चकोराश्चकोरकाः "जीवंजीवश्चकोरकः" इत्यमरः । पक्षिविशेषा ये चन्द्रिकया तृप्यन्ति । तेषां पारणां सन्तोषं चकार ततस्तस्मात्कारणात्प्रसन्नादानन्दयुक्तात्क्षमापते राज्ञो यथोचितमुचितमनतिक्रम्य वर्तत इति यथायोग्यं सोम इत्याकारकमभिधानं नामाऽऽप्तवान् प्राप्तवान् । अत्रोपमारूपकयोः संकरः ।

भाषा

चूंकि सुन्दर मुखवाले उस बालक ने चन्द्रमा के समान चुलुक्यवंशीयों के नेत्र रूपी चकोरों को सन्तुष्ट किया इसलिये प्रसन्न चित्त राजा से उसने सोम यह नाम पाया । अर्थात उसका नाम सोम रक्खा गया ।

अनन्यसामान्यतनूजशंसिनीं स्मरन्नजस्रं गिरमुद्गतां दिवः ।
द्वितीयगर्भार्थमभूत्स निर्भरं समुत्सुको मध्यमलोकनायकः ॥५९॥

अन्वयः

मध्यमलोकनायकः सः दिवः उद्गतां अनन्यसामान्यतनूजशंसिनीं गिरं अजस्रं स्मरन् द्वितीयगर्भार्थं निर्भरं समुत्सुकः अभूत् ।

व्याख्या

मध्यमश्चासौ लोकश्च मध्यमलोको भूलोकस्तस्य नायको मध्यमलोकपालो भूपाल: स राजाऽऽहवमल्लदेवो दिव आकाशादुद्गतां समागतां नाऽन्य: सामान्यस्समानो यस्य स चाऽसौ तनूजः पुत्रश्च तं शंसति निवेदयतीति तां गिरं वाणीमजस्रं निरन्तरं 'नित्यानवरताजस्रम्' इत्यमरः । स्मरन् द्वितीयगर्भार्थं द्वितीयगर्भकृते निर्भरमत्यन्तं समुत्सुक उत्कण्ठितोऽभूत् ।

भाषा

वह भूलोक का राजा असाधारण व अलौकिक पुत्र प्राप्त होने की आकाशवाणी को सदैव स्मरण करता हुआ, दूसरे गर्भ के लिये अत्यन्त उत्कण्ठित हुआ ।

स्थितस्य गर्भे प्रभयेव कस्यचिद् विलिप्यमानां स्फटिकामलत्विषः ।
स गण्डपालीं बिसदण्डपाण्डुरां ददर्श देव्याः पृथिवीपतिस्ततः ॥६०॥

अन्वयः

ततः पृथिवीपतिः स्फटिकामलत्विषः गर्भे स्थितस्य कस्यचित् प्रभया इव विलिप्यमानां बिसदण्डपाण्डुरां देव्याः गण्डपालीं ददर्श ।

व्याख्या

ततस्तदनन्तरं पृथिवीपती राजा स्फटिकस्याऽमला निर्मलात्विडिव प्रभेव 'स्युः प्रभारुग्रुचिस्त्विड्भाभाच्छविद्युतिदीप्तयः' इत्यमरः । त्विट् प्रभा यस्य स तस्य स्फटिकमणिसमानशुभ्रकान्तेर्गर्भे उदराभ्यन्तरे स्थितस्य विद्यमानस्य कस्यचिद् गर्भस्य प्रभयेव कान्त्येव विलिप्यमानां रज्यमानामनुलिप्यमानाञ्च बिसदण्ड इव मृणालदण्ड इव 'मृणालं बिसमब्जादि' इत्यमरः । पाण्डुरां शुभ्रवर्णां देव्या महिष्याः गण्डपालीं कपोलं ददर्श दृष्टवान । अत्रोपमोत्प्रेक्षयोः संकरः ।

भाषा

इसके अनन्तर राजा ने स्फटिक की निर्मल कान्ति के समान शुभ्र कान्ति वाले गर्भस्थित किसी (गर्भ) की कान्ति से मानों छाए हुए, कमलनाल के सदृश श्वेत रंग के रानी के कपोलस्थल को देखा।

स हेमवृष्टिं महतीमकारयच्चकार चित्राण्युपयाचितानि च ।
हरप्रसादोचितसूनुलालसश्चकार किं किं न नरेन्द्रचन्द्रमाः ॥६१॥

अन्वयः

सः महतीं हेमवृष्टिं चित्राणि उपयाचितानि च चकार। हरप्रसादोचितसूनुलालसः नरेन्द्रचन्द्रमाः किं किं न चकार।

व्याख्या

स राजा महतीं विशालां हेमवृष्टिं सुवर्णवृष्टिं चित्राण्याश्चर्यकराण्युपयाचितानि स्वमनोरथसिद्धये स्वाभीष्टदेवतायै पूर्वं संकल्पितानुपहारांश्च चकार। "दीयते यत्तु देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्यं दोहदं तद्विदुर्बुधाः"। स राजा याचकेभ्यः प्रचुरं सुवर्णं दत्तवान् देवेभ्यश्च स्वाभिलषितसिद्धये पूर्वसंकल्पितानुपहारान् पूजनादिमिषेणार्पितवानिति भावः। हरस्य शिवस्य यः प्रसादः प्रसन्नता 'प्रसादस्तु प्रसन्नता' इत्यमरः। तदुचितस्तदनुकूलो यः सूनुः पुत्रस्तस्मिन् लालसोत्कटकामना यस्य स 'कामोऽभिलाषस्तर्षश्च सोऽत्यर्थं लालसा द्वयोः' इत्यमरः। नरेन्द्राणां राज्ञां तारकाणामिव मध्ये चन्द्रमाश्चन्द्र इवाऽऽल्हादको मनोहारी च स राजा किं किं समुचितं कार्यं न चकार कृतवान्। सर्वमेव तद्योग्यं समुचितं कार्यं कृतवानित्यर्थः। अत्रार्थापत्त्यलङ्कारस्तेन सम्पदामुत्कर्षः प्रतीयते।

भाषा

उस राजा ने सुवर्ण की घोर वृष्टि की अर्थात् याचकों को खूब सुवर्णदान दिया। देवताओं की जो विचित्र मनौतियाँ की थीं उनको पूरा किया। शंकर के प्रसाद के अनुकूल पुत्र पाने की लालसा रखने वाले उस राजा ने क्या २ नहीं किया अर्थात् तदनुकूल सब कुछ किया।

उवाह धौतां क्षितिपालवल्लभा सुधाप्रवाहैरिव देहकन्दलीम् ।
विषादपङ्कक्षयतः क्षमापतेर्निरन्तरं तु प्रससाद मानसम् ॥६२॥

अन्वयः

क्षितिपालवल्लभा सुधाप्रवाहैः धौताम् इव देहकन्दलीम् उवाह । क्षमापतेः मानसं तु विषादपङ्कक्षयतः निरन्तरं प्रससाद ।

व्याख्या

क्षितिपालस्य भूपालस्य वल्लभा प्रिया राज्ञी सुधाया अमृतस्य प्रवाहैः संतानैर्धौतां प्रक्षालितामत एव श्वेतामिव देहकन्दलीं शरीरलतामुवाह धारितवती । क्षमापतेः पृथ्वीपतेः 'विपुला गह्वरी धात्री गौरिला कुंभिनी क्षमा । भूतधात्री रत्नगर्भा जगती सागराम्बरा ।' इत्यमरः । मानसं मनस्तु विषादो दुःखं स एव पङ्कः कर्दमस्तस्य क्षयतो विनाशात् निरन्तरमजस्रं प्रससाद प्रसन्नतां समवाप । मानसं सरः पङ्कराहित्याद्यथा निर्मलजलेन प्रसन्नतां प्राप्नोति तथैव नृपस्य मनो दुःखराहित्याद् गर्भचिन्हैः सुखं प्राप । अत्रोत्प्रेक्षारूपकश्लेषाणां संकरस्तेन शरदृतुवृत्तान्तः प्रतीयत इति वस्तुध्वनिः ।

भाषा

रानी, अमृत से धोई हुई के समान श्वेत शरीर को धारण करने लगी अर्थात् रानी सफेद पड़ने लगी । राजा का मन दुःख रूपी कीचड़ का क्षय होने से निरन्तर प्रसन्न होने लगा । जिस प्रकार कीचड़ दूर होकर निर्मल जल रहने से मानस सरोवर प्रसन्न होता है वैसे ही राजा का मन दुःख दूर होकर गर्भ के चिन्ह से निरन्तर प्रसन्न हुआ ।

निपीड्य चन्द्रं पयसे निवेशिता ध्रुवं तदीयस्तनकुम्भयोः सुधा ।
यदुत्पलश्यामलमाननं तयोः सलाञ्छनच्छायमिव व्यराजत ॥६३॥

अन्वयः

पयसे चन्द्रं निपीड्य सुधा तदीयस्तनकुम्भयोः ध्रुवं निवेशिता । यत् तयोः उत्पलश्यामलम् आननं सलाञ्छनच्छायम् इव व्यराजत ।

व्याख्या

पयसे दुग्धाय 'पयः क्षीरं पयोऽम्बु च' इत्यमरः । चन्द्रं सुधांशुं निपीड्य निष्पीड्य सुधा चन्द्रगतं पीयूषं तस्या राज्ञा अयं तदीयस्तौ तदीयौ स्तनौ एव कुम्भौ तयोर्नृपपत्निकुचकुम्भयोर्ध्रुवं निश्चयेन निवेशिता प्रवेशिता । यद्यस्मात्कारणात् तयोः कुचयोरुत्पलं नीलोत्पलमिव श्यामलं कृष्णवर्णमाननं चूचुकः 'चूचुको ना कुचाननम्' इति रत्नकोशः । लाञ्छनस्य चन्द्रस्थकृष्णचिन्हस्य छाया कान्तिस्तया सहितमिति सलाञ्छनच्छायमिव व्यराजत शुशुभे । चन्द्रस्थसुधागमसम्बन्धेन कलङ्ककान्त्या अप्यागमनसम्भवादुत्प्रेक्षालङ्कारः ।

भाषा

(उस बालक के दूध पीने के लिये) दूध के स्थान पर चन्द्रमा को निचोड़ कर अमृत ही रानी के स्तन रूपी घड़ों में अवश्य भरा गया होगा । क्यों कि उन दोनों स्तनों के नीले कमल के ऐसे काले चूचुक, (ढेपनी, स्तन के ऊपर की घुंडी) चन्द्रमा के कलङ्क की कान्ति से युक्त दिखाई देते थे अर्थात् काले थे । गर्भिणी के चूचुक काले हो जाते हैं ।

नरेन्द्रकान्ताकुचहेमकुम्भयोः सुधारसं चीरमिषेण बिभ्रतोः ।
हिमोपचारार्पितमार्द्रचन्दनं श्रियं दधौ गालनशुभ्रवाससः ॥६४॥

अन्वयः

क्षीरमिषेण सुधारसं बिभ्रतोः नरेन्द्रकान्ताकुचहेमकुम्भयोः हिमोपचारार्पितम् आर्द्रचन्दनं गालनशुभ्रवाससः श्रियं दधौ ।

व्याख्या

क्षीरस्य दुग्धस्य मिषेण व्याजेन सुधारसममृतरसं बिभ्रतोर्धारयतो नरेन्द्रस्याऽऽहवमल्लदेवस्य कान्ता वल्लभा तस्याः कुचावेव हेमकुम्भौ सुवर्णकुम्भौ तयोरुपरि हिमोपचाराय शीतोपचारायार्ऽपितं विलिप्तमार्द्रचन्दनं कृतार्द्रचन्दनलेपो गालनं स्रावणं क्षरणं वा तस्य शुभ्रं शुक्लं वासो वस्त्रं तस्याऽमृतरसस्रावणार्थश्वेतवस्त्रस्य शोभां कान्ति दधौ बभार । चन्दनस्य शुभ्रवर्णत्वात्तस्मिञ्छुभ्रवस्त्रत्वारोपः । अत्रनिदर्शनाऽलङ्कारः । 'संभवन्वस्तुसम्बन्धोऽसंभवन्वाऽपि कुत्रचित् । यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ।'

भाषा

दूध के व्याज से अमृत के रस को रखने वाले उस रानी के स्तन रूपी सोने के घड़ों पर, ठंडक पहुँचाने के लिये लगाया हुआ सफेद चन्दन, अमृत को छानने के लिये घड़ों के ऊपर रक्खे हुए सफेद छन्नों (छननों) की शोभा दे रहा था।

नरेन्द्रपुत्रस्य कृते सुरक्षितं क्षितीशकान्ताकुचकुम्भयोः पयः।
विलासहारोज्ज्वलमौक्तिकच्छलाद् समल्लिकावासमिव व्यधीयत।६५।

अन्वयः

नरेन्द्रपुत्रस्य कृते क्षितीशकान्ताकुचकुम्भयोः सुरक्षितं पयः विलासहारोज्ज्वलमौक्तिकच्छलात् समल्लिकावासम् इव व्यधीयत।

व्याख्या

नरेन्द्रस्य नृपस्य पुत्रः सूनुस्तस्य कृते क्षितीशस्य पृथ्वीपतेः कान्तायाः प्रियायाः कुचावेव स्तनावेव कुम्भौ घटौ तयोस्सुरक्षितं सुनिहितं पयः दुग्धं विलासाय धारितश्चासौ हारश्च तस्योज्ज्वलाश्शुभ्राश्चते मौक्तिकाश्च तेषाञ्छलान्निमिषेण विलासार्थधारितहारप्रोतशुभ्रमुक्ताफलव्याजेन मल्लिकापुष्पाणां 'मल्लिका शतभीरुश्च गवाक्षी भद्रमल्लिका। शीतभीरुर्मदायंती भूपदी तृणशून्यकम्' इति वाचस्पतिः। वासस्सुगन्धस्तेन सहितं युक्तमिति समल्लिकावासमिव व्यधीयत कृतम्। शुभ्रत्वान्मौक्तिकोपरि मल्लिकापुष्पत्वारोपः। सुगन्धार्थं दुग्धोपरि मल्लिकापुष्पाणां स्थितिरिति भावः। अत्र सापन्हवोत्प्रेक्षालङ्कारः।

भाषा

राजपुत्र के लिये रानी के स्तनरूपी घड़ों में सुरक्षित रक्खा हुवा दूध, शोभा के लिये पहने हुए हार के सफेद मोतियों के मिष से मानों सफेद बेले के फूलों की सुगन्ध से सुगन्धित किया गया था।

मृगीदृशः श्यामलचूचुकच्छलात् कुचद्वये भूपसुतोपयोगिनि।
प्रभावसंक्रान्तरसायनौषधी-दलद्वयं नीलमिव व्यराजत ॥६६॥

अन्वयः

मृगीदृशः भूपसुतोपयोगिनि कुचद्वये श्यामलचूचुकच्छलात् नीलं प्रभावसंक्रान्तरसायनौषधीदलद्वयम् इव व्यराजत।

व्याख्या

मृगीदृश एणनयनाया नृपस्त्रियो भूपसुतस्य राजपुत्रस्योपयोगिन्युपभोगयोग्ये कुचद्वये स्तनद्वये श्यामले कृष्णवर्णे च ते चूचुके कुचाग्रे 'चूचुकं तु कुचाग्रं स्यात्' इत्यमरः। तयोश्चछलाद्व्याजेन नीलं कृष्णवर्णं प्रभावेणाऽलौकिकशक्त्या संक्रान्तं संगतं रसायनौषध्या आयुर्वर्धकजरानिवारकभेषजस्य दलद्वयमिव पत्रयुगलमिव रराज शुशुभे। अत्र सापन्हवोत्प्रेक्षालङ्कारः।

भाषा

राजपुत्र के उपयोग में आने वाले मृगनयनी रानी के दोनों स्तनों पर काले रंग के चुचुकों (ढेपनी, स्तन के ऊपर की घुंडी) के मिष से मानों अलौकिक शक्ति से युक्त आयुष्य वर्धक और जरा निवारक किसी औषधि के काले रंग के दो पत्ते शोभित हो रहे थे।

निरन्तरायाससमर्थमर्थिनां कथं नु दारिद्र्यमसौ सहिष्यते।
न येन मध्यस्थमपि व्यषह्यत स्थितेन गर्भे नरनाथयोषितः ॥६७॥

अन्वयः

असौ अर्थिनां निरन्तरायाससमर्थं दारिद्र्यं कथं नु सहिष्यते। गर्भे स्थितेन येन नरनाथयोषितः मध्यस्थम् अपि (दारिद्र्यं) न व्यषह्यत।

व्याख्या

असौ संजनिष्यमाणपुत्रोऽर्थिनां याचकानां निरन्तरः सतत आयासः क्लेशस्तस्मिन्समर्थं क्लेशकारकमित्यर्थः। दारिद्र्यं धनाभावं कथं केन प्रकारेण सहिष्यते न सहिष्यत इत्यर्थः। यतो गर्भे उदरे स्थितेन येन भाविराजपुत्रेण नरनाथस्य नृपस्य योषितः सीमन्तिन्याः 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः। मध्यस्थमुदरस्थं दारिद्र्यं कृशत्वं न व्यषह्यत न सोढम्। गर्भिण्या उदरं वर्धत एव। अत अनेनोदरस्थकृशत्वरूपदारिद्र्यमपहृतम्। अत्रोत्प्रेक्षा गम्या।

भाषा

यह गर्भस्थ बालक याचकों को निरन्तर कष्ट देने वाली दरिद्रता को कैसे सहन करेगा। क्योंकि उसने गर्भ में आकर रानी के पेट की कृशता रूपी दरिद्रता न सहन की। अर्थात् गर्भवती स्त्रियों का पेट स्वभावतः ही बड़ा हो जाता है। रानी गर्भवती होने से उसका मध्य भाग बड़ा हो गया था।

बलेः समुल्लासमपाचकार यः स कारणादत्र कुतोऽपि वर्तते ।
इतीव गर्भः क्षितिपालयोषितः शशंस भञ्जन्नुदरे वलिस्थितिम् ॥६८॥

अन्वयः

क्षितिपालयोषितः गर्भः उदरे वलिस्थितिं भञ्जन्, यः बलेः समुल्लासम् अपाचकार सः कुतः अपि कारणात् अत्र वर्तते इति शशंस इव ।

व्याख्या

क्षितिपालयोषितो नृपपत्न्या गर्भो गर्भस्थो बाल उदरे वलिस्थितिं त्रिवलिरेखां भञ्जन्नपहरन् यो विष्णुर्वामनरूपो बलेर्बलिनामकदैत्यस्य समुल्लासमौद्धत्यमपाचकार दूरीकृतवान् स विष्णुः कुतोऽपिकारणात्कस्मादप्यनिर्वचनीयकारणादत्रोदरे वर्तते प्रतिवसतीति शशंसेव प्रकटीचकारेव । वबयोरभेदादुत्प्रेक्षा । नाविष्णुः पृथिवीपतिरिति वचनात्तस्य राजपुत्रस्य विष्णुरूपत्वं गम्यते ।

भाषा

रानी के गर्भ में का राजपुत्र, रानी के पेट पर की त्रिवली दूर करते हुए यह द्योतित करता था मानो यहाँ पेट में किसी कारण से राजा बलि के औद्धत्य का भङ्ग करने वाले विष्णु के अवतार रूप वामन आये हैं । (गर्भिणी के पेट पर की त्रिवली पेट बढ़ने से नहीं दिखाई पड़ती ।)

कृतावतारः क्षितिभारशान्तये न पीड्यमानां सहते महीमयम् ।
इतीव सा गर्भभरालसा शनैः पदानि चिक्षेप मृगायतेक्षणा ॥६९॥

अन्वयः

गर्भभरालसा मृगायतेक्षणा सा, क्षितिभारशान्तये कृतावतारः अयं पीड्यमानां महीं न सहते इति इव शनैः पदानि चिक्षेप ।

व्याख्या

गर्भभरेण गर्भभारेणाऽलसा मन्थरगतिर्मृगस्याऽऽयत ईक्षण इवेक्षणे नेत्रे यस्यास्सा नृपस्त्रीः क्षितेः पृथ्व्या भारः कुनृपतिकृतान्यायविशेषस्तस्य शान्तये दूरीकरणाय कृतोऽवतारो येन स गृहीततनुरयं कुमारो मयैव पीड्यमानां संबाध्यमानां महीं पृथ्वीं कथं सहते सहिष्यत इति हेतोरिव शनैर्मन्दं मन्दं पदानि पादान् भुवि

पृथिव्यां चिक्षेप दत्तवती। गर्भिण्यो मन्दगत्यैव चलन्तीति भावः। अत्रोत्प्रेक्षा-लङ्कारः।

भाषा

गर्भ के बोझ से धीरे २ चलने वाली, मृग के समान बड़ी २ आखों वाली रानी, मानों यह सोच कर कि पृथ्वी का बोझ कम करने के लिये शरीर धारण करने वाला मेरा गर्भस्थ कुमार, मुझ से पृथ्वी का बोझ द्वारा पीड़ित होना कैसे सहन करेगा, पृथ्वी पर धीरे २ पावों को डालती थी। (गर्भिणी स्त्रियाँ प्रायः धीरे २ ही चला करती हैं।)

सशब्दकाञ्चीमणिबिम्बितैर्बभौ सखीजनैः साद्भुतगर्भधारिणी।
उपास्यमाना कुलदेवतागणैः समन्ततो यामिकतां गतैरिव ॥७०॥

अन्वयः

अद्भुतगर्भधारिणी सा सशब्दकाञ्चीमणिबिम्बितैः सखीजनैः समन्ततः यामिकतां गतैः कुलदेवतागणैः इव उपास्यमाना बभौ।

व्याख्या

अद्भुतश्चासौ गर्भश्च तं धारयतीत्यद्भुतगर्भधारिण्याऽऽश्चर्यशंसिगर्भ-धारिणी सा राज्ञी शब्देन सहिता सशब्दा, सशब्दा चाऽसौ काञ्ची रशना तस्यां समुद्ग्रन्थिता मणयस्तासु प्रतिबिम्बितैः प्रतिफलितैः 'रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च' इत्यमरः। सखीजनैः समन्ततश्चतुर्दिक्षु यामिकतां प्राहरिकतां गतैः संप्राप्तैः कुलस्य वंशस्य देवतागणैरिष्टदेवतासमूहैरिवोपास्यमाना संसेव्य-माना बभौ शुशुभे। यथा प्राहरिकाः सशब्दं परितो गत्वा स्वकार्यं कुर्वन्ति तथैव सशब्दरशनागतमणि–प्रतिबिम्बित–सखीगणरूप–कुलदेवतागणैः समन्ततः प्राहरिककार्यं क्रियत इति भावः। उत्प्रेक्षालङ्कारः।

भाषा

अद्भुत (शक्ति शाली) गर्भ को धारण करने वाली रानी झन झनाने वाली करधनी में जड़े हुए मणियों में सखी जनों की परछाही पड़ने से मानों चारों ओर से चिल्ला २ कर पहरा देने वाली कुलकी इष्ट देवताओं से सेवित दिखाई पडती थी।

अलङ्कृता दुष्प्रसहेन तेजसा रराज सा रत्नमयीषु भूमिषु ।
महागृहाणां प्रतिबिम्बडम्बरैः प्रणम्यमानेव कुलाचलैरपि ॥७१॥

अन्वयः

दुष्प्रसहेन तेजसा अलङ्कृता सा रत्नमयीषु भूमिषु महागृहाणां प्रतिबिम्बडम्बरैः कुलाचलैः अपि प्रणम्यमाना इव रराज ।

व्याख्या

दुःखेन प्रकर्षेण सोढुं शक्येन दुष्प्रसहेन दुर्धर्षेण सोढुमशक्येन वा तेजसा दीप्त्या 'तेजः प्रभावे दीप्तौ च नले शुक्रेऽप्यतस्त्रिषु' इत्यमरः । अलङ्कृता विभूषिता सा राज्ञी रत्नमयीषु रत्ननिर्मितासु भूमिषु स्थानेषु कुट्टिमेष्वित्यर्थः । महागृहाणां प्रासादानां प्रतिबिम्बस्य प्रतिच्छायाया डम्बरैरारोपैः कुलाचलैस्सप्तभिः कुलपर्वतैरपि "महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥" प्रणम्यमानेव वन्द्यमानेव रराज शुशुभे । विशालाकारत्वात्प्रासादप्रतिबिम्बेषु कुलपर्वतत्वारोपः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

अत्यधिक तेज से विभूषित वह रानी, रत्नों से निर्मित फरसों पर बड़े २ महलों की परछाही पड़ने से मानों सात कुलपर्वतों से भी प्रणमित हो रही हो, ऐसी शोभित हो रही थी । अर्थात् महलों की परछाहीं मानों पर्वत थे जो उसके चरणों पर पड़ रहे थे ।

कलत्रमूर्वीतिलकस्य मेखला-कलापमाणिक्यमरीचिभिर्दधे ।
उदेष्यतः सूर्यसमस्य तेजसः समुद्गतं बालमिवातपं पुरः ॥७२॥

अन्वयः

ऊर्वीतिलकस्य कलत्रं मेखलाकलापमाणिक्यमरीचिभिः उदेष्यतः सूर्यसमस्य तेजसः पुरः समुद्गतं बालम् आतपम् इव दधे ।

व्याख्या

ऊर्व्याः पृथिव्यास्तिलकस्य भूषणस्य श्रेष्ठस्य वा नृपस्य कलत्रं भार्या 'कलत्रं श्रोणिभार्ययोः' इत्यमरः । मेखलाया रशनायाः 'स्त्रीकटयां मेखला काञ्ची सप्तकी

रशना तथा' इत्यमरः। कलापस्समुहस्तत्र स्थितानि माणिक्यानि मणयस्तेषां मरीचिभिः कान्तिभिर्हेतुभूतैरुदेष्यतो भविष्णोः सूर्यसमस्य भास्करतुल्यस्य तेजसो दीप्त्या पुरोऽग्रे समुद्गतं समुदितं बालं नूत्नमातपमिव प्रकाशमिव 'प्रकाशो द्योत आतपः' इत्यमरः। दधे धारयामास। भविष्णोः सूर्यसमतेजस्विनः पुत्रस्य जन्मतः प्राक् प्रकाशमिवेति भावः। अत्र मणिकिरणेषु बालातपस्योत्प्रेक्षणादुत्प्रेक्षा।

भाषा

पृथ्वी के भूषण रूप राजा की पत्नी, करधनी में जड़े हुए माणिक्यों की ज्योति से मानों उदय होने वाले सूर्य के तेज के पहिले फैले हुए प्रातः कालीन प्रकाश को धारण करती है। अर्थात् जिस प्रकार सूर्य का उदय हो कर तेज फैलने के पूर्व ही प्रकाश होने लगता है उसी प्रकार तेजस्वी पुत्र के उत्पन्न होने के पूर्व ही मानों वह करधनी में के माणिक्य का प्रकाश पड़ रहा था।

क्षपामुखेषु प्रतिबिम्बितः शशी हृदि क्षमावल्लभलोलचक्षुषः।
जगाम गर्भे दधतः सुखस्थितिं नरेन्द्रसूनोरुपधानतामिव ॥७३॥

अन्वयः

क्षपामुखेषु क्षमावल्लभलोलचक्षुषः हृदि प्रतिबिम्बितः शशी गर्भे सुखस्थितिं दधतः नरेन्द्रसूनोः उपधानताम् इव जगाम।

व्याख्या

क्षपामुखेषु प्रदोषेषु 'प्रदोषो रजनीमुखम्' इत्यमरः। क्षमायाः पृथ्व्या वल्लभस्य प्रियस्य पृथ्वीपतेरित्यर्थः। लोलचक्षुषश्चञ्चलनयनायाः कान्ताया हृदि हृदये 'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। प्रतिबिम्बितः प्रतिबिम्बत्वं प्राप्तः शशी चन्द्रो गर्भे उदरे सुखेनाऽऽनन्देन स्थितिं निवासं दधतः कुर्वतो नरेन्द्रसूनो राजपुत्रस्योपधानतामिवोपधीयते आरोप्यते शिरोऽत्रेत्युपधानं तस्य भावस्तामुपबर्हत्वमिव 'उपधानं तूपबर्हः' इत्यमरः। जगाम प्राप। उपबर्हस्य सादृश्यं ययाविति। उपधानं वर्तुलाकारं लम्बाकारञ्च भवति। अत्र चन्द्र-सादृश्याद्वर्तुलाकारस्यैवोपधानस्य ग्रहणम्। बालार्थं वर्तुलाकारमुपधानमेव लोके दृश्यते। अत्रोत्प्रेक्षालङ्कारः।

भाषा

सायंकाल के समय में पृथ्वीपति की चञ्चल नेत्रवाली रानी के हृदय में प्रतिबिम्बित चन्द्रमा मानों गर्भ में सुख से रहने वाले राजपुत्र की गोल तकिया का काम करता था।

अतः परं भविष्णुवीरपुत्रानुरूपं तस्य दोहदं वर्णयति कविः—

नृपप्रिया स्थापयितुं पदद्वयीमियेष दिक्कुञ्जरकुम्भभित्तिषु।
चिराय धाराजलपानलम्पटा कृपाणलेखासु मुमोच लोचने ॥७४॥

अन्वयः

नृपप्रिया दिक्कुञ्जरकुम्भभित्तिषु पदद्वयीं स्थापयितुम् इयेष। चिराय धाराजलपानलम्पटा कृपाणलेखासु लोचने मुमोच।

व्याख्या

नृपप्रिया राजपत्नी दिक्कुञ्जराणां दिग्दन्तिनां कुम्भा एव भित्तयः कुड्यानि 'भित्तिः स्त्री कुड्यम्' इत्यमरः। तासु पदद्वयीं चरणयुगलं स्थापयितुं निक्षेप्तुमियेषाऽऽचकाङ्क्ष। चिराय चिरकालात् 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः। धारायाः प्रवाहस्य जलं पयस्तस्य पाने लम्पटा लालसायुक्ता सा नृपपत्नी कृपाणानां करवालानां रेखा धारा तासु करवालधारासु लोचने नयने मुमोच प्रहितवती। अत्र खड्गधारायां जलधारात्वारोपः।

भाषा

रानी, दिग्गजों के गण्डस्थलरूपी दीवारों पर अपने दोनों पैर रखने की इच्छा करने लगी। चिरकाल से धार का जल पीने की लालसा रखने वाली रानी तलवारों की धारों पर अपनी आँखें डालने लगी। अर्थात् गर्भस्थित बालक में वीर रस प्रधान रहने से रानी को वीर रस का दोहद होने लगा।

मुहुः प्रकोपादुपरि स्थितासु सा चकार तारास्वपि पाटले दृशौ।
गुरुस्मया कारयितुं दिगङ्गनाः पदाब्जसंवाहनमाजुहाव च ॥७५॥

अन्वयः

गुरुस्मया सा प्रकोपात् उपरिस्थितासु तारकासु अपि मुहुः पाटले दृशौ चकार। पदाब्जसंवाहनं कारयितुम् दिगङ्गनाः आजुहाव च।

व्याख्या

गुरुर्महान् स्मयो मदो यस्याः सा 'दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः' इत्यमरः । प्रकोपात् क्रोधादुपर्याकाशे स्थितासु विद्यमानासु तारास्वपि तारकास्वपि 'नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' इत्यमरः । मुहुर्वारंवारं पाटले क्रोधारुणे दृशौ नयने चकार कृतवती । किं ताराः स्त्रियो मत्तः श्रेष्ठा । कथं तर्हि ता मदुपरि तिष्ठन्तीति क्रोधस्य कारणम् । दिशां काष्ठानामङ्गना देव्यस्ताः पदं पादोऽब्जमिव कमलमिव तस्य संवाहनं संमर्दनं स्वचरणारविन्दसंमर्दनं कारयितुमाजुहावाऽऽमन्त्रितवती च । चित्तोद्रेकेण दिगङ्गनाः स्वचरणसंवाहनयोग्या निर्धारिता इति भावः ।

भाषा

अत्यधिक मद से भरी रानी, ऊपर रहने वाली ताराओं की ओर क्रोध से लाल आँखें कर बार बार ताकने लगी और दिगङ्गनाओं को अपने पदकमलों को दबाने के लिए बुलाने लगी । अर्थात् गर्भ स्थित प्रतापी बालक जनित मद से तारारूपी स्त्रियाँ मेरे ऊपर कैसे गईं इससे क्रोध हुआ और दिगङ्गनाएँ मेरे पैर दबाने योग्य हैं, ऐसा अभिमान हुआ ।

उदञ्चितभ्रूर्मुखराणि संततं विलोकयामास विभूषणान्यपि ।
अजायत स्तब्धशिरःसु तेजसा गृहप्रदीपेष्वपि बद्धमत्सरा ॥७६॥

अन्वयः

उदञ्चितभ्रूः (सा) मुखराणि विभूषणानि अपि संततं विलोकयामास । तेजसा स्तब्धशिरःसु गृहप्रदीपेषु अपि बद्धमत्सरा अजायत ।

व्याख्या

उदञ्चिते समुन्नते भ्रुवौ दृग्भ्यामूर्ध्वभागौ यस्याः सा राज्ञी क्रोधभावयुक्तेत्यर्थः । मुखराणि शब्दायमानानि विभूषणान्याभूषणान्यपि संततमनारतं 'सततेऽनारताश्रान्त संतताविरतानिशम्' इत्यमरः । विलोकयामास ददर्श । क्रोधे भ्रुवौ समुन्नते भवत इति क्रोधेन वाचालतां प्राप्तान्याभूषणान्यवलोकितवती । महान्तो वाचालत्वं नैव सहन्त इति भावः । तेजसा तेजःपुञ्जेन स्तब्धानि निश्चलानि शिरांसि ज्योतिषि येषां तेषु गृहप्रदीपेषु गृहस्थदीपेष्वपि बद्धमत्सरा कृतवैराऽजायताऽभूत् । मयि विद्यमानायां कस्तेजसाऽविनीतस्सन् ज्वलतीत्याशयेन

मात्सर्यं वहति स्मेति भावः। उक्तञ्च 'प्रकृतिः खलु सा महीयसां सहते नान्यसमुन्नतिं यथेति'।

भाषा

रानी क्रोध मे अपनी भौंएँ उठा कर शब्द करने वाले आभूषणों को भी देखती थी और तेज से अपनी जोत रूपी मस्तक को ऊपर स्थिर रखने वाले घर के दीपों से भी ईर्ष्या करती थी। अर्थात् मेरे सामने इन भूपणों की बोलने की हिम्मत कैसी और इन तेजस्वी दीयों को बिना सिर झुकाए मेरे सामने ठहरने की हिम्मत कैसी—ऐसी वीर रस की, दोहदजनित भावनाएँ उस रानी के मन में होती थीं।

इति स्फुरच्चारुविचित्रदोहदा निवेदयन्ती सुतमोजसां निधिम्।
प्रतिक्षणं सा हरिणायतेक्षणा दृशोः सुधावर्तिरभून्महीभुजः ॥७७॥

अन्वयः

इति स्फुरच्चारुविचित्रदोहदा सुतम् ओजसां निधिं निवेदयन्ती हरिणायतेक्षणा सा प्रतिक्षणं महीभुजः दृशोः सुधावर्तिः अभूत्।

व्याख्या

इतीत्थं पूर्वोक्तरीत्या स्फुरत्प्रकाशितञ्चारुशोभनं विचित्रमसाधारणचमत्कारि दोहदं गर्भिणीच्छा 'दोहदं गर्भिणीच्छायामिच्छामात्रेऽपि दोहदम्' यस्यां सा सुतं पुत्रमोजसां बलानां 'ओजो दीप्तौ बले' इत्यमरः। निधिं निधानं निवेदयन्ती विज्ञापयन्ती हरिण इव मृग इवाऽऽयते विस्तीर्णे ईक्षणे नेत्रे यस्याः सा मृगायतनेत्रा राज्ञी प्रतिक्षणं क्षणे क्षणे महीभुजो नृपस्य दृशोर्नयनयोः सुधावर्ति सुखसमर्पका पीयूषशलाकाऽभूत्। राज्ञी पीयूषशलाकावन्नृपस्य नेत्रयोरानन्दसमर्पकाऽभूदिति भावः। अत्र रूपकालङ्कारः।

भाषा

उपर्युक्त प्रकार से मनोहर और आश्चर्यजनक दोहदों से युक्त, (अतएव) अपने पुत्र को बल का निधान सिद्ध करती हुई, मृग के समान बड़े बड़े नेत्र वाली रानी, आँखों को अमृताञ्जन की शलाका के ऐसा राजा को, प्रतिक्षण आनन्द देती थी। अर्थात् ऐसी अपनी रानी को देख कर राजा को प्रतिक्षण आनन्द होता था।

कृतेषु सर्वेष्वथ शास्त्रवर्त्मना यथाक्रमं पुंसवनादिकर्मसु ।
विशेषचिह्नैर्निजमीशितुः क्षितेर्वधूः समासन्नफलं न्यवेदयत् ॥७८॥

अन्वयः

अथ क्षितेः ईशितुः वधूः यथाक्रमं सर्वेषु पुंसवनादिकर्मसु शास्त्रवर्त्मना कृतेषु (सत्सु) विशेषचिह्नैः निजं समासन्नफलं न्यवेदयत् ।

व्याख्या

अथाऽनन्तरं क्षितेः पृथ्व्या ईशितुरीश्वरस्य राज्ञो वधूः स्त्रीः क्रममनतिक्रम्य वर्तत इति यथाक्रमं क्रमानुसारेण सर्वेषु समग्रेषु पुंसवनमादिर्येषां तानि कर्माणि संस्कारास्तेषु, पुंसवनसीमन्तोन्नयने द्वावेव संस्कारौ गर्भाधानसंस्कारानन्तरमिति बहुवचनमत्राऽनपेक्षितम् । परन्तु तान्त्रिकविधिना तृतीयोऽपि संस्कारो भवति । शास्त्रवर्त्मना धर्मशास्त्रप्रतिपादितमार्गेण कृतेषु सम्पादितेषु सत्सु विशेषचिन्हैर्विशिष्टलक्षणैर्निजं स्वीयं समासन्नं निकटवर्ति च तत् फलं पुत्रोत्पत्तिरूपं न्यवेदयत् सूचितवती ।

भाषा

इसके अनन्तर पृथ्वी के स्वामी की स्त्री रानी ने धर्मशास्त्र के अनुसार क्रम से पुंसवन सीमन्तोन्नयन प्रभृति संस्कारों के सम्पादित होने पर, विशेष लक्षणों से, शीघ्र होने वाले अपने पुत्र रूप फल की सूचना दी ।

त्रिलोकलक्ष्म्येव सलीलमीक्षितः कृतद्रवैश्चन्द्रकरैरिवाप्लुतः ।
अदूरवाच्छालतिकाफलोदयः क्वचिन्न माति स्म मुदा नरेश्वरः ॥७९॥

अन्वयः

त्रिलोकलक्ष्म्या सलीलम् ईक्षितः इव कृतद्रवैः चन्द्रकरैः आप्लुतः इव अदूरवाच्छालतिकाफलोदयः नरेश्वरः मुदा क्वचित् न माति स्म ।

व्याख्या

त्रिलोकस्य त्रिभुवनस्य लक्ष्म्या राजश्रिया सलीलं सविलासमीक्षितो दृष्ट इव, कृतो द्रवो जलरूपं येषां ते कृतद्रवास्तैर्द्रवीभूतैश्चन्द्रकरैश्शशिकिरणैराप्लुतोऽभिषिक्त इवाऽदूरे समीपस्थ एव वाच्छालतिकाया इच्छालतायाः फलस्य पुत्ररूप-

स्योदयः प्रादुर्भावो यस्य स नरेश्वरो राजा मुदाऽऽनन्दप्रवाहेण क्वचिन्न माति स्म हर्षस्येयत्तां न प्राप्नोति स्म । राजनि तस्मिन् हर्षातिरेको जात इति भावः । अत्रोत्प्रेक्षारूपकयोः संसृष्टिः ।

भाषा

त्रिभुवन की राज्यश्री से सप्रेम अवलोकित होने के समान तथा चन्द्रकिरणों को जलरूप में परिवर्तित कर उस जल से स्नान किये हुए के समान, शीघ्र ही जिसकी इच्छा लता में पुत्र रूप फल का उद्गम होने वाला है, ऐसा वह राजा हर्ष से फूले नहीं समाता था ।

अथ युग्मेन नृपवल्लभायाः सूतिकागृहप्रवेशं वर्णयति कविः—

भिषग्भिरापादितसर्वभेषजं वितीर्णरक्षाविधिमण्डलाक्षतम् ।
विशारदाभिः प्रसवोचिते विधौ निरन्तरं गोत्रवधूभिरञ्चितम् ॥८०॥
विवेश सुभ्रूरथ सूतिकागृहं प्रधानदैवज्ञनिवेदिते दिने ।
समुल्लसद्भिः शकुनैः सहस्रशः समर्पयन्ती नृपतेर्महोत्सवम् ॥८१॥

अन्वयः

अथ सुभ्रूः प्रधानदैवज्ञनिवेदिते दिने भिषग्भिः आपादितसर्वभेषजं वितीर्णरक्षाविधिमण्डलाक्षतं प्रसवोचिते विधौ विशारदाभिः गोत्रवधूभिः निरन्तरम् अञ्चितं सूतिकागृहं समुल्लसद्भिः सहस्रशः शकुनैः नृपतेः महोत्सवं समर्पयन्ती विवेश ।

व्याख्या

अथाऽनन्तरं सुष्ठु भ्रुवौ यस्याः सा सुभ्रू राजमहिषी प्रधानैः श्रेष्ठैर्दैवज्ञैर्मौहूर्तिकैः 'सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि । स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि' । इत्यमरः । निवेदिते कथिते दिने शुभदिवसे भिषग्भिर्वैद्यैरापादितानि सम्पादितानि सर्वाणि समग्राणि भेषजान्यौषधिद्रव्याणि यस्मिन्तत्, वितीर्णानि दत्तानि रक्षाविधये नवजातबालरक्षार्थं मण्डलानि यन्त्रविशेषाण्यक्षता अभिमन्त्रित मन्त्राक्षताश्च यस्मिन्तत्, प्रसवस्य जननकर्मण उचिते सुखप्रसवकारिणि समुचिते विधावनुष्ठाने विशारदाभिस्तत्कार्यकुशलाभिः गोत्रवधूभिः कुलाङ्गनाभिर्निरन्तरं सततमञ्चितं पूजितं सुतिकागृहमरिष्टं 'अरिष्टं सूतिकागृहम्' इत्यमरः । समुल्ल-

सद्भिः प्रकटीभूतैः सहस्रशोऽसंख्यैः शकुनैः शुभचिन्हैर्नृपतेर्नृपस्याऽऽहवमल्लदेवस्य महोत्सवं हर्षातिरेकं महोत्सेकं वा 'उत्सेकामर्षयोरिच्छाप्रसरे मह उत्सवः' इत्यमरः। समर्पयन्ती जनयन्ती सती विवेश प्रविष्टा।

भाषा

इसके बाद प्रधान ज्योतिषी द्वारा बताए हुए शुभ दिन, वैद्यों द्वारा स्थापित समग्र आवश्यक औषधियों से युक्त, रक्षा के लिये फेंकी हुई मन्त्राक्षतों तथा लिखे हुए मण्डलों या यन्त्रों से शोभित, चतुर कुलाङ्गनाओं द्वारा सुखप्रसव के योग्य विधि विधान पूर्वक पूजित, प्रसूति घर में, होने वाले हजारों शुभ शकुनों से राजा को परम आनन्द देती हुई, सुन्दर भौओं वाली रानी ने प्रवेश किया।

अथ कलापकेन पुत्रोत्पत्तिं वर्णयति कविः—

ततः प्रदीपेष्वपि तत्र विस्फुरत्प्रभाधरेष्वर्तिवशाज्जपत्स्विव।
विलासहंसीमपि बालकान्वितां परिच्छदे प्रष्टुमुपायमुत्सुके ॥८२॥

अन्वयः

ततः तत्र विस्फुरत्प्रभाधरेषु प्रदीपेषु अपि अर्तिवशात् जपत्सु इव परिच्छदे बालकान्वितां विलासहंसीम् अपि उपायं प्रष्टुं समुत्सुके सति (नृपतेर्नन्दनोऽजायतेति पञ्चाशीतिश्लोकेन सम्बन्धः।)

व्याख्या

ततः सूतिकागृहप्रवेशानन्तरं तत्र सूतिकागृहे धरन्तीति धरा विस्फुरन्त्या देदीप्यमानायाः प्रभायाः कान्तेर्धरास्तेषु देदीप्यमानकान्तिधरेषु प्रदीपेषु गृहदीपे-ष्वप्यर्तिवशात् पीड़ाकारणात् जपत्स्विव नृपकान्तायाः प्रसववेदनोन्मूलनाय मन्त्रजपं कुर्वत्सु सत्स्विव, जपकर्तृपक्षे विस्फुरन्तीतस्ततः प्रसरन्ती प्रभा यस्य स विस्फुरत्प्रभोऽधरो येषां ते तेषु जपत्सु मन्त्रजपं कुर्वत्सु, परिच्छदे परिजने दास्यादिके बालकैरन्वितां युक्तां नवजातबालयुक्तां विलासहंसीमपि क्रीडाहंसी-मप्युपायं प्रसववेदनानिवारणपूर्वकपुत्रोत्पत्त्युपायं प्रष्टुं समुत्सुके समुत्कण्ठिते सति नृपतेर्नन्दनोऽजायतेत्यनेनाऽन्वयः। अत्र जपत्स्विवेत्यत्रोत्प्रेक्षालङ्कारः। उत्तरा-र्धेऽतिशयोक्तिश्च।

भाषा

प्रसूति घरमें जाने के बाद वहाँ रानी की प्रसव वेदना को कम करने के ध्येय से मन्त्रजप करने में ओंठ के हिलने से उसकी फैलने वाली कान्ति से युक्त जप करने वालों के ऐसे तेज जलने वाले दीयों के भी मानो जप करते रहने पर, दासियों के, नवजात बच्चे वाली पालतू हंसिनी को भी प्रसव वेदना कम होकर पुत्र उत्पन्न होने का उपाय पूछने के लिए, उत्कण्ठित होने पर (राजा को पुत्र हुआ यह ८५ श्लोक के वाक्य से सम्बद्ध है ।)

निखातरक्षौषधिगेहदेहली—समीपसज्जीकृतशस्त्रपाणिषु ।
इतस्ततस्त्राटनमक्षतोत्करैर्विधाय हुँकारिषु मन्त्रवादिषु ॥८३॥

अन्वयः

निखातरक्षौषधिगेहदेहलीसमीपसज्जीकृतशस्त्रपाणिषु मन्त्रवादिषु अक्षतोत्करैः इतः ततः त्राटनं विधाय हुँकारिषु (सत्सु) (नृपतेर्नन्दनोऽजायतेत्यनेनाऽन्वयः ।)

व्याख्या

निखाता गर्तं विधाय तत्र निक्षिप्ता रक्षाया बालरक्षाया औषधयो भेषजानि यस्यां सा चासौ गेहदेहली सुतिकागृहावग्रहणी 'गृहावग्रहणी देहली' इत्यमरः । तस्यास्समीपे सज्जीकृताः स्थापिताः शस्त्रं पाणौ येषां ते सशस्त्रमनुष्या यैस्तेषु मन्त्रवादिषु मन्त्रपाठकेष्वक्षतोत्करैरभिमन्त्रिताक्षतसमूहैरितस्ततस्त्राटनं रक्षाविधिविशेषं "मन्त्राक्षतान्परितो विक्षिप्य तान्त्रिकैर्बालरक्षार्थं क्रियमाणोऽनर्थनिवारणविधिविशेषस्त्राटनम्" विधाय सम्पाद्य हुँकारिषु हुँकारशब्दं कुर्वत्सु सत्सु । (नृपतेर्नन्दनोऽजायतेति सम्बन्धः)

भाषा

गड्ढा खोदकर जहाँ प्रसूतिरक्षा की औषधियाँ गाड़ी हुई थीं ऐसी प्रसूतिघर की देवढ़ी के पास सशस्त्र मनुष्यों को बैठाने वाले मान्त्रिकों के इधर उधर मन्त्राक्षतों को फेंककर त्राटनविधि करके हुँकार शब्द करते रहने पर (राजा को पुत्र हुआ ।)

गृहोदरस्थे जरतीपरिग्रहे किमप्युपांशु स्वमतोपदेशिनि ।
वितीर्णकर्णासु निवासपञ्जरादनल्पशोकासु शुकाङ्गनास्वपि ॥८४॥

अन्वयः

गृहोदरस्थे जरतीपरिग्रहे उपांशु किमपि स्वमतोपदेशिनि (सति) अनल्पशोकासु शुकाङ्गनासु अपि निवासपञ्जरात् वितीर्णकर्णासु सतीषु (नृपतेर्नन्दनोऽजायतेत्यन्वयः) ।

व्याख्या

गृहोदरस्थे प्रसूतिगृहमध्यस्थे जरतीपरिग्रहे वृद्धनारीसमूहे उपांशु रहः शनैरित्यर्थः । 'विविक्तविजनच्छन्ननिःशलाकास्तथा रहः । रहश्चोपांशु' इत्यमरः । किमपि प्रच्छन्नमुपायमालम्ब्य स्वमतस्य स्वाभिप्रायस्योपदेशिनि प्राकाश्यमातन्वति सति । अनल्पः शोको यासां तासु बहुशोकासु कीराङ्गनास्वपि शुकस्त्रीष्वपि निवासपञ्जरात् स्वनिवासस्थानभूतपिञ्जरादेव न तु बहिर्निःसृत्य तस्योपायाभावात् । वितीर्णो दत्तः कर्णः श्रवणं याभिस्तासु किम्भवतीति सोत्कण्ठजिज्ञासायां सर्वमाकर्णयन्तीषु सतीषु । (नृपतेर्नन्दनोऽजायतेति सम्बन्धः ।) अत्रातिशयोक्त्यलङ्कारः ।

भाषा

प्रसूतिघर में बुड्ढी स्त्रियों के धीरे धीरे अपने विचार के अनुसार कुछ उपाय बताते रहने पर, अत्यधिक दुःखी, पिंजरे में की सुग्गियों के भी कान देकर सब सुनते रहने पर । (राजा को पुत्र हुआ ।)

अलभ्यत प्राक्तनचक्रवर्तिना न जन्म यत्राद्भुतधाम्नि केनचित् ।
तथाविधं लग्नमवाप्य नन्दनः शिवप्रसादान्नृपतेरजायत ॥८५॥

अन्वयः

अद्भुतधाम्नि यत्र प्राक्तनचक्रवर्तिना केनचित् अपि जन्म न अलभ्यत तथाविधं लग्नम् अवाप्य शिवप्रसादात् नृपतेः नन्दनः अजायत ।

व्याख्या

अद्भुतस्याऽऽश्चर्यस्य धाम स्थानं तस्मिन्नाश्चर्यसमुत्पादकवस्तूनां यस्मिन् समुद्भवो भवति तादृशे यत्र लग्ने प्राक्तनः पूर्वजातश्चासौ चक्रवर्तिः सार्वभौमश्च तेन केनचिदपि राज्ञा जन्म जनुः 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः' इत्यमरः । नाऽलभ्यत न लेभे तथाविधं लग्नं सुमुहूर्तमवाप्य संप्राप्य शिवप्रसादाच्छङ्करकृपाकटाक्षान्नृपतेर्नृपमाहवमल्लदेवं 'कर्मणि षष्ठी' पुत्रः सूनुरजायत समुत्पन्नः ।

भाषा

जैसे अद्भुतगुणयुक्त शुभलग्न में पूर्ववर्ति किसी भी सार्वभौम राजा ने जन्म नहीं पाया था ऐसे शुभ लग्न में भगवान् शंकर की कृपा से राजा को पुत्र हुआ।

चतुर्भिः पताका-कलापकमित्यर्थः।

सुरप्रसूनान्यपतन्सषट्पद-ध्वनीनि दध्वान सुरेन्द्रदुन्दुभिः।
परं प्रसादं ककुभः प्रपेदिरे गुणैः कुमारस्य सहोत्थितैरिव ॥८६॥

अन्वयः

सषट्पदध्वनीनि सुरप्रसूनानि अपतन्। सुरेन्द्रदुन्दुभिः दध्वान। कुमारस्य सहोत्थितैः गुणैः ककुभः परं प्रसादं प्रपेदिरे इव।

व्याख्या

षट्पदानां भ्रमराणां 'षट्पदभ्रमरालयः' इत्यमरः। ध्वनिना शब्देन सहितानि सषट्पदध्वनीनि सुरप्रसूनानि देवकुसुमानि 'प्रसूनं कुसुमं सुमम्' इत्यमरः। आकाशादपतन् पुष्पवृष्टिर्बभूवेत्यर्थः। सुरेन्द्रस्य पाकशासनस्य दुन्दुभिः दुंदुमिति शब्देन भातीति दुन्दुभिः भेरी 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः। दध्वान शब्दं चकार। कुमारस्य नवजातशिशोः सहोत्थितैर्जन्मना साकं समुत्पन्नैर्गुणैर्दयादाक्षिण्यादिमहापुरुषगुणैः ककुभः दिशः 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। प्रसादं प्रसन्नतां निर्मलत्वं वा प्रपेदिरे इव प्राप्ता इव। अत्रोत्प्रेक्षालङ्कारः।

भाषा

आकाश से भौंरों की गुंजार से युक्त नन्दन वन के फूलों की वृष्टि होने लगी। देवों के राजा इन्द्र का नगाड़ा बजने लगा। कुमार के साथ उत्पन्न उसके उज्वलगुणों से मानो सब दिशाएँ प्रसन्न अर्थात् उज्वल हो गईं।

नवप्रतापाङ्कुरचक्रकान्तया निरन्तरारात्रिकदीपसम्पदा।
श्रियं जगल्लोचनबालचन्द्रमाः समाजहारोदयसन्ध्ययेव सः ॥८७॥

अन्वयः

जगल्लोचनबालचन्द्रमाः सः नवप्रतापाङ्कुरचक्रकान्तया निरन्तरारात्रिकदीपसम्पदा उदयसन्ध्यया इव श्रियं समाजहार।

व्याख्या

जगतां भुवनानां भुवनगतमनुष्याणां लोचनानि नयनानि तेषां कृते सुखदाय-कत्वाद्बालचन्द्रमा बालशशी स नवजातशिशुर्नवस्य नूतनस्य प्रतापस्य तेजसोऽ-ङ्कुराणां किरणानां चक्रं वर्तुलाकारं मण्डलं तद्वत्कान्तया रमणीयया निरन्तरम-विच्छिन्नं पङ्क्त्याकारमाऽऽरात्रिकं बालस्य पुरस्तात् प्रज्वलित दीप भ्रामणं तस्य दीपसम्पदा दीपसम्पत्त्या, उदयसन्ध्ययेव सायं सन्ध्ययेव श्रियं शोभां समाजहार स्वीचकार। अर्थात् द्वितीयाचन्द्रः सन्ध्याकाले लोकैरारार्तिक्येन पूज्यते तद्वदयं बाल आरार्तिक्येन शोभितोऽभूदिति भावः। अत्रोपमारूपकयोः संकरः।

भाषा

जगत् भर के मनुष्यों की आँखों को आनन्द देने वाला बालचन्द्र स्वरूप वह बालक, नूतन तेज की किरणों के चक्र के समान रमणीय सतत आरती के दीपक की ज्योति से सायं काल की बालचन्द्र की शोभा को उत्पन्न कर रहा था। प्रायः सभी लोग दूज के चांद की सायं काल में आरती कर पूजा करते हैं। वैसे ही यह भी आरती से शोभित हुआ।

आसन्नरत्नगृहभित्तिषु निर्मलासु लोकोत्तरेण वपुषा प्रतिबिम्बितेन।
सेवां स्मरिष्यति कृतज्ञतयेव दिग्भिरङ्के गृहीत इव राजसुतो रराज॥८८॥

अन्वयः

राजसुतः निर्मलासु आसन्नरत्नगृहभित्तिषु प्रतिबिम्बितेन लोकोत्तरेण वपुषा (अयं) कृतज्ञतया सेवां स्मरिष्यति (इति) दिग्भिः अङ्के गृहीतः इव रराज।

व्याख्या

राज्ञः सुतो राजपुत्रो निर्मलासु निर्मलकान्तिष्वाऽऽसन्नाः समीपस्थाश्च रत्नगृहभित्तयो रत्नखचितगेहकुड्यानि तासु प्रतिबिम्बितेन प्रतिच्छायां गतेन लोकोत्तरेणाऽलौकिकेन वपुषा शरीरेण 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः। हेतुनाऽयं कुमारः कृतज्ञतया कृतमुपकृतं जानाति स्मरतीति कृतज्ञ-स्तस्य भावः कृतज्ञता तया सेवामस्मत्कृतां सेवां स्मरिष्यतीति दिग्भिःकाष्ठाभिरङ्के उत्सङ्गे गृहीत इव धारित इव रराज शुशुभे। अत्रोत्प्रेक्षालङ्कारः। वसन्त-तिलकाच्छन्दः। उक्ता वसन्ततिलका तभजाजगौगः।"

भाषा

राजकुमार के अलौकिक शरीर की परछाहीं, पास की रत्नों से जड़ी घर की साफ़ दीवारों पर पड़ने के कारण, मानों दिशाओं से वह राजपुत्र, यह समझ कर कि यह बड़ा होने पर कृतज्ञता से हमारी सेवाओं को स्मरण करेगा, गोदों में लिया हुआ शोभित होता था।

अकथयदवनीन्दोर्नन्दनोत्पत्तिवार्तां
प्रथमममरवृन्दानन्दिनान्दीनिनादः ।
तदनु तदनुरूपोत्साहतः सुन्दरीणां
त्वरितगमनलीलागद्गदो वाग्विलासः ॥८६॥

अन्वयः

अमरवृन्दानन्दिनान्दीनिनादः प्रथमम् अवनीन्दोः नन्दनोत्पत्तिवार्ताम् अकथयत्। तदनु तदनुरूपोत्साहतः सुन्दरीणां त्वरितगमनलीलागद्गदः वाग्विलासः (अकथयत्)।

व्याख्या

अमरवृन्दानां देवसमूहानामानन्दी सुखप्रदो नान्दीनिनादो मङ्गलध्वनिः प्रथमं पूर्वमवनीन्दोराहवमल्लदेवनृपं (कर्मणि षष्ठी) नन्दनस्य पुत्रस्योत्पत्तेर्जन्मनो वार्तां वृत्तान्तं 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः' इत्यमरः। अकथयदसूचयत्। तदनु तत्पश्चात् तस्य पुत्रजन्मनोऽनुरूपो योग्यो य उत्साहो हर्षातिरेकस्तस्मात् 'पञ्चम्यास्तसिल्'। सुन्दरीणामन्तःपुरललनानां त्वरितं शीघ्रञ्च तद् गमनं तस्य लीलया विलासेन गद्गदोऽविस्पष्टः कम्पमानश्च वाग्विलासः कलकलशब्दः पुत्रोत्पत्तिवृत्तान्तं राज्ञेऽकथयत् न्यवेदयत्। अत्राऽक्रमातिशयोक्त्यलङ्कारः। मालिनीच्छन्दः। "जनमयययुतेयं मालिनी भोगिलोकैः"।

भाषा

देवताओं की आनन्द देने वाली मङ्गलध्वनि के हौरे ने राजा को पहिले पहिले पुत्र उत्पन्न होने की सूचना दी। इसके बाद पुत्रोत्पत्ति के अनुरूप हर्ष से अन्तः पुर की ललनाओं के शीघ्रता से इधर उधर चलते २ गद्गद होकर बोले हुए कलकल शब्दों ने राजा को पुत्रोत्पत्ति से सूचित किया।

चञ्चच्चारणदीयमानकनकं संनद्धगीतध्वनि
स्फूर्जद्गाथकलुण्ठ्यमानकरटि प्रारब्धनृत्तोत्सवम् ।
पूर्णं मङ्गलतूर्यदुन्दुभिरवैरुत्तालवैतालिक-
श्लाघालङ्घितपूर्वपार्थिवमथ क्ष्माभर्तुरासीद्गृहम् ॥६०॥

अन्वय

अथ क्ष्माभर्तुः गृहं चञ्चच्चारणदीयमानकनकं संनद्धगीतध्वनि स्फूर्जद्गाथकलुण्ठ्यमानकरटि प्रारब्धनृत्तोत्सवं मङ्गलतूर्यदुन्दुभिरवैः पूर्णम् उत्तालवैतालिकश्लाघालङ्घितपूर्वपार्थिवम् आसीत् ।

व्याख्या

अथ पुत्रोत्पत्तिवार्ताप्रसरानन्तरं क्ष्माभर्तुः पृथ्वीपतेराहवमल्लदेवस्य गृहं प्रासादश्चञ्चद्भ्यो हर्षेण चञ्चलचित्तेभ्यश्चारणेभ्यः कुशीलवेभ्यो 'चारणास्तु कुशीलवाः' इत्यमरः । दीयमानं वितीर्यमाणं कनकं सुवर्णं यस्मिन्तत्, संनद्धो जायमानो गीतानां स्त्रीकर्तृकगायनानां 'सोहर इति लोके प्रसिद्धम्' ध्वनिः शब्दो यत्र तत्, स्फूर्जन्तो हर्षेण विलसन्तो गाथका गायकास्तैर्लुण्ठ्यमाना हठाद्गृह्यमाणाः करटिनो हस्तिनो यत्र तत्, प्रारब्धः समारब्धो नृत्तोत्सवो नृत्यसमारम्भो यत्र तत्, मङ्गलं मङ्गलरूपस्तूर्यदुन्दुभिरवो वाद्यविशेषशब्दस्तैः पूर्णं परिपूर्णम्, उत्ताला अत्युच्चैः शब्दायमाना वैतालिकाः स्तुतिपाठकास्तैः श्लाघया प्रशंसया लङ्घिता अतिक्रान्ता अधरीकृता इत्यर्थः । पूर्वपार्थिवाः पूर्ववर्तिनृपा यस्मिन्तदाऽऽसीत् । तादृशं गृहमासीदिति भावः । शार्दूलविक्रीडितच्छन्दः । सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।

भाषा

पुत्र होने की खबर फैलने के बाद राजा के महल में अत्यन्त प्रसन्न नटों को इनाम में सोना दिया जाने लगा, सोहर का गान प्रारम्भ हो गया, हर्ष से मस्त गवैये हाथियों को जबर्दस्ती इनाम में लेने लगे, नाच आरम्भ हो गया, मङ्गलमय तुरही और दुन्दुभी का नाद छा गया और बड़े ऊँचे शब्दों में स्तुति-पाठक लोग पूर्ववर्ती राजाओं से तुलना करते हुवे, इस राजा का वर्णन अधिक बढ़ाकर करने लगे ।

अथ समुचिते कर्मण्यास्थापरेण पुरोधसा
कथितमवनीनाथः सर्वं विधाय विधानवित् ।
प्रति मुहुरसौ सूनुस्पर्शान्महोत्सवमन्वभू-
दिह हि गृहिणां गार्हस्थ्यस्य प्रधानमिदं फलम् ॥६१॥

अन्वयः

अथ विधानवित् असौ अवनीनाथः समुचिते कर्मणि आस्थापरेण पुरोधसा कथितं सर्वं विधाय प्रति सूनुस्पर्शात् मुहुः महोत्सवम् अन्वभूत् । हि इह गृहिणां गार्हस्थस्य इदं प्रधानं फलम् ।

व्याख्या

अथ पुत्रजन्मानन्तरं विधानं शास्त्रविधिं वेत्ति जानातीति विधानविच्छास्त्रविधिज्ञोऽसौ प्रसिद्धोऽवनीनाथः पृथिवीपतिः समुचिते पुत्रजन्मसमयोचिते कर्मणि धार्मिककृत्ये आस्था दृढभक्तिः परं प्रधानं यस्य स तेन धार्मिककार्येषु दृढभक्तिपरायणेन पुरोधसा पुरोहितेन 'पुरोधास्तु पुरोहितः' इत्यमरः । कथितं सूचितं सर्वं समग्रं धर्मकृत्यं जातकर्मादिकं विधाय सम्पाद्य प्रतिसूनुस्पर्शात् प्रत्येकं पुत्रस्पर्शावसरान्मुहुः पुनः पुनः 'मुहुः पुनः पुनः शश्वदभीक्ष्णम्' इत्यमरः । महोत्सवं महदानन्दमन्वभूदनुभवविषयमकुर्वत । हि यस्मात्कारणादिहाऽस्मिन् संसारे गृहिणां गृहस्थाश्रमवासिनां जनानां गार्हस्थस्य गृहस्थधर्मस्येदं पुत्रमुखदर्शनरूपमेव प्रधानं मुख्यं फलम् । अत्राऽर्थान्तरन्यासालङ्कारः । हरिणीच्छन्दः । "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ।"

भाषा

पुत्र जन्म होने के अनन्तर शास्त्रीय विधियों को जाननेवाले उस राजा ने श्रद्धालु कुलपुरोहित द्वारा कथित पुत्र जन्म के लिये उचित सब जातकर्म आदि धर्म कृत्यों को विधिवत् कर पुत्रदेह के प्रत्येक स्पर्श के अवसर मे बार २ परम आनन्द का अनुभव किया । क्योंकि इस संसार में गृहस्थाश्रम में रहने वालों के लिये गार्हस्थ धर्म का पुत्र प्राप्ति ही मुख्य फल है ।

इति श्री त्रिभुवनमल्लदेव-विद्यापति-काश्मीरकभट्ट श्री बिल्हणविरचिते विक्रमाङ्कदेव-चरिते महाकाव्ये द्वितीयः सर्गः ।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाज-बुधोत्तमात्समुदितः श्रीविश्वनाथः सुधीः ।
चक्रे रामकुबेरपण्डितवरात्संप्राप्तसाहाय्यक—
ष्टीकायुग्ममिदं रमाकरुणया सर्गे द्वितीये शुभे ॥

ॐ शान्तिः शान्तिः शान्तिः ।

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

तृतीयः सर्गः

अथ नवजातराजकुमारं वर्णयति कविः—

स विक्रमेणाद्भुततेजसा च चेष्टाविशेषानुमितेन बालः ।
श्रीविक्रमादित्य इति क्षितीन्दोरवाप विख्यातगुणः समाख्याम् ॥१॥

अन्वयः

स विख्यातगुणः बालः चेष्टाविशेषानुमितेन विक्रमेण अद्भुततेजसा च क्षितीन्दोः श्रीविक्रमादित्यः इति समाख्याम् अवाप ।

व्याख्या

सः प्रसिद्धो विख्यातगुणः प्रसिद्धगुणो बालो बालकश्चेष्टाविशेषेणाऽऽकारेङ्गितादिव्यवहारेणाऽनुमितो विज्ञातस्तेन विक्रमेण शौर्येणाऽद्भुततेजसाऽऽश्चर्यचुम्बि प्रतापेन च क्षितेः पृथिव्या इन्दुश्चन्द्रः (प्रजाल्हादकत्वात्) तस्मादाहवमल्लदेवनृपात् श्रीविक्रमादित्य इति विक्रमेण पराक्रमेण तेजसा चाऽऽदित्यस्वरूपः इति समामन्वर्थमाख्यां नाम 'आख्याव्हे अभिधानञ्च नामधेयञ्च नाम च' इत्यमरः । अवाप प्राप ।

भाषा

प्रसिद्ध गुणों से युक्त उस बालक ने अपने विशेष लक्षणों से अनुमित आश्चर्य कारक तेज तथा भावि विक्रम का परिचय देकर पृथ्वी के चन्द्र स्वरूप राजा आहवमल्लदेव से विक्रम में और तेज में सूर्य की समानता का सूचक श्री विक्रमादित्य यह अन्वर्थक नाम पाया ।

देवस्य चालूक्यविभूषणस्य भार्या यशोरञ्जितदिङ्मुखेन ।
तेनावदातद्युतिना रराज साम्राज्यलक्ष्मीरिव विक्रमेण ॥२॥

अन्वयः

चालुक्यविभूषणस्य देवस्य भार्या यशोरञ्जितदिङ्मुखेन अवदातद्युतिना तेन साम्राज्यलक्ष्मीः विक्रमेण इव रराज ।

व्याख्या

चालुक्यस्य चालुक्यवंशस्य विभूषणमलङ्काररूपस्तस्य देवस्य राज्ञ आहवमल्लदेवस्य भार्या जाया 'भार्या जायाऽथ पुं भूम्नि दाराः स्यात्तु कुटुम्बिनी' इत्यमरः। यशसा कीर्त्या रञ्जितानि प्रसादितानि दिशामाशानां मुखान्यग्रभागा येन सः तेनाऽवदाता सिता द्युतिः कान्तिर्यस्य तेन धवलकान्तिना 'अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः' । इत्यमरः । तेन राजकुमारेण विक्रमेण साम्राज्यस्य सार्वभौमत्वस्य लक्ष्मीः श्रीर्विक्रमेण शौर्यणेव रराज शोभिताऽभूत् । अत्रोपमालङ्कारः ।

भाषा

जिस प्रकार साम्राज्य की लक्ष्मी (विक्रम) पराक्रम से शोभित होती है उसी प्रकार चालुक्यवंश के भूषण राजा आहवमल्लदेव की रानी सब दिशाओं के अग्र भागों को अपने यश से उज्वल करने वाले गौर वर्ण अपने पुत्र विक्रम से शोभित हुई ।

अथ बाललीलां वर्णयति कविः—

आलम्ब्य हारं करपल्लवेन पयोधरं पातुमसौ प्रवृत्तः ।
भोगेष्वबाह्या गुणिनो ममेति स्वभावमात्मीयमिवाभ्यधत्त ॥३॥

अन्वयः

असौ हारं करपल्लवेन आलम्ब्य पयोधरं पातुं प्रवृत्तः (सन्) मम भोगेषु गुणिनः अबाह्याः इति आत्मीयं स्वभावम् अभ्यधत्त इव ।

व्याख्या

असौ बालो स्वमातुर्हारं मुक्ताहारं करपल्लवेन हस्तपल्लवेनाऽऽलम्ब्य विधृत्य पयोधरं स्तनं पातुं स्तनगतदुग्धपानं कर्तुं प्रवृत्तो लग्नस्सन् मम भोगेषु भोग्य-

वस्तुषु गुणिनो गुणवन्तः पुरुषा हारादयः श्लिष्टगुणपदार्थसूत्रसंग्रथिता अतस्तेऽपि गुणिनोऽबाह्या अन्तरङ्गा मया सह गुणवन्तोऽपि भोग्यवस्तुषु सुखमनुभवन्त्वित्यात्मीयं स्वभावं स्वकीयां प्रकृतिमभ्यधत्तेव कथितवानिव । नाऽहं स्वोपभोग्यवस्तुषु गुणिनो विहायोपभोगे प्रवृत्तो भविष्यामीति सूचयन्निव गुणिनं मुक्ताहारं करेण धृत्वा स्तनपानरूपोपभोगे प्रवृत्त इति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

यह बालक अपनी माता के मोती के हार को अर्थात् गुणी को अपने कोमल-पत्ते के ऐसे सुकुमार हाथ से पकड़ कर स्तनपान करता हुआ मानों अपने स्वभाव को प्रकट करता था कि उसके उपभोगों में गुणीलोग कभी भी छूट नहीं सकते अर्थात् वह गुणियों को अपने उपभोगों में सदैव साथ रक्खेगा । (गुण शब्द का अर्थ डोरा होने से डोरे में परोया मोती का हार भी गुणी कहा जा सकता है ।)

मातृस्तनोत्सङ्ग-विलासहार-प्रभा प्रविश्येव विनिःसरन्ती ।
तस्यानिमित्तस्मितचन्द्रिकाभू-न्नरेन्द्रनेत्रोत्सववैजयन्ती ॥४॥

अन्वयः

तस्य मातृस्तनोत्सङ्गविलासहारप्रभा प्रविश्य विनिःसरन्ती इव अनिमित्तस्मितचन्द्रिका नरेन्द्रनेत्रोत्सववैजयन्ती अभूत् ।

व्याख्या

तस्य बालकस्य मातुः स्तनौ कुचौ मातृस्तनौ तयोरुत्सङ्गे मध्ये विलासहारो विलासार्थं धृतो मुक्ताहारस्तस्य प्रभा कान्तिर्बालं प्रविश्याऽभ्यन्तरं गत्वा पुनः विनिस्सरन्तीव बहिरागतेव नास्ति निमित्तं कारणं यस्मिंस्तत् स्मितमीषद्धास एव चन्द्रिका ज्योत्स्ना 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः । चन्द्रप्रकाश इत्यर्थः । नरेन्द्रस्य राज्ञो नेत्रोत्सवस्य नयनानन्दस्य 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः । वैजयन्ती विज्ञापयित्री पताका तत्स्वरूपाऽभूत् । श्वेतवर्णा मुक्ताहारकान्तिरेव बालं प्रविश्य बालकस्याऽकारणेषद्धासरूपचन्द्रिकारूपेण बहिरागता नृपस्य नयनानन्दकरी बभूवेत्यर्थः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

उस बालक की माता के कुचों के मध्य में विलसित मोती के हार की सफ़ेद

कान्ति, मानों उस बालक के भीतर प्रविष्ट होकर उसके स्वाभाविक मुसकान रूप सफेद चन्द्रिका के रूप में फिर बाहर निकलती हुई राजा के नेत्रों के आनन्दोत्सव को सूचित करने वाली पताका थी। अर्थात् राजा को बालक के अकारण स्वाभाविक स्मित से अत्यन्त हर्ष होता था।

मुष्टिप्रविष्टारुणरत्नदीप-प्रभालता तस्य समुल्लसन्ती।
विपक्षकण्ठक्षतजानुलिप्ता कृपाणलेखा सहजेव रेजे ॥५॥

अन्वयः

तस्य मुष्टिप्रविष्टारुणरत्नदीपप्रभालता समुल्लसन्ती सती विपक्षकण्ठ-क्षतजानुलिप्ता सहजा कृपाणलेखा इव रेजे।

व्याख्या

तस्य बालकस्य मुष्ट्योः प्रविष्टा प्राप्ता याऽरुणा रक्तवर्णा रत्नदीपानां प्रभारूपिणी लता कान्तिवल्ली सा समुल्लसन्ती सुशोभिता सती विपक्षाणां शत्रूणां कण्ठास्तेषां क्षतजं रुधिरं तेनाऽनुलिप्ताऽनुरञ्जिता सहजा सहैवोत्पन्ना स्वाभाविकी जन्मसिद्धा कृपाणलेखेव खड्गलेखेव रेजे समलङ्कृताऽऽसीत्। बालकमुष्टि-प्रविष्टरत्नदीपरक्तवर्णकान्तिः शत्रुकण्ठरुधिरानुलिप्तसहजकृपाणलेखेव शुशुभ इति भावः।

भाषा

उस बालक की मुट्ठी में प्रवृष्ट रत्नदीप की लाल रंग की कान्ति, शत्रुओं के कटे हुए गलों के खून से सनी, जन्म सिद्ध, साथ ही में उत्पन्न तलवार की धार के ऐसी शोभित होती थी।

त्यक्त्वोपविष्टान्यदसौ कुमारः समुत्थितानां सविधे जगाम।
आगामि तेनाधिकमुन्नतात्मा नीचेषु वैमुख्यमिवाचचक्षे ॥६॥

अन्वयः

यत् असौ उन्नतात्मा कुमारः उपविष्टान् त्यक्त्वा समुत्थितानां सविधे जगाम तेन नीचेषु आगामि अधिकं वैमुख्यम् आचचक्षे इव।

व्याख्या

यद्यस्मात्कारणादसौ स उन्नतोऽभ्युदयोन्मुख आत्मा यस्य सः कुमारो राजपुत्र उपविष्टान् भूमावासीनान् पुरुषान् त्यक्त्वा विहाय तदुत्सङ्गं परित्यज्येत्यर्थः। समुत्थितानामूर्ध्वस्थानां पुरुषाणां सविधे तदङ्केषु जगाम स्वेच्छया गतवान् तेन कारणेन नीचेषु नीचजनेष्वागामि भविष्यदधिकमनल्पं वैमुख्यं विरुद्धदिशि गतं मुखं यस्य स तस्य भावो वैमुख्यं नीचप्रतिकूलत्वरुचिमाचचक्ष इव जगादेवाऽसूचयदि-वेत्यर्थः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

चूँकि यह उन्नत आत्मा वाला बालक बैठे हुए मनुष्यों की गोदों को छोड़ कर खड़े भये हुए मनुष्यों की गोदों में जाता था इससे मानों उसने प्रकट कर दिया कि वह भविष्य में नीचे या नीच मनुष्यों से अधिक विमुख रहेगा।

धात्रेयिकाया स्मितपूर्वकं य-ददत्त हुङ्कारमसौ कुमारः।
अपूरयत्तेन नृपस्य कर्णौ पेयूषगण्डूषपरम्पराभिः ॥७॥

अन्वयः

यत् असौ कुमारः धात्रेयिकायाः स्मितपूर्वकं हुङ्कारम् अदत्त तेन पेयूष-गण्डूषपरम्पराभिः नृपस्य कर्णौ अपूरयत्।

व्याख्या

यद्यस्मात्कारणादसौ पूर्वोक्तः कुमारो राजपुत्रो धात्रेयिकाया उपमातुः स्मितपूर्वकं सस्मितं हुङ्कारशब्दं बालस्वाभाविकशब्दमदत्त दत्तवान् तेन कारणेन पेयूषस्याऽमृतस्य गण्डूषं मुखपूर्तिः 'गण्डूषो मुखपूर्तौ स्याद्गजहस्ताङ्गु-लावपि। प्रसृत्या प्रमितेऽपिस्यात्' इति हैमः। तेषां परम्पराभि सन्ततप्रयो-गैर्नृपस्य राज्ञः कर्णौ श्रोत्रेऽपूरयत् संपूरितवान्। उपमात्रे हुङ्कारदानरूपबाल-लीलया राजाऽऽनन्दपरिपूर्णमानसो बभूवेति भावः। स्वभावोक्तिरलङ्कारः।

भाषा

यह बालक अपनी दाई के पुचकारने पर मुस्कुराते हुए हुँकारी भरता था इससे वह राजा के दोनों कानों को अमृत के गण्डूष की परम्परा से भर देता था। अर्थात् उन हुंकारियों को सुन कर राजा को परम आनन्द होता था।

यदुत्थितः सोऽङ्गुलिसंग्रहेण यत्किञ्चिदव्यक्तमवोचतापि ।
अभीक्ष्णमक्ष्णोः श्रवसोश्च तेन क्षमापतेः संवननं बभूव ॥८॥

अन्वयः

यत् सः अङ्गुलिसंग्रहेण उत्थितः अपि यत् किञ्चित् अव्यक्तम् अवोचत तेन क्षमापतेः अक्ष्णोः श्रवसोः च अभीक्ष्णं संवननं बभूव ।

व्याख्या

यद्यस्मात्कारणात् स बालकोऽन्येषां जनानामङ्गुलिसंग्रहेणाऽङ्गुलिं धृत्वोत्थितः समुत्थानं कृतवान् 'अङ्गुल्यः करशाखास्स्युः' इत्यमरः । अपि चाऽन्यच्च यत्किञ्चिदव्यक्तमस्पष्टमवोचत संजगाद तेन कारणेन क्षमायाः पतिः स्वामी तस्याऽवनिभर्तुः 'क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ।' 'धवः प्रियः पतिर्भर्ता' इत्यमरः । अक्ष्णोर्नयनयोः 'लोचनं नयनं नेत्र मीक्षणं चक्षुरक्षिणी' इत्यमरः । श्रवसोश्च कर्णयोश्च 'कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्ममरः । अभीक्ष्णं पुनः पुनः 'मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः । संवननं वशीकरणं 'वशक्रिया संवननं' इत्यमरः । अभूत् बभूव । तस्य बालस्योऽङ्गुलिं संगृह्योत्थानं दृष्ट्वा यत्किञ्चिदस्पष्टं संभाषणञ्च श्रुत्वा राजा वशीकरण-मन्त्राभिभूत इव जातः । सर्वं कार्यजातं त्यक्त्वा तदवलोकनश्रवणयोर्मग्न इति भावः ।

भाषा

चूंकि यह बालक दूसरों की अंगुली पकड़ कर उठने लगा और साफ़ २ समझ में न आने वाले शब्दों को बोलने लगा इससे राजा की आँखों व कानों का बार २ वशीकरण होता था । अर्थात् राजा सब कामों को छोड़ इस बालक की लीला देखने में ही परम मुदित होता था ।

क्रमेण सम्पादितचूलकर्मा चालुक्यभूपालधुरन्धरस्य ।
विनोदलीलाकुसुमोच्चयानां स नन्दनो नन्दनतामवाप ॥९॥

अन्वयः

क्रमेण सम्पादितचूलकर्मा सः नन्दनः चालुक्यभूपालधुरन्धरस्य विनोदलीलाकुसुमोच्चयानां नन्दनताम् अवाप ।

व्याख्या

क्रमेण जातकर्मादिसंस्कारानन्तरं सम्पादितं निष्पादितं चूलकर्म चूडाकर्म-संस्कारो यस्य सः सम्पादितचूलकर्मा स नन्दयतीति नन्दनः सर्वजनानन्ददाता पुत्रश्चालुक्यवंशीया ये भूपाला नरेश्वरास्तेषां धुरन्धरस्याऽग्रगण्यस्याऽऽहवमल्ल-देवस्य विनोदलीला मनस आनन्दविहारलीला एव कुसुमानि पुष्पाणि 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः। तेषामुच्चयास्समूहाः 'समुदाय-स्समुदयः समवायश्चयो गणः' इत्यमरः। तेषां नन्दनतामिन्द्रस्य नन्दनवनना-मककाननस्वरूपतामवाप प्राप्तवान्। यथा नन्दनवने पुष्पोच्चयानामियत्ता नास्ति तथैवाऽस्य राज्ञो मनसि विनोदलीलानामत्याधिक्यं बभूवेति भावः। पुत्रे नन्दनवनत्वारोपे विनोदलीलासु कुसुमत्वारोपस्य कारणत्वात्परम्परितं रूपकम्। 'नियतारोपणोपायः स्यादारोपः परस्य यः। तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥'

भाषा

धीरे २ जातकर्मादि संस्कारों के अनन्तर चौलकर्म संस्कार होने के बाद वह राजपुत्र, चालुक्य वंशीय राजाओं में श्रेष्ठ आहवमल्लदेव राजा के मानसिक आनन्द विहार लीला रूपी पुष्पसंचयों का इन्द्र का नन्दनवन ही हो गया। अर्थात् जिस प्रकार नन्दन वन में अगणित पुष्प समुदाय होते हैं वैसे इस राजा के मन में इस बालक को देख कर अपरिमित आनन्द विहार लीलाओं का प्रादुर्भाव हुआ।

उत्सङ्गमारुह्य नरेश्वरस्य स पांसुलीलापरिधूसराङ्गः।
निजाङ्गतः संगलितैः परागैश्चक्रे मनःकार्मणचूर्णयोगम् ॥१०॥

अन्वयः

पांसुलीलापरिधूसराङ्गः सः नरेश्वरस्य उत्सङ्गम् आरुह्य निजाङ्गतः संगलितैः परागैः मनःकार्मणचूर्णयोगं चक्रे।

व्याख्या

पांसुषु धूलिषु "रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः" इत्यमरः। लीला क्रीडा तया परिधूसराणीषत्पाण्डून्यङ्गानि यस्य सः 'हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः' इत्यमरः। धूलिक्रीडनेन धूलिधूसरिताङ्गः स बालकः

नराणामीश्वरस्तस्य मानवेश्वरस्य राज्ञ उत्सङ्गमङ्कमारुह्य स्थित्वा निजाङ्गतः स्वीयावयवेभ्यः संगलितैरधःपतितैः परागैर्धूलिभिर्जनेश्वरस्य मनसो हृदयस्य कार्मणं मूलौषधिद्वारा वशक्रिया 'मूलकर्म तु कार्मणम्' इत्यमरः। तत्कृते यच्चूर्णमोषधिचूर्णं तस्य योगं योजनां चक्रे विहितवान्। कुमाराङ्गगलित-धूलिभिर्नृपस्य प्रेमपूरितं हृदयं वशीकृतमिव संजातमिति भावः। अत्र निदर्शनालङ्कारः।

भाषा

मिट्टी में खेलने से धूल से भरे शरीर वाला अतएव कुछ सफेद वर्ण का दिखलाई पड़ने वाला वह बालक, राजा की गोद में बैठ कर अपने शरीर से झड़ी हुई धूलि से मानो राजा के मन को वशीकरण करने का औषधिचूर्ण प्रयोग करता था।

राज्ञां प्रणामाञ्जलिसम्पुटेषु किमप्यवज्ञामुकुलीकृताक्षः।
तस्यैकहस्ताम्बुरुहप्रणामे कृतार्थमात्मानममंस्त देवः ॥११॥

अन्वयः

राज्ञां प्रणामाञ्जलिसम्पुटेषु किमपि अवज्ञामुकुलीकृताक्षः देवः तस्य एकहस्ताम्बुरुहप्रणामे आत्मानं कृतार्थम् अमंस्त।

व्याख्या

राज्ञां सामन्तभूपानां प्रणामार्थं विहितमञ्जलिसम्पुटं तेषु सत्सु, द्वाभ्यां युताभ्यां कराभ्यां सर्वै राजभिर्नमस्कारे कृते सतीति भावः। किमप्यनिर्वचनीय-प्रकारेण हेलयेत्यर्थः। अवज्ञयोपेक्षया 'रीढावमाननावज्ञावहेलनमसूक्षणम्' इत्यमरः। मुकुलीकृते 'अमुकुलो मुकलः कृतः इति मुकुलीकृतः' 'अभूततद्भावेच्विः। कुड्मलो मुकुलोऽस्त्रियाम्' इत्यमरः। ईषत्सङ्कुचितेऽक्षिणी यस्य स देवो राजाऽऽहवमल्लदेवस्तस्य बालकस्यैकहस्ताम्बुरुहमेककरकमलं समुत्थाप्य कृतः प्रणामस्तस्मिन् सति आत्मानं स्वं कृतार्थं कृतकृत्यं सफलजन्मवन्तमित्यर्थः। अमंस्त मेने। नृपैर्बद्धाञ्जलिभिः प्रणामे कृतेऽप्यवहेलनयाऽऽहवमल्लदेवस्य दृष्टिस्तेषामुपरि सङ्कुचितैवाऽऽसीत्। परञ्च बालकृतैकहस्तप्रणामे तु स प्रसन्नतया कृतकृत्यो बभूव।

भाषा

अन्य सामन्त राजाओं से दोनों हाथ जोड़कर प्रणाम किये जाने पर भी अवहेलना से अपनी आँखों को कुछ संकुचित बना लेने वाला राजा आहवमल्लदेव, उस बालक के एकही हाथ से प्रणाम किए जाने पर अपने को कृतकृत्य समझता था।

प्रतिक्षणं कुन्तलपार्थिवस्य वितन्वतस्तन्मुखचुम्बनानि ।
तदीयदन्तच्छदजन्मनेव रागेण चेतः परिपूर्णमासीत् ॥१२॥

अन्वयः

प्रतिक्षणं तन्मुखचुम्बनानि वितन्वतः कुन्तलपार्थिवस्य चेतः तदीयदन्तच्छदजन्मना रागेण इव परिपूर्णम् आसीत् ।

व्याख्या

प्रतिक्षणं निरन्तरं तस्य बालस्य मुखस्याऽऽननस्य चुम्बनानि वितन्वतो विदधतः कुन्तलस्य कुन्तलदेशस्य पार्थिवो राजा तस्य चेतो मानसं दन्ताश्छाद्यन्ते तिरोधीयन्तेऽनेनेति दन्तच्छदोऽधरः 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः। तस्माज्जन्म यस्य स तेन बालाधरस्थितेन रागेणेवाऽऽरुणवर्णेनेव मानसपक्षे प्रेम्णा परिपूर्णं पूरितं बभूव ।

भाषा

क्षण क्षण में उस बालक के मुख को चूमने में प्रवृत्त उस कुन्तलदेश के राजा का हृदय मानों उस बालक के अधरोष्ठ से उत्पन्न होने वाले राग (लालिमा) से लाल हो गया था या राग (प्रेम) से भर गया था।

मुखेन्दुसञ्चारकृताभिलाष-कुरङ्गभीत्यर्थमिवार्पितेन ।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण ॥१३॥

अन्वयः

सः राजसूनुः मुखेन्दुसञ्चारकृताभिलाषकुरङ्गभीत्यर्थम् इव अर्पितेन कण्ठावसक्तेन व्याघ्रनखाङ्कुरेण अराजत ।

व्याख्या

स राजपुत्रो मुखेन्दावाननचन्द्रे संचाराय गमनाय कृतोऽभिलाषो येन स कुरङ्गो लांच्छनमृगस्तस्य भीत्यर्थं भयोत्पादनायेवार्पितेन धारितेन कण्ठावसक्तेन कण्ठलग्नेन व्याघ्रनख एवाङ्कुरः स्तेनाऽराजत शुशुभे। बालमुखेन्दौ लाच्छनमृगस्य गमनवारणाय व्याघ्रनखाः कण्ठे समारोपिताः। व्याघ्रनखेन तत्र व्याघ्रसत्तामनुमाय मृगस्तत्र न गच्छति। अतएव बालस्य मुखचन्द्रो निष्कलङ्क इति भावः। बालकस्याऽरिष्ट निवारणार्थं तस्य गले व्याघ्रनखार्पणं भारते प्रसिद्धम्। फलोत्प्रेक्षाऽलङ्कारः। तेन मुखस्य निष्कलङ्कचन्द्ररूपत्वं ध्वन्यते।

भाषा

वह राज पुत्र, मुखरूपी चन्द्र में आने की अभिलाषा रखने वाले लांच्छन मृग को डराने के लिए मानों गले में पहिने हुए व्याघ्रनखांकुर से शोभित हो रहा था अर्थात् व्यघ्र के भय से मृग वहाँ नहीं जा सकता अत एव उसका मुख रूपी चन्द्र निष्कलङ्क था। (लड़कों के गले में व्याघ्रनख पहनाने की प्रथा भारत में चिरकाल से चली आई है।)

क्रीडन्समुत्सारितवारनारी—मञ्जीरनादागतराजहंसः।
एकः क्षितेः पालयिता भविष्यन् स राजहंसासहनत्वमूचे ॥१४॥

अन्वयः

क्रीडन्समुत्सारितवारनारीमञ्जीरनादागतराजहंसः सः एकः क्षितेः भविष्यन् पालयिता राजहंसासहनत्वम् ऊचे।

व्याख्या

क्रीडन् बालोचितक्रीडाविलासं कुर्वन् समुत्सारिता निवारिता वारनारीणां वाराङ्गनानां 'वारस्त्री गणिका वेश्या रूपाजीवा' इत्यमरः। मञ्जीरनादेन नूपुरशब्देनाऽऽगता राजहंसा मरालश्रेष्ठा 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः' इत्यमरः। येन स एवम्भूतः स बालक एक एवैकाक्येव क्षितेः सम्पूर्णपृथिव्या भविष्यन् भावी पालयिता रक्षिता राजहंसानां श्रेष्ठनृपाणामसहनत्वं तेषां महत्त्वसहनाक्षमत्वमूचे निवेदितवान्। श्लिष्टोत्प्रेक्षालङ्कारः।

भाषा

खेलते हुए, वेश्याओं के पैंजेब के शब्दों को सुनकर आए हुए राजहंस पक्षियों को भगा देने वाले उस बालक ने, सम्पूर्ण पृथ्वी का एक छत्र राजा हो कर भविष्य में अन्य श्रेष्ठ राजहंसों अर्थात् राजाओं के महत्व की असहनशीलता का परिचय दिया।

स पीडयन्नायसपञ्जरस्थान् क्रीडापरः केसरिणां किशोरान्।
समाददे भाविरिपुद्विपेन्द्र-युद्धोपयोगीव तदीयशौर्यम् ॥१५॥

अन्वयः

क्रीडापरः सः आयसपञ्जरस्थान् केसरिणां किशोरान् पीडयन् भाविरिपुद्विपेन्द्रयुद्धोपयोगि तदीयशौर्यं समाददे इव।

व्याख्या

क्रीडापरो बालक्रीडासक्तः स आयसपञ्जरस्थान् लौहनिर्मितपिञ्जरस्थितान् लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी' इत्यमरः। केसरिणां सिंहानां किशोरान् शिशून् पीडयन् बाधमानो भाविषु भविष्यत्सु रिपव एव द्विपेन्द्रास्तेषां शत्रुगजेन्द्राणां युद्धेषु जन्येषु 'युद्धमायोजनं जन्यं प्रधनं प्रविदारणम्' इत्यमरः। उपयोगि कार्यसाधकं विजयकारीतिभावः। तदीयं सिंहशिशुसम्बन्धिशौर्यं पराक्रमं समाददे इव गृहीतवानिव। सिंहोऽनायासेन स्वशौर्येण गजं हन्ति तदीयशौर्येणाऽयमपि भविष्यत् काले रिपुगजेन्द्रं हनिष्यतीति भावः। रूपकसहकृतोत्प्रेक्षालङ्कारः।

भाषा

खेलकूद में लगे हुए उस बालक ने लोहे के पिंजरे में के शेर के बच्चों को तंग कर भावी शत्रुरूपी गजेन्द्रो के युद्धों में उपयोगी उनके शौर्य को मानों ले लिया। सिंह ही का शौर्य गजेन्द्रों के मारने में समर्थ होता है। इसलिये इसने शत्रुरूपी गजेन्द्रों को मारने के लिये मानों इनसे शौर्य छीन लिया।

प्राप्तोदयः पादनखैश्चकासे स बालचन्द्रः परिवर्द्धमानः।
अभ्यर्थमानः सहखेलनाय बालैरपत्यैरिव शीतरश्मेः ॥१६॥

अन्वयः

प्राप्तोदयः परिवर्द्धमानः बालचन्द्रः सः पादनखैः शीतरश्मेः बालैः अपत्यैः सहखेलनाय अभ्यर्थमानः इव चकासे ।

व्याख्या

प्राप्त उदय उत्पत्तिरौन्नत्यं वा येन सः परिवर्द्धमानो वृद्धि प्राप्नुवन् बालश्चन्द्र इवेति बालचन्द्रः कुमारो नवीनचन्द्रो वा सः पादनखैरर्द्धचन्द्राकारैः श्वेतैश्च प्रतिबिम्बितचन्द्रैर्वा शीतो रश्मिः किरणो यस्य सः 'किरणोऽस्त्रमयूखांशु गभस्ति-घृणिरश्मयः' इत्यमरः । शीतरश्मिस्तस्य शीतरश्मेश्चन्द्रस्य बालैर्बालरूपैरपत्यैः पुत्रैः सहखेलनाय सहक्रीडनायाऽभ्यर्थ्यमानः प्रार्थ्यमान इव चकासे विदिद्युते । पादनखानामुपरि चन्द्रशिशुत्वोत्प्रेक्षा । राजकुमारस्य बालचन्द्रेण सहाभेदाद्रूप-कालङ्कारः । अयं बालचन्द्रः शीतरश्मेर्बालैः क्रीडार्थं प्रार्थित इवाऽभूत् इति बालस्वभावोक्तिर्व्यञ्ज्यते ।

भाषा

उदित भया हुआ और बढ़ता हुआ, बालचन्द्र के समान वह कुमार, पांव के नखों के स्वच्छ तथा अर्धचन्द्राकार होने से या पांव के स्वच्छ नखों में प्रतिबिम्बित चन्द्र होने से मानों चन्द्रमा के छोटे २ बच्चों से साथ खेलने के लिये पांव पड़कर प्रार्थना किये गये के ऐसा शोभित हो रहा था । अर्थात् पांव के नखों के मिष से चन्द्र के बालक पांव पड़कर उसके साथ खेलने की प्रार्थना करते थे ।

परां प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनुः ।
पुण्यात्मनामत्र तथाविधानां निमित्तमात्रं गुरवो भवन्ति ॥१७॥

अन्वयः

नरेन्द्रसूनुः क्रमेण सर्वासु लिपिषु परां प्रतिष्ठां जगाम । अत्र तथा-विधानां पुण्यात्मनां गुरवो निमित्तमात्रं भवन्ति ।

व्याख्या

नरेन्द्रस्य मनुष्येन्द्रस्य सूनुः पुत्रः क्रमेण शनैः शनैः सर्वास्वखिलासु लिपि-ष्वक्षरविन्यासेषु 'लिपिरक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ' इत्यमरः । परामु-त्कृष्टां प्रतिष्ठां काष्ठामुत्कर्षमित्यर्थः 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः ।

जगाम प्राप। अत्र संसारे तथाविधानां नृपकुमारसदृशानामलौकिकानां पुण्यात्मनां सुकृतिनां गुरव उपदेशका निमित्तमात्रं कारणमात्रं भवन्ति। पुण्यैरेव सर्वा विद्या अनायासेन ते प्राप्नुवन्ति गुरवस्तु निमित्तमात्रं भवन्तीति भावः। अर्थान्तरन्यासोऽलङ्कारः।

भाषा

वह राजपुत्र धीरे २ समग्र वर्णमालाओं को अच्छी तरह से जान गया। इस संसार में ऐसे पुण्यात्माओं के शिक्षकगण केवल निमित्त के लिये ही होते हैं।

अभ्यासहेतोः क्षिपतः पृषत्कान् नरेन्द्रसूनोः सकलासु दिक्षु।
प्रहारभीतेव परिभ्रमन्ती पार्थस्य कीर्तिर्विरलीबभूव ॥१८॥

अन्वयः

अभ्यासहेतोः सकलासु दिक्षु पृषत्कान् क्षिपतः नरेन्द्रसूनोः प्रहारभीता इव परिभ्रमन्ती पार्थस्य कीर्तिः विरलीबभूव।

व्याख्या

अभ्यासहेतोर्बाणादिविक्षेपणाभ्यासदार्ढ्याय सकलासु समग्रासु दिक्षु काष्ठासु 'दिशस्तु ककुभः काष्ठा आशाश्चहरितश्च ताः' इत्यमरः। चतुर्दिक्ष्वित्यर्थः। पृषत्कान् बाणान् 'पृषत्कबाणविशिखा अजिह्मगखगाशुगाः' इत्यमरः। क्षिपतोः मुञ्चतोः नरेद्रसूनो राजपुत्रस्य प्रहारात्प्रहरणाद्भीतेव भययुक्तेव परिभ्रमन्ती-तस्ततश्चलन्ती पार्थस्याऽर्जुनस्य कीर्तिर्बाणसन्धानयशो विरलीबभूव निबिडेतरा बभूव न्यूनीबभूवेत्यर्थः। राजकुमारस्याऽभ्याससमय एव बाणसन्धानकौशलम-र्जुनादप्यधिकमासीदिति भावः।

भाषा

अभ्यास करने के लिये सब दिशाओं में बाणों को चलाने वाले उस राजपुत्र के बाणों के प्रहार के भय से मानों डरी हुई, चारो ओर भागने वाली (अर्जुन के पक्ष में) चारो ओर फैली हुई अर्जुन की बाण चलाने की कीर्ति संकुचित हो गई। अर्थात् अभ्यास काल में ही वह राजपुत्र बाण चलाने की कला में अर्जुन से भी कुशल था।

लावण्यलुब्धाभिरलब्धमेव भूपालकन्यामधुपाङ्गनाभिः ।
कवित्ववक्तृत्वफला चुचुम्ब सरस्वती तस्य मुखारविन्दम् ॥१९॥

अन्वयः

कवित्ववक्तृत्वफला सरस्वती लावण्यलुब्धाभिः भूपालकन्यामधुपाङ्ग-नाभिः अलब्धम् एव तस्य मुखारविन्दं चुचुम्ब ।

व्याख्या

कवित्वं काव्यकर्तृत्वं वक्तृत्वं वाग्मिता च फलं यस्याः सा सरस्वती वाग्देवता, यस्यास्समवधाने सति कवित्वं वक्तृत्वञ्चाऽनायासेनैव प्रतिफलतीति भावः । लावण्ये कुमारस्य सौन्दर्ये लुब्भाभिस्तद्रसाकाङ्क्षिणीभिर्भूपालानां राज्ञां कन्या राजकुमार्य एव मधुपानां भ्रमराणामङ्गनाः स्त्रियस्ताभिरलब्धमप्राप्तं तस्य कुमारस्य मुखमेवाऽरविन्दं कमलं 'वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्' इत्यमरः । चुचुम्ब तस्य मुखे निवासं चकारेत्यर्थः । सरस्वती कुमारवृत्तान्ते नायकव्यवहारसमारोपात्समासोक्तिरलङ्कारः । भूपालकन्यासु भ्रमराङ्गनात्वा-भेदारोपान्मुखे चाऽरविन्दत्वाभेदारोपाद्रूपकालङ्कारः । तेन चाऽस्य विलक्षणं कवित्वं वाग्मित्वञ्च व्यज्यते ।

भाषा

उस राजकुमार के सौन्दर्य पर मोहित राजकन्या रूपी भ्रमराङ्गनाओं से अप्राप्य उसके मुख कमल को कवित्व तथा वक्तृत्व शक्ति देनेवाली सरस्वती ने चूमलिया । अर्थात् सरस्वती ने उसके मुख में वास कर लिया । अतएव वह कुमार बाल्यकाल में ही कविता बनाने में और युक्तिपूर्ण बातें करने में अत्यन्त निपुण हो गया ।

तं बालचन्द्रं परिपूर्यमाण-मालोक्य लावण्यकलाकलापैः ।
कुमुद्वतीनामिव कामिनीनां निशासु निद्रा विमुखीबभूव ॥२०॥

अन्वयः

निशासु लावण्यकलाकलापैः परिपूर्यमाणं तं बालचन्द्रम् आलोक्य कुमुद्वतीनाम् इव कामिनीनां निद्रा विमुखीबभूव ।

व्याख्या

निशासु रात्रिषु लावण्यस्य सौन्दर्यस्य कलास्तासां कलापाः समूहास्तैः परिपूर्यमाणं तं बालः कुमारः चन्द्र इव शशीव नूतनचन्द्रो वा तं समालोक्य दृष्ट्वा कुमुद्वतीनामिव कुमुदिनीनामिव कामिनीनामङ्गनानां निद्रा विमुखीबभूवाऽपससार गतेत्यर्थः। यथा निशासु नवीनचन्द्रं विलोक्य कुमुदिनी विकसिता भवति स्वकुड्मलत्वरूपनिद्रां जहाति तथैव कामिन्योऽपि तमद्भुतसौन्दर्ययुक्तं कुमारं निरीक्ष्य कामज्वरपीडिताः सत्यो रात्रौ निद्रां न लब्धवत्य इति भावः। अत्र कुमुद्वती कामिन्योर्द्वयोरेकक्रियान्वयात्तुल्ययोगितालङ्कारः।

भाषा

रात्रियों में जिस प्रकार कलासमूहों से क्रमशः परिपूर्ण होने वाले नूतन चन्द्रमा को देखकर कुमुदिनी विकसित हो जाती है और उसकी कलीस्वरूपी निद्रा हट जाती है उसी प्रकार सौन्दर्य से परिपूर्ण होने वाले उस कुमार को देखकर सुन्दरियाँ काम ज्वर से पीड़ित हो जाती हैं अतएव रात्रियों में उनकी निद्रा दूर हो जाती है।

धैर्येण तस्मिन्नवधीर्य याति स्मरोत्सुकानां नगराङ्गनानाम्।
आबद्धमुग्धभ्रुकुटिच्छटानां पेतुः सकोपं नयनोत्पलानि॥२१॥

अन्वयः

धैर्येण अवधीर्य याति तस्मिन् स्मरोत्सुकानाम् आबद्धमुग्धभ्रुकुटीच्छटानां नगराङ्गनानां नयनोत्पलानि सकोपं पेतुः।

व्याख्या

धैर्येण धीरतया स्वस्वाभाविकगुणेन गाम्भीर्येणाऽवधीर्य कामिनीस्तिरस्कृत्य याति गच्छति तस्मिन् कुमारे स्मरेण कामवेगेनोत्सुकानामुद्वेल्लितमानसानामाबद्धाः सङ्कुचिता अत एव मुग्धा सुन्दर्यो या भ्रुकुटयस्तासां च्छटाः शोभा यासां तासां नगराङ्गणानां नागरिकसुन्दरीणां नयनान्येव नेत्राण्येवोत्पलानि इन्दीवराणि तानि सकोपं कोपेन सहितं यथा स्यात्तथाऽनादरं दृष्ट्वा समुद्भूतेन क्रोधेन पेतुः न्यपतन्। कामवेगेनोत्सुकानामङ्गनानां धीरतयाऽवधीरणात्तस्मिन् ताः कुपिताः संजाता इति भावः।

भाषा

स्वाभाविक धीरता से सुन्दरियों के आकर्षण में न पड़ कर उनकी अवहेलना करने वाले उस राजपुत्र पर, कामवेग से चलायमान मन वाली सङ्कुचित अतएव सुन्दर भौवों की शोभा से युक्त नागरिक सुन्दरियों के नेत्र कमल, क्रोध से पड़ते थे। अर्थात् अपनी अवहेलना देखकर नागरिक सुन्दरियाँ भौवें चढ़ाकर क्रोध से उसे देखती थीं।

लावण्यलक्ष्मीकुलधाम्नि तत्र विवर्द्धमाने शनकैः कुमारे।
कासामजायन्त न कामिनीनां निद्रादरिद्राणि विलोचनानि[१] ॥२२॥

अन्वयः

तत्र लावण्यलक्ष्मीकुलधाम्नि कुमारे शनकैः विवर्द्धमाने सति कासां कामिनीनां विलोचनानि निद्रादरिद्राणि न अजायन्त।

व्याख्या

तत्र कल्याणपुरे लावण्यस्य सौन्दर्यस्य या लक्ष्मीः श्रीस्तस्याः कुलधाम कुलगृहं तस्मिन् 'धाम तेजो गृहे मणौ' इत्यमरः। सौन्दर्यश्रीकुलगृहे तस्मिन् कुमारे राजपुत्रे शनकैः शनैः शनैर्विवर्द्धमाने सति वर्द्धिते सति कासां कामिनीनामङ्गनानां विलोचनानि नयनानि निद्रादरिद्राणि निद्रारहितानि नाऽजायन्त न जातानि अपितु सर्वाः कामिन्यो रात्रौ तस्य स्मरणान्निद्रां न लेभिरे। तस्याद्भुत-सौन्दर्यश्रियमवलोक्य सर्वा अपि कामिन्यः कामपरवशाः सत्यो रात्रौ निद्रां न लेभिर इति भावः।

भाषा

सौन्दर्य की शोभा के कुलगृह स्वरूप उस राजपुत्र के धीरे २ बड़े होने पर उस कल्याण पुर में कौन ऐसी युवतियाँ थीं जिन्हें निद्रा का दारिद्रय न हुआ। अर्थात् अलौकिक सौन्दर्य से सुशोभित उस राजपुत्र को देख कर सब युवतियाँ काम पीड़ित हो निद्रा से वञ्चित हो गईं।

---

[१] अयमेव भावः प्रकारान्तरेणाऽस्य सर्गस्य विंशतितमे श्लोके प्रदर्शितः।

तेजस्विनामुन्नतिमुन्नतात्मा सेहे न बालोऽपि नरेन्द्रसूनुः ।
देवोऽपि भास्वाञ्छरणेच्छयेव समाश्रितो विष्णुपदं रराज[१] ॥२३॥

अन्वयः

उन्नतात्मा बालः अपि नरेन्द्रसूनुः तेजस्विनाम् उन्नतिं न सेहे । भास्वान् देवः अपि शरणेच्छया इव विष्णुपदं समाश्रितः रराज ।

व्याख्या

उन्नत उन्नतिप्रवण आत्मा यस्य स बालोऽपि स्वल्पवयस्कोऽपि नरेन्द्रसूनू राजपुत्रस्तेजस्विनां तेजसा जाज्वल्यमानानामुन्नतिमभ्युदयं न सेहे न सोढुं शशाक । यतो भास्वान् सूर्यो देवोऽपि विबुधोऽपि 'अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः' इत्यमरः । शरणेच्छयेव स्वरक्षां याचमान इव विष्णुपदं विष्णोर्भगवतः पदं चरणं विष्णुपदमाकाशं वा 'वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः । समाश्रितः प्राप्तो रराज शुशुभे । तस्य बाल्यकालादेव तेजस्युन्नत्यसहनस्वभावात्सूर्यो देवोऽपि भीत्या विष्णुपदङ्गत इव शुशुभ इति भावः । अत्र हेतूत्प्रेक्षा ।

भाषा

उन्नतात्मा वह राजपुत्र, बालक होते हुए भी, तेजस्वियों के अभ्युदय को नहीं सहन कर सकता था । इसीलिये मानों, सूर्य, देव होते हुए भी, इससे अपनी रक्षा करने के लिये भगवान् विष्णु की शरण में गया या आकाश में शोभित हुआ ।

उच्चैः स्थितं तस्य किरीटरत्नं तेजोधनानामुपरि स्थितस्य ।
क्षमामिव प्रार्थयितुं लुलोठ संक्रान्तिभङ्ग्या मणिपादपीठे ॥२४॥

अन्वयः

तेजोधनानाम् उपरिस्थितस्य तस्य उच्चैः स्थितं किरीटरत्नं मणिपादपीठे संक्रान्तिभङ्ग्या क्षमां प्रार्थयितुम् इव लुलोठ ।

---

[१] किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ इत्युक्तेः ।
भारविः (किरातार्जुनीये २ सर्गे २१ श्लोकः)

व्याख्या

तेज एव दीप्तिरेव धनं येषां ते तेजोधनास्तेषां तेजस्विनामुपरि सर्वोत्कर्षेण स्थितस्य विद्यमानस्य तस्य राजसुनोरुच्चैः शिरसि स्थितं विराजमानं किरीट-रत्नं मुकुटरत्नं मणिभी रत्नादिभिर्निर्मिते पादपीठे पादाधारपीठे संक्रान्तिभङ्ग्या प्रतिबिम्बव्याजेन क्षमां प्रार्थयितुमिव याचितुमिव लुलोठ पपात । अत्रोत्प्रेक्षा-लङ्कारः ।

भाषा

सब तेजस्वियों में श्रेष्ठ इस राजपुत्र के, मस्तक पर का मुकुटमणि, रत्न जड़ित पांव रखने की चौकी पर पड़ी अपनी परछाहीं के मिष से (उस तेजस्वी के भी ऊपर बैठने के अपराध से) मानों क्षमा याचना करने के लिये उसके पैरों पड़ता था ।

अत्रान्तरेऽभूज्जयसिंहनामा पुत्रस्तृतीयोऽपि नराधिपस्य ।
स्वप्नेऽपि संवादयशोदरिद्रश्चन्द्रार्द्धचूडस्य न हि प्रसादः ॥२५॥

अन्वयः

अत्र अन्तरे नराधिपस्य जयसिंहनामा तृतीयः अपि पुत्रः अभूत् ।
हि चन्द्रार्द्धचूडस्य प्रसादः स्वप्ने अपि संवादयशोदरिद्रः न (भवति) ।

व्याख्या

अत्रान्तरेऽस्मिन्नवकाशे 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्य-मरः । नराधिपस्याऽऽहवमल्लदेवराजस्य जयसिंहनामा जयसिंहनामकस्तृती-योऽपि पुत्रः सूनुरभूदजायत । हि यस्मात्कारणात् चन्द्रार्द्धश्चूडायां शिरसि यस्य तस्य शिवस्य प्रसादोऽनुग्रहः स्वप्नेऽपि कथमपीतिभावः । संवादस्य स्वानुकूल-फलदानरूपस्य वचनस्य यद्यशस्तेन दरिद्रो रहितो न, नभवतीत्यर्थः । शिवप्रसादप्राप्तिप्रयोजकवचनस्य सदैव सत्यत्वमिति कुतस्तद्वचनस्य मिथ्या-भाव प्रसङ्ग इति भावः । अत्र पूर्वार्द्धोक्तस्य द्वितीयार्द्धोक्तेनाऽर्थेन समर्थना-दर्थान्तरन्यासालङ्कारः । "सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणाऽर्थान्तरन्यासोऽष्टधा ततः ।" इति लक्षणात ।

भाषा

इसी बीच में आहवमल्लदेव राजा को जयसिंह नामक तृतीय पुत्र भी हुआ। क्योंकि भगवान् शङ्कर की कृपा, स्वप्न में भी, वचनानुकूल फलप्रदान के यश से वञ्चित नहीं हो सकती।

सर्वासु विद्यासु किमप्यकुण्ठ-मुत्कण्ठमानं समरोत्सवेभ्यः।
श्रीविक्रमादित्यमथावलोक्य स चिन्तयामास नृपः कदाचित् ॥२६॥

अन्वयः

अथ कदाचित् सः नृपः श्रीविक्रमादित्यं सर्वासु विद्यासु अकुण्ठं समरोत्सवेभ्यः किमपि उत्कण्ठमानम् अवलोक्य चिन्तयामास।

व्याख्या

अथाऽनन्तरं कदाचित् कस्मिंश्चित्समये सः प्रसिद्धो नृपो भूपतिराहवमल्लदेवः श्रीविक्रमादित्यं तन्नामकं स्वसुतं सर्वासु सकलासु विद्यासु शस्त्रशास्त्रविद्यास्वकुण्ठ-ममन्दं निपुणमित्यर्थः 'कुण्ठो मन्दः क्रियासु यः' इत्यमरः। समरोत्सवेभ्यो युद्धकार्येभ्यः किमपि अनिर्वचनीयतयोत्कण्ठमानं समुत्सुकमवलोक्य दृष्ट्वा चिन्तया-मास विचारयामास।

भाषा

कुछ काल के अनन्तर, समग्र शस्त्र और शास्त्र विद्याओं में निपुण अपने मध्यम पुत्र श्री विक्रमादित्य को संग्राम महोत्सवों के लिए विशेष लालायित देखकर राजा आहवमल्लदेव सोचने लगे।

अलङ्करोत्यद्भुतसाहसाङ्कः सिंहासनं चेदयमेकवीरः।
एतस्य सिंहीमिव राजलक्ष्मीमङ्कस्थितां कः क्षमतेऽभियोक्तुम् ॥२७॥

अन्वयः

अयम् अद्भुतसाहसाङ्कः एकवीरः सिंहासनम् अलङ्करोति चेत् (तर्हि) एतस्य अङ्कस्थितां सिंहीम् इव राजलक्ष्मीम् अभियोक्तुं कः क्षमते।

व्याख्या

अयमद्भुतमाश्चर्यावलम्बि साहसं विक्रमोऽङ्कं चिह्नं यस्य स 'कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। एकवीरोऽद्वितीयशूरो विक्रमाङ्कदेवः सिंहासनं राज्यसिंहासनमलङ्करोति विभूषयति चेद्यदि तर्हि एतस्य राजकुमारस्याऽङ्कस्थितामुत्सङ्गे स्थितां विराजमानां सिंहीमिव मृगेन्द्राङ्गनामिवाऽपरिभवनीयामत एवाऽजेयां राजलक्ष्मीं नृपश्रियमभियोक्तुमाक्रमितुं हठाद् गृहीतुमित्यर्थः। कः को वा क्षमते प्रभवति न कोपीत्यर्थः।

भाषा

यदि अद्भुतसाहस के लक्षणों से युक्त यह अद्वितीय वीर विक्रमाङ्कदेव राजसिंहासन (राजगद्दी) को सुशोभित करेगा तो इसकी गोद में रहने वाली सिंहिनी के समान राजलक्ष्मी को कौन छेड़ सकेगा। अर्थात् सिंहिनी के समान प्रबल इसकी राजलक्ष्मी से कौन छेड़ छाड़ करेगा अर्थात् उसको छीनने का प्रयत्न करेगा।

करोमि तावद्युवराजमेन-मत्यक्तसाम्राज्यभरस्तनूजम्।
तटद्वयीं संश्रयणाद्दधातु धुनीव साधारणतां नृपश्रीः ॥२८॥

अन्वयः

अत्यक्तसाम्राज्यभरः (अहं) एनं तनूजं तावत् युवराजं करोमि। नृपश्रीः धुनी इव तटद्वयीसंश्रयणात् साधारणतां दधातु।

व्याख्या

न त्यक्तः परित्यक्तः साम्राज्यस्य सम्पूर्णराज्यस्य भरो भारो येन स एवम्भूतोऽहमेनं विक्रमाङ्कदेवनामकं तनूजं, तन्वाः शरीरात् जायत इति तनूजस्तं तनूजं पुत्रं तावत् युवराजं करोमि राज्यकार्यभारग्रहणे नियुक्तं विदधामि। नृपश्री राजलक्ष्मी धुनीव नदीव 'अथ नदी सरित्। तरंगिणी शैवलिनी तटिनी ह्लादिनी धुनी' इत्यमरः तटयोर्द्वयी तटद्वयी तस्याः संश्रयणादाश्रयणात् साधारणतामुभयावलम्बित्वात् सामान्यस्वरूपं दधातु। विक्षोभं न गच्छत्विति भावः।

भाषा

मैं अपने साम्राज्य का भार न छोड़ते हुए इस विक्रमाङ्कदेव को सम्प्रति युवराज पद पर नियुक्त कर देता हूँ। ऐसा कर देने से दोनों तटों के आश्रय

से स्वाभाविक रूप से बहने वाली नदी के समान हम दोनों के आश्रय में रहने वाली राजलक्ष्मी समान रूप से चलती रहेगी ।

एवं विनिश्चित्य कृतप्रयत्न-मूचे कदाचित्पितरं प्रणम्य ।
सरस्वतीनूपुरसिञ्जितानां सहोदरेण ध्वनिना कुमारः ॥२९॥

अन्वयः

कुमारः कदाचित् एवं विनिश्चित्य कृतप्रयत्नं पितरं प्रणम्य सरस्वतीनूपुरसिञ्जितानां सहोदरेण ध्वनिना ऊचे ।

व्याख्या

कुमारो विक्रमाङ्कदेवः कदाचित् कस्मिंश्चित्काले एवं पूर्वोक्तप्रकारेण विनिश्चित्य निश्चयं विधाय कृतः समारब्धः प्रयत्न उद्योगो येन तं पितरं जनकमाहवमल्लदेवं प्रणम्य नमस्कृत्य सरस्वत्या वाग्देव्या नूपुराणां मञ्जीराणां 'पादांगुदं तुलाकोटि मंजीरो नूपुरोऽस्त्रियाम्' इत्यमरः । सिञ्जितानां स्वनानां सहोदरेण सदृशेन मधुरेणेत्यर्थः ध्वनिना शब्देन वचसा वा ऊचे जगाद । सुमधुर-कर्णप्रियशब्देन स्वपितरं जगादेति भावः ।

भाषा

किसी समय राज कुमार ने, पूर्वोक्त निश्चय कर तदनुरूप कार्य करने में प्रवृत्त अपने पिता आहवमल्लदेव को, सरस्वती के पैजेब की ध्वनि के सदृश सुमधुर और कर्णप्रिय शब्दों में कहा ।

आज्ञा शिरश्चुम्बति पार्थिवानां त्यागोपभोगेषु वशे स्थिता श्रीः ।
तव प्रसादात्सुलभं समस्त-मास्तामयं मे युवराजभावः ॥३०॥

अन्वयः

आज्ञा पार्थिवानां शिरः चुम्बति, श्रीः त्यागोपभोगेषु वशे स्थिता, तव प्रसादात् समस्तं सुलभम् । मे युवराजभावः आस्ताम् ।

व्याख्या

आज्ञा मदीयादेशः पार्थिवानां राज्ञां शिरः शीर्षं चुम्बति समाक्रामति । सर्वे राजानो ममाऽऽज्ञापालनं कुर्वन्तीति भावः । श्रीर्धनादिसमृद्धिस्त्यागेषु दानेषू-

पभोगेषु सम्भोगेषु वशे स्थिता ममाऽऽधीना दानसम्भोगादिषु नास्ति मे द्रव्याभाव इत्यर्थः । तव प्रसादादनुग्रहात्समस्तं समग्रं वस्तुजातं सुलभं सुखेन लभ्यं, मे मम युवराजभावो यौवराज्ये नियोजनमास्तां विरमतु ।

भाषा

मेरी आज्ञा का सब राजा लोग पालन करते हैं। दान और उपभोग के लिये मुझे द्रव्य की कमी नहीं है। आप के अनुग्रह से मुझे सब सुलभ है। मुझे युवराज बनाने का विचार स्थगित किया जाय।

जगाद देवोऽथ मदीप्सितस्य किं वत्स धत्से प्रतिकूलभावम् ।
ननु त्वदुत्पत्तिपरिश्रमे मे स चन्द्रचूडाभरणः प्रमाणम् ॥३१॥

अन्वयः

अथ देवः जगाद । वत्स मदीप्सितस्य प्रतिकूलभावं किं धत्से । ननु मे त्वदुत्पत्तिपरिश्रमे सः चन्द्रचूडाभरणः प्रमाणम् ।

व्याख्या

अथ स्वपुत्रवचनश्रवणानन्तरं देवो राजा जगाद कथयामास । हे वत्स ! हे पुत्र ! ममेप्सितमभीष्टं मदीप्सितं तस्य मदभीष्टस्य मनोरथस्य प्रतिकूलभाव प्रातिकूल्यं विरोधमित्यर्थः । किं किमर्थं धत्से करोषि । नन निश्चयेन मे मम तवोत्पत्तिर्जन्म त्वदुत्पत्तिस्तत्र परिश्रमस्तपस्यादिकरणं तस्मिन् स चन्द्रःश्चूडायाः शिरस आभरणं भूषणं यस्य सः शिवः प्रमाणं साक्षी । स शिव एव जानाति तव जन्महेतोः यादृशं कठिनतपश्चरणं मयाऽनुष्ठितमतो मम मनोरथस्य विरोधं विहाय तत्साधयेति भावः ।

भाषा

पुत्र की ऐसी उक्ति को सुनने के अनन्तर राजा ने कहा। बेटा ! मेरे अभीप्सित कार्य का क्यों विरोध करते हो। तुम्हारा जन्म होने के लिये मुझे तपश्चरणादि अनुष्ठान में कैसा परिश्रम करना पड़ा है यह चन्द्रशेखर शंकर ही जानते हैं। इसलिये मेरी इच्छा का विरोध न करो।

धत्से जगद्रक्षणयामिकत्वं न चेत्त्वमङ्गीकृतयौवराज्यः ।
मौर्वीरवापूरितदिङ्मुखस्य क्रान्तिः कथं शाम्यतु मद्भुजस्य ॥३२॥

अन्वयः

त्वम् अङ्गीकृतयौवराज्यः (सन्) जगद्रक्षणयामिकत्वं न धत्से चेत् मौर्वीरवापूरितदिङ्मुखस्य मद्भुजस्य क्लान्तिः कथं शाम्यतु ।

व्याख्या

त्वमङ्गीकृतं परिगृहीतं यौवराज्यं युवराजकर्म येन स एवम्भूतस्सन् जगतो भुवनस्य 'विष्टपं भुवनं जगत्' इत्यमरः। रक्षणं पालनं तस्य यामिकत्वं प्रहरित्वं न धत्से न वहसि चेत् मौर्व्या ज्याया रवेण नादेनाऽऽपूरितानि दिशां मुखानि येन स तस्य मद्भुजस्य मम बाहोः 'भुज बाहु प्रवेष्टो दोः' इत्यमरः। क्लान्तिः परिश्रान्तिः कथं केन प्रकारेण शाम्यतु शान्तिमेतु। मदुपार्जितस्य रक्षणे यदि त्वं दीक्षितो न भविष्यसि तर्हि मत्कठोरपरिश्रमस्य साफल्यं कुत इति भावः।

भाषा

अगर तुम युवराज पद को स्वीकार कर जगत् की रक्षा के लिये पहरेदारी नहीं करोगे तो प्रत्यञ्चा के शब्दों से सब दिशाओं को भर देने वाली अर्थात् गुंजाने वाली मेरी इस भुजा की थकावट कैसे दूर होगी। अर्थात् मेरी जीती हुई पृथ्वी के यदि तुम पहरे दार न बनोगे तो मेरा इस समस्त पृथ्वी को जीत कर अपने अधीन करने का कठोर परिश्रम कैसे सफल होगा।

आकर्ण्य कर्णाटपतेः सखेद-मित्थं वचः प्रत्यवदत्कुमारः ।
सरस्वतीलोलदुकूलकान्तां प्रकाशयन्दन्तमयूखलेखाम् ॥३३॥

अन्वयः

कुमारः कर्णाटपतेः इत्थं सखेदं वचः आकर्ण्य सरस्वतीलोलदुकूलकान्तां दन्तमयूखलेखां प्रकाशयन् प्रत्यवदत् ।

व्याख्या

कुमारो राजकुमारः कर्णाटपतेर्दक्षिण-भारतस्थितकर्णाटकदेशाधिपतेराहवमल्लदेवस्येत्थमेवम्भूतं खेदेन दुःखेन सहितं युक्तं खेदप्रकाशकं वचो वाणीमाकर्ण्य निशम्य सरस्वत्या वागधिष्ठातृदेव्या लोलं चञ्चलं यद्दुकूलं वस्त्रं तद्वत् कान्तां शुभ्रत्वेन रमणीयां दन्तानां रदानां मयूखाः किरणाः तेषां लेखा पंक्तिः 'वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः, इत्यमरः। तां प्रकाशयन् प्रकटयन् प्रत्यवदत् प्रत्युत्तरं ददौ। अत्रोपमालङ्कारः।

भाषा

दक्षिण भारत स्थित कर्णाटक देश के राजा आहवमल्लदेव की अर्थात् अपने पिता की ऐसी दुःखभरी वाणी को सुनकर सरस्वती के चञ्चल सफेद वस्त्र के समान शुभ्र दांतों के किरणों की पंक्ति को प्रकट करते हुए, राजकुमार ने प्रत्युत्तर दिया।

वाचालतैषा पुरतः कवीनां कान्त्या मदोऽयं सविधे सुधांशोः।
त्वत्संनिधौ पाटवनाटनं यत् तथापि भक्त्या किमपि ब्रवीमि ॥३४॥

अन्वयः

यत् त्वत्संनिधौ पाटवनाटनम् एषा कवीनां पुरतः वाचालता, अयं सुधांशोः सविधे कान्त्याः मदः तथापि भक्त्या किमपि ब्रवीमि।

व्याख्या

यत् यद्यपि त्वत्तव संनिधौ समीपे पाटवस्य चातुर्यस्य नाटनं प्रकाशनमेषा कवीनां वर्णनाचातुरीसम्पन्नानां पण्डितानां पुरतोऽग्रे वाचालता मुखरताभिव्यक्तिरेव न तु किञ्चिदुचितं वचनमिति। (अथ च) अयं (इदमित्युचितम्) सुधांशोः सकलकान्तिनिधानस्येन्दोस्सविधे संनिकटे कान्त्याः शोभायाः 'शोभा कान्तिर्द्युतिच्छविः' इत्यमरः। मदः स्वाभिमानप्रकाशनमेव। यथा चन्द्रसमीपे कान्तिमदप्रकाशनं कविसमीपे वचोभिनाटनं च व्यर्थं तथैव तव समीपे मदीयोक्तिरिति भावः। तथाप्येवं सत्यपि निष्प्रयोजनकत्वेऽपि त्वयि भक्त्या, पूज्येष्वनुरागो भक्तिस्तया किमपि किंचिद्वचो ब्रवीमि वच्मि। निदर्शनाऽलङ्कारः।

भाषा

यद्यपि आप के समक्ष मेरा चातुर्य प्रकाशन करना विद्वानों के सन्मुख मुखरता अर्थात् बकवाद करना है और कान्ति निधान चन्द्रमा के सन्मुख कान्ति की शेखी बघारना है। तो भी आप में जो मेरी भक्ति है अर्थात् पूज्यत्व बुद्धि है उससे कुछ कहता हूँ।

विचारचातुर्यमपाकरोति तातस्य भूयान्मयि पक्षपातः।
ज्येष्ठे तनूजे सति सोमदेवे न यौवराज्येऽस्ति ममाधिकारः ॥३५॥

अन्वयः

तातस्य मयि भूयान् पक्षपातः (तातस्य) विचारचातुर्यम् अपाकरोति । (तातस्य) ज्येष्ठे तनूजे सोमदेवे सति मम यौवराज्ये अधिकारः न अस्ति ।

व्याख्या

तातस्य पितुर्मयि भूयानधिकः पक्षपातः स्नेहान्मदीयपक्षग्रहणं तातस्य विचारस्य विवेकस्य चातुर्यं नैपुण्यमपाकरोति दूरीकरोति । अस्मिन्विषये भवदुक्तौ विवेकपुरस्सरविचारप्रावीण्यं न दृश्यत इत्यर्थः । यतस्तातस्य ज्येष्ठे पुत्रे सोमदेवे तन्नामके सति विद्यमाने सति धर्मशास्त्रमर्यादया मम तस्मात् कनीयसो यौवराज्ये युवराजपदेऽधिकारो योग्यत्वमौचित्यञ्च नाऽस्ति न विद्यते ।

भाषा

आप का मेरे प्रति अधिक पक्षपात, आप की विवेकयुक्त विचार की पटुता को दूर कर रहा है । आप के ज्येष्ठ पुत्र सोमदेव के रहते हुए मेरा युवराज पद पाने का कोई अधिकार नहीं है ।

चालुक्यवंशोऽपि यदि प्रयाति पात्रत्वमाचारविपर्ययस्य ।
अहो महद्वैशसमाः किमन्य-दनङ्कुशोऽभूत्कलिकुञ्जरोऽयम् ॥३६॥

अन्वयः

यदि चालुक्यवंशः अपि आचारविपर्ययस्य पात्रत्वं प्रयाति (तर्हि) आः किम् अन्यत्, अहो महत् वैशसम्, अयं कलिकुञ्जरः अनङ्कुशः अभूत् ।

व्याख्या

यदि चालुक्यस्य वंशः कुलमप्याऽऽचारो धर्मानुकलमर्यादा तस्य विपर्ययो वैपरीत्यं तस्य पात्रत्वं भाजनत्वं प्रयाति गच्छति तर्हि आः ! इति खेदे । किमदन्यद्वस्तु । अहो ! इत्याश्चर्ये । महद्वैशसं स्यात् महदनर्थप्रयोजकं स्यात् । "वैशसं हिंसा" । अतोऽयं कलिकुञ्जरः कलिरूपहस्त्यनङ्कुशो निरङ्कुशो निष्प्रतिबन्धक इत्यर्थः । अभूज्जातः । मर्यादा त्यागे चालुक्यवंशः कलिकाल-पराभूत इत्यपवादः स्यादिति भावः ।

भाषा

यदि चालक्यवंश भी अनाचार का स्थान बन गया तो बडे आश्चर्य और

दुःख से कहना पड़ता है कि इतना बड़ा अनर्थ और क्या हो सकता है। यह कलि रूपी हाथी निरङ्कुश हो गया। अर्थात् अब कलि के प्रचार में कोई रोक टोक न रह गई।

लक्ष्म्याः करं ग्राहयितुं तदादौ तातस्य योग्यः स्वयमग्रजो मे।
कार्यं विपर्यासमलीमसेन न मे नृपश्रीपरिरम्भणेन ॥३७॥

अन्वयः

तत् आदौ मे अग्रजः तातस्य लक्ष्म्याः करं ग्राहयितुं स्वयं योग्यः। विपर्यासमलीमसेन नृपश्रीपरिरम्भणेन मे न कार्यम्।

व्याख्या

तत्तस्मात्कारणात् धर्मानुकूलमर्यादानुरोधात् मे ममाऽग्रजो ज्येष्ठभ्राता तातस्य पितुस्तव लक्ष्म्याः श्रियः करं हस्तं ग्राहयितुं तातरूपप्रयोजककर्तृक-ज्येष्ठभ्रातृप्रयोज्यकर्तृकलक्ष्मीसम्बन्धिकरग्रहणं सम्पादयितुं स्वयमात्मना योग्य-स्समर्थः। विपर्यासेन प्रातिकूल्येन वैपरीत्येन वा 'स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये' इत्यमरः। मलीमसेन कलङ्कितेन 'मलीमसं तु मलिनं कच्चरं मलदूषितम्' इत्यमरः। नृपश्रियो राजलक्ष्म्याः परिरम्भणेन समालिङ्गनेन ग्रहणेनेत्यर्थः। मे मम न कार्यं न किंचित्प्रयोजनम्।

भाषा

इसलिये पहिले मेरे ज्येष्ठ भ्राता स्वयं आप के राजश्री का हाथ पकड़वाने के योग्य हैं। क्रमराहित्य के या प्रतिकूलता के कलङ्क से कलङ्कित राजलक्ष्मी को स्वीकार करने से मुझे कोई प्रयोजन नहीं है।

ज्येष्ठं परिम्लानमुखं विधाय भवामि लक्ष्मीप्रणयोन्मुखश्चेत्।
किमन्यदन्यायपरायणेन मयैव गोत्रे लिखितः कलङ्कः ॥३८॥

अन्वयः

ज्येष्ठं परिम्लानमुखं विधाय (अहम्) लक्ष्मीप्रणयोन्मुखः भवामि चेत् (तर्हि) अन्यायपरायणेन मया एव गोत्रे कलङ्कः लिखितः, किम् अन्यत्।

व्याख्या

ज्येष्ठं भ्रातरं सोमदेवं परिम्लानं क्रमप्राप्तराज्यलक्ष्मीपरिग्रहाप्राप्त्या मलिनं मुखं वदनं यस्य तं विधाय कृत्वाऽहं लक्ष्म्याः प्रणयः स्नेहस्तस्मिन्नुन्मुखः प्रवणः परायणो वा भवामि चेत् तर्हि अन्यायेऽन्याययुक्तकार्ये परायणो लग्नस्तेन मया विक्रमाङ्कदेवेनैव गोत्रे विशुद्धचालुक्यवंशे कलङ्कः कालुष्यं लिखितः सम्पादितः। किमन्यदन्यायकार्यम् ? अन्यस्याऽन्यायकार्यस्याऽन्वेषणप्रयासो व्यर्थ एवेति भावः।

भाषा

यदि मैं अपने बड़े भाई सोमदेव को क्रमप्राप्त राज्यलक्ष्मी के न प्राप्त होने से उदास बनाकर स्वयं लक्ष्मी के प्रेम में तत्पर हो जाऊँ, तो अन्याय युक्त कार्य करने में तत्पर, मैंने ही इस शुद्ध चालुक्य वंश में कलङ्क लगाया। और क्या अन्याय का कार्य हो सकता है ?

तातश्चिरं राज्यमलङ्करोतु ज्येष्ठो ममारोहतु यौवराज्यम्।
सलीलमाक्रान्तदिगन्तरोऽहं द्वयोः पदातिव्रतमुद्वहामि ॥३६॥

अन्वयः

तातः चिरं राज्यम् अलङ्करोतु, मम ज्येष्ठः यौवराज्यम् आरोहतु, अहं सलीलम् आक्रान्तदिगन्तरः सन् द्वयोः पदातिव्रतम् उद्वहामि।

व्याख्या

तातः पिता चिरं चिराय 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः। राज्यमलङ्करोतु विभूषयतु। मम ज्येष्ठो ज्येष्ठभ्राता सोमदेवो यौवराज्यं युवराजपदमारोहतु अधितिष्ठतु। अहं लीलया सहितं सलीलं सहेलं यथास्यात्तथाऽऽक्रान्तानि समधिष्ठितानि दिगन्तराणि येन स आक्रान्तदिगन्तरस्सन् द्वयोः तातस्य भ्रातुश्च पदातेः पत्तेः 'पदातिपत्तिपदगपादातिक पदाजयः' इत्यमरः। व्रतं नियममुद्वहामि धारयामि। अहं तव ज्येष्ठभ्रातुश्च पादातिको भूत्वोभयोः सेवां करिष्यामीति भावः।

भाषा

आप चिरकाल तक राज्य को शोभित करते रहें। बड़े भाई युवराज पद पर आरूढ हों। मैं, बात की बात में समग्र दिशाओं में आक्रमण करता हुआ, आप दोनों का प्यादा बनकर रहूँगा।

रामस्य पित्रा भरतोऽभिषिक्तः क्रमं समुल्लङ्घ्य यदात्मराज्ये ।
तेनोत्थिता स्त्रीजित इत्यकीर्ति-रद्यापि तस्यास्ति दिगन्तरेषु ॥४०॥

अन्वयः

यत् रामस्य पित्रा आत्मराज्ये क्रमं समुल्लङ्घ्य भरतः अभिषिक्तः तेन उत्थिता स्त्रीजितः इति तस्य अकीर्तिः अद्य अपि दिगन्तरेषु अस्ति ।

व्याख्या

यत् रामस्य पित्रा दशरथेनाऽऽत्मनः स्वस्य राज्ये क्रमं नियमोचितपरिपाटी-क्रमं समुल्लङ्घ्याऽतिक्रम्य भरतः स्वकनीयान्पुत्रोऽभिषिक्तोऽभिषेकतिलकाञ्चितः कृतस्तेनाऽनुचितकार्येणोत्थिता समुत्पन्ना स्त्रिया भार्यया जितो वशीकृत इति तस्याऽकीर्तिरपयशोऽद्याप्यद्यावधि दिगन्तरेषु सर्वदिक्ष्वस्ति विद्यते ।

भाषा

चूँकि रामजी के पिता दशरथ राजा ने कुलपरम्परागत क्रम का उल्लंघन कर बड़े भाई के रहते हुए छोटे भाई, भरत का राज्याभिषेक किया, इस अनुचित कार्य से उत्पन्न, स्त्री का वशीभूत, ऐसी उसकी अपकीर्ति अभी भी सब दिशाओं में अर्थात् सर्वत्र फैली हुई है ।

तदेष विश्राम्यतु कुन्तलेन्द्र यशोविरोधी मयि पक्षपातः ।
न किं समालोचयति क्षितीन्दु-रायासशून्यं मम राज्यसौख्यम् ॥४१॥

अन्वयः

हे कुन्तलेन्द्र । तत् एषः मयि यशोविरोधी पक्षपातः विश्राम्यतु । क्षितीन्दुः मम आयासशून्यं राज्यसौख्यं किं न समालोचयति ।

व्याख्या

हे कुन्तलेन्द्र ! कुन्तलदेशाधिप ! तत्तस्मात्कारणादेव मयि मत्सम्बन्धे यशसः कीर्तेर्विरोधी प्रतिबन्धको दुष्कीर्तिजनकः पक्षपातो विश्राम्यतु विश्रान्तिमेतु, न जायतामित्यर्थः । क्षितीन्दुः पृथिवीन्दुर्भवान् ममाऽऽयासेन परिश्रमेण शून्यं रहितमनायासप्राप्तमित्यर्थः । राज्यसौख्यं किं न समालोचयति, कथं न पश्यति । अहं त्वनायासेनैव राज्यसौख्यमनुभवामीति भवान् जानात्येवेत्यर्थः ।

भाषा

इसलिए, हे कुन्तलदेशाधिपति ! मेरे प्रति जो आपका अपकीर्तिजनक पक्षपात है उसे छोड़ दीजिये। क्या राजा साहेब (आप) नहीं देखते हैं कि मैं अनायास ही सब राज्य का सौख्य पा रहा हूँ।

पुत्राद्वचः श्रोत्रपवित्रमेवं श्रुत्वा चमत्कारमगान्नरेन्द्रः।
इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति ॥४२॥

अन्वयः

नरेन्द्रः पुत्रात् एवं श्रोत्रपवित्रं वचः श्रुत्वा चमत्कारम् अगात्। हि पांसुलानां धुरि (स्थिता) इयं लक्ष्मीः केषां चेतः न कलुषीकरोति।

व्याख्या

नरेन्द्रो राजाऽऽहवमल्लदेवः पुत्रात्सूनोर्विक्रमाङ्कदेवादेवमेवम्भूतं श्रोत्रपवित्रं कर्णपूतं कर्णसुखदायकमित्यर्थः। वचो वाणीं श्रुत्वा निशम्य चमत्कारमाश्चर्यमगात्प्राप्तः आश्चर्यचकितो बभूवेत्यर्थः। हि यस्मात्कारणात् पांसुलानां स्वैरिणीनां धुरि अग्रभागे स्थितेयं लक्ष्मीः श्रीः सम्पत्तिरित्यर्थः। केषां पुरुषाणां चेतो मनः 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। न कलुषीकरोति न मलिनीकरोति। अपि तु लक्ष्मीः सर्वानेव सन्मार्गाच्च्यावयतीति भावः।

भाषा

इस प्रकार पुत्र की कर्ण को पवित्र करने वाली अर्थात् कान को अच्छी लगने वाली वाणी को सुनकर राजा को आश्चर्य हुआ। क्यों कि स्वेच्छाचारिणियों में अग्रणी लक्ष्मी किनके चित्तों को मलिन नहीं करदेती। अर्थात् लक्ष्मी की प्राप्ति में सभी मनुष्यों का मन कलुषित हो जाता है।

सस्नेहमङ्के विनिवेश्य चैन-मुवाच रोमाञ्चतरङ्गिताङ्गः।
क्षिपन्निवात्युज्ज्वलदन्तकान्त्या प्रसादमुक्तावलिमस्य कण्ठे ॥४३॥

अन्वयः

रोमाञ्चतरङ्गिताङ्गः एनम् अङ्के सस्नेहं विनिवेश्य अस्य कण्ठे अत्युज्ज्वलदन्तकान्त्या प्रसादमुक्तावलिं क्षिपन् इव च उवाच।

व्याख्या

रोमाञ्चेन रोमहर्षणेन तरङ्गितानि युक्तान्यङ्गानि यस्य स राजाऽऽहवमल्लदेव एनं विक्रमाङ्कदेवमङ्क उत्सङ्गे सस्नेहं प्रेमोल्लासपूर्वकं यथास्यात्तथा विनिवेश्य संस्थाप्याऽस्य पुत्रस्य कण्ठे गलभागेऽत्युज्वलाऽतिविशदा दन्तानां 'रदना दन्ता रदाः' इत्यमरः। कान्तिः प्रभा तया धवलदन्तकान्तिछद्मना प्रसादरूपा या मुक्तानां मौक्तिकानामावलिर्माला तां क्षिपन्निव च निदधदिव चोवाच जगाद।

भाषा

सर्व अङ्गों में रोमाञ्च से युक्त उस राजा आहवमल्ल देव ने अपने पुत्र विक्रमाङ्क देव को प्रेम पूर्वक अपनी गोद में बैठाकर और उसके गले में अपनी श्वेत दन्तकान्ति के मिष से मानों प्रेम से समर्पित मोतियों की माला को पहनाते हुए, कहा।

भाग्यैः प्रभूतैर्भगवानसौ मे सत्यं भवानीदयितः प्रसन्नः।
चालुक्यगोत्रस्य विभूषणं यत् पुत्रं प्रसादीकृतवान्भवन्तम् ॥४४॥

अन्वयः

असौ भगवान् भवानीदयितः मे प्रभूतैः भाग्यैः सत्यं प्रसन्नः। यत् चालुक्यगोत्रस्य विभूषणं भवन्तं पुत्रं प्रसादीकृतवान्।

व्याख्या

असौ भगं विद्यते यस्मिन् स भगवान् 'भगं श्री काममाहात्म्यवीर्ययत्नार्क-कीर्तिषु' इत्यमरः। 'भगं श्री योनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु। माहात्म्यै-श्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ'। इति मेदिनी। भवान्याः पार्वत्या दयितो वल्लभः 'अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम्' इत्यमरः। शिवो मे प्रभूतैर्बहुलैर्भाग्यैर्भागधेयैः 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः। सत्यं ध्रुवं प्रसन्नः प्रीतः। यद्यस्मात्कारणात् चालुक्यगोत्रस्य चालुक्यवंशस्य विभूषणमलङ्कारभूतं भवन्तं त्वां पुत्रं पुत्रत्वेन प्रसादीकृतवान् दत्तवान्। त्वत्सदृशं चालुक्यवंशालङ्कारभूतं पुत्रं प्रसादीकृत्य तेन शिवेन महाननुग्रहः प्रदर्शित इति भावः। 'भवानीदयितः' इति चिन्त्यम्।

भाषा

पार्वती के पति भगवान् शंकर मेरे बड़े भाग्य से, सचमुच प्रसन्न हुए हैं। जिस कारण से उन्होंने चालुक्य वंश के भूषण स्वरूप तुम्हारे ऐसे पुत्र को देने की कृपा की है।

एतानि निर्यान्ति वचांसि वक्त्रात् कस्यापरस्य श्रवणामृतानि।
मधूनि लेह्यानि सुरद्विरेफै—र्न पारिजातादपरः प्रसूते ॥४५॥

अन्वयः

एतानि श्रवणामृतानि वचांसि अपरस्य कस्य वक्त्रात् निर्यान्ति। सुरद्विरेफैः लेह्यानि मधूनि पारिजातात् अपरः न प्रसूते।

व्याख्या

एतानीमानि श्रवणयोः कर्णयोरमृतान्यमृततुल्यानि कर्णामृतानि वचांसि वचनानि 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः। त्वदपरस्य कस्य पुरुषस्य वक्त्रान्मुखान्निर्यान्ति निर्गच्छन्ति। न कस्यापि त्वदपरस्य मुखादिति भावः। सुराणां देवानां द्विरेफैर्भ्रमरैः सुरलोकस्थैर्द्विरेफैरित्यर्थः। लेह्यान्यास्वादनीयानि मधूनि पुष्परसान् 'मधु मद्ये पुष्परसे क्षौद्रे' इत्यमरः। पारिजाताद्देववृक्षादपरो वृक्षो न प्रसूते न जनयति। दृष्टान्तालङ्कारः।

भाषा

कान को अमृत के समान सुख देने वाले ये वचन अन्य किसके मुख से निकल सकते हैं। पारिजात वृक्ष के अतिरिक्त अन्य किसी वृक्ष में, स्वर्गलोग के भ्रमरों के आस्वाद लेने योग्य पुष्परस, नहीं उत्पन्न होता है।

यस्याः कृते भूमिभृतां कुमाराः केषां न पात्रं नयविप्लवानाः।
उन्मत्तमातङ्गसहस्रगुर्वी सा राज्यलक्ष्मीस्तृणवल्लघुस्ते ॥४६॥

अन्वयः

यस्याः कृते भूमिभृतां कुमाराः केषां नयविप्लवानां पात्रं न, सा उन्मत्तमातङ्गसहस्रगुर्वी राज्यलक्ष्मीः ते तृणवत् लघुः।

व्याख्या

यस्या राजलक्ष्म्याः कृते भूमिं बिभ्रति पालयन्तीति भूमिभृतस्तेषां पृथिवी-पालानां कुमाराः पुत्रा राजकुमारा इत्यर्थः। केषां नयस्य नीतेर्विप्लवा विपर्या-सास्तेषां नयविप्लवानामनीतीनां पात्रं भाजनं न, न जाताः। सा उन्मत्ता मदान्धा ये मातङ्गा गजाः 'गजेऽपि नागमातङ्गौ' इत्यमरः। तेषां सहस्रं तद्वद्गुर्वी भारवती स्पृहणीया च राज्यलक्ष्मीस्ते त्वदर्थं तृणवल्लघुरल्पीयसी तुच्छा च। अन्येराजकुमारा राज्यलक्ष्मीं सर्वतोऽधिकां मन्यमानास्तदर्थमनीति-माचरन्ति परन्तु त्वत्कृते सा तुच्छेति भावः।

भाषा

जिस राज्यलक्ष्मी के लिये अन्य राजाओं के पुत्र गण क्या २ अनीति नहीं कर डालते वह सहस्रों मदोन्मत्त हाथियों से भी भारी तथा बहुमूल्य राज्यलक्ष्मी तुम्हारे लिये तृण के समान हलकी है अर्थात् तुच्छ है।

लङ्कासमीपाम्बुधिनिर्गतेयं रक्तासवैस्तृप्यति राक्षसीव।
लक्ष्मीरसौ त्वद्भुजदण्डबद्धा पात्रं भवित्री विनयव्रतस्य ॥४७॥

अन्वयः

इयं लङ्कासमीपाम्बुधिनिर्गता लक्ष्मीः राक्षसी इव रक्तासवैः तृप्यति। असौ त्वद्भुजदण्डबद्धा सती विनयव्रतस्य पात्रं भवित्री।

व्याख्या

इयं पूर्ववर्णिता लङ्कायाः रावणनगर्याः समीपे योऽम्बुधिस्समुद्रस्तस्मान्निर्गता जाता लक्ष्मीः श्री राक्षसीव रक्तानि रुधिराण्येवाऽसवा मद्यानि तैस्तृप्यति तृप्तिमाप्नोति। यथा लङ्कायां जाता काचिद्राक्षसी रुधिरपानेनैव तृप्यति तथैव लङ्कानिकटस्थसमुद्रजा लक्ष्मीरपि रुधिरप्रवाहेण तृप्यतीति भावः। असौ लक्ष्मीस्त्वद्भुजावेव दण्डौ तयोर्बद्धा त्वद्भुजयोर्दण्डेन शासनेन वा बद्धा सती विनयव्रतस्य विनम्रताशिक्षायाः पात्रमास्पदं भवित्री भविष्यति। लोके दण्डेनैव दुर्विनीतानां शासनं भवति। दुर्विनीता विनीताश्च संपाद्यन्ते, क्रूरत्वञ्च विहन्यते, सुस्वभावश्च संस्थाप्यते इति भावः।

भाषा

लङ्का के पास के समुद्र में से उत्पन्न यह लक्ष्मी, राक्षसी के समान रक्त रूपी सुरा से तृप्त होती है। परन्तु यह तुम्हारे भुजदण्ड से बँध जाने पर विनम्र हो जाएगी। अर्थात् लङ्का में उत्पन्न राक्षसी जिस प्रकार रक्त पान कर तृप्त होती है वैसे ही यह लंका के समीपवर्ती समुद्र से उत्पन्न होने वाली लक्ष्मी रक्त प्रवाह से तृप्त होती है। यह लक्ष्मी तुम्हारे भुजाओं के दण्ड से दण्डित होकर या तुम्हारी भुजा के आश्रय में आने पर भविष्य में नम्र हो जाएगी।

जानामि मार्गं भवतोपदिष्टं ममापि चालुक्यकुले प्रसूतिः ।
किन्त्वत्र लक्ष्मीर्गुणबन्धहीने निसर्गलोला कथमेति दार्ढ्यम् ॥४८॥

अन्वयः

भवता उपदिष्टं मार्गं जानामि। (यतः)मम अपि चालुक्यकुले प्रसूतिः। किन्तु गुणबन्धहीने अत्र निसर्गलोला लक्ष्मीः कथं दार्ढ्यम् एति।

व्याख्या

भवतोपदिष्टं कथितं मार्गं नयवर्त्म जानामि वेद्मि। यतो ममाऽपि चालुक्यवंशे नीतिमार्गावलम्बिनि चालुक्यनृपाणां कुले प्रसूतिरुत्पत्तिः। अहमपि त्वत्सदृशो नीतिमार्गकुशले चालुक्यवंशे जात इति त्वदुक्तं सर्वं नयवर्त्म जानामीतिभावः। किन्तु परन्तु गुणानां शौर्यादीनां पक्षे रज्जूनां बन्धः संघः पक्षे ग्रन्थिस्तेन हीने रहितेऽत्र अस्मिन् ज्येष्ठे पुत्रे सोमदेवे निसर्गात्स्वभावादेव लोला चञ्चलाऽस्थिरा लक्ष्मी राज्यश्रीः कथं केन प्रकारेण दार्ढ्यं दृढ़तां स्थिरतामित्यर्थः। एति प्राप्नोति समुपयास्यतीति भावः। दृढबन्धनेन बद्ध एव पदार्थो निश्चलो भवतीति नियमः।

भाषा

तुमने जो नीतिमार्ग दिखाया है उसे मैं भी जानता हूँ। क्यो कि मेरा भी जन्म नीति कुशल चालुक्य राजाओं के वंश में ही हुआ है। परन्तु शौर्यादिगुणों के संघ से रहित अथवा बंधन योग्य ग्रंथियुक्त रस्सी से रहित मेरे ज्येष्ठपुत्र सोमदेव के युवराज पद पर बैठने पर यह स्वभावतः चञ्चला राज्यलक्ष्मी इससे

कैसे दृढ़ता पूर्वक बांधी जा सकती है अर्थात् बिना बँधे कैसे अपनी चञ्चलता छोड़ कर साथ रह सकती है।

किञ्चिन्न मे दूषणमस्ति पृच्छ दैवज्ञचक्रं यदि कौतुकं ते।
एतस्य साम्राज्यममन्यमानाः पापग्रहा एव गृहीतपापाः ॥४६॥

अन्वयः

मे न किञ्चित् दूषणम् अस्ति। यदि ते कौतुकं (तर्हि) दैवज्ञचक्रं पृच्छ। पापग्रहाः एव गृहीतपापाः (सन्तः) एतस्य साम्राज्यम् अमन्य-मानाः (सन्ति)।

व्याख्या

मे ममाऽत्र न किञ्चिद्दूषणं न कोऽपि दोषोऽस्ति। नाऽहं सोमदेवस्य यौवराज्यदानप्रतिबन्धक इति भावः। यदि ते तव कौतुकं कुतूहलम् 'कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्' इत्यमरः। ज्ञातुं महती समुत्कण्ठा भवेदित्यर्थः। तर्हि दैवं जानन्तीति दैवज्ञा ज्योतिषिकाः 'सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि' इत्यमरः। तेषां चक्रं समूहं पृच्छ। पापग्रहाः क्रूरग्रहा अनिष्टग्रहा इत्यर्थः। गृहीतानि पापानि दुष्कृतजन्यादृष्टानि यैस्ते गृहीतपापाः सन्त एतस्य सोमदेवस्य साम्राज्यं सम्राट्पदेऽधिरोहममन्यमानाः सन्ति न स्वीकुर्वन्ति न समर्थयन्तीति भावः।

भाषा

सोमदेव को युवराज न बनाने में मेरा कोई दोष नहीं है। यदि तुमको यह जानने का उत्कट इच्छा हो तो ज्योतिषियों से पूछो। (तब तुमको विदित होगा कि) सोमदेव के पापग्रह अनिष्ट कारक होकर इसका साम्राज्य होने में प्रतिबन्धक हैं।

साम्राज्यलक्ष्मीदयितं जगाद त्वामेव देवोऽपि मृगाङ्कमौलिः।
लोकस्तुतां मे बहुपुत्रतां तु पुत्रद्वयेन व्यतनोत्परेण ॥५०॥

अन्वयः

मृगाङ्कमौलिः देवः अपि त्वाम् एव साम्राज्यलक्ष्मीदयितं जगाद। लोकस्तुतां मे बहुपुत्रतां तु परेण पुत्रद्वयेन व्यतनोत्।

व्याख्या

मृगाङ्कश्चन्द्रः 'अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः। मौलौ मस्तके यस्य स मृगाङ्कमौलिश्चन्द्रमौलिर्देवः शिवोऽपि त्वामेव भवन्तमेव साम्राज्यलक्ष्म्याः साम्राज्यश्रियो दयितं वल्लभं 'दयितं वल्लभं प्रियम्' इत्यमरः। जगादोवाच कथितवानित्यर्थः। लोकैर्जनैः स्तुतां प्रशंसितां जनप्रसिद्धामित्यर्थः। मे मम बहुपुत्रतामनेकतनयत्वं तु परेण त्वदतिरिक्तेन पुत्रद्वयेन व्यतनोत् कृतवान्।

भाषा

भगवान् शङ्कर ने भी तुम्हीं को साम्राज्यलक्ष्मी का प्रिय बताया था। संसार में प्रशंसित अनेक पुत्रवत्ता को शंकर ने मुझे अन्य दो पुत्रों को देकर पूर्ण कर दिया।

तन्मे प्रमाणीकुरु वत्स वाक्यं चालुक्यलक्ष्मीश्चिरमुन्नतास्तु।
निर्मत्सराः क्षोणिभृतः स्तुवन्तु ममाकलङ्कं गुणपक्षपातम् ॥५१॥

अन्वयः

हे वत्स! तत् मे वाक्यं प्रमाणीकुरु। चालुक्यलक्ष्मीः चिरम् उन्नता अस्तु। निर्मत्सराः क्षोणिभृतः मम अकलङ्कं गुणपक्षपातं स्तुवन्तु।

व्याख्या

हे वत्स पुत्र तत्तस्मात्कारणान्मे मम वाक्यं वचनं प्रमाणीकुरु स्वीकुरुष्व, यौवराज्यं गृहाणेत्यर्थः। चालुक्यवंशस्य लक्ष्मी राज्यश्रीश्चिरं चिरकाल-मुन्नता वृद्धिमभ्युपेताऽस्तु। मत्सरेणाऽन्यशुभद्वेषेण परसम्पत्त्यसहनेनेत्यर्थः। 'मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु' इत्यमरः। रहिता हीनाः क्षोणिभृतो राजानो ममाऽकलङ्कं दोषरहितं गुणेषु शौर्यादिषु पक्षपातं गुणैकरागमित्यर्थः। स्तुवन्तु प्रशंसन्तु।

भाषा

हे पुत्र! इसलिये मेरी बात को मानो अर्थात् युवराज पद को ग्रहण करो (जिससे) चालुक्यवंश की राज्यलक्ष्मी चिरकाल तक उन्नत हो। मात्सर्यहीन अन्य राजा लोग मेरे अनिन्दनीय, गुणों के पक्षपात की प्रशंसा करें।

श्रुत्वेति वाक्यं पितुरादरेण जगाद भूयो विहसन्कुमारः ।
मद्भाग्यदोषेण दुराग्रहोऽयं तातस्य मत्कीर्तिकलङ्कहेतुः ॥५२॥

अन्वयः

कुमारः पितुः इति वाक्यम् आदरेण श्रुत्वा विहसन् (सन) भूयः जगाद । अयं तातस्य दुराग्रहः मद्भाग्यदोषेण मत्कीर्तिकलङ्कहेतुः (अस्ति)

व्याख्या

कुमारो राजकुमारो विक्रमाङ्कदेवः पितुर्जनकस्याऽऽहवमल्लदेवस्येतीत्थं वाक्यं वचनमादरेण समादरेण श्रुत्वा निशम्य विहसन् हास्यं कुर्वन्सन् भूयः पुनरपि जगादोक्तवान् । अयं पूर्वोक्तः तातस्य जनकस्य भवतो दुराग्रहो दुरभिनिवेशो मह्यं राज्यलक्ष्मीसमर्पणरूपाभिनिवेशो मम भाग्यस्य दिष्टस्य 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः । दोषेण विपर्यासेन मम कीर्तेर्यशसः कलङ्कस्य मलिनीकरणस्य हेतुः कारणमस्ति । सत्यपि ज्येष्ठे भ्रातरि मम दुर्भाग्यजनितेन भवतो दुराग्रहेण मे यौवराज्यग्रहणं मत्कीर्तिमलिनीकरणकारणमेव भविष्यतीति भावः ।

भाषा

राजा की उपर्युक्त बातों को आदर पूर्वक सुनकर राजकुमार विक्रमाङ्कदेव ने हँसते हुए फिर से कहा कि यह पिता जी का दुराग्रह, मेरे दुर्भाग्य से, मेरी कीर्ति में कलङ्क लगने का कारण है ।

यदि ग्रहास्तस्य न राज्यदूताः कारुण्यशून्यः शशिशेखरो वा ।
तैरेव तातो भविता कृतार्थ-स्तद्वार्यतां कीर्तिविपर्ययो मे ॥५३॥

अन्वयः

यदि तस्य ग्रहाः राज्यदूताः न, वा शशिशेखरः कारुण्यशून्यः (तथापि) तैः एव तातः कृतार्थः भविता । तत् मे कीर्तिविपर्ययः वार्यताम् ।

व्याख्या

यदि तस्य सोमदेवस्य ग्रहाः जन्माङ्गस्थितग्रहाः 'ग्रहो निग्रहनिर्बन्धग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः' इति विश्वः । राज्यस्य

साम्राज्यस्य दूताः संदेशहराः 'स्यात्संदेशहरो दूतो दूत्यं तद्भावकर्मणि' इत्यमरः। न, न सन्ति। तद्राज्यसूचका न सन्तीति भावः। अथवा शशिशेखरश्चन्द्र-मौलिः शिवः कारूण्येन दयया शून्यो रहितः। यदि शिवः स्वदयया तस्मै राज्यसुखभोगं न ददाति चेदिति भावः। तथापि तैरेव ग्रहै राज्यसुखभोगासं-सूचकै रेव तातः पिता भवान् कृतार्थः कृतकार्यस्सफलमनोरथ इत्यर्थः। भविता भविष्यति। तत्तस्मात्कारणान्मे मम कीर्तिविपर्ययो दुर्यशो वार्यतामपयशो न विधातव्यमित्यर्थः।

भाषा

यद्यपि सोमदेव के ग्रह उसके राज्योपभोग सूचक नहीं है या यों कहें कि भगवान् शंकर की उसपर दया नहीं है। तो भी उन्हीं ग्रहों से आप की मनोरथ सिद्धि होगी। इसलिये मेरे अपयश को न होने दीजिये।

अशक्तिरस्यास्ति न दिग्जयेषु यस्यानुजोऽहं शिरसा धृताज्ञः।
स्थानस्थ एवाद्भुतकार्यकारी बिभर्तु रक्षामणिना समत्वम् ॥५४॥

अन्वयः

यस्य शिरसा धृताज्ञः अहम् अनुजः अस्य दिग्जयेषु अशक्तिः न अस्ति। स्थानस्थः एव अद्भुतकर्मकारी (सन्) रक्षामणिना समत्वं बिभर्तु।

व्याख्या

यस्य सोमदेवस्य शिरसा नतमस्तकेन धृता संश्रिता आज्ञाऽऽदेशो येन सोऽह-मनुजः कनीयान्भ्राताऽस्मि। अस्य मम भ्रातुस्सोमदेवस्य दिशां जयो विजय-स्तेषु दिग्विजयकर्मण्यशक्तिरसामर्थ्यं नाऽस्ति न संभवति। सः स्थाने तिष्ठतीति स्थानस्थः स्वस्थाने स्थित एवाऽद्भुतान्याश्चर्यकराणि कर्माणि करोतीत्यद्भुत-कर्मकारी सर्वसाधारणजनासाध्याश्चर्यजनककृत्यसंसाधकस्सन् रक्षामणिना सर्व-रक्षणक्षमरूपाचिन्त्यप्रभावशालिना मणिना सह समत्वं सादृश्यं बिभर्त्वेतु। यथा रक्षामणिः स्वस्थानस्थितस्सन् यस्य शरीरे तिष्ठति तस्य सर्वतो भावेन रक्षणं करोति तथैव मे भ्राता स्वस्थानस्थितः सन्मत्साहाय्येनाऽद्भुतकर्मकारी भूत्वा सकलजनसंरक्षको भवत्विति भावः।

भाषा

आज्ञा का शिरसा पालन करने वाला जिसका मैं छोटा भाई हूँ उसके दिग्विजय में असामर्थ्य सम्भावित नहीं हो सकता है। वह अपने स्थान पर ही रहकर आश्चर्यजनक काम करता हुआ रक्षामणि की समानता को प्राप्त हो। अर्थात् रक्षामणि जहाँ बंधा रहता है वहीं रहकर सम्पूर्ण विघ्नों को अपने प्रभाव से दूरकर सब प्रकार का आश्चर्यजनक काम कर मनुष्य की रक्षा करता है वैसे ही सोमदेव अपने स्थान पर ही रहकर मेरी सहायता से आश्चर्य-जनक कार्य करने के यश का भागी होकर प्रजा की रक्षा करे।

इत्यादिभिश्चित्रतरैर्वचोभिः कृत्वा पितुः कौतुकमुत्सवञ्च।
अकारयज्ज्येष्ठमुदारशीलः स यौवराज्यप्रतिपत्तिपात्रम् ॥५५॥

अन्वयः

उदारशीलः सः इत्यादिभिः चित्रतरैः वचोभिः पितुः कौतुकम् उत्सवं च कृत्वा ज्येष्ठं यौवराज्यप्रतिपत्तिपात्रम् अकारयत्।

व्याख्या

उदारमसंकुचितं शीलं स्वभावो यस्य स उदारशील उदारस्वभावः स राजपुत्रो विक्रमाङ्कदेव इत्यादिभिरेवम्भूतैश्चित्रतरैर्विचित्रैर्वचोभिर्वाक्यैः पितुराहवमल्लदेवस्य कौतुकं कौतूहलमुत्सवमानन्दावसरञ्च 'उत्सेकामर्षयोरिच्छाप्रसरे मह उत्सवः' इत्यमरः। कृत्वा जनयित्वा ज्येष्ठं ज्येष्ठभ्रातरं सोमदेवं यौवराज्यस्य युवराजपदस्य प्रतिपत्तिः स्वीकृतिस्तस्य पात्रं स्थानमकारयत् कारितवान्। स्ववचःप्रसरैर्ज्येष्ठभ्रातुर्यौवराज्यपदप्रदानस्वीकृतिं लब्धवानिति भावः।

भाषा

उदार स्वभाव वाले उस राजपुत्र विक्रमाङ्कदेव ने ऐसी २ अनेक आश्चर्य-जनक बातें कहकर अपने पिता आहवमल्लदेव राजा के कुतूहल और आनन्द के अवसर को उत्पन्न कर, अपने बड़े भाई सोमदेव को युवराज पद पर नियत करने की स्वीकृति करा ली।

स्वयं समाधास्यति चन्द्रमौलि-रम्लानकीर्तेरभिवाञ्छितं मे।
कार्यं विचार्येति सुतोपदिष्टं स सर्वमुर्वीपतिरन्वतिष्ठत् ॥५६॥

अन्वयः

चन्द्रमौलिः स्वयम् अम्लानकीर्तेः मे अभिवाञ्छितं समाधास्यति इति विचार्य सः उर्वीपतिः सुतोपदिष्टं सर्वं कार्यम् अन्वतिष्ठत् ।

व्याख्या

चन्द्रमौलिः शशिशेखरः शिवस्स्वयमेवाऽम्लाना निष्कलङ्का कीर्तिर्यशो यस्य तस्य मे ममाऽभिवाञ्छितमीप्सितं समाधास्यति पूरयिष्यतीतीत्थं विचार्य निश्चित्य सः प्रसिद्ध उर्व्या वसुंधरायाः 'सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा' इत्यमरः । पतिः स्वमी राजाऽऽहवमल्लदेवः सुतेन पुत्रेणोपदिष्टं संमन्त्रितं सर्वं पूर्णं कार्यं यौवराज्यप्रदानकार्यमन्वतिष्ठच्चकार ।

भाषा

चन्द्रशेखर भगवान् शंकर, स्वयं ही, निष्कलङ्क कीर्तिवाले मेरी अभिष्ट सिद्धि करेंगे, ऐसा विचार करके उस राजा आहवमल्लदेव ने पुत्र द्वारा कथित, यौवराज्य प्रदान रूप कार्य को पूर्णता से सम्पन्न किया ।

ज्येष्ठे कृतेऽपि प्रतिपत्तिपात्रे तमेव लक्ष्मीरनुमन्यते स्म ।
पूरेण निम्ने निहिताऽपि सिन्धु-रपेक्षते सागरमार्गमेव ॥५७॥

अन्वयः

ज्येष्ठे प्रतिपत्तिपात्रे कृते अपि लक्ष्मीः तम् एव अनुमन्यते स्म । पूरेण निम्ने निहिता अपि सिन्धुः सागरमार्गम् एव अपेक्षते ।

व्याख्या

ज्येष्ठे ज्येष्ठभ्रातरि सोमदेवे प्रतिपत्तिपात्रे यौवराज्यदानपात्रे कृतेऽपि सम्पादितेऽपि लक्ष्मी राज्यश्रीस्तमेव विक्रमाङ्कदेवमेवाऽनुमन्यते स्म तस्मिन्नेव सन्मानं प्रणयिताञ्च प्रदर्शयति स्मेति भावः । पूरेण जलप्रवाहेण निम्ने नीचस्थाने गर्ते वा निहिता प्रस्थापिताऽपि सिन्धुर्नदी सागरस्य समुद्रस्य मार्गमेव पन्थानमेवाऽपेक्षते प्रतीक्षते । दृष्टान्तालङ्कारः ।

भाषा

बड़े भाई सोमदेव को युवराज पद पर आरूढ़कर देने पर भी राज्य श्री विक्रमाङ्कदेव के ही अनुकूल थी । जल प्रवाह के कारण नीचे स्थान पर भी

बहने वाली नदी, समुद्र में जा मिलने की ही अपेक्षा रखती है। अर्थात् सिफारिश से गुणहीन सोमदेव के युवराज पद पर स्थित होने पर भी राज्यश्री विक्रमाङ्कदेव को ही अपनाती थी क्योंकि जल प्रवाह से नीच स्थान में बहने वाली नदी समुद्र में ही मिलने की अपेक्षा रखती है।

देवोपदेशाद्गुणदर्शनाच्च स एव चित्ते नृपतेरुवास।
यथा स्तुतं रत्नपरीक्षकेण दृष्टप्रभावं च महार्हरत्नम् ॥५८॥

अन्वयः

सः एव देवोपदेशात् गुणदर्शनात् च नृपतेः चित्ते उवास। यथा रत्नपरीक्षकेण स्तुतं दृष्टप्रभावं च महार्हरत्नम्।

व्याख्या

स एव विक्रमाङ्कदेव एव देवोपदेशादाऽऽकाशवाण्याः श्रवणात् गुणदर्शनाद्विक्रमाङ्कदेवे शौर्यादिगुणानामनुभवाच्च नृपते राज्ञश्चित्ते मनसि 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। उवास स्थितिं चकार। यथा रत्नपरीक्षकेण वैकटिकेन स्तुतं प्रशंसितं दृष्टोऽनुभूतः प्रभावः सामर्थ्यं यस्य तत् दृष्टप्रभावमनुभूतसामर्थ्यञ्च महार्हरत्नं महर्घं रत्नम्। वैकटिकेन प्रशंसितमनुभूतसामर्थ्यं च बहुमूल्यं रत्नं राज्ञो हृदये वक्षःस्थले धार्यते तथैवाऽऽकाशवाण्या, प्रशंसितोऽनुभूतगुणश्च विक्रमाङ्कदेवो राज्ञो हृदये स्थित इति भावः।

भाषा

जौहरी द्वारा प्रशंसित और अनुभूत सामर्थ्य वाले बहुमूल्य रत्न के समान आकाशवाणी द्वारा प्रशंसित और अनुभव में आये हुए उसके गुणों से विक्रमाङ्क देव ने राजा आहवमल्ल के हृदय में स्थान प्राप्त कर लिया। अर्थात् जिस प्रकार जौहरी द्वारा प्रशंसित और अनुभव में आए हुए उसके सामर्थ्य से बहुमूल्य रत्न को राजा हृदय पर धारण कर लेता है वैसे ही आकाशवाणी से प्रशंसित और अनुभव में आए हुए उसके गुणों से विक्रमाङ्क देव ने राजा के हृदय में स्थान प्राप्त कर लिया।

स यौवराज्यश्रियमाश्रितस्य ज्येष्ठस्य राज्ये च पितुः स्थितस्य।
कार्यं द्वयोरप्यखिलं बभार भूशेषयोर्भारमिवादिकूर्मः ॥५९॥

अन्वयः

सः यौवराज्यश्रियम् आश्रितस्य ज्येष्ठस्य, राज्ये स्थितस्य पितुः च द्वयोः अपि अखिलं कार्यम्, आदिकूर्मः भूशेषयोः भारम् इव बभार ।

व्याख्या

स विक्रमाङ्कदेवो यौवराज्यश्रियं यौवराज्यलक्ष्मीमाश्रितस्य समास्थितस्य ज्येष्ठस्य ज्येष्ठभ्रातुः सोमदेवस्य, राज्ये राज्यसिंहासने स्थितस्य वर्तमानस्य पितुस्तातस्य च द्वयोरुभयोरप्यखिलं समस्तं 'विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्' इत्यमरः । कार्यं युवराजप्रयुक्तं राजप्रयुक्तञ्च कार्यमित्यर्थः । आदिकूर्मो विष्णोः प्रथमावताररूपः कच्छपो भूः पृथ्वी शेषो नागराजोऽनन्तस्तयोर्भारमिव बभार धारयामास । यथाऽऽदिकच्छपो भुवस्तद्धारकस्य नागराजस्याऽपि भारं दधाति तथैव विक्रमाङ्कदेवः स्वज्येष्ठभ्रातुस्स्वपितुश्च कार्यभारमवहदिति भावः ।

भाषा

भगवान् विष्णु का आदि अवतार कच्छप जैसे पृथ्वी और पृथ्वी का भार उठाने वाले शेषराज दोनों का बोझ उठाये रहता है उसी प्रकार विक्रमाङ्कदेव ने युवराज पद पर स्थित अपने बड़े भाई तथा राजगद्दी पर विराजित अपने पिता इन दोनों का सम्पूर्ण कार्य भार अपने ऊपर ले लिया ।

आज्ञापयामास च वन्दिताज्ञं तमेव सर्वत्र रणोत्सवेषु ।
पपौ च भूपस्तदुपार्जितानि यशोवतंसानि जयामृतानि ॥६०॥

अन्वयः

सः भूपः वन्दिताज्ञं तम् एव सर्वत्र रणोत्सवेषु आज्ञापयामास, तदुपार्जितानि यशोवतंसानि जयामृतानि च पपौ ।

व्याख्या

स भूपो राजाऽऽहवमल्लदेवो वन्दिता सम्मानिताऽऽज्ञा येन तं सम्मानिताज्ञं तं विक्रमाङ्कदेवमेव सर्वत्र रणोत्सवेषु युद्धोत्सवेषु गमनार्थमाज्ञापयामास नियोजितवान् । तेन विक्रमाङ्कदेवेनोपार्जितानि समानीतानि यशः कीर्तिरेवाऽवतंसो भूषणं येषां तानि । एतेन यशसः पुष्पसाम्यं गम्यते । जया विजया एवाऽ-

मृतानि पीयूषाणि तानि च पपौ पिबति स्म । युद्धे सर्वत्र विजयप्राप्त्या तदीयकीर्ति निशम्य परमतृप्तोऽभूदिति भावः । अत्र जयस्य अमृतत्वेन रूपकं शब्दोपात्तं, यशसि च पुष्पारोपोऽर्थलभ्य इति एकदेशविवर्ति-रूपकमलङ्कारः ।

भाषा

राजा आहवमल्लदेव सर्वत्र संग्रामोत्सवों में आज्ञाकारी विक्रमाङ्कदेव को ही जाने की आज्ञा देता था और उसके द्वारा उपार्जित यश से सुशोभित विजयरूपी अमृतों का पान किया करता था ।

तत्कुम्भिकुम्भस्थलचीनपिष्ट-विपाटलो वारिनिधिर्बभासे ।
आपूरितश्चोलबलक्षयोत्थ-रक्तापगानामिव मण्डलेन ॥६१॥

अन्वयः

तत्कुम्भिकुम्भस्थलचीनपिष्टविपाटलः वारिनिधिः चोलबलक्षयोत्थरक्तापगानां मण्डलेन आपूरितः इव बभासे ।

व्याख्या

तस्य विक्रमाङ्कदेवस्य कुम्भिनो दन्तिनस्तेषां कुम्भस्थलानि गण्डस्थलानि तेषु यच्चीनपिष्टं चीनदेशभवं चूर्णं सिन्दूरं तेन विपाटलो रक्तवर्णो वारिनिधिर्जलनिधिस्समुद्रश्चोलानां चोलनृपाणां बलं सैन्यं 'वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्' इत्यमरः । तेषां क्षयेण नाशेनोत्था जाता रक्तस्य रुधिरस्याऽऽपगा नद्यः "अपां समूहो आपं तेन गच्छतीत्यापगा' । समूहे अण्" । तासां मण्डलेन समूहेनाऽऽपूरितस्संवलित इव बभासे द्युतिं संप्राप । लोके सिन्दूरेण गजगण्डस्थलानि शोभार्थं लिप्यन्ते । उत्प्रेक्षालङ्कारः ।

भाषा

विक्रमाङ्कदेव के हाथियों के गण्डस्थलों पर लगाये हुए सिन्दूर से सिन्दुरिया रंग का समुद्र मानों चोलदेशीय राजाओं की सेना के काटे जाने से उत्पन्न खून की नदियों के समूह से भरा भासित होता था ।

चालुक्यरामे हरिवाहिनीभिः सहागते तत्र तटीं पयोधिः ।
प्रादुर्भवन्मौक्तिकशुक्तिशङ्क्या भयेन दन्तानिव निश्चकर्ष ॥६२॥

अन्वयः

चालुक्यरामे तत्र हरिवाहिनीभिः सह तटीम् आगते (सति) पयोधिः प्रादुर्भवन्मौक्तिकशुक्तिभङ्ग्या भयेन दन्तान् निश्चकर्ष इव।

व्याख्या

चालुक्यस्य चालुक्यवंशस्य रामे रामसदृशपराक्रमशालिनि तत्र कुमारे विक्रमाङ्कदेवे हरीणामश्वानां रामपक्षे कपीनां 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः। वाहिन्यः सेनास्ताभिः सह तटीं समुद्रवेलामागते प्राप्ते सति पयोधिः समुद्रः प्रादुर्भवन्ति समुद्भवन्ति मौक्तिकानि मुक्ता यासु ताश्शुक्तयो मुक्तास्फोटाः 'मुक्तास्फोटः स्त्रियां शुक्तिः' इत्यमरः। तासां भङ्ग्या व्याजेन भयेन भीत्या दन्तान् रदान् 'रदना दशना दन्ता रदाः' इत्यमरः। निश्चकर्षेव निष्कृष्टवानिव। भयभीता दन्तान् प्रदर्श्य क्षमायाचनं कुर्वन्ति तथैव शुक्तिव्याजेन दन्तान् प्रदर्श्य भयभीतस्समुद्रः क्षमायाचनमकरोदिति भावः। सापन्हवोत्प्रेक्षाऽलङ्कारः।

भाषा

चालुक्यवंशीय राम स्वरूप उस कुमार विक्रमाङ्कदेव के, घोड़े की पलटन के साथ, राम के पक्ष में—बन्दरों की सेना के साथ, समुद्र के किनारे आने पर मोतियों को उत्पन्न करने वाली (तट पर पड़ी हुई) सीपों के मिष से मानों समुद्र ने भय से दांत चियार दिये।

तस्मिन्प्रविष्टे मलयाद्रिकुञ्जं तद्वाहिनीकुञ्जरकर्णतालैः।
वियोगिनीनामुपतापनाय चैत्रं विना चन्दनवायुरासीत् ॥६३॥

अन्वयः

तस्मिन् मलयाद्रिकुञ्जं प्रविष्टे सति तद्वाहिनीकुञ्जरकर्णतालैः वियोगिनीनाम् उपतापनाय चैत्रं विना चन्दनवायुः आसीत्।

व्याख्या

तस्मिन् विक्रमाङ्कदेवे मलयस्य तन्नामकस्याद्रेः पर्वतस्य मलयाचलस्य कुञ्जं निकुञ्जं प्रविष्टे सति तस्य वाहिन्यां सेनायां ये कुञ्जरा गजास्तेषां कर्णरूपतालैस्तालवृन्तैर्वियोगिनीनां विरहिणीनामुपतापनाय पीडनाय चैत्रं मधुमासं

'स्याच्चैत्रे चैत्रिको मधुः' इत्यमरः। विना विनैव चन्दनस्य चन्दनवृक्षस्य वायुः पवनश्चन्दनवायुर्दक्षिणानिल इत्यर्थः। आसीत् प्रादुर्बभूव। तद्वाहिन्यामसंख्याता गजा आसन्निति भावः। अत्र चैत्रं विना चन्दनवायुप्रवृत्तेर्विभावनालङ्कारः। "विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।"

भाषा

विक्रमाङ्कदेव के मलयाचल के कुञ्ज में प्रविष्ट होने पर उसकी सेना के हाथियों के कानरूपी ताड़ के पंखों से, चैत का महीना न होने पर भी, विरहिणियों को सन्तप्त करने वाला, चन्दन की सुगन्ध से युक्त दक्षिणानिल बहने लगा।

अदर्शयत्कामपि राजहंस-लीलामसौ कुन्तलराजसूनुः।
निस्त्रिंशधाराजलसङ्गतं यद् द्विषां यशः क्षीरमिवाचकर्ष ॥६४॥

अन्वयः

असौ कुन्तलराजसूनुः काम् अपि राजहंसलीलाम् अदर्शयत्। यत् निस्त्रिंशधाराजलसङ्गतं द्विषां यशः क्षीरम् इव आचकर्ष।

व्याख्या

असौ कुन्तलराजस्य कुन्तलदेशाधिपस्य सूनुः पुत्रो विक्रमाङ्कदेवो कामपि विचित्रां राजहंसस्य राजश्रेष्ठस्य हंसपक्षिणो वा लीलां क्रीडाविलासमदर्शयत् प्रकटयाम्बभूव। 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैस्सिताः' इत्यमरः यद्यस्मात्कारणात् निर्गतस्त्रिंशद्भ्योऽङ्गुलिभ्य इति निस्त्रिंशः खड्गः 'तूण्यां खड्गे तु निस्त्रिंश चन्द्रहासासिरिष्टयः' इत्यमरः। तस्य धाराजलेन तीक्ष्णाग्रभागजलेन सङ्गतं मिश्रितं द्विषां शत्रूणां 'द्विड्विपक्षा हितामित्रदस्युशात्रवशत्रवः' इत्यमरः। यशः कीर्तिं क्षीरमिव दुग्धमिवाऽऽचकर्ष पृथक् कृतवान्। हंसो मिश्रितनीरक्षीरयोः क्षीरं पिबति नीरं त्यजतीति प्रसिद्धिः। कुन्तलराजपुत्रोऽपि स्वखड्गधाराजलमिश्रितशत्रुयशसो यशः पृथक्त्वेन स्वीचकारेति भावः। श्लेषानुप्राणितातिशयोक्तिर्निदर्शना वाऽलङ्कारः।

भाषा

उस कुन्तलदेश के राजपुत्र ने श्रेष्ठराजा की या राजहंस पक्षी की एक विलक्षण लीला दिखाई। जिस प्रकार राजहंस पानी और दूध मिला देने पर पानी से

दूध को अलग कर पी जाते हैं उसी प्रकार इस राजहंस ने खड्ग की धार के पानी से मिले हुए शत्रुओं के यश को दूध के समान अलग कर अपनी ओर खींच लिया अर्थात् स्वीकार कर लिया ।

तस्मिन् समाकर्षति चापदण्डं वीरप्रकाण्डे विजयोद्यमेषु ।
मुखान्यभूवन् द्रविडाङ्गनाना-मुष्णोष्णनिःश्वासविधूसराणि ॥६५॥

अन्वयः

वीरप्रकाण्डे तस्मिन् विजयोद्यमेषु चापदण्डं समाकर्षति (सति) द्रविडाङ्गनानां मुखानि उष्णोष्णनिःश्वासविधूसराणि अभूवन् ।

व्याख्या

प्रशस्तो वीरो वीरप्रकाण्डस्तस्मिन् 'मतल्लिकामर्चचिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि' इत्यमरः । तस्मिन्विक्रमाङ्कदेवे विजयोद्यमेषु विजय-यात्रासु चापदण्डं धनुर्दण्डं समाकर्षति सति द्रविडदेशीयाङ्गनानां चोलदेशीयनारीणां चोलीनामित्यर्थः । मुखानि वदनान्युष्णादप्युष्ण इत्युष्णोष्णो निःश्वासः शोकजनितोच्छ्वासस्तेन विधूसराणीषत्पाण्डूनि कान्तिरहितानीत्यर्थः । 'ईषत्पाण्डुस्तु धूसरः' इत्यमरः । अभूवन् जातानि । अत्र चापदण्डाकर्षणमात्रेण मुखानां विधूसरत्वोक्त्याऽतिशयोक्तिरलङ्कारः ।

भाषा

युद्ध यात्राओं में वीरों में श्रेष्ठ उस विक्रमाङ्कदेव के धनुष तानने पर चोल देश की नारियों के मुख, गरम २ उच्छ्वास लेने से कुछ सफ़ेद पड़ जाते थे अर्थात् कान्ति हीन हो जाते थे ।

तस्मिन्विरुद्धे गिरिनिर्झराम्बु श्रमातिरेकात्पशुवन्निपीय ।
मातेति चोलः क्षितिमादिभर्ता कृत्वा स्तनास्वादमिवोत्ससर्ज ॥६६॥

अन्वयः

तस्मिन् विरुद्धे (सति) आदिभर्ता चोलः श्रमातिरेकात् गिरिनिर्झराम्बु स्तनास्वादम् इव पशुवत् निपीय क्षितिं माता इति कृत्वा उत्ससर्ज ।

व्याख्या

तस्मिन्विक्रमाङ्कदेवे विरुद्धे विपक्षतां गते सत्याऽऽक्रान्तवति सतीत्यर्थः। आदौ पूर्वं भर्ता पतिश्चोलश्चोलदेशीयनृपः श्रमस्य परिश्रमस्याऽतिरेकादाधिक्यात् गिरीणां शैलानां 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः। निर्झराः स्रोतांसि तेषामम्बु जलं स्तनयोः कुचयोरास्वादं दुग्धमिव पशुवत् पात्राभावान्मुखेनैव पशुवन्निपीय पीत्वा क्षितिं चोलदेशभूमिं माता जननीति कृत्वेति हेतोरुत्ससर्ज त्यक्तवान्। पूर्वमयं चोलभूमेर्भर्ता। विक्रमाङ्कदेवेनाऽऽक्रान्ते चोलदेशे युद्धजनितपरिश्रमस्य पश्चात्पलायनजनितपरिश्रमस्य चाऽधिक्यात् पात्राभावात् स्तनपानमिव गिरिनिर्झराम्बुनः पशुवन्मुखेनैव पानात् सा चोलभूमिः सम्प्रति जननीव जातेति हेतोस्तस्या उपभोगो भर्तृत्वेन निषिद्ध इति धिया तां मुमोचेत्यर्थः। चोलभूमिं त्यक्त्वाऽन्यत्र पलायित इति भावः। अत्रोत्प्रेक्षालङ्कारः, परमर्थौचित्यं चिन्त्यमेव।

भाषा

उस विक्रमाङ्कदेव के चोलदेश पर आक्रमण करने पर, चोलभूमि का पहिले जो पति था अर्थात् राजा था, वह चोलराज युद्ध के और भागने के अधिक परिश्रम से बहुत प्यासा होकर, पहाड़ियों के झरनों का जल, गिलास न होने से चोल भूमि के स्तनपान के समान पशुओं के ऐसे मुख से पीकर, चोल भूमि को स्तनपान कराने वाली जननी है ऐसा समझ कर और उसका अब उपभोग करना ठीक नहीं ऐसा सोचकर, मानों उसे त्याग कर चला गया। अर्थात् विक्रमाङ्कदेव के आक्रमण करने पर वह चोल भूमि छोड़ कर भाग गया।

स मालवेन्दुं शरणं प्रविष्ट-मकण्टके स्थापयति स्म राज्ये।
कन्याप्रदानच्छलतः क्षितीशाः सर्वस्वदानं बहवोऽस्य चक्रुः ॥६७॥

अन्वयः

सः शरणं प्रविष्टं मालवेन्दुम् अकण्टके राज्ये स्थापयति स्म। बहवः क्षितीशाः कन्याप्रदानच्छलतः अस्य सर्वस्वदानं चक्रुः।

व्याख्या

स विक्रमाङ्कदेवः शरणं रक्षायाचनाय प्रविष्टं समागतं मालवेन्दुं मालवदेशराजानमकण्टके प्रतिबन्धशून्ये बाधारहिते इत्यर्थः। राज्ये स्थापयति स्म

प्रतिष्ठापयति स्म । बहवो बहुसंख्यकाः क्षितीशा राजानः कन्यायाः स्वदुहितुः प्रदानं पाणिग्रहणरूपेण समर्पणं तस्य च्छलेन व्याजेनाऽस्याऽस्मै राजकुमाराय सर्वस्वस्य सर्वधनराज्यादेः प्रदानं चक्रुः सर्वस्वं धनराज्यादिकं यावद्वस्तु ददुः । "अस्य सर्वस्वदानं चक्रुः" इत्यत्र "अस्ये"ति षष्ठीप्रयोगश्चिन्त्यः ।

भाषा

विक्रमाङ्कदेव ने शरण में आए हुए मालवा के राजा को निष्कण्टक राज्य पर पुनः बैठा दिया । बहुत से अन्य राजाओं ने अपनी कन्याओं का उसके साथ विवाह कर देने के मिष से अपना सर्वस्व उसको समर्पण कर दिया ।

त्रिलोकवीरः कियतो विजिग्ये न दुर्दमानां प्रतिपार्थिवानाम् ।
दोर्विक्रमेणाद्भुतसाहसेन महाहवानाहवमल्लसूनुः ॥६८॥

अन्वयः

त्रिलोकवीरः आहवमल्लसूनुः अद्भुतसाहसेन दोर्विक्रमेण दुर्दमानां प्रतिपार्थिवानां कियतः महाहवान् न विजिग्ये ।

व्याख्या

त्रिलोके भुवनत्रये वीर एकशूर आहवमल्लस्य सूनुः पुत्रो विक्रमाङ्कदेवोऽद्भुतं चित्रं साहसं दमो यस्य सः 'साहसं तु दमो दण्डः' इत्यमरः । तेन दोष्णोर्भुजयोर्विक्रमः पराक्रमस्तेन दुःखेन दमयितुं दान्तुं दण्डयितुं शक्या दुर्दमास्तेषां दुर्दमानां दुर्जेयानां प्रतिपार्थिवानां विपक्षिनृपाणां शत्रूणामित्यर्थः । कियतः कतिसंख्याकान् महाहवान् महासमरान्न विजिग्ये न जयति स्म । बहुसंख्यानि महायुद्धानि जयति स्मेति भावः । अत्रार्थापत्त्यलङ्कारः ।

भाषा

तीनों लोकों में अपनी वीरता का सानी न रखने वाले आहवमल्ल राजा के पुत्र विक्रमाङ्क देव ने, विचित्र दमनशक्ति से युक्त अपनी भुजाओं के पराक्रम से अनेक दुर्दान्त विपक्षी राजाओं के अर्थात् शत्रुओं के कितने महायुद्धों को नहीं जीता । अर्थात् अनेक महायुद्धों को जीता ।

उत्कन्धरानेव रणाङ्गणेषु यस्यातितुङ्गस्य हठात्प्रहर्तुः ।
न नम्रभावादपरो नृपाणा-मासीत्कृपाणप्रतिषेधमार्गः ॥६९॥

अन्वयः

अतितुङ्गस्य रणाङ्गणेषु उत्कन्धरान् एव हठात् प्रहर्तुः यस्य कृपाण-प्रतिषेधमार्गः नृपाणां नम्रभावात् अपरः न आसीत् ।

व्याख्या

अतितुङ्गस्याऽत्युच्चस्य 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगे' इत्यमरः । रणाङ्गणेषु समरभूमिषूद्गतोन्नता कन्धरा ग्रीवा येषां तानेव ऊर्ध्वस्थितग्रीवानुद्धतानेवेत्यर्थः । नृपान् हठात्प्रसभं प्रहर्तुर्नाशयितुर्यस्य राजकुमारस्य कृपाणस्य खड्गस्य प्रहारस्येत्यर्थः । प्रतिषेधो निषेधस्तस्य मार्गः पन्थाः कृपाणप्रहारजनितस्वनाशाद्रक्षणोपाय इत्यर्थः । नृपाणां विपक्षाणां राज्ञां नम्रभावाद्विनयेन पराजयस्वीकारादपरोऽन्यो नाऽऽसीत् । ये खलून्नतां ग्रीवां कृत्वा तेन सार्द्धमभिमानेन युद्धाय समागतास्तेषामेव नाशो जातः । ये खलु नम्रभावादस्य पुरतः पराजयं स्वीचक्रुस्ते तु सुरक्षिता इति भावः ।

भाषा

रणभूमि में अभिमान से ऊँची गर्दन कर युद्ध के लिये आने वालों को ही चुन २ कर मारने वाले उस अत्युन्नत राजपुत्र की तलवार के प्रहार से विपक्षी राजाओं को बचने का उपाय, नम्रता से पराजय स्वीकार कर लेने के अतिरिक्त दूसरा नहीं था ।

व्याजावतीर्णेन जनार्दनेन तेनोदरे हाररुचिच्छटाभिः ।
नाभीसरोजोद्गमवारणाय संचारिता चन्द्रमसः प्रभेव ॥७०॥

अन्वयः

व्याजावतीर्णेन जनार्दनेन तेन उदरे हाररुचिच्छटाभिः नाभीसरोजोद्गमवारणाय चन्द्रमसः प्रभा संचारिता इव ।

व्याख्या

व्याजेन छलेन विक्रमाङ्कदेव रूपेणेत्यर्थः । अवतीर्णः पृथ्वीतले समागतस्तेन जनार्दनेन विष्णुना तेन राजकुमारेणोदरे कुक्षौ 'पिचण्डकुक्षी जठरोदरं तुन्दम्' इत्यमरः । हारस्य मुक्ताहारस्य रुचीनामुज्ज्वलकान्तीनां छटाभिश्शोभाभिः नाभ्यां विष्णुवत्स्वनाभ्यां सरोजस्य कमलस्योदगम उत्पत्तिस्तस्य वारणाय

दूरीकरणाय चन्द्रमसः सुधांशोः प्रभा ज्योत्स्ना संचारितेव प्रसारितेव । विष्णु-रूपोऽपि स नाभिकमलोत्पत्तिमुदरस्थ—हारजनितोज्ज्वलकान्तिभिश्चन्द्रमसो ज्योत्स्नेव प्रसार्य निवारितवान् । यतः कमलानि न चन्द्रिकायां विलसन्ति प्रादुर्भवन्तीति भावः । अत्र सापन्हवोत्प्रेक्षालङ्कारः ।

भाषा

विक्रमाङ्क देव के छद्म से अवतीर्ण विष्णु ने अपनी नाभी में से कमल की उत्पत्ति को रोकने के लिये, अपने पेट पर के मोती के हार की उज्वल कान्ति से मानों चन्द्रमा की चांदनी फैला दी थी। अर्थात् चन्द्रिका में कमल नष्ट होते हैं इसलिये मोती के हार की मानों चांदनी की ऐसी चमक फैला कर कमल की उत्पत्ति रोक दी।

न भोजराजः कविरञ्जनाय मुञ्जोऽथवा कुञ्जरदानदक्षः ।
हस्ताम्बुजे तस्य गुणिप्रियस्य सहर्षमाविष्कृतहेमवर्षे ॥७१॥

अन्वयः

गुणिप्रियस्य तस्य सहर्षम् आविष्कृतहेमवर्षे हस्ताम्बुजे (सति) कुञ्जर-दानदक्षः भोजराजः अथवा मुञ्जः कविरञ्जनाय न ।

व्याख्या

गुणिनो गुणवन्तः प्रिया यस्य स तस्य गुणिप्रियस्य तस्य राजकुमारस्य विक्रमाङ्कदेवस्य हर्षेण सहितं सहर्षं सानन्दमाविष्कृतं प्रकटीकृतं हेम्नः सुवर्णस्य वर्षं वृष्टिर्येन स तस्मिन् हस्त एवाम्बुजं कमलं तस्मिन् करकमले विराजमाने सति कुञ्जराणां हस्तिनां दानं प्रदानं तस्मिन् दक्षः प्रवीणो भोजराजो धाराधी-शोऽथवा मुञ्जस्तत्पूर्ववर्ती मुञ्जनामनृपः कवीनां रञ्जनं प्रसन्नीकरणं तस्मै करिदानद्वाराऽपि कवीनां मनः प्रसादाय न, न तथा समर्थ इति भावः ।

भाषा

गुणिजनों से प्रेम रखने वाले उस राजकुमार के, प्रसन्नतापूर्वक सुवर्ण की वृष्टि करने वाले कर कमल के रहते हुए अर्थात् अपने हाथ से गुणियों को सहर्ष सुवर्ण दान करते रहने पर, कवियों को हाथियों का प्रदान करने में प्रवीण राजा भोज या राजा मुञ्ज, कवियों को प्रसन्न करने में, वैसे समर्थ नहीं हुए ।

तस्यारिलक्ष्मीपरिरम्भकेलि—समुत्सुकप्राज्यभुजद्वयस्य ।
केयूर-रत्नाङ्कुरकण्टकानां तैक्ष्ण्यं कृपाणाहतिभिर्निरस्तम् ॥७२॥

अन्वयः

अरिलक्ष्मीपरिरम्भकेलिसमुत्सुकप्राज्यभुजद्वयस्य तस्य केयूररत्नाङ्कुर-कण्टकानां तैक्ष्ण्यं कृपाणाहतिभिः निरस्तम् ।

व्याख्या

अरीणां शत्रूणां लक्ष्मीः श्रीस्तस्याः परिरम्भ आलिङ्गनमेव केलिः क्रीड़ा तस्यां समुत्सुकं समुत्कण्ठितं प्राज्यं विशालं भुजद्वयं बाहुयुगलं यस्य तस्य राजकुमारस्य केयूरेऽङ्गदे स्थितानि रत्नानि तेषामङ्कुराः अग्रभागा एव कण्टकानि तेषां तैक्ष्ण्यं तीव्रता कृपाणैः शत्रूणां खड्गैराहतयः प्रहारास्तैर्निरस्तं कृतम् । कृपाणाहतिभिः केयूररत्नाङ्कुरकण्टकानां तैक्ष्ण्यनिराकरणादालिङ्गनं निष्प्रत्यूहमभवदिति भावः । एतेन लक्ष्म्यास्तस्य राजकुमारस्य सर्वतोभावेन स्वीकरणं ध्वन्यते तेन रसाभासध्वनिः ।

भाषा

शत्रुओं की लक्ष्मी की आलिङ्गनरूपी क्रीडा में उत्सुक लम्बी २ दो भुजाओं वाले उस राजकुमार के बिजायट में जड़े हुवे रत्नों का अग्रभाग रूपी काटों का तीखापन, शत्रुओं के खड्ग के प्रहारों से नष्ट हो गया था । अतएव आलिङ्गन में लक्ष्मी को उन काँटों के गड़ने की आशंका न थी ।

एकातपत्रोर्जितराज्यलोभा-च्छत्रान्तराणामिव वारणाय ।
स भूभृतामुन्नतवंशभाजां दण्डानशेषाञ्छतधा बभंज ॥७३॥

अन्वयः

सः एकातपत्रोर्जितराज्यलोभात् छत्रान्तराणां वारणाय इव उन्नतवंश-भाजां भूभृताम् अशेषान् दण्डान् शतधा बभंज ।

व्याख्या

स राजकुमार एकमेवातपत्रं छत्रं यस्मिन्तदेकातपत्रमेकच्छत्रमूर्जितं समृद्धि-मद्विशालं राज्यं तस्य लोभात्तस्य प्रतिष्ठावाञ्छयाऽन्यच्छत्रं छत्रान्तरं तेषामन्य

नृपच्छत्राणां वारणायेव दूरीकरणायेवाऽन्ये राजानश्छत्रान्न धारयन्त्विति धियेवेत्यर्थः। उन्नतवंशमुच्चकुलं तुङ्गवेणुं वा भजन्तीत्युन्नतवंशभाजस्तेषां भूभृतां राज्ञां पर्वतानां वाऽशेषान् समग्रान्दण्डान् सैन्यानि वेणुदण्डान् वा शतधा बभंज शतखण्डानि चकार। अन्यः कोऽपि समुन्नतवंशजो राजा सच्छत्रो राज्यं मा करोत्विति हेतोस्तेन राज्ञां सैन्यं शतधा खण्डितम्। नाशितमितिभावः। अत्रोत्प्रेक्षालङ्कारः श्लेषानुप्राणितः।

भाषा

विक्रमाङ्कदेव ने निष्कण्टक एक छत्र श्रेष्ठ राज्य के लोभ से अर्थात् एक छत्र श्रेष्ठ राज्य की स्थापना करने के ध्येय से अन्य राजाओं के छत्रों को मिटा देने के लिये, उन्नत बांसों से युक्त पर्वतों के समग्र बांसों को अथवा उन्नत वंश में होने वाले राजाओं की सेना के, सौ टुकड़े कर डाले अर्थात् सेना को नष्ट कर दिया।

गायन्ति स्म गृहीतगौडविजयस्तम्बेरमस्याहवे
तस्योन्मूलितकामरूपनृपतिप्राज्यप्रतापश्रियः।
भानुस्यन्दन—चक्रघोषमुषितप्रत्यूषनिद्रारसाः
पूर्वाद्रेः कटकेषु सिद्धवनिताः प्रालेयशुद्धं यशः ॥७४॥

अन्वयः

आहवे गृहीतगौडविजयस्तम्बेरमस्य उन्मूलितकामरूपनृपतिप्राज्यश्रियः तस्य भानुस्यन्दनचक्रघोषमुषितप्रत्यूषनिद्रारसाः सिद्धवनिताः पूर्वाद्रेः कटकेषु प्रालेयशुद्धं यशः गायन्ति स्म।

व्याख्या

आहवे संग्रामे 'अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवः' इत्यमरः। गृहीताः स्वायत्तीकृता गौडस्य गौडदेशाधिपस्य विजये जये स्तम्बेरमा हस्तिनो येन तस्योन्मूलिता समूलं नाशिता कामरूपदेशस्य आसामेति लोके प्रसिद्धस्य नृपते राज्ञः प्राज्या श्रेष्ठा प्रतापश्रीः प्रभावलक्ष्मीर्येन तस्य, तस्य विक्रमाङ्कदेवस्य भानोः सूर्यस्य स्यन्दनस्य रथस्य चक्राणां घोषेण शब्देन मुषितः परित्याजितः प्रत्यूषस्य प्रातः कालस्य निद्रारसो निद्रानन्दो यासां ताः सिद्धवनिता गन्धर्वाङ्गनाः

पूर्वाद्रेः पूर्वाचलस्य कटकेषु नितम्बेषु 'कटकोऽस्त्री नितम्बोद्रेः' इत्यमरः। प्रालेयमिव हिममिव शुद्धं श्वेतवर्णं यशः कीर्तिं गायन्ति स्म सङ्गीतपुरस्सरं स्तुवन्ति स्म।

भाषा

युद्ध में गौड या बंगाल के राजा को जीत कर उसके हाथियों को छीन लेने वाले, कामरूप या असाम के राजा की समृद्ध प्रतापश्री को समूल नष्ट कर देने वाले उस राजकुमार विक्रमाङ्कदेव की बरफ के समान श्वेत कीर्ति को, सूर्य के रथ के पहिओं की घड़घड़ाहट से प्रातः काल की निद्रा के आनन्द से वञ्चित अर्थात् जागपड़ी हुई सिद्ध नामक देव कन्याएँ, पूर्वाचल के नीचे के भागों में गाया करती थीं।

आसीत्तस्य समुत्सुकः सुरपतिः संग्रामसंदर्शने
सेहे किन्तु न गाढपीडितधनुष्टङ्कारमुच्चैश्रवाः।
आरूढः सुरवारणं रणरसक्रुद्धेभगन्ध—ग्रहात्
तेनाप्येष पलायनप्रणयिना दूरं समुत्सारितः ॥७५॥

अन्वयः

सुरपतिः तस्य संग्रामदर्शने समुत्सुकः आसीत्। किन्तु उच्चैःश्रवाः गाढपीडितधनुष्टङ्कारं न सेहे। (अतः) एषः सुरवारणम् आरूढः। (किन्तु) रणरसक्रुद्धेभगन्धग्रहात् पलायनप्रणयिना तेन अपि एषः दूरं समुत्सारितः।

व्याख्या

सुराणां देवानां पतिः स्वामीन्द्रस्तस्य विक्रमाङ्कदेवस्य संग्रामाणां युद्धानां दर्शने कौतुकेन निरीक्षणे समुत्सुक उत्कण्ठित आसीत्। विक्रमाङ्कदेवस्य विचित्र युद्धकलां सर्वतो निशम्य तस्य युद्धदर्शने कौतुकयुक्तस्सन् समुत्सुक आसीदिति भावः। किन्तूच्चैःश्रवा इन्द्राश्वः 'हय उच्चैः श्रवाः सूतो मातलिर्नन्दनं वनम्' इत्यमरः। गाढं यथास्यात्तथा पीडितं धनुः शरासनं तस्य टङ्कारं शब्दं न सेहे न सोढुं समर्थः। टङ्कारशब्दं श्रुत्वा पलायित इति भावः। अत एष इन्द्रः सुरवारणमैरावतमारूढोधिष्ठितः। किन्तु रणरसेन संग्रामरसेन क्रुद्धाः कुपिता इभा गजास्तेषां गन्धस्य ग्रहात् ग्रहणात् पलायने वेगेन दूरापसरणे प्रणयः

प्रीतिर्यस्य तेन पलायनोत्तरलितमनसा तेनैरावतेनाऽप्येष दूरं रणभूमितो महदन्तरं समुत्सारितोऽपनीतः। विक्रमाङ्कदेवस्य गजा गन्धगजा आसन्निति भावः। यस्य गन्धं समाघ्राय पलायन्तेऽपरे गजाः। स सुगन्धगजः प्रोक्त इति। अत्राति-शयकोक्तिरलङ्कारस्तेनाऽस्य लोकोत्तरं शौर्यं ध्वन्यते।

भाषा

इन्द्र को इस विक्रमाङ्क देव का संग्राम देखने की उत्कण्ठा हुई। परन्तु इन्द्र का घोड़ा उच्चैःश्रवा, इस राजकुमार के कान तक खींच कर चलाये जाने वाले धनुष के टङ्कार को न सहन कर सका। अर्थात् उसके धनुष के टङ्कार से भड़क गया। इसलिये इन्द्र ऐरावत नाम के अपने हाथी पर सवार हुआ। परन्तु इस राजकुमार के युद्ध की भावना से क्रोधयुक्त गन्ध गजों की गन्ध से (भयभीत होकर) भाग जाने में ही प्रेम रखने वाला अर्थात् अपना कल्याण समझने वाला ऐरावत भी इन्द्र को युद्धभूमि से दूर भगा ले गया।

काञ्ची पदातिभिरमुष्य विलुण्ठिताभूद्
देवालयध्वजपटावलिमात्रशेषा।
लुण्टाकलुप्तनिखिलाम्बरडम्बराणां
कौपीनकार्पणपरेव पुराङ्गनानाम् ॥७६॥

अन्वयः

अमुष्य पदातिभिः विलुण्ठिता (सती) देवालयध्वजपटावलिमात्रशेषा काञ्ची लुण्टाकलुप्तनिखिलाम्बरडम्बराणां पुराङ्गनानां कौपीनकार्पणपरा इव अभूत।

व्याख्या

अमुष्य विक्रमाङ्कदेवस्य पदातिभिः पादचारिसैनिकैर्विलुण्ठिता हठादपहृत-सर्वस्वा सती देवानामालया देवालया देवमन्दिराणि तेषां ध्वजेषु पताकासु संसक्ता या पटावलिस्तन्मात्रमेव पताकांशुकान्येव शेषोऽवशिष्टवस्त्रभागो यस्यां सा काञ्ची तन्नाम्नी चोलराजधानी लुण्टाकैर्हठादपहरणशीलैर्लुप्तान्यपहृतानि निखिलाम्बराणामखिलवस्त्राणां डम्बराण्याटोपा यासां तास्तासां पुराङ्गनानां

काञ्चीनगरस्त्रीणां कौपीनकं गुह्याच्छादनवस्त्रं तस्याऽर्पणे परा तत्परेवाऽभूत् । सर्वतो भावेन काञ्चीनगरी पदातिभिर्लुण्ठितेति भावः ।

भाषा

विक्रमाङ्कदेव की पैदल सेना से लूटी जाने पर केवल देव मन्दिरों की पताकाओं में ही वस्त्रों का अस्तित्व रखने वाली चोलराजा की प्रधान नगरी काञ्ची, लुटेरों द्वारा अपहृत वस्त्र समूह वाली नागरिक स्त्रियों को मानों गुह्याङ्ग ढकने के लिये लंगोटी ही देने में तत्पर थी अर्थात् समर्थ थी । अर्थात् पूरी तरह से कांची नगरी को सैनिकों ने लूट लिया था ।

अत्र द्राविडभूमिपालदलनक्रीडारसोड्डामरे
कोदण्डध्वनिभिर्विधुन्वति घनध्वानानुकारैर्जगत् ।
वैदेहीरमणस्य रावणशिरच्छेदेऽप्यशान्तक्रुधः
प्रत्यावृत्तिरकाण्डकम्पतरलैराशङ्कि लङ्काचरैः ॥७७॥

अन्वयः

द्राविडभूमिपालदलनक्रीडारसोड्डामरे अत्र घनध्वानानुकारैः कोदण्डध्वनिभिः जगत् विधुन्वति (सति) अकाण्डकम्पतरलैः लङ्काचरैः रावणशिरच्छेदे अपि अशान्तक्रुधः वैदेहीरमणस्य प्रत्यावृत्तिः आशङ्कि ।

व्याख्या

द्राविडश्चसौ भूमिपालश्च द्राविडभूमिपालश्चोलदेशराजस्तस्य दलनस्य पीडनस्य या क्रीडा लीलास्तस्या रसे उड्डामर अत्युत्सुकस्तस्मिन्नत्राऽस्मिन्विक्रमाङ्कदेवे घनानामेघानां ध्वानो निस्वनस्तदनुकारैस्तत्सदृशैः कोदण्डस्य धनुषो ध्वनिभिश्शब्दैर्जगल्लोकं विधुन्वति कम्पयति सति अकाण्डेऽसमय एव कम्पो भयेन कम्पनं तेन तरलैश्चञ्चलैर्लङ्काचरै राक्षसै रावणस्य लङ्कापतेः शिरसां छेदे कर्तने कृतेऽप्यशान्ता क्रुध् क्रोधो यस्य तस्य वैदेह्या रमणस्य श्री रामचन्द्रस्य प्रत्यावृत्तिः पुनरावर्तनं पुनरागमनमित्यर्थः । आशङ्कि वितर्कितम् । कोदण्डप्रयोगेऽयं श्री रामचन्द्रवत् कुशल आसीदिति भावः । उत्प्रेक्षालङ्कारः ।

भाषा

चोलदेश के राजा को परास्त करने के क्रीडारस में समुत्सुक, राज कुमार

विक्रमाङ्कदेव के मेघ की गर्जना के समान धनुष की ध्वनि से समस्त जगत् को कंपाते रहने पर असमय में ही कम्प से चञ्चल अर्थात् बिना कारण भयभीत राक्षसों ने, रावण के शिरों को काट डालने पर भी क्रोध शान्त न होने वाले श्री रामचन्द्र की पुनः लौट आने की आशङ्का की। अर्थात् विक्रमाङ्कदेव के जगत् को कंपा देने वाले धनुष के टङ्कारों को सुनकर व्यर्थ ही भय से व्याकुल राक्षसों को सन्देह हुआ कि रावण के शिरों को काटने पर भी क्रोध शान्त न होने से कहीं राम ही तो फिर से नहीं लौट कर आ रहे हैं।

इति श्री विक्रमाङ्कदेव चरिते महाकाव्ये त्रिभुवनमल्लदेव विद्यापति काश्मीर-कभट्ट श्री बिल्हणविरचिते तृतीयः सर्गः।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाजबुधोत्तमात्समुदितः श्रीविश्वनाथः सुधीः।
चक्रे रामकुबेर-पण्डितवरात्संप्राप्तसाहाय्यक-
ष्टीकायुग्ममिदं रमाकरुणया सर्गे तृतीये वरे॥

ॐ शान्तिः शान्तिः शान्तिः।

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

चतुर्थः सर्गः

कार्यतो युवराजत्वे राजसूनुरवस्थितः ।
स दिग्विजयमव्याज-वीरः स्मर इवाकरोत् ॥१॥

अन्वयः

कार्यतः युवराजत्वे अवस्थितः अव्याजवीरः सः राजसूनुः स्मरः इव दिग्विजयम् अकरोत् ।

व्याख्या

कार्यतस्सम्पूर्णराज्यकार्यकारित्वाद्युवराजत्वे युवराजकार्यसम्पादनेऽवस्थितः प्रतिष्ठितो न तु युवराजपदे समभिषिक्तस्तत्र तु तदग्रजस्सोमदेवो नाम राजपुत्रोऽभिषिक्त आसीत् । व्याजेन कपटेन वीरो व्याजवीरः स न भवतीत्यव्याजवीरो निष्कपटवीरः सत्यशूर इत्यर्थः । सः प्रसिद्धो राजसूनुर्नृपपुत्रः 'आत्मजस्तनयः सूनुस्सुतः पुत्रः स्त्रियां त्वमी' इत्यमरः । विक्रमाङ्कदेवः स्मर इव काम इव 'कामः पञ्चशरः स्मरः' इत्यमरः । दिशामाशानां 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । लक्षणया दिक्षु स्थितानां राज्ञामन्यजनानाञ्च विजयं जयमकरोत् । पृथ्वीस्थसकलभूपानां पराजयं विधाय तान् स्ववशे कृतवानित्यर्थः । राजसूनोस्स्मरेण साधर्म्यावगमादुपमालङ्कारः 'साधर्म्यमुपमा भेदे' । सर्गेऽस्मिन्ननुष्टुप् छन्दः । 'श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघु पञ्चमम् । द्विचतुः पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥' इति लक्षणात्

भाषा

सम्पूर्ण राज्य कार्य करने के लिये युवराज पद पर अभिषिक्त न होते हुए

भी उस पद पर स्थित, उस सत्य शूर राज पुत्र विक्रमाङ्कदेव ने कामदेव के समान समस्त दिशाओं को अर्थात् समस्त दिशाओं के राजाओं को तथा अन्य लोगों को जीत लिया अर्थात् अपने वश में कर लिया।

अभज्यन्त गजैस्तस्य लीलया मलयद्रुमाः।
समं केरलकान्तानां चूर्णकुन्तलवल्लिभिः॥२॥

अन्वयः

तस्य गजैः लीलया मलयद्रुमाः केरलकान्तानां चूर्णकुन्तलवल्लिभिः समम् अभज्यन्त।

व्याख्या

तस्य विक्रमाङ्कदेवस्य गजैर्हस्तिभिर्लीलया क्रीडया मलयस्य मलयाद्रेर्द्रुमा वृक्षाः केरलकान्तानां केरलदेशीयरमणीनां चूर्णकुन्तला अलकाः 'अलकाश्चूर्ण-कुन्तलाः' इत्यमरः। एव वल्लयो लतास्ताभिः समं सहाऽभज्यन्त भग्ना भूमौ निपातिता इत्यर्थः। गजसेनया पतीनां विनाशे केरलदेशीयनारीणां चूर्णकुन्तला देशाचाररीत्या तासां मुण्डनेन भूमौ पतिता मलयद्रुमाश्च तैर्गजैर्भूमौ पातिताः। अत्र सहोक्तिरलङ्कारः। द्रुमाणां पाते वल्लयोऽपि पतन्त्येवेति सूच्यते।

भाषा

विक्रमाङ्कदेव के हाथियों ने मलयाचल के चन्दनवृक्षों के साथ ही केरल-देशीय स्त्रियों के केशपाश रूपी लता को भी तोड़ कर पृथ्वी पर गिरा दिया। अर्थात् गज सेना से उनके पतियों का नाश हो जाने पर देशाचारानुसार उन स्त्रियों के विधवा हो जाने से केश भी मूँड दिये गये थे और वे पृथ्वी पर गिर गये।

मदस्तम्बेरमैस्तस्य मलये निर्द्रुमीकृते।
मन्ये चन्दनवायूनामभूद्दुर्भिक्षमक्षयम्॥३॥

अन्वयः

तस्य मदस्तम्बेरमैः मलये निर्द्रुमीकृते (सति) चन्दनवायूनाम् अक्षयं दुर्भिक्षम् अभूत् (इति) मन्ये।

व्याख्या

तस्य विक्रमाङ्कदेवस्य मदो दानमस्त्येषु ते मदा मदयुक्ताः 'अर्श आदिभ्योऽजित्यच् प्रत्ययः'। स्तम्बेरमा गजाः 'इभः स्तबेरमः पद्मी' इत्यमरः। तैर्मदोन्मत्तगजैर्मलये मलयपर्वते न सन्ति द्रुमा अस्मिन्निति निर्द्रुमः न निर्द्रुमोऽनिर्द्रुमः, अनिर्द्रुमो निर्द्रुमः कृत इति निर्द्रुमीकृतस्तस्मिन् 'अभूततद्भावे संपद्यकर्त्तरि च्विरित्ति च्विः प्रत्ययः'। भक्षणाद्भञ्जनाच्च वृक्षरहिते कृते सति चन्दनवायूनां चन्दनद्रुमसम्पर्काच्छीतलसुगन्धिपवनानां दक्षिणानिलानामित्यर्थः। अक्षयमविनाशि चिरकालसंभवीत्यर्थः। दुर्भिक्षमभावोऽभूदित्यहं मन्ये तर्कयामि। अत्रोत्प्रेक्षालङ्कारः।

भाषा

उसके मदोन्मत्त हाथियों द्वारा मलयाचल का, वृक्षों को तोड़ने और खाने से, वृक्ष रहित कर दिये जाने पर चिरकाल के लिये शीतल, मन्द, सुगन्ध वायु का (दक्षिणानिल का) अकाल पड गया होगा ऐसा मैं समझता हूँ।

चन्दनस्यन्दिडिण्डीरच्छलेन मलयाचलः।
पिण्डं श्रीखण्डवृक्षाणां परोक्षाणामिवाकरोत् ॥४॥

अन्वयः

मलयाचलः चन्दनस्यन्दिडिण्डीरच्छलेन परोक्षाणां श्रीखण्डवृक्षाणां पिण्डम् इव अकरोत्।

व्याख्या

मलयाचलो मलयाद्रिश्चन्दनाच्चन्दनवृक्षात्स्यन्दी प्रच्युतो डिण्डीरः फेनः 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। तस्य च्छलेन व्याजेन परोक्षाणां भग्नानामत एव परलोकगतानां श्रीखण्डवृक्षाणां चन्दनतरूणां पिण्डमिव श्राद्धपिण्डमिवाऽकरोत् कृतवान्। मृतेभ्यः सम्बन्धिभिः पिण्डदानं क्रियते तथैव मलयाचलः स्वोत्पनानां सम्प्रति नष्टानां चन्दनवृक्षाणां चन्दनस्यन्दिफेनव्याजेन पिण्डदानं कृतवानित्यर्थः।

भाषा

मलयाचल ने टूटे हुए चन्दन वृक्षों से चूने वाले (सफेद) फेनों के मिष से मानों मरे हुए अर्थात् नष्ट भए हुए चन्दन-वृक्षों का पिण्डदान किया।

सान्द्रचन्दननिस्यन्दपङ्किलैस्तस्य वारणैः ।
क्षणमौर्वाग्निसन्तापः प्रविश्य शमितोऽम्बुधेः ॥५॥

अन्वयः

सान्द्रचन्दननिस्यन्दपङ्किलैः वारणैः प्रविश्य अम्बुधेः औौर्वाग्निसन्तापः क्षणं शमितः ।

व्याख्या

सान्द्रो घनीभूतो यश्चन्दनस्य श्रीखण्डवृक्षस्य निस्यन्दः प्रस्रुतो द्रवीभूत-पदार्थस्तेन पङ्किलैश्चन्दनवृक्षसंघर्षवशादार्द्रशरीरैर्वारणैर्गजैः प्रविश्य समुद्रमध्ये जलक्रीडार्थं गत्वाऽम्बुधेः समुद्रस्यौर्वोग्निरौर्वाग्निर्वाडवाग्निस्तस्मात्सन्तापः पीडा क्षणं क्षणमात्रं शमितः शान्ति नीतः । 'औौर्वस्तु वाडवो वडवानलः' इत्यमरः । तस्य शीतचन्दनस्यन्दलिप्ताङ्गेषु गजेषु समुद्रं प्रविष्टेषु समुद्रस्य वडवानलतापः क्षणं शान्ति गत इति भावः । गम्योत्प्रेक्षालङ्कारः ।

भाषा

(अपने शरीरों को चन्दनवृक्षों से रगड़ने के कारण) गाढे २ चन्दन के रस से लथपथ उसके हाथियों ने समुद्र में स्नानादि क्रीडा के लिए प्रवेश कर (चन्दन की ठण्डक से) समुद्र की वडवानल की गर्मी को थोड़े देर के लिये शान्त कर दिया ।

औौर्वाग्नितप्तपाथोधौ चन्दनस्यन्दवासिताः ।
शीतोपचारसाम्राज्यं भेजुर्मलयनिम्नगाः ॥६॥

अन्वयः

चन्दनस्यन्दवासिताः मलयनिम्नगाः औौर्वाग्नितप्तपाथोधौ शीतोपचार-साम्राज्यं भेजुः ।

व्याख्या

चन्दनस्य श्रीखण्डवृक्षस्य स्यन्देन प्रस्नुतजलेन वासिताः सुगन्धित्वमापन्ना मलयस्य मलयाद्रेर्निम्नगा नद्यः 'स्रोतस्विनी द्वीपवती स्रवंती निम्नगापगा' इत्यमरः । औौर्वाग्निना वडवानलेन तप्त उष्णतां प्रापितः पाथोधिस्समुद्रस्त-

स्मिन् शीतोपचारस्य सन्तापनिवारणपूर्वकशीतानयनस्य साम्राज्यं वैशिष्ट्यं भेजुः सिषेविरे। समुद्रे चन्दनजलवासितानां नदीनां समागमात् समुद्रे शैत्यं जातं वडवानलसन्तापश्च निवारित इति भावः।

भाषा

बड़वानल मे तपे समुद्र में चन्दन के रस से सुवासित, मलयाचल की नदियां शीतोपचार का काम करने लगीं।

सखीव निखिलैस्तस्य सेनासीमन्तिनीजनैः।
प्रीत्या मलयवायूनां जन्मभूमिरदृश्यत ॥७॥

अन्वयः

तस्य निखिलैः सेनासीमन्तिनीजनैः प्रीत्या सखी इव मलयवायूनां जन्मभूमिः अदृश्यत।

व्याख्या

तस्य विक्रमाङ्कदेवस्य निखिलैस्समस्तैः सेनायां सेनया सह समागताः सीमन्तिन्योऽङ्गनास्तासां जनस्समूहस्तैः प्रीत्या प्रेम्णा सखीव प्रेयसीव मलयवायूनां दक्षिणानिलानां जन्मभूमिर्मलयपर्वतोऽदृश्यत परिवीक्षिता। संयोगावस्थायां सुखप्रदानां दक्षिणानिलानां जन्मभूमिरङ्गनाभिः सखीव प्रीत्या दृष्टेति भावः।

भाषा

उसकी सेना में की अङ्गनाओं ने दक्षिणानिल की जन्म भूमि मलयाचल को (संयोगावस्था में दक्षिणानिल के सुखद होने के कारण) सखी के समान प्रेम से देखा।

मलयेन तदीयस्त्री-सुरभिश्वसितानिलैः।
गुहाश्चन्दनवायूनां बीजार्थमिव पूरिताः ॥८॥

अन्वयः

मलयेन तदीयस्त्रीसुरभिश्वसितानिलैः गुहाः चन्दनवायूनां बीजार्थं पूरिताः इव।

व्याख्या

मलयेन मलयाचलेन तस्य विक्रमाङ्कदेवस्येमा इति तदीयाः स्त्रियो नार्यस्तासां सुरभीणि सुगन्धीनि 'सुरभिर्घ्राणतर्पणः । इष्टगन्धः सुगन्धिः स्यात्' इत्यमरः । श्वसितान्येवाऽनिलास्तैस्तदीयाङ्गनासुगन्धिश्वसितानिलैर्गुहा दर्यश्चन्दनवायूनां श्रीखण्डानिलानां बीजार्थं बीजसंरक्षणाय पूरिता इव परिपूर्णीकृता इव । गजकृतसमस्तचन्दनवृक्षनाशेऽपि आगामिनि समये कान्तासुरभिश्वसितरूपबीजैः प्रभूताश्चन्दनवायवस्समुत्पत्स्यन्तीति धिया मलयेन तासां श्वसितानां गुहासु बीजरूपेण संग्रहः कृत इति भावः । श्वसितानिलैर्गुहापरिपूरणे चन्दनवायुरूप-बीजसंरक्षणस्य फलत्वेनोत्प्रेक्षणात्फलोत्प्रेक्षा, तया च तदीयाङ्गनानां श्वसिताऽ-निलैस्सह मलयपवनानामुपमा गम्यते ।

भाषा

मलयाचल ने, विक्रमाङ्कदेव के हाथियों द्वारा चन्दन वृक्षों का समूल नाश कर दिये जाने पर, चन्दन की सुगन्ध से युक्त वायुओं का बीज बनाए रखने के लिये मानों विक्रमाङ्कदेव की सेना में की अङ्गनाओं के सुगन्धित सांसों को गुफाओं में भर लिया ।

गजोन्मूलितनिक्षिप्त-चन्दनद्रुमसम्पदः ।
स मूल्यमिव रत्नानि जग्राह महतोऽम्बुधेः ॥६॥

अन्वयः

सः गजोन्मूलितनिक्षिप्तचन्दनद्रुमसम्पदः महतः अम्बुधेः रत्नानि मूल्यम् इव जग्राह ।

व्याख्या

स विक्रमाङ्कदेवो गजैर्हस्तिभिः पूर्वमुन्मूलिता उत्पाटिताः पश्चान्निक्षिप्तास्सं-पातिताश्चन्दनद्रुमास्तद्रूपसम्पदो यस्मिन् स नागसमूहोत्पाटितसंपातितचन्दनमही-रुहरूपसम्पत्तेर्महतोऽम्बुधेर्महासागरात् महासागरसकाशादित्यर्थः । रत्नानि समुद्रस्थितविविधरत्नसमूहान् मूल्यमिव दत्तचन्दनद्रुमसम्पत्तेर्मूल्यार्थमिव जग्राह गृहीतवान् । परिवृत्तिनामालङ्कारः । "परिवृत्तिर्विनिमयः समन्यूनाधि-कैर्भवेत्" इति लक्षणात् ।

भाषा

अपने हाथियों द्वारा उखाड़ कर फेंके हुए चन्दनवृक्षों की सम्पत्ति से युक्त विशाल समुद्र से मानों उस विक्रमाङ्कदेव ने मूल्य में रत्नों को ले लिया ।

शिलाभिः करटिक्षुण्ण-श्रीखण्डस्यन्दपाण्डुभिः ।
मलयस्तद्बलक्षोभादस्थिशेष इवाऽभवत् ॥१०॥

अन्वयः

मलयः करटिक्षुण्णश्रीखण्डस्यन्दपाण्डुभिः शिलाभिः तद्बलक्षोभात् अस्थिशेषः इव अभवत् ।

व्याख्या

मलयो मलयाचलः करटिभिर्गजैः क्षुण्णास्संमर्दिताः श्रीखण्डाश्चन्दनवृक्षास्तेषां स्यन्देन प्रस्नुतद्रव्येण पाण्डुवर्णाः शुभ्रवर्णास्ताभिः शिलाभिर्हेतुभिस्तस्य बलं सैन्यं तस्य क्षोभात्संघर्षात्संमर्दनादित्यर्थः । अस्थीन्येव शेषा अवशिष्टांशा यस्य स इवाऽभवत् । शिलासु शुभ्रत्वसाम्यादस्थिस्वरूपस्योत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

उस राजा के हाथियों से नष्ट किए हुए चन्दन वृक्ष के रस से सफेद भई हुई पत्थर की चट्टानों के मिष से मानों उस राजा की पलटनों से सम्मर्दित होने से मलयाचल की हड्डियाँ अवशिष्ट रह गई हों ऐसा वह दिखाई देता था ।

अम्भोधिः श्रीभुजङ्गस्य निद्राभङ्गविधायिना ।
चमूकलकलेनेव कुपितः क्षोभमाययौ ॥११॥

अन्वयः

अम्भोधिः श्रीभुजङ्गस्य निद्राभङ्गविधायिना चमूकलकलेन कुपितः सन् इव क्षोभम् आययौ ।

व्याख्या

अम्भोधिस्समुद्रः श्रियो लक्ष्म्या भुजङ्गः पतिर्विष्णुस्तस्य विष्णोर्निद्राया भङ्गस्तं विदधातीति तेन निद्राविच्छेदकारिणा चमूकलकलेन सेनासञ्चलनशब्देन कुपित-

स्सन्निव क्रुद्धस्सन्निव क्षोभं व्याकुलत्वमाययौ प्राप्तः। समुद्रक्षोभे सेनाकलकल-श्रवणस्य हेतुत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः।

भाषा

लक्ष्मीपति भगवान् विष्णु की निद्रा का भङ्ग करने वाले सेना के कोलाहल से मानों समुद्र कुपित होकर क्षुब्ध हो उठा।

क्षुण्णास्तत्करिभिस्तोय-द्विपाङ्घ्रिनिगडोपमाः।
शयानाः कुण्डलीभूय वार्धितीरे महोरगाः ॥१२॥

अन्वयः

वार्धितीरे तोयद्विपाङ्घ्रिनिगडोपमाः कुण्डलीभूय शयानाः महोरगाः तत्करिभिः क्षुण्णाः।

व्याख्या

वार्धेः समुद्रस्य तीरे तटे समुद्रतटे तोयस्य जलस्य द्विपा गजास्तेषामङ्घ्रयः पादास्तेषां निगडानां शृङ्खलानामुपमा सादृश्यं येषां ते समुद्रगजनिगडोपमाः 'अथ शृङ्खले। अन्दुको निगडोऽस्त्री स्यात्' इत्यमरः। कुण्डलीभूय मण्डलाकारेण कुण्डलनां विधाय शयानाः सुप्ता महोरगा उरसा गच्छन्तीत्युरगा महान्त उरगा महोरगा महासर्पास्तस्य विक्रमाङ्कदेवस्य करिभिर्हस्तिभिः क्षुण्णा गजपादैः सम्मर्दिताः। समुद्रतटे सर्पाणामाधिक्यं स्वाभाविकमेव। अत्रोपमालङ्कारः।

भाषा

समुद्र तट पर जलहाथियों के पांव में बांधने के सिक्कड़ के सदृश मण्डल-बाँध कर सोए हुए बड़े २ सांप, उस राजा के हाथियों से कुचल दिये गए।

दधिरे तद्गजाः पाद-लग्नपाथोधिमौक्तिकाः।
क्षुण्णनक्षत्रपुञ्जस्य सौन्दर्यं सुरदन्तिनः ॥१३॥

अन्वयः

पादलग्नपाथोधिमौक्तिकाः तद्गजाः क्षुण्णनक्षत्रपुञ्जस्य सुरदन्तिनः सौन्दर्यं दधिरे।

व्याख्या

पादेषु पदेषु लग्नानि संसक्तानि पाथोधेः समुद्रस्य मौक्तिकानि येषां ते चरणसंसक्तमुक्ताकलापास्तस्य विक्रमाङ्कदेवस्य गजा हस्तिनः क्षुण्णः पादसम्बन्धेन संचूर्णितो नक्षत्रपुञ्जो तारकासमूहो येन तस्य "नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' इत्यमरः। सुरदन्तिन ऐरावतस्य सौन्दर्यं शोभां दधिरे संप्राप्ताः। निदर्शनालङ्कारः।

भाषा

उसके हाथी, जिनके पांवों में समुद्र के मोती लग गये थे, नक्षत्र समूहों को कुचलने वाले इन्द्र के ऐरावत हाथी की शोभा प्राप्त कर रहे थे।

तस्य वाहनमेकैकं गाहमानममन्यत।
मन्दुरास्मरणायातमुच्चैःश्रवसमम्बुधिः ॥१४॥

अन्वयः

अम्बुधिः तस्य गाहमानम् एकैकं वाहनं मन्दुरास्मरणायातम् उच्चैः-श्रवसम् अमन्यत।

व्याख्या

अम्बुधिः समुद्रः तस्य विक्रमाङ्कदेवस्य गाहमानं समुद्रं प्रविशन्तमेकैकमश्वं प्रत्येकं वाजिनं मन्दुरा वाजिशाला 'वाजिशाला तु मंदुरा' इत्यमरः। तस्याः स्मरणेनाऽऽयातं मदीया वाजिशाला समुद्रेऽवतिष्ठत इति स्मृत्या समागतमुच्चैः-श्रवसमिन्द्राश्वममन्यत मेने। तस्य वाजिनोऽतीव श्रेष्ठा इति भावः। समुद्रा-देवोच्चैःश्रवस उत्पत्तिरिति पौराणिकी कथाऽत्र सूचिता।

भाषा

समुद्र ने, समुद्र में स्नान करने वाले उसके हर एक घोड़े को, अपनी अश्व-शाला का स्मरण कर आया हुआ उच्चैःश्रवा नाम का इन्द्र का घोड़ा ही समझा। अर्थात् उसका हर एक घोड़ा उच्चैःश्रवा के ऐसा ही था। उच्चैः-श्रवा नामक इन्द्र के घोड़े की उत्पत्ति समुद्र में से ही हुई है।

तद्दन्तिपदसंघट्ट—त्रुटन्मौक्तिकशुक्तिकः।
चक्रेऽम्बुधिर्भयोद्भ्रान्त—हृदयस्फुटनभ्रमम् ॥१५॥

अन्वयः

तद्दन्तिपदसंघट्टत्रुटन्मौक्तिकशुक्तिकः अम्बुधिः भयोद्भ्रान्तहृदय-स्फुटनभ्रमं चक्रे।

व्याख्या

तस्य विक्रमाङ्कदेवस्य दन्तिनो हस्तिनः 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः। तेषां पदानां चरणानां संघट्ट आमर्दस्तेन त्रुटन्ति स्फुटन्ति मौक्तिकानि मुक्ताफलानि यासु ताः शुक्तयो मुक्तास्फोटा 'मुक्तास्फोटःस्त्रियां शुक्तिः' इत्यमरः। यस्मिन् सोऽम्बुधिः सागरो भयेन त्रासेनोद्भ्रान्तं विह्वलं यद्धृदयं तस्य स्फुटनं विच्छेदस्तस्य भ्रमं भ्रान्तिं चक्रे। शुक्तिस्फोटजनित-शब्देन समुद्रस्य हृदयं स्फुटति किमिति प्रेक्षकाणां भ्रान्तिर्जातेति भावः। अत्र भ्रान्तिमानलङ्कारः।

भाषा

उसके हाथियों के पांव के नीचे दब कर टूटने वाली मोतियों की सीपों से अर्थात् उनके शब्दों से, प्रेक्षकों को, भय से विह्वल समुद्र का हृदय ही तो नहीं फट रहा है, ऐसा भ्रम हुआ।

अन्विष्यन्मरणोपायं दुःखात्तत्सैन्यलुण्ठितः।
कालकूटं हरग्रस्तं शुशोच पयसां निधिः ॥१६॥

अन्वयः

तत्सैन्यलुण्ठितः पयसां निधिः दुःखात् मरणोपायम् अन्विष्यन् हरग्रस्तं कालकूटं शुशोच।

व्याख्या

तस्य विक्रमाङ्कदेवस्य सैन्यैश्चमूभिर्लुण्ठितः स्वरत्नापहरणैरामर्दितः पयसां जलानां निधिः समुद्रो दुःखाच्चमूसंलुण्ठनजन्यक्लेशान्मरणस्य मृत्योरुपायं यत्नमन्विष्यन् ध्यायन् हरेण शिवेन ग्रस्तं स्वगले स्थापितं कालकूटं, कालकूटं नाम पूर्वं समुद्रे स्थितमुग्रं विषं शुशोच शोकेन सस्मार। मरणस्य सरलोपायमन्यं कञ्चिदमन्यमानः कालकूटस्यैव तादृशं सामर्थ्यं निश्चिन्वानस्तस्य च हरग्रस्तत्वेना-

ऽलभ्यत्वादधिकं शोकमापेति भावः । कालकूटस्याऽप्युत्पत्तिः समुद्रादेव जातेति पौराणिकी कथाऽत्राऽनुसन्धेया । अत्राऽतिशयोक्तिरलङ्कारः ।

भाषा

उसकी सेना द्वारा रत्नादि के लेलेने से लूट लिया गया हुआ समुद्र, दुःख से, मरने का उपाय सोंचते हुए अपने कालकूट नामक विष को शंकर ने अपने गले में रख लिया है, यह सोंचकर, बहुत शोक करने लगा। अर्थात् यदि वह विष उसके पास होता तो उसके खाने से शीघ्र मृत्यु हो जाती।

विद्रुमेषु समुद्रस्य कान्ताबिम्बौष्ठकान्तिषु ।
अराजन् राजपुत्रस्य प्रीतिपात्रीकृता दृशः ॥१७॥

अन्वयः

समुद्रस्य कान्ताबिम्बौष्ठकान्तिषु विद्रुमेषु राजपुत्रस्य प्रीतिपात्रीकृताः दृशः अराजन् ।

व्याख्या

समुद्रस्य पयोधेः कान्तानां रमणीनां बिम्बफलवद्रक्तवर्णा ओष्ठा अधरास्तेषां कान्तिरिव कान्तिर्येषु तेषु विद्रुमेषु प्रवालेषु 'अथ विद्रुमः पुंसि प्रवालं पुंनपुंसकम्' इत्यमरः । राजपुत्रस्य विक्रमाङ्कदेवस्य प्रीतेः स्नेहस्य पात्रीकृता भाजनीकृताः प्रेमार्द्रा इत्यर्थः । दृशो नयनान्यराजन् शुशुभिरे लग्नानीति भावः ।

भाषा

स्त्रियों के बिम्ब फल के ऐसे लाल ओठों के समान दिखाई पड़ने वाले समुद्र के मूँगों पर उस राजपुत्र की प्रेम भरी दृष्टि पड़ी।

तेन केरलभूपाल-कीलालकलुषीकृतः ।
अगस्त्यमुनिसंत्रासमत्याज्यत पयोनिधिः ॥१८॥

अन्वयः

तेन केरलभूपालकीलालकलुषीकृतः पयोनिधिः अगस्त्यमुनिसंत्रासम् अत्याज्यत ।

व्याख्या

तेन विक्रमाङ्कदेवेन केरलस्य[१] केरलदेशस्य भूपाला राजानस्तेषां कीलालेन रुधिरेण 'शोणितेऽम्भसि कीलालम्' इत्यमरः । कलुषीकृतो मलिनीकृतोऽपवित्रीकृत इत्यर्थः । पयोनिधिस्समुद्रोऽगस्त्यमुनेः कुम्भजमुनेस्संत्रासमाचमनत्रयेणैव सर्वसमुद्रजलरिक्तीकरणरूपं भयमत्याज्यत तद्भयान्निवृतमकारयत । रक्तमिश्रितमपवित्रं समुद्रजलं कुम्भयोनिः कदापि न पास्यतीति धिया निर्भयत्वमिति भावः ।

भाषा

उसने केरलदेश के राजाओं को मारकर उनके रक्त से समुद्रजल को मिश्रित कर अतएव अपवित्र कर समुद्र को अगस्त्य मुनि के भय से छुड़ा दिया । अर्थात् अगस्त्य मुनि अब रक्त मिश्रित अपवित्र जल को कदापि न पीएँगे इसलिये समुद्र को अब उनका भय न रहा ।

उदरालोडनोद्भ्रान्त-दन्तसंक्रान्तपन्नगैः ।
पाथोधेरन्त्रमालेव तद्दन्तिभिरकृष्यत ॥१६॥

अन्वयः

उदरालोडनोद्भ्रान्तदन्तसंक्रान्तपन्नगैः तद्दन्तिभिः पाथोधेः अन्त्रमाला इव अकृष्यत ।

व्याख्या

उदरस्य समुद्रकुक्षेरालोडनान्मन्थनादुद्भ्रान्ता भयत्रस्ता दन्तेषु रदनेषु संक्रान्ताः संलग्नाः पन्नगाः सर्पा येषां तैस्तस्य विक्रमाङ्कदेवस्य दन्तिभिः करिभिः पाथोधेः पयोधेरन्त्रमाला इव पुरीतच्छ्रेणिरिव 'अन्त्रं पुरीतत्' इत्यमरः । आन्त्रमालेवेत्यर्थः । अकृष्यताऽऽकृष्टा । अत्र दन्ते उद्भ्रान्तसंलग्नसर्पेष्वन्त्रमालाया उत्प्रेक्षणात्स्वरूपोत्प्रेक्षालङ्कारः ।

---

[१] केरलदेशो भारतस्य दक्षिणपश्चिमकोणे विद्यमानः 'ट्रावंकोर' सहितान्यभूमिमण्डलात्मक आसीत् ।

भाषा

विक्रमाङ्कदेव के हाथियों के, समुद्र के भीतर घुस कर उसका मन्थन करने से, घबड़ा कर उनके दाँतों में लपटे हुए सर्पों से ऐसा प्रकट होता था मानों हाथियों ने समुद्र की अंतड़ियाँ खींच ली हों।

तद्भयात्सिंहलद्वीप-भूपतिः शरणागतः ।
विशश्रामाश्रमपदे लोपामुद्रापतेर्मुनेः ॥२०॥

अन्वयः

तद्भयात् शरणागतः सिंहलद्वीपभूपतिः लोपामुद्रापतेः मुनेः आश्रमपदे विशश्राम ।

व्याख्या

तस्माद्विक्रमादित्याद्भयं भीतिस्तस्माच्छरणमागतो रक्षार्थं तत्समीपे समुपस्थितः सिंहलद्वीपस्य सीलोननाम्ना प्रसिद्धस्य द्वीपस्य भूपतिर्नृपतिर्लोपामुद्राया अगस्त्यपत्न्याः पतेर्मुनेरगस्त्यस्य 'अगस्त्यः कुम्भसम्भवः । मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी' इत्यमरः । आश्रमपदे विशश्राम विश्रान्तिमाजगाम । सिंहलद्वीपस्याऽपि युद्धं विना विजयोऽनेन कृत इति भावः । अगस्त्याश्रमप्राप्त्या तस्य तापसाश्रमस्वीकारोऽपि सूचितः ।

भाषा

उसके भय से शरण में आया हुआ सीलोन का राजा, अगस्त्यमुनि के आश्रम में विश्राम करने लगा अर्थात् राजपाट छोड़कर तपस्या करने लगा ।

धुनानेन धनुश्चित्रं कृतास्तेन मुखेन्दवः ।
गाङ्गकुण्डपुरस्त्रीणां गलत्कुण्डलमण्डलाः ॥२१॥

अन्वयः

धनुः धुनानेन तेन गाङ्गकुण्डपुरस्त्रीणां मुखेन्दवः गलत्कुण्डलमण्डलाः कृताः (इति) चित्रम् ।

व्याख्या

धनुश्चापं धुनानेन संचालयता टङ्कारयता वा तेन विक्रमाङ्कदेवेन [१]गाङ्ग कुण्डस्य गाङ्गकुण्डचोलपुरनामकस्य पुरस्य नगरस्य स्त्रीणां ललनानां मुखेन्दव आननचन्द्रा गलन्ति भूमौ पतन्ति कुण्डलमण्डलानि कर्णभूषणसमूहा येभ्यस्ते स्रस्तोत्तंससमूहाः कृता विरचिता इति चित्रमाश्चर्यकरम् । गाङ्गकुण्ड-चोलपुरस्य विजयः कृतस्तेन युद्धे मृतानां पतीनां नाशात् स्त्रीणामाभूषणत्यागः संजात इति भावः । अथवा कर्णपीडकेन भयंकरधनुष्टङ्कारेण पूरितानां कर्णानां कम्पना-त्तद्गतभूषणपतनं जातमिति भावः । अत्रधनुःकम्पनेन कुण्डलानां निपत-नोक्त्याऽसङ्गत्यलङ्कारः । "कार्यकारणयोर्भिन्नदेशतायामसंङ्गतिः" इति लक्षणात् ।

भाषा

उसके धनुष की टङ्कार करते रहने से गङ्गकुण्ड चोलपुर की स्त्रियों के मुखचन्द्र, कान के आभूषणों से रहित हो गए, यह एक आश्चर्य की बात है । अर्थात् धनुष के कर्ण के लिये असह्य टङ्कारों से कान का पर्दा फटने लगने से कानों को जोर से हिलाने पर, उनमें के आभूषण गिर गए । अथवा पतिमरण से आभूषण धारण करना बन्द हो गया ।

यशःकूर्चिकया चित्रं दिग्भित्तिषु निविष्टया ।
द्रविडीगण्डफलके तेनावर्त्यत पाण्डिमा ॥२२॥

अन्वयः

तेन दिग्भित्तिषु निविष्टया यशःकूर्चिकया द्रविडीगण्डफलके पाण्डिमा अवर्त्यत इति चित्रम् ।

व्याख्या

तेन कुमारेण विक्रमाङ्कदेवेन दिश एव भित्तयस्तासु निविष्टया संप्रापितया यशसः स्वकीर्त्तेः कूर्चिका यशोरूपश्वेतीकरणद्रवपदार्थस्य लेपनयन्त्रं तया द्रविडीनां द्रविडाङ्गनानां गण्डफलके कपोलस्थले पाण्डिमा शुक्लत्वमवर्त्यत प्रावर्त्यत शुक्लत्वं कृतमित्यर्थः । इति चित्रमाश्चर्यकरम् । पतिमरणात् खेदात्

---

[१] राजेन्द्र चोल (गंगैकोण्ड) निर्मापिता चोलराजधानी । कावेरीनद्यास्तटे विद्यमानाऽऽसीत् । सम्प्रति गङ्गकुण्डचोलपुरनाम्ना प्रसिद्धा ।

कुङ्कुमादिरक्तीकरणलेपाभावाञ्च शुक्लत्वं जातमिति भावः। अत्राऽप्य-सङ्गत्यलङ्कारः।

भाषा

दिशा रूपी भीतों पर उसके यशरूपी सफेदी की कूंची के फिरने से द्रविड़ देश की ललनाओं के कपोलस्थल सफेद पड़ गये, यह एक आश्चर्य की बात है। अर्थात् द्रविड़ देश के वीरों को मारडालने से उनकी स्त्रियों के कपोलस्थल दुःख से अथवा केसरिया चन्दन आदि का प्रयोग न होने से सफेद पड़ गये थे।

गलितोत्तुङ्गशृङ्गत्वाद् द्विषां तेन जिगीषुणा।
अपि लूनशिरस्केव राजधानी व्यधीयत ॥२३॥

अन्वयः

जिगीषुणा तेन द्विषां राजधानी अपि गलितोत्तुङ्गशृङ्गत्वात् लूनशिरस्का इव व्यधीयत।

व्याख्या

जेतुमिच्छुर्जिगीषुस्तेन जिगीषुणा विजयैषिणा तेन विक्रमाङ्कदेवेन द्विषां शत्रूणां 'द्विड्विपक्षाहितामित्र दस्युशात्रवशत्रवः' इत्यमरः। राजधानी धीयन्ते राजानोऽस्यामिति धानी, राज्ञो धानी राजधानी प्रधानपुरी अपि गलितानि भग्नानि सन्ति पतितान्युत्तुङ्गान्यत्युच्चानि शृङ्गाणि शिखराणि 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः। यस्याः सा तस्या भावो गलितोत्तुङ्गशृङ्गत्वं तस्मात् कारणाल्लूनं छिन्नं शिरो मस्तकं यस्याः सा लूनशिरस्केव 'शेषाद्विभाषेति कप्' व्यधीयत सम्पादिता। तस्या अत्युच्चप्रासादशिखरपतनात् राजधानी छिन्नमस्तकेव भाति स्मेति भावः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

विजय की इच्छा रखने वाले विक्रमाङ्कदेव ने शत्रु की राजधानी के ऊँचे २ शिखरों के टूट कर नीचे गिर पड़ने के कारण, मानों उसे भी सिर कटी बना दिया।

तत्प्रतापमवोचन्त वक्त्रैर्विगलदश्रुभिः।
पुरन्ध्रयो नरेन्द्राणां जलाञ्जलिदशां गतैः ॥२४॥

अन्वयः

नरेन्द्राणां पुरन्ध्रयः जलार्द्रसमतां गतैः विगलदश्रुभिः वस्त्रैः तत्प्रतापम् अवोचन्त ।

व्याख्या

नरेन्द्राणां विपक्षनृपाणां पुरन्ध्रयः कान्ता जलार्द्राभिर्जलार्द्रव्यजनैः सह समतां तुल्यतां गतैः प्राप्तैर्विगलन्ति पतन्त्यश्रूणि नेत्रजलानि येभ्यस्तानि विगलदश्रूणि तैर्वस्त्रैर्वासोभिः 'वस्त्रमाच्छादनं वासः' इत्यमरः । तस्य राजकुमारविक्रमाङ्कदेवस्य प्रतापं प्रभावमवोचन्त समूचुः । पतिविरहादसह्यदुःखेन रोदनादश्रुपरम्परयाऽऽर्द्रं वस्त्रमेव तस्य कुमारस्य प्रतापं प्रकटयितुमलमिति भावः । अत्र विगलदश्रु-वस्त्राणां जलार्द्राभिस्साम्यप्रतिपादनादुपमालङ्कारः ।

भाषा

विपक्षी राजाओं की स्त्रियाँ पानी से भिगाए हुए पंखों के समान अश्रुओं से अत्यधिक भींगे हुए अतएव अश्रुओं की बूदों को टपकाने वाले अपने वस्त्रों से उस राजकुमार के प्रताप को व्यक्त करती थीं ।

चोलान्तःपुरगेहेषु सिंहानां तस्य बाहुना ।
लोललाङ्गूलदण्डानां द्वाररक्षा समर्पिता ॥२५॥

अन्वयः

तस्य बाहुना चोलान्तःपुरगेहेषु द्वाररक्षा लोललाङ्गूलदण्डानां सिंहानां समर्पिता ।

व्याख्या

तस्य विक्रमाङ्कदेवस्य बाहुना भुजेन चोलस्य चोलदेशीयनृपस्याऽन्तःपुरगेहेष्ववरोधगृहेषु 'स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्च' इत्यमरः । द्वाराणां रक्षा रक्षणभारो लोलाश्चञ्चला लाङ्गूला दण्डा इव पुच्छदण्डा येषां ते तेषां सिंहानां मृगेन्द्राणां कृते समर्पिता निहिता । शत्रुनाशानन्तरं सर्वेषु नगरस्थेषु पलायितेषु सत्सु रिक्तत्वात्तदन्तःपुरेषु सिंहाः समागत्य निवसन्ति स्म । द्वारपाला दण्डं धारयन्तीति सिंहाः स्वपुच्छं दण्डरूपं धारयन्तो द्वारपालकार्यं कुर्वन्ति स्मेति भावः । अनेन तद्भुजशौर्यं व्यज्यते । अत्र नगराणां शून्यस्वरूपव्यङ्ग्यस्यैव भङ्ग्या कथनात्पर्यायोक्तालङ्कारः ।

भाषा

उसके भुजबल ने चोलराजाओं के अन्तः पुर की दरबानी, चञ्चल पूंछ रूपी दण्डे को धारण करने वाले सिहों को सौंप दी। अर्थात् उस नगर से सब मनुष्यों के भाग जाने पर नगर के बीरान जंगल हो जाने से उसके अन्तः पुर को गुफ़ा समझ उसमें शेर रहने लगे।

चिन्तया दुर्बलं देहं द्रविडो यत्पलायितः।
संकटाद्रिदरीद्वार-प्रवेशे बह्वमन्यत ॥२६॥

अन्वयः

यत्पलायितः द्रविडः संकटाद्रिदरीद्वारप्रवेशे चिन्तया दुर्बलं देहं बहु अमन्यत।

व्याख्या

यस्माद्विक्रमाङ्कदेवात्पलायितः समराङ्गणं स्वगृहञ्च परित्यज्य द्रुतगतिमवलम्ब्य प्रधावितो द्रविडो द्रविडदेशनृपः संकटं संबाधमल्पावकाशमित्यर्थः। 'संकटं नातु संबाध': इत्यमरः। यदद्रेः पर्वतस्य दरीणां कन्दराणां 'दरी तु कन्दरो वा स्त्री' इत्यमरः। द्वारं 'स्त्री द्वार्द्वारं प्रतीहारः' इत्यमरः। तस्य प्रवेशस्तस्मिन् पर्वतकन्दराणामल्पावकाशद्वारप्रवेशे चिन्तया पराजयचिन्तया दुर्बलं सामर्थ्यहीनमत एव कृशं देहं शरीरं बह्वमन्यत प्रशंसितवान्। शरीरस्य स्थूलत्वेऽल्पावकाशाद्रिदरीद्वारे प्रवेशाभावे स्वसंरक्षणमसम्भवमिति स्वकृशत्वं प्रशंसितवानिति भावः।

भाषा

विक्रमाङ्कदेव के भय से घर दुवार छोड़ कर भागा हुआ द्रविड देश का राजा, पर्वत की कन्दराओं के संकुचित द्वार में (छिपने के लिये) घुसने योग्य, चिन्ता से कृश भये हुए अपने शरीर की बहुत प्रशंसा करने लगा। अर्थात् शरीर स्थूल होने से वह उस कन्दरा में न घुस सकता और उसको छिपने का अवसर न मिलता। इसलिये अपने दुबले पतले शरीर की सराहना करने लगा।

दृश्यन्तेऽद्यापि तद्भीति-विद्रुतानां द्रुमालिषु।
[१]अलकाश्चोलकान्तानां कर्पूरतिलकाङ्किताः ॥२७॥

---

[१] अलिका इत्यपि पाठभेदः।

अन्वयः

द्रुमालिषु तद्भीतिविद्रुतानां चोलकान्तानाम् अलकाः अद्यापि कर्पूरतिलकाङ्किताः दृश्यन्ते ।

व्याख्या

द्रुमाणां वृक्षाणामालयः पंक्तयस्तासु द्रुमाणामालयो येषु वा वनेषु तस्माद्राजकुमाराद्भीतिर्भयं तया विद्रुतानां पलायितानां, चोलकान्तानां चोलदेशस्थकामिनीनामलकाः केशपाशा अद्यापि कर्पूरेण कर्पूरमिश्रितेन तिलकेनाऽङ्किताः शोभिता दृश्यन्ते इति विरोधः । पक्षे कर्पूरनामकतिलकनामकवृक्षैरङ्किताः सम्बद्धा इति परिहारः । पतिमरणात्तद्भीतिविद्रुतानां स्त्रीणां अलकाः कर्पूरतिलकेनाऽङ्किता दृश्यन्त इति विरोधस्तत्परिहारस्तु कर्पूरतिलकवृक्षेषु व्यासक्ता अलका इति भावः । अत्र श्लेषानुप्राणितो विरोधाभासालङ्कारः ।

भाषा

उस राजा के भय से, वृक्षों के समूहों में से या जंगलों में से भागने वाली चोल देश की नारियों के केश आज भी कर्पूरमिश्रित तिलक से शोभित दिखाई देते हैं। विधवा होकर, भागने वाली स्त्रियों के केश में तिलक, इस विरोध के दूर करने के लिये उन स्त्रियों के कर्पूर और तिलक के वृक्षों से फंसे हुए केश दिखाई देते हैं ऐसा अर्थ करने से विरोध दूर हो जाता है ।

क्षणाद्विगलितानर्घ्य-पदार्था द्रविडक्षितेः ।
प्राकारसूत्रशेषाभूत् काञ्ची तद्बाहुकम्पिता ॥२८॥

अन्वयः

तद्बाहुकम्पिता क्षणात् विगलितानर्घ्यपदार्था द्रविडक्षितेः काञ्ची प्राकारसूत्रशेषा अभूत् ।

व्याख्या

तस्य विक्रमाङ्कदेवस्य बाहुना भुजेन कम्पिता धर्षिता पक्षे संचालिता क्षणात् क्षणमात्रादेव विगलिता नष्टा पक्षे पतिता अनर्घ्यपदार्था बहुमूल्यरत्नादिपदार्था यस्याः सा द्रविडक्षितेर्द्रविडराजपृथिव्याः काञ्ची तन्नामनगरी पक्षे रशना प्राकारस्य प्राचीरस्य 'प्राकारो वरणः सालः प्राचीरं प्रांततो वृतिः'

इत्यमरः। सूत्रं भग्नावशेषचिह्नरूपरेखैव शेषोऽवशिष्टांशो यस्याः सा पक्षे प्रकर्षेणऽऽकारे सूत्रमेव शेषो यस्याः साऽभूत्। श्लेषानुप्राणितः समासोक्तिरलङ्कारः।

भाषा

उस राजकुमार के भुजबल से त्रस्त और क्षणभर में जिसके बहुमूल्य रत्न नष्ट हो गए हैं ऐसी द्रविड राजा की राजधानी काञ्ची प्राकार (बाहरी दीवाल) के नष्ट हो जाने से उसके चिन्ह की लकीर मात्र शेष रह गई हो ऐसी हो गई थी। पक्ष में उस राजकुमार के बाहु से हिलाई गई द्रविड देश रूपी कामिनी की करधनी, हिलाने से बहुमूल्य रत्नों के गिर पड़ने के कारण, आकार में डोरा मात्र शेष रह गया हो, ऐसी हो गई थी।

तेनानास्पदमात्मीय—प्रतापोत्कर्षरागिणा।
चक्रेऽनङ्गप्रतापस्य [१]वेङ्गिभूपाङ्गनाजनः ॥२६॥

अन्वयः

आत्मीयप्रतापोत्कर्षरागिणा तेन वेङ्गिभूपाङ्गनाजनः अनङ्गप्रतापस्य अनास्पदं चक्रे।

व्याख्या

आत्मनोऽयमित्यात्मीयः प्रतापः प्रभावस्तस्योत्कर्षोऽभिवृद्धिस्तस्य रागिणाऽभिलाषुकेण तेन राजकुमारेण वेङ्गिभूपस्याऽङ्गनाजनो रमणीसमूहोऽनङ्गप्रतापस्य कामदेवप्रभावस्याऽनास्पदमभाजनं चक्रे कृतः। वेङ्गिभूपस्य पराजयादापत्तिसागरमग्नास्तदङ्गनाः कामसम्बन्धिविलासरतिक्रीडादीन् सकलान् सुखान्विस्मृतवत्य इति भावः। अथवा पतिमरणात्तासां कामक्रीडा सर्वथा लुप्तेति भावः।

भाषा

अपने प्रताप का उत्कर्ष चाहने वाले उस राजकुमार ने वेङ्गिभूपाल की रानियों को कामदेव के प्रताप का अस्थान कर दिया। अर्थात् राजा के मर जाने से उनमें काम वासना लुप्त हो गई।

---

[१] वेंगिदेशो भारतस्य दक्षिणपूर्वे गोदावरीकृष्णानद्योर्मध्ये विद्यमान आसीत्।

आक्रान्तरिपुचक्रेण [१]चक्रकोटपतेः परम् ।
लिखिताश्चित्रशालासु तेनामुच्यन्त दन्तिनः ॥३०॥

अन्वयः

आक्रान्तरिपुचक्रेण तेन चक्रकोटपतेः चित्रशालासु लिखिताः दन्तिनः परम् अमुच्यन्त ।

व्याख्या

आक्रान्तं समाक्रान्तं विजितमित्यर्थः । रिपुचक्रं शत्रुचक्रवालं येन तेन विजितारिसमूहेन तेन विक्रमाङ्कदेवेन चक्रकोटनामकस्थानस्य पतिः स्वामी तस्य चक्रकोटदेशाधिपस्य चित्राणां शालासु गृहेषु चित्रमन्दिरेषु लिखिताश्चित्रिता दन्तिनो गजाः परं केवलममुच्यन्त मुक्ताः । चक्रकोटपतेस्सकला गजाः स्वायत्तीकृता इत्यर्थः । अत्र केवलं चित्रलिखिता गजा एव त्यक्ता इत्युक्त्या सर्वाऽपि गजसेना स्वायत्तीकृतेति प्रतीत्याऽर्थापत्तिरलङ्कारः ।

भाषा

शत्रु समूह को जीतने वाले उस राजकुमार विक्रमाङ्कदेव ने चक्रकोट के राजा की चित्रशाला में चित्रित हाथियों को ही केवल छोड़ दिया अर्थात् उसके सब हाथी ले लिये ।

कृतकार्यः परावृत्य कियत्यप्यध्वनि स्थितः ।
अथ गम्यत्वमरतेरकस्मादेव सोऽगमत् ॥३१॥

अन्वयः

अथ कृतकार्यः सः परावृत्य कियति अध्वनि अपि स्थितः (सन्) अकस्मात् एव अरतेः गम्यत्वम् अगमत् ।

व्याख्या

अथ दिग्विजयानन्तरं कृतं कार्यं दिग्विजयरूपकृत्यं येन सः सम्पादितोद्देश्यः

---

[१] वेंगिदेशस्योत्तरतश्चक्रकोटनगरमासीत् । एतत्प्रदेशे हस्तिनामधिकता 'आइने अकबरी' पुस्तकेनाऽपि समर्थ्यते ।

स विक्रमाङ्कदेवः परावृत्य निवृत्य कियत्यध्वन्यपि मार्गेऽपि स्थितस्सन् विजय-प्रदेशात्परावृत्य स्वदेशमार्गे कियद्दूरं समागतोऽपि सन्नकस्मादेवाऽतर्कितोपनत-मरतेरुद्वेगस्य गम्यत्वं पात्रत्वमगमत् प्राप्तः ।

भाषा

बाद में दिग्विजय का कार्य सम्पन्न कर लौटते हुए मार्ग में कुछ दूर भी आजाने पर, वह अकस्मात् अशान्ति का पात्र बन गया अर्थात् वह उद्विग्न हो उठा ।

स शङ्कातङ्कमासाद्य स्फुरणाद्वामचक्षुषः ।
श्रेयोऽस्तु तातपादाना-मिति सास्रमवोचत ॥३२॥

अन्वयः

सः वामचक्षुषः स्फुरणात् शङ्कातङ्कम् आसाद्य तातपादानां श्रेयः अस्तु इति सास्रम् अवोचत ।

व्याख्या

स राजकुमारो वामं दक्षिणेतरं चक्षुर्नयनं तस्य वामनयनस्य स्फुरणाच्च-लनात् शङ्कायाः सन्देहस्याऽऽतङ्कं भयमासाद्य प्राप्य तातपादानां पूज्यचरणानां (मम पितुः) श्रेयः कल्याणमस्त्विति वचोऽस्रेणाऽश्रुणा सहितं यथास्यात्तथाऽवोच-तोक्तवान् ।

भाषा

बाईं आँख के फड़कने से सन्देह से भयभीत होकर उसने आँसू बहाते हुए पिता जी का शुभ हो, ऐसा कहा ।

अदृश्यैः कैश्चिदागत्य चिन्तया शून्यचेतसः ।
तस्यामङ्गलवार्तेव कापि कर्णे न्यधीयत ॥३३॥

अन्वयः

अदृश्यैः कैश्चित् इव आगत्य चिन्तया शून्यचेतसः तस्य कर्णे का अपि अमङ्गलवार्ता न्यधीयत ।

व्याख्या

अदृश्यैरदृष्टिगोचरैः कैश्चिदविवाऽनिर्दिष्टनामकैरिवाऽऽगत्य संप्राप्य चिन्तयाऽऽ-ध्यानेन 'स्याच्चिन्तास्मृतिराध्यानम्' इत्यमरः। शून्यं चेतश्चित्तं यस्य तस्य विवेकरहितहृदयस्य 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। तस्य विक्रमाङ्कदेवस्य कर्णे श्रोत्रे काऽपि काचित् विचित्राऽप्यमङ्गलवार्ताऽशुभवृत्तान्तो न्यधीयत स्थापिता कथितेत्यर्थः।

भाषा

प्रत्यक्ष पहिचान में न आने वाले लोगों के समान कुछ लोगों ने मानों आकर चिन्ता से शून्य हृदय उस राजपुत्र के कान में कोई अमङ्गल बात कही।

शुभाशुभानि वस्तूनि संमुखानि शरीरिणाम्।
प्रतिबिम्बमिवायान्ति पूर्वमेवान्तरात्मनि ॥३४॥

अन्वयः

संमुखानि शुभाशुभानि वस्तूनि शरीरिणाम् अन्तरात्मनि प्रतिबिम्बम् इव पूर्वम् एव आयान्ति।

व्याख्या

संमुखानि संमुखमागतानि सन्निकटवर्तीनीत्यर्थः। शुभं मङ्गल्यमशुभमङ्गल्यं तानि मङ्गल्यामङ्गल्यानि वस्तूनि घटनाः शरीरिणां प्राणिनामन्तरात्मानि प्रति-बिम्बमिव प्रतिच्छायमिव प्रागेवाऽऽयान्ति पूर्वमेव समागच्छन्ति। भवितव्यतायाः परिज्ञानं प्राणिनामन्तः प्रथममेव सूचितम्भवतीति भावः।

भाषा

निकट भविष्य में होने वाली शुभ और अशुभ घटनाएँ प्राणियों के हृदय में प्रतिबिम्ब के समान पहिले ही प्रतिबिम्बत हो जाती हैं।

अवगाहितनिःशेष—शास्त्रनिर्मलधीरपि।
अकारणमसौ प्राप्तः कुमारो यदधीरताम् ॥३५॥

अन्वयः

यत् अवगाहितनिःशेषशास्त्रनिर्मलधीः अपि असौ कुमारः अकारणम् अधीरतां प्राप्तः ।

व्याख्या

यद्यस्मात् कारणादवगाहितानि विलोडितानि निःशेषशास्त्राणि सकलागमास्तैर्निर्मला विशदा धीर्बुद्धिर्यस्य सः 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । निर्मथितसकलशास्त्रतत्वतया विशदप्रज्ञोऽपि असौ कुमारो विक्रमाङ्कदेवोऽकारणं कारणरहितं यथा स्यात्तथाऽधीरतां चाञ्चल्यं प्राप्तः । सचिन्तो भूदित्यर्थः । यदित्यनेन पूर्वश्लोकार्थः सम्बद्ध्यते ।

भाषा

इस कारण से सम्पूर्ण शास्त्रों के अध्ययन से निर्मल बुद्धि वाला भी वह राजकुमार निष्कारण ही अधीर हो उठा ।

सर्वस्वदानमालोच्य दुर्निमित्तप्रशान्तये ।
अप्रयाणमसौ चक्रे ततः कृष्णानदीतटे ॥३६॥

अन्वयः

ततः असौ दुर्निमित्तप्रशान्तये सर्वस्वदानम् आलोच्य कृष्णानदीतटे अप्रयाणं चक्रे ।

व्याख्या

ततस्तदनन्तरमसौ प्रसिद्धः कुमारो दुर्निमित्तस्य वामाक्षिस्फुरणरूपदुश्शकुनस्य प्रशान्तये निवारणाय सर्वस्वस्य विजयापहृतानां सकलवस्तूनां दानं पात्रेषु वितरणं समालोच्य निर्धार्य कृष्णानद्यास्तटे तीरेऽप्रयाणमवस्थानं चक्रे । तत्रैव स्थितोऽभूदित्यर्थः ।

भाषा

इसके अनन्तर वह (बाँई आँख का फड़कना रूप) बुरे शकुन की शान्ति के लिये, विजय में प्राप्त सब वस्तुओं का दान कर देने का निश्चय कर, कृष्णा नदी के तट पर रुक गया ।

स तत्क्षणात्परिम्लान-मुखं संमुखपातिनम् ।
ददर्श राजधानीतः प्रधानं दूतमागतम् ॥३७॥

अन्वयः

सः तत्क्षणात् राजधानीतः आगतं परिम्लानमुखं संमुखपातिनं प्रधानं दूतं ददर्श ।

व्याख्या

स विक्रमाङ्कदेवस्तत्क्षणात् तस्मिन्नेव समये राजधानीतः कल्याणपुरत आगतं प्राप्तं परिम्लानं ग्लानिपरीतं मुखमाननं यस्य तं चिन्तितवदनमित्यर्थः । संमुखमग्रे पतति समागच्छतीति संमुखपाती तं संमुखमागच्छन्तं प्रधानं विशिष्टं दूतं संदेशहरं 'स्यात्संदेशहरो दूतः' इत्यमरः । ददर्श दृष्टवान् ।

भाषा

उसी समय उसने कल्याणपुर से आए हुए उदास मुख वाले सामने उपस्थित मुख्य दूत को देखा ।

अथ कुलकेन दूतं वर्णयति कविः—

अप्रियावेदने जिह्वा-मवगम्य पराङ्मुखीम् ।
कथयन्तमिवानर्थं श्वासैरत्यर्थमायतैः ॥३८॥

अन्वयः

अप्रियावेदने जिह्वां पराङ्मुखीम् अवगम्य अत्यर्थम् आयतैः श्वासैः अनर्थं कथयन्तम् इव (तं राजनन्दनः पप्रच्छ ।) इति द्विचत्वारिंशत्तमन श्लोकेन सम्बन्धः ।

व्याख्या

अप्रियस्याऽशुभवृत्तान्तस्याऽऽवेदने कथने जिह्वां रसनां पराङ्मुखीं विमुखीमनुद्युक्तामित्यर्थः । अवगम्य ज्ञात्वाऽत्यर्थमत्यन्तमायतैर्दीर्घैः श्वासैः श्वसनैः करणैरनर्थमनिष्टं कथयन्तमिव विज्ञापयन्तमिव (राजनन्दनः पप्रच्छेति द्विचत्वारिंशत्तमश्लोकेन सम्बन्धः) । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

अप्रिय बात कहने को जीभ प्रस्तुत नहीं है ऐसा समझ कर मानों जोर २ से सांस भर कर अनिष्ट बात कहने वाले (दूत को राजपुत्र ने पूछा।) यह ४२ वे श्लोक से सम्बन्धित है।

निर्यद्भिरतिमात्रोष्णै-र्मुखनिश्वासवायुभिः।
निवेदयन्तं दुर्वार्ता-वज्रानलमुपस्थितम् ॥३९॥

अन्वयः

निर्यद्भिः अतिमात्रोष्णैः मुखनिश्वासवायुभिः उपस्थितं दुर्वार्तावज्रानलं निवेदयन्तम् (दूतं पप्रच्छेत्यन्वयः।)

व्याख्या

निर्यद्भिर्निगच्छद्भिरतिमात्रोष्णैः प्रकामोष्णैर्मुखस्य वदनस्य निश्वासवायुभिः श्वसनपवनैरुपस्थितं विद्यमानं दुर्वार्ताऽशुभवृत्तान्त एव वज्राग्निः कुलिशवन्हिस्तं निवेदयन्तं प्रकटयन्तम् (दूतं पप्रच्छेति सम्बन्धः।) मुखनिश्वासवायुकरणकदुर्वार्तारूपवज्राग्निप्रकटनक्रियाया दूते उत्प्रेक्षितत्वादुत्प्रेक्षा रूपकानुप्राणिता।

भाषा

विद्यमान दुर्वाता रूपी वज्राग्नि को अपने मुख से हाँपने में निकलने वाले अत्यन्त गरम २ श्वास रूपी वायु से प्रकट करने वाले (राजदूत को पूछा।) अग्नि के संपर्ग से श्वासवायू का गरम हो जाना स्वाभाविक है।

ककुभां भर्तृभक्तानां पृच्छन्तीनां नृपस्थितिम्।
विद्रवन्तमिवाभान्तमत्यन्तत्वरितैः पदैः ॥४०॥

अन्वयः

नृपस्थितिं पृच्छन्तीनां भर्तृभक्तानां ककुभाम् अत्यन्तत्वरितैः पदैः विद्रवन्तम् इव आभान्तम् (दूतं पप्रच्छ।)

व्याख्या

नृपस्य राज्ञः स्थितिमवस्थां पच्छन्तीनां जिज्ञासमानानां भर्तभक्तानां स्वामि-

स्वरूपराजभक्तानां ककुभां दिशां दिशो दिगङ्गनाः प्रतीत्यर्थः। 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। अत्यन्तत्वरितैरत्यन्तशीघ्रगामिभिः पदैश्चरणैर्विद्रवन्तमिव धावन्तमिवाऽऽभान्तं भासमानम् (दूतं पप्रच्छ।)

भाषा

राजा की खबर पूछने वाली, अपने स्वामी की भक्त दिशाओं की तरफ़ अत्यन्त वेग से भाग चलने वाले (दूत को देखा।)

अनर्थवार्तावहन—महापातकदूषितम्।
गणयित्वेव धैर्येण सर्वथापि निराकृतम्॥४१॥

अन्वयः

अनर्थवार्तावहनमहापातकदूषितं गणयित्वा इव सर्वथा अपि धैर्येण निराकृतं (दूतं पप्रच्छ।)

व्याख्या

अनर्थवार्तया अनिष्टवृत्तान्तस्य वहनेन प्रापणेन धारणेन वा यन्महापातकं महापापं तेन दूषितं कलुषितहृदयं गणयित्वेव विदित्वेव धैर्येण धीरतया कर्त्रा सर्वथाऽपि सर्वप्रकारेणाऽपि निराकृतं परित्यक्तं (दूतं पप्रच्छ।) अनिष्टवृत्तान्तधारण-महापापमेनं विगणय्य धैर्येणाऽपि त्यक्तसङ्गमित्यर्थः। अत्रोत्प्रेक्षालङ्कारः

भाषा

अशुभ वार्ता को धारण करने के पाप से मानों दूषित समझ कर धैर्य से एकदम परित्यक्त अर्थात् अधीर (दूतको पूछा।)।

कृतप्रणाममासन्नमथ तं राजनन्दनः।
कुशलं तातपादानामिति पप्रच्छ वत्सलः॥४२॥

अन्वयः

अथ वत्सलः राजनन्दनः आसन्नं कृतप्रणामं तं तातपादानां कुशलम् इति पप्रच्छ।

व्याख्या

अथाऽनन्तरं वत्सलः पितृविषयकस्नेहवान् राजनन्दनो राजकुमार आसन्नं समीपागतं कृतप्रणामं कृतनमस्कारं तं दूतं तातपादानां मम पितृचरणानां कुशलं क्षेममस्तीति 'कुशलं क्षेममस्त्रियाम्' इत्यमरः । पप्रच्छ पृष्टवान् ।

भाषा

इसके अनन्तर पास में आकर प्रणाम करने वाले उस दूत को पिता का प्रेम रखने वाले राजपुत्र ने पिता जी कुशल तो हैं, ऐसा पूछा ।

पञ्चभिः कुलकं, पञ्चश्लोकात्मकं कुलक[1]मत्र समाप्तमित्यर्थः ।

उपविश्य शनैः पार्श्वे स निरुत्सा[2]हया गिरा ।
कथयामास नासाग्र–विलुठद्बाष्पशीकरः ॥४३॥

अन्वयः

सः पार्श्वे शनैः उपविश्य नासाग्रविलुठद्बाष्पशीकरः (सन्) निरुत्साहया गिरा कथयामास ।

व्याख्या

स दूतः पार्श्वे समीपे शनैर्मन्दमुपविश्य स्थित्वा नासाग्रे नासिकाग्रे विलुठन्तो वर्तमाना वाष्पशीकरा अश्रुबिन्दवो यस्यैवं भूतस्सन् 'शीकरोऽम्बुकणाः स्मृताः' इत्यमरः । निरुत्साहयोत्साहशून्यया गिरा वाचा 'गीर्वाग्वाणी सरस्वती' इत्यमरः । कथयामास उवाच ।

भाषा

वह दूत धीरे से पास में बैठ कर, नासिका के अग्रभाग में आँसू की बूंद से युक्त होकर अनुत्साहित वाणी से बोलने लगा ।

विधेहि दृढमात्मानं मावधीरय धीरताम् ।
कुमार व्यापिपर्त्येष दुर्वाताप्रलयाम्बुदः ॥४४॥

---

[1] छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् । द्वाभ्यान्तु युग्मकं संदानितकं त्रिभिरिष्यते । कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।

[2] निरुत्सवयेत्यपि पाठः

अन्वयः

हे कुमार आत्मानं दृढं विधेहि धीरतां मा अवधीरय एषः दुर्वार्ता-प्रलयाम्बुदः व्यापिपर्ति ।

व्याख्या

हे कुमार ! हे राजकुमार ! विक्रमाङ्कदेव ! आत्मानं स्वं दृढं निश्चलं विधेहि कुरु । धीरतां धैर्यं माऽवधीरय मा तिरस्कुरु । एष अग्रे कथनीयो दुर्वार्तारूपोऽमङ्गल्यवृत्तान्तरूपः प्रलयाम्बुदः प्रलयकालिकमेघो व्यापिपर्ति व्यापारं करोति । प्रलयकालिकमेघजन्यकष्टसमां कष्टप्रदां वार्तां श्रोतुं धैर्ययुक्तो भवेति भावः ।

भाषा

हे राजकुमार ! विक्रमाङ्कदेव ! अपने को कड़ा बनालो । धैर्य मत छोड़ो । आगे कहा जाने वाला बुरा वृत्तान्त रूपी प्रलयकाल का मेघ अब व्यापार करने जा रहा है । अर्थात् प्रलयकाल के मेघ से होने वाले कष्ट के समान कष्ट देने वाली दुःखद वार्ता अब मैं सुनाने जा रहा हूँ । इसलिये दृढ़ होकर धैर्य से सुनो ।

आपाण्डुपाण्ड्यमालोल-चोलमाक्रान्तसिंहलम् ।
देवस्त्वद्विजयं श्रुत्वा भेजे सुखमयीं स्थितिम् ॥४५॥

अन्वयः

देवः आपाण्डुपाण्ड्यम् आलोलचोलम् आक्रान्तसिंहलं त्वद्विजयं श्रुत्वा सुखमयीं स्थितिं भेजे ।

व्याख्या

देवो राजाऽऽहवमल्लदेव आपाण्डुरासमन्तात्पाण्डुः पाण्डुरः 'हरिणः पाण्डुरः पाण्डुः' इत्यमरः । पाण्ड्यः पाण्ड्यनृपो येन तमासमन्ताल्लोलश्चलश्चोलदेशभूपो येन तमाक्रान्तः सिंहलः सिंहलद्वीपो येन तं तव भवतो विजयं दिग्विजयं श्रुत्वाऽऽ-कर्ण्य सुखमयीं सुखैकानुभवभूतां स्थितिमवस्थां भेजे प्राप ।

भाषा

राजा आहवमल्ल देव ने पाण्ड्राजा को निस्तेज करने वाले चोलराजा को घबड़हट में डालने वाले और सीलोन के राजा को परास्त करने वाले तुम्हारे विजय को सुन कर सुखमय अवस्था का अनुभव किया। अर्थात् राजा को अत्यन्त हर्ष हुआ।

अकाण्डे विधि चाण्डालस्तस्मै दाहज्वरं ददौ।
न कैश्चिदपि लभ्यन्ते निष्कम्पाः सुखसंपदः ॥४६॥

अन्वयः

अकाण्डे विधिचाण्डालः तस्मै दाहज्वरं ददौ। कैश्चित् अपि निष्कम्पाः सुखसम्पदः न लभ्यन्ते।

व्याख्या

अकाण्डेऽनवसरे विधिर्ब्रम्हैव चाण्डालो दुष्टकार्यकर्ता तस्मै राज्ञे दाहज्वरं[१] ज्वरविशेषं महासंतापकरं ज्वरमित्यर्थः। ददौ दत्तवान्। विधिवशादसमय एव स दाहज्वराक्रान्तोऽभूदित्यर्थः। कैश्चिदपि भाग्यवद्भिर्निष्कम्पाः कम्पेन चाञ्चल्येन रहिता निष्कम्पा विघ्नरहिताः सुखसम्पदः सुखसम्पत्तयो न लभ्यन्ते न प्राप्यन्ते। पूर्वार्द्धस्योत्तरार्द्धेन समर्थनादर्थान्तरन्यासालङ्कारः।

भाषा

बेमौके ही चाण्डाल विधि ने राजा को दाहज्वर से पीड़ित कर दिया। कोई भी मनुष्य विघ्न रहित सुखसम्पत्ति को नहीं प्राप्त कर सकते।

अपरिश्रान्तसन्तापश्चन्दनालेपनेन सः।
त्वदङ्कपालीपेयूषमाचकाङ्क्ष पुनः पुनः ॥४७॥

[१] वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः।
कण्ठोष्ठमुखनासानां पाकः स्वेदश्च जायते॥
प्रलापो वक्त्रकटुता मूर्च्छादाहो मदस्तृषा।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च॥
इति दाहज्वरलक्षणम्। (चक्रपाणिदत्तोक्तम्)

अन्वयः

सः चन्दनालेपेन अपरिश्रान्तसन्तापः सन् त्वदङ्कपालीपेयूषं पुनः पुनः आचकाङ्क्ष ।

व्याख्या

स राजा दाहज्वरे संजाते सति चन्दनस्य श्रीखण्डस्याऽऽलेपेनाऽङ्गेषु सर्वतः प्रलेपेन न परिश्रान्तः शान्तिमुपगतः संतापो दाहो यस्यैवंभूतस्सन् तव विक्रमाङ्क-देवस्याऽङ्कपाली आश्लेषः स एव पेयूषममृतं हृदयस्य शैत्यापादकत्वात्त्वत्परि-रम्भणरूपसुधां पुनः पुनः मुहुराचकाङक्षाऽभिलषितवान् ।

भाषा

दाहज्वर से पीड़ित वह राजा सर्वाङ्ग में चन्दन के लेप से भी शान्ति न प्राप्त कर तुम्हारे आलिङ्गन रूप अमृत की कामना करने लगा ।

क्रमादर्धप्रबुद्धानि शिशिक्षे वीक्षितानि सः ।
वासवस्येव दूतेषु कुर्वन्गजनिमीलिकाम् ॥४८॥

अन्वयः

सः वासवस्य दूतेषु गजनिमीलिकां कुर्वन् इव क्रमात् अर्धप्रबुद्धानि वीक्षितानि शिशिक्षे ।

व्याख्या

स राजा वासवस्येन्द्रस्य 'वासवो वृत्रहा वृषा' इत्यमरः । दूतेषु संदेश-हारकेषु स्वर्गदूतेष्वित्यर्थः । गजस्य हस्तिनो निमीलिकेव निमीलेव निमीलिका तां हस्तिसदृशदृग्व्यापारं कुर्वन्निव विस्तारयन्निवोपेक्षां कुर्वन्निवेत्यर्थः । क्रमात् क्रमशोऽर्धप्रबुद्धान्यर्धविकसितानि वीक्षितानि दर्शनव्यापारान् शिशिक्षे कर्तुमारेभे । शिवसायुज्येच्छुः स नृपः स्वर्गदूतानपि न बहुमन्यते स्म । रोगस्याऽसाध्यत्वान्म-रणकालिकार्धनिद्रितार्धप्रबुद्धनेत्रेऽधारयदिति भावः ।

भाषा

वह राजा मानों इन्द्र के दूतों पर अर्थात् स्वर्गदूतों के उसे बुलाने आने पर हाथी की आँखों के समान आँखें बनाता हुआ, अधखुली आँखें ही रखने लगा ।

शिवसायुज्य की इच्छा रखने वाले उस राजा को मानों स्वर्गदूतों का कोई महत्व ही नहीं है ऐसा प्रकट करते हुए वह मरणकालिक अधखुली आंखें रखने लगा।

अन्तर्दाह-मिवालोक्य प्रियां कीर्तिं विनिर्गताम् ।
दर्शयन्दशनज्योत्स्ना-मथोवाच स मन्त्रिणः ॥४६॥

अन्वयः

अथ सः मन्त्रिणः अन्तर्दाहम् आलोक्य विनिर्गतां प्रियां कीर्तिं इव दशनज्योत्स्नां दर्शयन् उवाच ।

व्याख्या

अथाऽनन्तरं स राजा मन्त्रिण आमात्यान्प्रति मन्त्रिणामित्यर्थः अन्तर्दाहमन्तः सन्तापमालोक्य दृष्ट्वा विनिर्गतां बहिर्निःसृतां प्रियां हृद्यां कीर्तिमिव यश इव शुक्लत्वाद्दशनज्योत्स्नां दन्तचन्द्रिकां 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः। दर्शयन् प्रकटयन्नुवाच जगाद ।

भाषा

इसके बाद वह राजा मन्त्रियों को घबड़ाया हुआ देख कर, बाहर निकलने वाली अपनी (सफ़ेद) प्रिय कीर्ति के समान दन्तकान्ति को फैलाते हुए कहने लगा ।

क्षिप्ता मुकुटमाणिक्य-पट्टिकासु महीभुजाम् ।
टङ्केनेव प्रतापेन निजाज्ञाक्षरमालिका ॥५०॥

अन्वयः

महीभुजां मुकुटमाणिक्यपट्टिकासु प्रतापेन टङ्केन इव निजाज्ञाक्षरमालिका क्षिप्ता ।

व्याख्या

महीं भुञ्जन्ति ते महीभुजस्तेषां राज्ञां मुकुटानां किरीटानां माणिक्यान्येव-मणय एव पट्टिकास्तासु प्रतापेन प्रभावेण टङ्केनेव पाषाणदारणेनेव 'टङ्कः पाषाणदारणः' इत्यमरः। निजस्य स्वस्याऽऽज्ञानामादेशानामक्षराणि तद्बोधक-

वर्णास्तेषां मालिका परम्परा क्षिप्तोत्कीर्णा। सर्वेऽपि राजानो ममाऽऽज्ञापालका मद्वशीभूता इति भावः। प्रतापे टङ्कत्वोत्प्रेक्षणादुत्प्रेक्षा।

भाषा

मैंने अपने टाँकी के समान प्रताप से राजाओं के मुकुट के माणिक्य रूपी सिल्लियों पर अपनी आज्ञाओं के अक्षर खोद दिये थे। अर्थात् सब राजा मेरी आज्ञाओं का पालन करते थे और मेरे वश में थे।

दिग्भित्तयः शरश्रेणि-कृतच्छिद्र[illegible]ः।
स्वयशोराजहंसस्य प्रापिताः पञ्जरश्रियम् ॥५१॥

अन्वयः

शरश्रेणिकृतच्छिद्रपरम्पराः दिग्भित्तयः स्वयशोराजहंसस्य पञ्जरश्रियं प्रापिताः।

व्याख्या

शराणां बाणानां श्रेणिभिः परम्पराभिः कृताश्छिद्राणां बिलानां परम्पराः पंक्तयो यासु ता दिशश एव भित्तयो दिग्भित्तयः स्वं स्वकीयं यश एव कीर्तिरेव राजहंसः शुभ्रवर्णत्वात् तस्य पञ्जरस्य श्रियं शोभां प्रापिताः गमिताः। पञ्जराणि-च्छिद्रयुक्तान्येव भवन्ति। सर्वदिक्षु शरैश्शत्रून् हत्वा अतएव सर्वदिक्षु शरैश्छिद्रं कृत्वा संप्राप्तयशोराजहंसस्य दिक्पञ्जरं निर्मितमिति दिग्भित्तिभिः पञ्जरशोभा समनुप्राप्तेति भावः। यशसि राजहंसाभेदारोपाद्रूपकम्।

भाषा

मैंने बाणों को बरसा कर छिद्र मय की हुई दिशा रूपी भीतों को अपने यश रूपी राजहंस के लिये पिंजड़े की शोभा को प्राप्त कराया। अर्थात् बाणों को बरसा कर सम्पूर्ण दिशाओं के राजाओं को जीत कर सर्वत्र अपनी कीर्त्ति फैला दी।

अद[illegible] भूमिर्विमुद्राभिर्विभूतिभिः।
नीताः कुलवधूसाम्यं साधूनां वेश्मसु श्रियः ॥५२॥

अन्वयः

विमुद्राभिः विभूतिभिः भूमिः अदरिद्रीकृता। साधूनां वेश्मसु श्रियः कुलवधूसाम्यं नीताः।

व्याख्या

विमुद्राभिरनन्ताभिर्विभूतिभिः ऐश्वर्योपायैर्भूमिरदरिद्रीकृता समृद्धा कृता। साधूनां सज्जनानां वेश्मसु गृहेषु 'गृहं गेहोदवसितं वेश्म सद्म निकेतनम्' इत्यमरः। श्रियो लक्ष्म्यः कुलवधूभिः प्रशस्तकुलोत्पन्नरमणीभिस्साम्यं समानतां नीताः प्रापिताः। यथा कुलवधूः स्थायित्वं निश्चलत्त्वं च भजते तथैव सतां गेहेषु लक्ष्म्याः स्थायित्वं निश्चलत्वञ्च प्रतिपादितमिति भावः।

भाषा

मैंने दान देकर अपरिमित सम्पत्ति के साधनों से पृथ्वी की कमी दूर कर दी। सज्जनों के घर में मैंने लक्ष्मी को कुलवधू के समान स्थायी और निश्चल कर दिया।

प्राप्तः कोदण्डपाण्डित्य-जातलक्ष्मीसमागमः।
काकुत्स्थनिबिडस्थामा सूनुर्विक्रमलाञ्छनः ॥५३॥

अन्वयः

कोदण्डपाण्डित्यजातलक्ष्मीसमागमः काकुत्स्थनिबिडस्थामा विक्रमलाञ्छनः सूनुः (मया) प्राप्तः।

व्याख्या

कोदण्डे धनुषि लक्षणया तद्विद्यायां 'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमरः। पाण्डित्येन प्रावीण्येन जातः प्राप्तो लक्ष्म्या सह समागमो मेलनं यस्य सः, काकुत्स्थस्येव रामचन्द्रस्येव निबिडं घनमधिकमित्यर्थः। स्थाम पराक्रमो यस्य सः, 'द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च। शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता' इत्यमरः। विक्रमः पराक्रमो लाञ्छनं लक्षणं चिह्नं वा यस्य स विक्रमाङ्कदेवो नाम सूनुः पुत्रो मया प्राप्तः।

भाषा

मैंने धनुर्विद्या की पण्डिताई से लक्ष्मी का समागम प्राप्त करने वाला अर्थात

धनुष चला कर सब राजाओं को जीत कर लक्ष्मी प्राप्त करने वाला श्री रामचन्द्र के समान अत्यधिक पराक्रमी, विक्रम चिह्न वाला अर्थात् विक्रमाङ्कदेव नाम का पुत्र पाया है ।

तेनैव युवराजत्वं समारोप्य यशस्विना ।
एष साम्राज्यभारस्य वोढा सोमेश्वरः कृतः ॥५४॥

अन्वयः

यशस्विना तेन एव एषः सोमेश्वरः युवराजत्वं समारोप्य साम्राज्य-भारस्य वोढा कृतः ।

व्याख्या

यशः कीर्तिर्विद्यते यस्य स यशस्वी तेन यशस्विना कीर्तिमता तेन विक्रमाङ्क-देवेन एषोऽयं सोमेश्वरो मम ज्येष्ठपुत्रः सोमदेवो युवराजत्वं युवराजपदं समारोप्य प्रतिष्ठाप्य साम्राज्यस्य भारस्तस्य सकलराज्यकार्यभारस्य वोढा धारयिता कृतः ।

भाषा

उस यशस्वी विक्रमादित्य ने ही मेरे ज्येष्ठ पुत्र सोमदेव को युवराज पद पर बैठाकर सम्पूर्ण राज्य कार्य का भार उसको सौंप दिया ।

इति मे कृतकृत्यस्य माहेश्वरशिरोमणेः ।
गिरिजानाथनगरे समारोहणमुत्सवः ॥५५॥

अन्वय

इति कृतकृत्यस्य माहेश्वरशिरोमणेः मे गिरिजानाथनगरे समारोहणम् उत्सवः (अस्ति) ।

व्याख्या

इतीत्थं कृतानि साधितानि कृत्यानि सर्वकार्याणि येन स तस्य कृतकृत्यस्य सम्पादितसांसारिकसकलकृत्यस्य महेश्वरस्य शिवस्येमे इति माहेश्वराः शङ्कर-भक्तास्तेषां शिरोमणिर्मूर्धन्यस्तस्य मे मम गिरिजायाः पार्वत्या नाथस्य शिवस्य

पुरे शिवलोके कैलासे समारोहणं गमनमुत्सव आनन्दोऽस्ति। कृतकृत्यस्य मेऽधुना शिवलोकप्राप्तिः प्रभूतप्रमोदावहेति भावः।

भाषा

इस प्रकार सांसारिक समस्त कार्यों को सफलता पूर्वक सम्पादन करने वाले और शङ्कर के भक्त शिरोमणि, मेरा, पार्वतीपति महादेव की कैलास नगरी में जाना, उत्सव है।

आत्मानमुन्मदद्वाःस्थ—गलहस्तितसेवकाः।
अगम्यमपि दैवस्य विदन्ति हतपार्थिवाः ॥५६॥

अन्वयः

उन्मदद्वाःस्थगलहस्तितसेवकाः हतपार्थिवाः आत्मानं दैवस्य अगम्यम् अपि विदन्ति।

व्याख्या

द्वारि तिष्ठन्तीति द्वाःस्था द्वारपाला उन्मदा मदोन्मत्ताश्च ते द्वास्थाश्चो-न्मदद्वास्थास्तैर्गलहस्तिता गले हस्तं दत्वा दूरं प्रापितास्सेवका राजभक्ता यैस्ते हता अज्ञानेन हताः सम्यग्ज्ञानपराङ्मुखाः पार्थिवा राजान आत्मानं स्वं दैवस्य विधेः 'विधिर्विधाने दैवे च' इत्यमरः। अगम्यमप्यविषयमपि विदन्ति जानन्ति। अज्ञानिनो राजानो मदेन दैवमपि तिरस्कुर्वन्तीति भावः।

भाषा

मदोन्मत्त दरबानों द्वारा गर्दनिया देकर राजभक्त लोगों को हटवा देने वाले अज्ञानी राजा लोग अपने को दैव से भी अगम्य समझने लगते हैं। अर्थात् दुरभिमान से दैव भी उनका कुछ बिगाड़ नहीं सकता ऐसा समझने लगते हैं।

मम शुद्धे कुले जन्म चालुक्यवसुधाभृताम्।
कियत्योऽपि गताः श्रोत्र-मैत्रीं शास्त्रार्थविप्रुषः ॥५७॥

अन्वयः

चालुक्यवसुधाभृतां शुद्धे कुले मम जन्म कियत्यः शास्त्रार्थविप्रुषः अपि श्रोत्रमैत्रीं गताः।

व्याख्या

चालुक्यस्य चालुक्यवंशस्य वसुधां पृथ्वीं बिभ्रति पालयन्तीति चालुक्यवसुधा-भृतस्तेषां चालुक्यभूपालानां शुद्धे निर्मले कुले वंशे मम जन्म जनुः । 'जनुर्जनन-जन्मानि जनिरुत्पत्तिरुद्भवः' इत्यमरः । कियत्यो वहुसंख्याताः शास्त्रार्थविप्रुषोऽपि शास्त्रार्थरूपजलविन्दवोऽपि 'पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम्' इत्य-मरः । श्रोत्रेण कर्णेन सह मैत्रीं परिचयं गताः प्राप्ताः कर्णगोचरं गता इत्यर्थः । श्रेष्ठचालुक्यवंशे जन्मना सह शास्त्रार्थोऽपि कर्णगोचरीकृत इति भावः ।

भाषा

चालुक्यवंशीय राजाओं के विशुद्ध कुल में मेरा जन्म हुआ है । शास्त्रार्थ के कितने ही छींटे मेरे कानों में पड़े हैं । अर्थात् शास्त्रार्थों का भी मैंने वहुत श्रवण किया है ।

जानामि करिकर्णान्त—चञ्चलं हतजीवितम् ।
मम नान्यत्र विश्वासः पार्वतोजीवितेश्वरात् ॥५८॥

अन्वयः

(अहं) हतजीवितं करिकर्णान्तचञ्चलं जानामि । मम पार्वतीजीविते-श्वरात् अन्यत्र विश्वासः न ।

व्याख्या

अहं हतजीवितमधमजीवनं करीणो हस्तिनः कर्णस्तस्याऽन्तः प्रान्तभागस्त-द्वच्चञ्चलमस्थिरं जानामि वेद्मि । 'क्षणभङ्गुराः प्राणाः' इति श्रुतेः । मम पार्वत्या गिरिजाया जीवितस्य जीवनस्येश्वरः शिवस्तस्मादन्यत्र स्थाने विश्वासो ममाऽऽस्था नाऽस्ति । सत्यत्वस्य स्थिरत्वस्य नित्यत्वस्य वा सत्ता शिवं विहाय नाऽन्यत्र । अतः शिवसायुज्यप्राप्तिरेव मम मुख्यमुद्देश्यमिति भावः ।

भाषा

मैं इस अधम जीवन को हाथियों के कान के प्रान्त भाग के सदृश चञ्चल समझता हूँ । मेरी पार्वतीपति शंकर को छोड़ कर अन्यत्र आस्था नहीं है । अर्थात् मैं शिवसायुज्य की कामना करता हूँ ।

उत्सङ्गे तुङ्गभद्रायास्तदेष शिवचिन्तया ।
वाञ्छाम्यहं निराकर्तुं देहग्रहविडम्बनाम् ॥५९॥

अन्वयः

तत् एषः अहं तुङ्गभद्रायाः उत्सङ्गे शिवचिन्तया देहग्रहविडम्बनां निराकर्तुं वाञ्छामि ।

व्याख्या

ततस्तस्मात्कारणात् शिवसायुज्यप्राप्तिहेतोः एषोऽहं तुङ्गभद्रायास्तुङ्गभद्रानाम्न्या नद्या उत्सङ्गेऽङ्के तटे इत्यर्थः। शिवचिन्तया शिवध्यानेन देहस्य शरीरस्य ग्रहो ग्रहणं धारणमित्यर्थः। तस्य विडम्बनामुपद्रवं जन्मग्रहणदुःखं निराकर्तुमपनेतुं वाञ्छामि समभिलषामि। शिवसायुज्येन पुनर्जन्मग्रहणदुःखं मा भवत्वित्यभिलषामीति भावः ।

भाषा

शिवसायुज्य मुक्ति प्राप्त होने के लिये मैं तुङ्गभद्रा नदी के तट पर शंकर का ध्यान करते हुए फिर से जन्म लेने के दुःख को सदा के लिये दूर कर देने की कामना रखता हूँ ।

यातोऽयमुपकाराय कायः श्रीकण्ठसेवया ।
कृतघ्नव्रतमेतस्य यत्र तत्र विसर्जनम् ॥६०॥

अन्वयः

अयं कायः श्रीकण्ठसेवया उपकाराय यातः । एतस्य यत्र तत्र विसर्जनं कृतघ्नव्रतम् ।

व्याख्या

अयं कायो देहः श्रीकण्ठस्य शिवस्य सेवया परिचर्ययोपकाराय स्वाभीष्टसिद्ध्यर्थं यातो गतः। एतस्य वपुषो यत्र तत्र तीर्थादन्यत्र विसर्जनं त्यागः कृतं घ्नन्तीति कृतघ्नाः परोपकारविस्मरणशीलास्तेषां व्रतमनुष्ठानं कार्यमित्यर्थः। कृतघ्ना एव येनाऽभीष्टसिद्धिं साधयन्ति तस्य कार्यनिष्पादनादनन्तरं तादृशं योग्यं समादरं न कुर्वन्ति। एवमेवाऽनेन देहेन शिवसेवाद्वारा मम महानुपकारो जातस्तस्मादस्य तीर्थस्थानेष्वेव परित्यागो युक्ततर इति भावः ।

भाषा

इस शरीर द्वारा शंकर की आराधना करने से मेरा बड़ा उपकार हुआ है। इसको तीर्थस्थान के अतिरिक्त अन्यत्र त्याग करना कृतघ्नता ही होगी।

तथेति वचनं राज्ञः प्रत्यपद्यन्त मन्त्रिणः।
उचिताचरणे केषां नोत्साहचतुरं मनः ॥६१॥

अन्वयः

मन्त्रिणः इति राज्ञः वचनं तथा प्रत्यपद्यन्त। केषां मनः उचिताचरणे उत्साहचतुरं न।

व्याख्या

मन्त्रिणो राजसचिवा इति पूर्वोक्तं राज्ञो नृपस्य वचनं वचः 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः। तथा येन प्रकारेण राज्ञा कथितं तेनैव प्रकारेण प्रत्यपद्यन्ताऽङ्गीचक्रुः। केषां विचारशीलानां मनुष्याणां मनश्चेत उचितस्य योग्यस्य कार्यस्याऽऽचरणे सम्पादन उत्साहचतुरं समुत्साहितं न भवति। अपि तु सर्वेषामेव। अत्राऽर्थान्तरन्यासालङ्कारः।

भाषा

मन्त्रियों ने राजा के इस वचन को तदनुसार ही स्वीकार किया। ऐसे कौन विचारशील लोग हैं जिनका मन उचित कार्य करने में उत्साहित न हो।

ततः कतिपयैरेव प्रयाणैः प्रणयिप्रियः।
तां क्षोणीपतिरद्राक्षीद् दक्षिणापथजान्हवीम् ॥६२॥

अन्वयः

ततः प्रणयिप्रियः क्षोणीपतिः कतिपयैः एव प्रयाणैः तां दक्षिणापथ-जान्हवीम् अद्राक्षीत्।

व्याख्या

ततो राजवाक्यस्य सचिवानुमोदनानन्तरं प्रणयिनां स्नेहिनां प्रियो हृद्यः क्षोण्याः पृथ्व्याः पतिरीश्वरो नृपः कतिपयैरेवाऽल्पसंख्यैरेव प्रयाणैः [illegible]-

नान्तरं गत्वा तत्र किञ्चिद्विश्रम्य पुनः प्रस्थानैस्तां दक्षिणापथस्य दक्षिणप्रदेशस्य जान्हवीं गङ्गां तुङ्गभद्रानदीमद्राक्षीद् ददर्श ।

भाषा

इसके बाद अपने प्रेमियों के प्यारे उस राजा ने मार्ग में थोड़े ही ठहराओं (पड़ावों) को देकर दक्षिणापथ की गङ्गा, तुङ्गभद्रा नदी का दर्शन किया ।

तुङ्गभद्रा नरेन्द्रेण तेनामन्यत मानिना ।
तरङ्गहस्तैरुत्क्षिप्य क्षिपन्तीवेन्द्रमन्दिरे ॥६३॥

अन्वयः

मानिना तेन नरेन्द्रेण तुङ्गभद्रा तरङ्गहस्तैः उत्क्षिप्य इन्द्रमन्दिरे क्षिपन्ती इव अमन्यत ।

व्याख्या

मानश्चित्तसमुन्नतिरस्याऽस्तीति मानी तेन मानिना 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः' इत्यमरः । तेन नरेन्द्रेणाऽऽहवमल्लदेवनृपेण तुङ्गभद्रा दक्षिणापथगङ्गा तरङ्गा वीचय एव हस्ताः करास्तैस्तरङ्गरूपकरैरुत्क्षिप्योर्ध्वं प्रक्षिप्येन्द्रस्य मन्दिरे स्वर्गे (राजानं) क्षिपन्तीव प्रापयन्तीवाऽमन्यत मेने । अत्रोत्प्रेक्षालङ्कारः । तुङ्गभद्रायां तरङ्गाभिन्नहस्तैर्जनानां स्वर्गलोकप्रापणस्य क्रियाया उत्प्रेक्षणात् ।

भाषा

उस उन्नत चित राजा ने, तुङ्गभद्रा नदी, अपने तरङ्गरूपी हाथों से मानों उसे स्वर्ग में इन्द्र के मन्दिर में उछाल रही हो, ऐसा समझा ।

उद्दण्डा तेन डिण्डीर-पिण्डपङ्क्तिरदृश्यत ।
विमानहंसमालेव प्रहिता पद्मसद्मना ॥६४॥

अन्वयः

तेन उद्दण्डा डिण्डीरपिण्डपङ्क्तिः पद्मसद्मना प्रहिता विमानहंसमाला इव अदृश्यत ।

व्याख्या

तेन राज्ञा उद्दण्डाऽत्युन्नता डिण्डीराणां फेनानां 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। पिण्डा शरीराणि समूहा इत्यर्थः 'पिण्डो बोले बले सान्द्रे देहागारैक-देशयोः। देहमात्रे निवापे च गोल सिल्हकयोरपि' इति मेदिनी। तेषां पङ्क्तिः श्रेणी पद्मं कमलमेव सद्म गृहं यस्य तेन ब्रह्मणा प्रहिता नृपानयनार्थं प्रेषिता शुक्लत्वात् विमानानि व्योमयानानि 'व्योमयानं विमानोऽस्त्री' इत्यमरः। एव हंसमाला हंसश्रेणिः इवाऽदृश्यत दृष्टा। अत्र फेनपिण्डपङ्क्तौ विमानहंसमालायाः शुभ्रत्वादुत्प्रेक्षणाद्वस्तूत्प्रेक्षा।

भाषा

उस राजा ने ऊँचे ऊँचे फेन के सफेद गोलों की कतार को; मानों ब्रह्मा ने उसको स्वर्ग में बुलाने के लिये भेजे हुए विमान रूपी हंसों की कतार हैं, ऐसा देखा।

अतिदूरं समुत्प्लुत्य निपतद्भिः स शीकरैः।
अराजत धराचन्द्रः प्रत्युद्गत इव ग्रहैः ॥६५॥

अन्वयः

सः धराचन्द्रः अतिदूरं समुत्प्लुत्य निपतद्भिः शीकरैः ग्रहैः प्रत्युद्गत इव अराजत।

व्याख्या

सः प्रसिद्धः धराया भूमेश्चन्द्र इन्दुः आहवमल्लदेवोऽतिदूरं सुदूरं समुत्प्लुत्यो-र्ध्वंगत्वा निपतद्भिरधस्तादापतद्भिः शीकरैरम्बुकणैः 'शीकरोम्बुकणाः स्मृताः' इत्यमरः। ग्रहैर्बुधशुक्रादिग्रहनक्षत्रैः प्रत्युद्गत इव सन्मानप्रदर्शनार्थं कृताभ्यु-त्थान इवाऽराजत शुशुभे। शुभ्रत्वादूर्ध्वस्थानस्थितत्वाच्चाऽम्बुकणेषु ग्रहत्वा-भेदः। शीकराणामुत्प्लुत्य पुनः पतने ग्रहकर्तृकाभ्युत्थानक्रियाया उत्प्रेक्षणात् क्रियोत्प्रेक्षा।

भाषा

वह पृथ्वी का चन्द्र राजा, बहुत ऊँचे उठकर नीचे गिरने वाले जलकणों से मानों बुध शुक्र आदि ग्रहों द्वारा आदर में उत्थापन दिया गया हो, ऐसा शोभित हुआ।

तत्रावतीर्य धौरेयो धीराणां धरणीपतिः ।
स्नात्वा चण्डीशचरण-द्वन्द्वचिन्तापरोऽभवत् ॥६६॥

अन्वयः

धीराणां धौरेयः धरणीपतिः तत्र अवतीर्य स्नात्वा चण्डीशचरणद्वन्द्व-चिन्तापरः अभवत् ।

व्याख्या

धीराणां धैर्यवतां धौरेयो धुरीणः 'धूर्वहे धुर्य धौरेयधुरीणास्सधुरन्धराः' इत्यमरः । धरण्या धरायाः 'धरा धरित्री धरणी' इत्यमरः । पतिः स्वामी भूपतिराहवमल्लदेवस्तत्र तुङ्गभद्रानद्यामवतीर्य प्रविश्य स्नात्वा स्नानं विधाय चण्ड्याः पार्वत्या ईशः पतिश्चण्डीशस्तस्य शिवस्य चरणद्वन्द्वस्य पादयुगलस्य चिन्ता ध्यानं तत्र परो लग्नः शिवचरणयुगलध्यानतत्परोऽभवत् ।

भाषा

धीरों का अग्रणी वह आहवमल्लदेव राजा तुङ्गभद्रा नदी में उतर कर और स्नना करके शंकर भगवान् के चरण युगल के ध्यान में तत्पर हो गया ।

अदत्त चापरिच्छिन्नमखिन्नः काञ्चनोत्करम् ।
न कृच्छ्रेऽपि महाभागास्त्यागव्रतपराङ्मुखाः ॥६७॥

अन्वयः

अखिन्नः (सः) अपरिच्छिन्नं काञ्चनोत्करं अदत्त च । महाभागाः कृच्छ्रे अपि त्यागव्रतपराङ्मुखाः न (भवन्ति) ।

व्याख्या

अखिन्नः प्रसन्नमानसः स अपरिच्छिन्नममितं काञ्चनस्य सुवर्णस्योत्करं समूहं अदत्त च दानपात्रेभ्यः समर्पितवांश्च । महाभागा महाभाग्यवन्तो जनाः कृच्छ्रेऽपि कष्टे समापतितेऽपि त्यागव्रताद्दानानुष्ठानात्पराङ्मुखा विमुखा न भवन्ति । अत्रार्थान्तरन्यासो नामालङ्कारः । "सामान्यं वा विशेषो वा यदन्येन समर्थ्यते । यत्त सोऽर्थान्तरन्यासस्साधर्म्येणेतरेण वा" ।

भाषा

और उस राजा ने प्रसन्न चित्त से अपरिमित सुवर्ण के ढेरों का दान किया। महा भाग्यशाली लोग कष्ट आने पर भी दानानुष्ठान से विमुख नहीं होते।

प्रविश्य कण्ठदघ्नेऽथ सरित्तोये जगाम सः।
कल्लोलतूर्यनिर्घोषै—श्चन्द्रचूडामणेः पुरीम् ॥६८॥

अन्वयः

अथ सः कण्ठदघ्ने सरित्तोये प्रविश्य कल्लोलतूर्यनिर्घोषैः चन्द्रचूडामणेः पुरीं जगाम।

व्याख्या

अथाऽनन्तरं स राजा कण्ठदघ्ने गलप्रमाणे कण्ठदघ्नमित्यत्र कण्ठः प्रमाणमस्येति विग्रहे 'प्रमाणे द्वयसन्दघ्नञ्मात्रचः' इति सूत्रेण दघ्नच् प्रत्ययः। सरितस्तुङ्गभद्रानद्यास्तोये जले प्रविश्य गत्वा कल्लोला उल्लोलाः 'महत्सूल्लोलकल्लोलौ' इत्यमरः। एव तूर्याणि वाद्यविशेषाः "तुरही" इति भाषायां प्रसिद्धाः। तेषां निर्घोषैश्शब्दैस्सह चन्द्र एव हिमांशुरेव 'हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः' इत्यमरः। चूडामणिश्शिरोभूषणं यस्य तस्य शिवस्य पुरीं कैलासं जगाम प्राप्तवान्।

भाषा

अनन्तर तुङ्ग भद्रा नदी में गले तक पानी में खड़े होकर लहरों के ऊंचे २ शब्द रूपी तुरही की ध्वनि के साथ वह राजा शंकर की कैलास नगरी में चला गया।

पद्ययुग्मेन राजकुमारावस्थां वर्णयति कविः—

इत्युक्त्वा विरते तत्र कृतनेत्राम्बुदुर्दिनः।
हृतासिधेनुः पार्श्वस्थैः साक्रन्दगलकन्दलः ॥६९॥
स्वभावादार्द्रभावेन पितृस्नेहाच्च तादृशः।
तथा रुरोद वपुषा भूपृष्ठलुठितेन सः ॥७०॥

अन्वयः

इति उक्त्वा तत्र विरते (सति) कृतनेत्राम्बुदुर्दिनः पार्श्वस्थैः हृतासिधेनुः साक्रन्दगलकन्दलः सः स्वभावात् आर्द्रभावेन तादृशः पितृस्नेहात् च भूपृष्ठलुठितेन वपुषा तथा रुरोद ।

व्याख्या

इति पूर्वोक्तमुक्त्वा कथयित्वा तत्र दूते विरते विश्राममुपगतवति सति कृतं सम्पादितं नेत्राम्बुभिर्नयननिर्गताश्रुजलैर्दुर्दिनं मेघावृतदिवसो येन सः 'मेघच्छन्नेऽन्हि दुर्दिनम्' इत्यमरः । अश्रुवृष्टिं कुर्वन्नित्यर्थः । पार्श्वे तिष्ठन्तीती पार्श्वस्थास्तैः समीपचरैर्जनैः हृता गृहीता असिधेनुश्छुरिका यस्य स 'छुरिका चासिधेनुका' इत्यमरः । आक्रन्देनाऽऽर्तनादेन सहितो गल एव कन्दलो नालो यस्य सः राजकुमारः स्वभावात्प्रकृत्यैवाऽऽर्द्रभावेन स्निग्धभावेन 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इत्यमरः । तादृशस्तथाभूतादनिर्वचनीयात्पितृस्नेहाच्च पितृप्रेम्णश्च भुवः पृष्ठे भूपृष्ठे भूमितले लुठितमितस्ततः परावर्तितं तेन वपुषा शरीरेण 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः । तथैवं वक्ष्यमाणप्रकारेण रुरोद रोदनं कृतवान् ।

भाषा

इस प्रकार कह कर दूत के चुप होने पर अपने आँखों के आँसुओं से मेघ के ऐसी वृष्टि करने वाला, पास के लोगों ने कहीं दुःख से वह अपना प्राणान्त न करले इस भय से जिसकी छूरी छीन ली है ऐसा पुक्काफाड़ कर रोने वाला, वह राजकुमार, स्वभाव से ही कोमल हृदय होने से तथा वैसे पितृस्नेह से जमीन पर लोट २ कर इस प्रकार विलाप करने लगा ।

एवंविधदुराचार—गृहीतनियमं यमम् ।
मन्यते स्म यथा वंशे तिग्मांशुरपि कण्टकम् ॥७१॥

यथा तिग्मांशुः अपि एवंविधदुराचारगृहीतनियमं यमं वंशे कण्टकं मन्यते स्म ।

व्याख्या

स तथा रुरोदेति पूर्वपद्योक्तेन तथाशब्देन सहाऽत्रस्थो यथा शब्दः साकाङ्क्षः । स तथा रुरोद यथा येन कारणेन तिग्मांशुः सूर्यो यमपिताऽप्येवंविधदुराचाराय

तस्य पितृमारणरूपात्याचाराय धर्मपरायणानां मृत्यव इत्यर्थः । गृहीतः स्वीकृतो नियमो निश्चयो येन तं यमं कृतान्तं वंशे सूर्यवंशे कण्टकं कुलकलङ्कं मन्यतेस्म ज्ञातवान् ।

भाषा

राजकुमार विक्रमाङ्कदेव के वैसे रोने से यमराज के पिता सूर्य भी, उसके पिता के सदृश धर्मात्माओं को जान से मार डालने का दुराचार का काम करने के नियमी, अपने पुत्र यमराज को सूर्यवंश का कलङ्क समझने लगे ।

एतद्दुःखानभिज्ञेभ्यो दिनेभ्यः स्पृहयन्मुहुः ।
दिवसोऽपि यथात्मानं मन्दभाग्यममन्यत ॥७२॥

अन्वयः

यथा एतद्दुःखानभिज्ञेभ्यः दिनेभ्यः मुहुः स्पृहयन् दिवसः अपि आत्मानं मन्दभाग्यम् अमन्यत ।

व्याख्या

यथेति पदं पूर्वोक्तस्य तथा रुरोदेति वाक्यस्य तथा शब्देनाऽन्वेति । स तथा रुरोद यथा येन कारणेनैतद्दुःखान्याऽऽहवमल्लमृत्युजन्यराजकुमारविलापादि-दुःखानि तेषामनभिज्ञा अपरिचितास्तेभ्यो दिनेभ्यो दिवसेभ्यो मुहुः पुनःपुनः स्पृहयन्नभिलषन् दिवसोऽपि राजकुमारकृतविलापदिवसोऽप्यात्मानं स्वं मन्दभाग्यं हतभाग्यममन्यत मेने । अन्यदिवसा मत्तो भाग्यवन्तो यैरिदं महद्दुखं नाऽनु-भूतमिति चिन्तयति स्मेति भावः ।

भाषा

राजकुमार विक्रमाङ्कदेव के वैसे रोने से वह दिन भी, ऐसे क्लेश से अनभिज्ञ अन्य दिवसों के समान ही हम होते तो अच्छा था, ऐसी अभिलाषा करते हुए अपने को हतभाग्य समझने लगा ।

"विशेषकम्" त्रिभिः पद्यैर्यत्र वाक्यसमाप्तिर्भवति तद्विशेषकं संदानितकं तिलकं वा ।

अथ कालकलाः स्थित्वा कियतीरप्यसौ तथा ।
अचिन्तयदविश्रान्त-बाष्पसंतानदुर्दिनः ॥७३॥

अन्वयः

अथ अविश्रान्तबाष्पसन्तानदुर्दिनः असौ कियतीः अपि कालकलाः तथा स्थित्वा अचिन्तयत् ।

व्याख्या

अथ पितृमरणदुर्घटनाश्रवणानन्तरमविश्रान्तं निरन्तरं बाष्पसंतानस्याऽश्रुधाराया दुर्दिनं वृष्टिर्यस्मिन्सः, असौ विक्रमाङ्कदेवः कियतीरपि काश्चिदपि कालकलाः समयकलाश्चिरकालपर्यन्तं तथा तेनैव प्रकारेण स्थित्वोपविश्याऽचिन्तयत् चिन्तयामास ।

भाषा

बाद में लगातार आँसुओं की झड़ी बरसाने वाले विक्रमाङ्कदेव ने चिरकाल तक उसी दशा में रहने के बाद विचार किया ।

तवादिकूर्म कर्माणि निषेधन्ति सुखस्थितिम् ।
प्रयाहि शेष निष्पेषादस्थिपञ्जरशेषताम् ॥७४॥

अन्वयः

हे आदिकूर्म कर्माणि तव सुखस्थितिं निषेधन्ति । हे शेष निष्पेषात् अस्थिपञ्जरशेषतां प्रयाहि ।

व्याख्या

हे आदिकूर्म ! हे कच्छपावतार ! कर्माणि भाग्यानि तव सुखस्थितिं सुखेन स्थितिमाहवमल्लकर्तृकभूभारहरणस्य निरन्तरं जायमानत्वादल्पभू-भारधारणेन भुवस्तले सुखपूर्वकवासं निषेधन्ति न मन्यन्ते । हे शेष । नागराज ! निष्पेशाद्राज्ञोऽभावाद्भूभारस्याऽऽधिक्यात्तस्य धारणेन तवाऽङ्गाना-मत्यन्तसम्मर्दनादस्थिपञ्जरः शेषोऽवशिष्टांशो यस्य स तस्य भावोऽस्थिपञ्जर-शेषता तामधिकभारवहनजन्यदुःखातिशयान्मांसक्षयेणाऽस्थिमात्रावशिष्टस्वरूपं प्रयाहि प्राप्नुहि ।

भाषा

हे आदिकूर्म ! हे विष्णु के अवतार रूप । दुर्भाग्यों से तुम को अब चैन से रहने को नहीं मिल सकता । क्योंकि राजा आहवमल्लदेव के

रहने से पृथ्वी का बोझ कम होकर, तुम्हारा भूभार कम होने से तुम्हें जो सुख मिलता था वह अब उस राजा के मर जाने से तुम्हें प्राप्त न हो सकेगा। हे शेष! हे नागराज! राजा आहवमल्लदेव के मर जाने से पृथ्वी का बोझ अधिक होकर उससे पीसे जाने के कष्ट से तुम्हारा मांस सूख कर हड्डियाँ ही अवशिष्ट रह जाएँगी।

दिग्गजास्त्यजत स्वैर-क्रीडाविहरणादरम्।
संभूय भूयः सर्वेऽपि धारयन्तु धरामिमाम् ॥७५॥

अन्वयः

हे दिग्गजाः स्वैरक्रीडाविहरणादरं त्यजत सर्वे अपि भूयः संभूय इमां धरां धारयन्तु।

व्याख्या

हे दिग्गजाः! हे दिक्कुञ्जराः! स्वैरं स्वच्छन्दं यथास्यात्तथा यत्क्रीडासु विहरणं विहारार्थं संचलनं तस्मिन्नादरं स्नेहं त्यजत मुञ्चत। सर्वेऽपि भवन्तस्सकला भूयः पुनरपि राज्ञ उत्पत्तिकालात्प्रागिव संभूय मिलित्वेमां धरां पृथ्वीं धारयन्तु वहन्तु। इदानीं युष्माकं पृथ्वीभारवहनकर्मणि सहायको राजाऽऽहवमल्लदेवो भुवं परित्यज्य परलोकं गत इति भावः।

भाषा

हे दिग्गजों! राजा आहवमल्लदेव के रहने से पृथ्वी स्थिर थी इसलिये तुम लोग आनन्द से स्वच्छन्द क्रीड़ा में घूमते थे। किन्तु अब राजा आहवमल्लदेव पृथ्वी छोड़ कर परलोक को सिधार गये हैं, इसलिये अपना स्वच्छन्द क्रीड़ा प्रेम छोड़ो और सब मिलकर इस पृथ्वी को सह्माँलो।

बाहुराहवमल्लस्य सुवर्णस्तम्भविभ्रमः।
पुरन्दरधुरां धर्तुं धात्रा व्यवहितः कृतः ॥७६॥

अन्वयः

धात्रा सुवर्णस्तम्भविभ्रमः आहवमल्लस्य बाहुः पुरन्दरधुरां धर्तुं व्यवहितः कृतः।

व्याख्या

धात्रा विरञ्चिना 'धाताब्जयोनिर्द्रुहिणो विरञ्चिः कमलासनः' इत्यमरः। सुवर्णस्यस्तम्भः सुवर्णस्तम्भः काञ्चनस्तम्भस्तस्य विभ्रमो विलासो भ्रान्तिर्वा यस्मिन् स काञ्चनस्तम्भसदृश आहमल्लस्याऽऽहवमल्लदेवनृपस्य बाहुर्भुजः पुरन्दरस्य पुरुहूतस्य 'वृद्धःश्रवाःशुनासीरः पुरुहूतः पुरन्दरः' इत्यमरः। धुरां राज्यकार्यभारं स्वर्गराज्यकार्यभारमित्यर्थः। धर्तुं वोढुं व्यवहितः कृतोऽस्माद्भूलोकान्महद्दूरे स्थापितः। नृपस्य पुण्यातिशयेन देवत्वप्राप्त्या पुरन्दरस्य राज्यकार्ये साहाय्यप्रदानार्थं ब्रह्मणा स व्यवहित इति भावः। काव्यलिङ्गालङ्कारः।

भाषा

ब्रह्माने, सोने के खम्भे की शोभा वाले राजा आहवमल्लदेव के बाहु को स्वर्ग के राज्य कार्य में इन्द्र की सहायता करने के लिये इस पृथ्वी पर से दूर हटा दिया है। अर्थात् राजा को इस पृथ्वी पर से स्वर्ग में हटा दिया है।

निजासु राजधानीषु स्थितिं दधतु पार्थिवाः।
तादृशः पुनरुत्साहो वीरसिंहासने कुतः ॥७७॥

अन्वयः

पार्थिवाः निजासु राजधानीषु स्थितिं दधतु। कुतः पुनः वीरसिंहासने तादृशः उत्साहः।

व्याख्या

पृथिव्या ईश्वराः पार्थिवा नृपा निजासु स्वीयासु राजधानीषु प्रधाननगरेषु स्थितिं सुखेन निवासं दधतु कुर्वन्तु। कुतः कस्माद्धेतोः पुनः भूयो वीराणां सिंहासनं संग्राम्भूमिस्तस्मिन् तादृशः पूर्वानुभूत उत्साहश्चित्तस्योन्नतिः। सम्प्रति नृपस्याऽऽहवमल्लदेवस्य युद्धप्रियस्याऽभावात्सर्वे राजानो युद्धभयं त्यक्त्वा सुखेन निवसन्त्विति भावः।

भाषा

राजा लोग अब सुख से अपनी अपनी राजधानियों में रहें। आहवमल्लदेव राजा के न रहने से अब युद्ध भूमियों में वैसा उत्साह कहाँ। अर्थात् युद्धप्रिय राजा आहवमल्लदेव के न रहने से युद्ध का भय छोड़कर सब राजा निश्चिन्त हो कर अपनी अपनी राजधानी में सुख से रहें।

तद्बाहुदण्डविश्लेषे किं पौरुष करिष्यसि ।
प्रतिपालकवैधुर्यात् प्रताप परितप्यसे ॥७८॥

अन्वयः

हे पौरुष ! तद्बाहुदण्डविश्लेषे किं करिष्यसि । हे प्रताप ! प्रतिपालकवैधुर्यात् परितप्यसे ।

व्याख्या

हे पौरुष ! हे पुरुषार्थ ! "पुंभावे तत्क्रियायां च पौरुषम्' इत्यमरः । तस्याऽऽहवमल्लदेवनृपस्य बाहुदण्डो भुजदण्डस्तस्य विश्लेषे वियोगे किं करिष्यसि न किमपीत्यर्थः । तद्बाहुदण्डाभावे पुरुषार्थस्य सत्तैव नास्तीति भावः । हे प्रताप ! हे तेजः । 'स प्रतापः प्रभावश्च यत्तेजः कोषदण्डजम्' इत्यमरः । प्रतिपालकस्य संरक्षकस्याऽऽश्रयदातुरित्यर्थः । राज्ञ आहवमल्लदेवस्य वैधुर्याद्राहित्यात् परितप्यसे दुःखजन्यसंतापं प्राप्तोऽसि । आहवमल्लदेवे नृपे गते सति पौरुषप्रतापयोराश्रयाभावात्परिताप इति भावः । अत्र विनोक्तिनामाऽलङ्कारः ।

भाषा

हे पुरुषार्थ ! आहवल्लदेव राजा के वियोग में अब तू क्या करेगा । हे प्रताप ! आश्रय के अभाव में तू दुःखी हो रहा है । अर्थात् आहवमल्लदेव राजा के न रहने से पौरुष और प्रताप दोनों ही निराधार हो गये ।

पद्मे पद्माकरानेव पुनः सद्मत्वमानय ।
अयं त्वया पतिभ्रंश-संतापोऽन्यत्र दुःसहः ॥७९॥

अन्वयः

हे पद्मे ! पुनः पद्माकरान् एव सद्मत्वम् आनय । त्वया अयं पति-भ्रंश-संतापः अन्यत्र दुस्सहः ।

व्याख्या

हे पद्मे ! हे लक्ष्मि ! 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः । पुनः भूयोऽपि पद्मानां कमलानामाकरास्समूहास्तानेव सद्मत्वं गृहत्वं निवासस्थानत्वमानय प्रापय । त्वया भवत्याऽयमनुभूयमानः पत्युर्नृपस्य भ्रंशो

विनाशस्तस्य सन्तापो पत्यभावजन्यपरितापोऽन्यत्र कमलेभ्योऽन्यस्थाने दुस्सहो दुःखेन सोढुं शक्यः । कमलानां संयोग एव विरहावसरे वियोगाधिसन्तापं निरस्य शरीरे शैत्यमापादयतीत्यतः पुनस्त्वया पूर्वनिवासस्थानं कमलमेवाऽऽश्रयणीयमिति भावः । अत्रोत्तरार्धेन पूर्वोक्तकमलसमाश्रयसमर्थनादर्थान्तरन्यासः ।

भाषा

हे लक्ष्मी ! अब कमलों को ही फिर से अपना निवासस्थान बना । स्वामी के नाश का यह दुःख कमलों के अतिरिक्त अन्य स्थान में रह कर सहन करना अत्यन्त कठिन है । अर्थात् पति विरह जनित सन्ताप को शान्त करने के लिये कमल जनित शैत्य ही लाभदायक हो सकता है ।

श्लाघ्यं शेषफणाचक्र-विटङ्कात्पतनं भुवः ।
अथवा स्नेहपाण्डित्यं मृत्पिण्डस्येदृशं कुतः ॥८०॥

अन्वयः

भुवः शेषफणाचक्रविटङ्कात् पतनं श्लाघ्यम् । अथवा मृत्पिण्डस्य ईदृशं स्नेहपाण्डित्यं कुतः (सम्भवति) ।

व्याख्या

भुवः पृथिव्याः पतिविनाशे शेषस्याऽनन्तसर्पराजस्य 'शेषोऽनन्तो वासुकिस्तु' इत्यमरः । फणानां स्फटानां 'स्फटायां तु फणा द्वयोः' इत्यमरः । चक्रं समूह एव विटङ्कमुच्चशिखरं 'कपोतपालिकायां तु विटङ्कं पुंनपुंसकम्' इत्यमरः । तस्मात्पतनं पतनेन मरणं श्लाघ्यं वरम् । अथवा पक्षान्तरे मृत्पिण्डस्य मृत्तिका-शरीरस्य 'पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोल-सिह्लकयोरपि' इति मेदिनी । ईदृशं विशिष्टं स्नेहः प्रेम तस्य पाण्डित्यं विचार-प्राचुर्यं कुतः कस्माद्धेतोः सम्भवति नैव स्यादचेतनत्वादिति भावः ।

भाषा

पृथ्वी को तो पृथ्वी पति के मर जाने पर शेष राज अनन्त के फनों के समूह रूपी उच्चशिखर से गिर कर मर जाना ही उचित है । परन्तु मिट्टी का शरीर रखने वाली पृथ्वी में इस प्रकार का प्रेम का सद्विचार कैसे सम्भव है । अर्थात् अचेतन पृथ्वी में इस प्रकार का उच्च प्रेमभाव उत्पन्न होना ही असम्भव है ।

अपूर्वः कोपि दुर्मेधाः शङ्के वेधाः समुत्थितः ।
पुराणः क्लेशनिष्पन्नां स्वकृतिं नाशयेत्कथम् ॥८१॥

अन्वयः

कः अपि अपूर्वः दुर्मेधाः वेधाः समुत्थितः (इति) शङ्के । पुराणः (वेधाः) क्लेशनिष्पन्नां स्वकृतिं कथं नाशयेत् ।

व्याख्या

कोऽपि कश्चिन्न पूर्वः प्राचीन इत्यपूर्वोऽर्वाचीनो दुष्टा दोषान्विता मेधा बुद्धिर्यस्य स दुर्बुद्धिर्वेधा ब्रह्मा 'स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः' इत्यमरः । समुत्थितः संवृत्तः (इति) शङ्के तर्कयामि । पुराणः प्राचीनो वेधा ब्रह्मा क्लेशेन महत्प्रयासेन निष्पन्नां सम्पादितां स्वकृतिं राजाऽऽहवमल्लदेवोत्पादनकार्यं कथं नाशयेत् समुन्मूलयेत् । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

मालूम होता है कि कोई नवीन, बुद्धिहीन ब्रह्मा आ गया है । क्यों कि यदि पुराना ब्रह्मा होता तो परिश्रम से बनाई हुई राजा आहवमल्लदेव रूपी अपनी वस्तु को कैसे नष्ट करता ।

अहो शौर्यमहो धैर्यं चित्रं गाम्भीर्यविभ्रमाः ।
यत्सत्यं क्वचिदेकत्र गुणास्ते दुर्लभाः पुनः ॥८२॥

अन्वयः

शौर्यं अहो ! धैर्यं अहो ! गाम्भीर्यविभ्रमाः चित्रम् । यत् क्वचित् एकत्र पुनः ते गुणाः दुर्लभाः (तत्) सत्यम् ।

व्याख्या

शौर्यं नृपाहवमल्लदेवनिष्ठं वीरत्वमहो आश्चर्यकारि । धैर्यं नृपाहवमल्लदेवनिष्ठं धीरत्वमहो अद्भुतम् । गाम्भीर्यस्य मर्यादाया विभ्रमा विलासाश्चित्रमाश्चर्यावलम्बिनः । यत् तदिति क्वचिदित्यादिवाक्यपरामर्शकम् । क्वचित् कस्मिंश्चिदेकत्रैकस्मिन् स्थाने आधारे वा पुनस्ते पूर्वोक्तास्सर्वे गुणाः शौर्यादयो दुर्लभा दुष्प्रापास्तत् सत्यमवितथम् । आहवमल्लदेवे राज्ञि पञ्चत्वं गते सति

समेषां पूर्वोक्तानां गुणानां समवायः पुनः कस्मिश्चिदेकस्मिन् मनुष्ये दुर्लभ इति सत्यमिति भावः ।

भाषा

अरे वह शौर्य ! अरे वह धैर्य ! अरे वे मर्यादा के कार्य ! यह सत्य है कि ये सब गुण एकही मनुष्य में फिर से नहीं मिल सकते जो आहवमल्ल देव में थे ।

कुण्ठी कृतारिशस्त्रस्य तस्य वज्रोपमाकृतेः ।
भाग्यानामेव मे दोषा-देष जातः परिक्षयः ॥८३॥

अन्वयः

मे भाग्यानाम् एव दोषात् कुण्ठीकृतारिशस्त्रस्य वज्रोपमाकृतेः तस्य एषः परिक्षयः जातः ।

व्याख्या

मे मम भाग्यानामेवदुर्भाग्यानामेवदोषादपराधात् कुण्ठीकृतानि व्यर्थीकृतान्यरीणां शत्रूणां शस्त्राणि प्रहरणानि येन स तस्य व्यर्थीकृतशत्रुप्रहरणस्य वज्रस्य कुलिशस्य 'ह्लादिनीवज्रमस्त्रीस्यात्कुलिशं भिदुरं पविः । शतकोटिः स्वरुः शंबो दम्भोलिरशनिर्द्वयोः' इत्यमरः । उपमा सादृश्यं यस्यां सा वज्रोपमाऽतिकठिनाऽऽकृतिर्देहो यस्य स तस्य वज्रोपमाकृतेर्वज्रवदतिकठोरशरीरस्य तस्याऽऽहवमल्लदेवस्य एष उपस्थितः परिक्षयो विनाशो जातः ।

भाषा

मेरे ही दुर्भाग्य से शत्रुओं के शस्त्रों को कुण्ठित कर देने वाले और वज्र के समान अति कठोर शरीर वाले मेरे पिता आहवमल्लदेव राजा की मृत्यु हुई है ।

पाठान्तरम् । तदेव पूर्वोक्तश्लोकार्धं प्रकारान्तरेण वर्णयति कविः ।

मद्भाग्यदोषादेवैष जाने जातः परिक्षयः ।

अन्वयः

एषः परिक्षयः मद्भाग्यदोषात् एव जातः (इति) जाने ।

व्याख्या

एषः पूर्वोक्तः परिक्षयो मम पितुराहवमल्लदेवस्य परिक्षयो नाशो मम भाग्यानां दुर्भाग्यानां दोषादेवाऽपराधादेव जातः सम्भूत इति जाने तर्कयामि ।

भाषा

यह मेरे पिता आहवमल्लदेव की मृत्यु मेरे दुर्भाग्य के दोष से ही हुई है ऐसा मैं समझता हूँ ।

विधास्यति कथं धाता सर्गरत्नं तथाविधम् ।
कथं वा संघटिष्यन्ते तादृशाः परमाणवः ॥८४॥

अन्वयः

धाता तथाविधं सर्गरत्नं कथं विधास्यति । तादृशाः परमाणवः कथं वा संघटिष्यन्ते ।

व्याख्या

धाता ब्रह्मा तथाविधं तादृशमाहवमल्लदेवसदृशं सर्गस्य सृष्टे रत्नं बहुमूल्य-मणिरूपमुत्कृष्टा सृष्टिरित्यर्थः । कथं विधास्यति केन रूपेण करिष्यति । तादृशास्तथाविधा आहवमल्लदेवस्य समवायिकारणभूताः परवाणवः कारणभूत-द्रव्याणि कथं वा संघटिष्यन्ते केन प्रकारेण वा मिलिष्यन्ति । आहवमल्लदेव-समवायिकारणीभूतावयवद्रव्याणां दुर्लभत्वात्तादृशी सृष्टिरपि न सम्भाव्यत इति महद्दुःखकारणमिति भावः ।

भाषा

ब्रह्मा वैसे सृष्टि के रत्न को अर्थात् सर्वोच्च रचना को कैसे बना सकेगा ? और उस प्रकार के परमाणु जिनसे आहवमल्लदेव राजा की सृष्टि हुई थी कैसे मिलेंगे । अर्थात् वैसे परमाणुओं के न मिलने से आहवमल्लदेव सदृश दूसरे मनुष्य की सृष्टि हो ही नहीं सकेगी यह एक बड़े दुःख की बात है ।

प्रधावत्सम्मुखानेक-वाहिनीगाहनक्षमः ।
अम्भोधिरिव दुष्प्रापः सत्त्वराशिस्तथाविधः ॥८५॥

अन्वयः

प्रधावत्सम्मुखानेकवाहिनीगाहनक्षमः तथाविधः सत्त्वराशिः अम्भोधिः इव दुष्प्रापः ।

व्याख्या

प्रधावन्त्योऽतितीव्रवेगेनाऽऽपतन्त्यः समुद्रपक्षे वहन्त्यः सम्मुखा अभिमुखा अनेका बह्व्यो वाहिन्यः सेनाः पक्षे नद्यः 'वाणिन्यौ नर्तकीदूत्यौ स्रवन्त्यामपि वाहिनी' इत्यमरः । तासां गाहने विलोडने क्षमस्समर्थस्तथाविधस्तादृशः सत्त्वस्य बलस्य सत्त्वगुणस्य वा पक्षे सत्त्वानि जलजन्तवस्तेषां राशिः 'सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयोः । पिशाचादावात्मभावे बले प्राणेषु जन्तुषु' इति हेमचन्द्रः । निधिरम्भोधिरिव समुद्र इव दुष्प्रापो दुर्लभः । तीव्रवेगेन सम्मुखं समागच्छन्तीनां नदीनां गाहने समर्थः, जलजन्तूनां निधिस्समुद्र इव तीव्रवेगेन सम्मुखं समागच्छन्तीनां सेनानां विलोडने समर्थः बलवान् सत्त्वगुणयुक्तो राजाऽऽहवमल्लदेवसदृशो नरो दुर्लभ इति भावः । अत्र श्लिष्टोपमालङ्कारः ।

भाषा

वेग से सम्मुख आने वाली नदियों को अपने में मिला लेने में समर्थ, जलजन्तुओं के निधि समुद्र के समान, वेग से सम्मुख आने वाली सेनाओं को मथ डालने में समर्थ, सत्वगुण या बल का निधि राजा आहवमल्लदेव के ऐसा पुरुष दुर्लभ है ।

आर्येण सौकुमार्यैक-भाजनेन हहा कथम् ।
अयं विषादवज्राग्निरसह्यत मया विना ॥८६॥

अन्वयः

सौकुमार्यैकभाजनेन आर्येण अयं विषादवज्राग्निः मया विना कथम् असह्यत, हहा ।

व्याख्या

सौकुमार्यं कोमलता मार्दवं वा तस्यैकं भाजनं पात्रं तेन सौकुमार्यैकभाजनेन स्नेहार्द्रपरममृदुस्वभावेनाऽऽर्येण पूज्येन ज्येष्ठभ्रात्रा सोमदेवेनाऽयमनुभूयमानो विषाद एव पितृमरणशोक एव वज्राग्निः कुलिशवदविषह्यदुःखदहनो मया विना ममाऽनुपस्थितौ कथं केन प्रकारेणाऽसह्यत सोढः । हहा इति खेदे । अहमेव ज्येष्ठ-भ्रातुरतिप्रियोऽस्मि । दुःखकाले चाऽतिप्रियवस्तुनिरीक्षणेन मानसे शान्तिस्स-ञ्जायते, दुःखसहनस्य क्षमताऽपि संपद्यते । ममाऽनुपस्थितौ कथं मे भ्राता तद्दुःख-सहने समर्थो जातः स्यादिति भावः ।

भाषा

हाय ! अत्यन्त कोमल हृदय, मेरे बड़े भाई सोमदेव ने इस शोकरूपी वज्राग्नि को मेरे वहाँ न रहने पर कैसे सहन किया होगा। अर्थात् दुःख में प्रियवस्तु के पास रहने से दुःख का वेग कम हो जाता है। मैं उसका अत्यन्त प्रिय हूँ। अतः मेरी अनुपस्थिति में उसने इस दुःख को कैसे सहन किया होगा।

साक्रन्दमिति चान्यच्च स संचिन्त्य पुनः पुनः।
शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत ॥८७॥

अन्वयः

सः इति अन्यत् च पुनः पुनः साक्रन्दं संचिन्त्य विवेकदीपेन शनैः पन्थानं प्रत्यपद्यत।

व्याख्या

स विक्रमाङ्कदेव इति च पूर्वोक्तं विषयञ्चाऽन्यच्च किञ्चिन्मनोगतञ्च पुनः पुनर्भूयोभूयस्साक्रन्दं सविलापं यथास्यात्तथा संचिन्त्य विचार्य विवेक एव सदसद्विचार एव दीपः प्रकाशकारकस्तेन सदसद्विचारप्रकाशेन शनैः क्रमशः पन्थानं मार्गं स्वस्थतां प्रत्यपद्यत प्राप्तवान्। विवेकप्रकाशेन शोकतमो निरस्य शनैः यथाकथञ्चित् स्वस्थो बभूवेति भावः ॥

भाषा

वह विक्रमाङ्कदेव पूर्वोक्त तथा अन्य भी कुछ मानसिक बातों का रोते हुए बार बार विचार कर धीरे धीरे विवेक रूपी दीप के प्रकाश से (शोक रूपी अन्धकार को दूर कर) रास्ते पर आया। अर्थात् कुछ स्वस्थ हुआ।

यथाविधि विधायाथ संस्थितस्य पितुः क्रियाम्।
अग्रजालोकनोत्कण्ठा—प्रेरितः सोऽचलत्पुरः ॥८८॥

अन्वयः

अथ सः संस्थितस्य पितुः क्रियां यथाविधि विधाय अग्रजालोकनोत्कण्ठाप्रेरितः (सन्) पुरः अचलत्।

व्याख्या

अथ किञ्चित्स्वास्थ्यप्राप्त्यनन्तरं स विक्रमाङ्कदेवः संस्थितस्य मृतस्य 'परासुप्राप्तपंचत्वपरेतप्रेतसंस्थिताः' इत्यमरः । पितुर्जनकस्य क्रियां तर्पणादिकर्विधिं शास्त्रविधानमनतिक्रम्य वर्तत इति यथाविधि शास्त्रमर्यादानुकूलं विधाय कृत्वाऽग्रजस्य ज्येष्ठभ्रातुरवलोकने दर्शने उत्कण्ठयोत्कटेच्छया प्रेरितो नियोजितस्सन् पुरोऽग्रे कल्याणपुरमार्गेऽचलत् प्रतस्थे ।

भाषा

कुछ स्वस्थ होने के अनन्तर, अपने मृत पिता की शास्त्रानुसार तर्पणादि क्रियाकर्म कर वह विक्रमाङ्कदेव, अपने बड़े भाई सोमदेव से मिलने की उत्कण्ठा से प्रेरित होकर कल्याणपुर के मार्ग पर आगे बढ़ा ।

कियद्भिरपि सोऽध्वानमुल्लङ्घ्य दिवसैस्ततः ।
निःशब्दसैन्यसंघात-सहितः प्राविशत्पुरीम् ॥८९॥

अन्वयः

ततः निःशब्दसैन्यसंघातसहितः सः कियद्भिः अपि दिवसैः अध्वानम् उल्लङ्घ्य पुरीं प्राविशत् ।

व्याख्या

ततः कल्याणनगरं प्रति प्रस्थानानन्तरं निःशब्दाः (दुःखेन) स्वनमकुर्वाणाः सैन्याः सैनिकास्तेषां संघातस्समूहस्तेन सहितो युक्तः स विक्रमाङ्कदेवः कियद्भिरपि कतिपयैरेव दिवसैर्दिनैरध्वानं पन्थानमुल्लङ्घ्य समतिक्रम्य पुरीं कल्याणनगरं प्राविशत् प्रविष्टः ।

भाषा

इसके अनन्तर शब्द रहित अर्थात् बाजे गाजे से रहित, सेना समूह के सहित कुछ ही दिनों में रास्ता पार कर वह कल्याणपुर में प्रविष्ट हुआ ।

सरोजिनीव हंसेन नयेनेव नरेन्द्रता ।
कविना सुखगोष्ठीव चन्द्रेणेव विभावरी ॥९०॥

लक्ष्मीरिव प्रदानेन कवित्वेनेव वाग्मिता ।
मेने तनाऽपवित्रेव पित्रा विरहिता पुरी ॥६१॥

अन्वयः

तेन पित्रा विरहिता पुरी, हंसेन विरहिता सरोजिनी इव, नयेन विरहिता नरेन्द्रता इव, कविना विरहिता सुखगोष्ठी इव, चन्द्रेण विरहिता विभावरी इव, प्रदानेन विरहिता लक्ष्मीः इव, कवित्वेन विरहिता वाग्मिता इव अपवित्रा मेने ।

व्याख्या

तेन विक्रमाङ्कदेवेन पित्राऽऽहवमल्लदेवेन विरहिता वियुक्ता पुरी कल्याणपुरी हंसेन मरालेन विरहिता शून्या सरोजिनीव कमलिनीव, नयेन नीत्या विरहिता विहीना नरेन्द्रतेव राजत्वमिव राजकर्मेवेत्यर्थः । कविना सहृदयेन पण्डितेन विरहिता रिक्ता सुखस्याऽऽनन्दस्य रसस्य लक्षणया तदनुभवस्य तदनुभवकर्तुर्गोष्ठीव सभेव, चन्द्रेणेन्दुना विरहिता हीना विभावरीव रात्रिरिव कवित्वेन कविकर्मणाऽलौकिकचमत्काराधायककाव्येनेत्यर्थः । विरहिता विना वाग्मितेव वाक्प्रावीण्यमिवाऽपवित्राऽमेध्याऽरमणीयेत्यर्थः । मेने बुद्धा । मालोपमा—विनोक्त्यलङ्कारयोः सङ्करः ।

भाषा

उसने पिता से रहित उस कल्याणपुर को, हंस से रहित कमलिनी, नीति से रहित राज्यकार्य, कवि से रहित रस भरी बातों से रसास्वाद देने वाली सभा, चन्द्रमा से रहित रात, दान से रहित सम्पत्ति और उत्तम काव्य रचना से रहित वाक्पटुता के समान, अपवित्र अर्थात् अरमणीय समझा ।

युगलकम्—युग्मकम्[१] ।

अग्रे समागतेनाथ मानितः सोऽग्रजन्मना ।
सह तेनैव सक्लेशं विवेश नृपमन्दिरम् ॥६२॥

अन्वयः

अथ अग्रे समागतेन अग्रजन्मना मानितः सः तेन एव सह नृपमन्दिरं सक्लेशं विवेश ।

---

[१] युग्मकलक्षणं ४२ श्लोकटिप्पण्यां द्रष्टव्यम् ।

व्याख्या

अथ पुरीदर्शनानन्तरमग्रे पुरः समागतेन सभाजनार्थं समुपस्थितेनाऽग्रजन्मना ज्येष्ठभ्रात्रा सोमदेवेन मानितस्समादृतस्स विक्रमाङ्कदेवस्तेनैव सोमदेवेनैव सह नृपमन्दिरं राजसदनं क्लेशेन दुःखेन सहितं सक्लेशं सदुःखं शोकमनुभवन्नित्यर्थः। विवेश प्रविष्टः।

भाषा

कल्याण नगरी में पहुँचने पर बड़े भाई सोमदेव से अगवानी द्वारा सम्मानित विक्रमाङ्कदेव, उसी के साथ राजमन्दिर में दुःख से गया।

अन्योन्यकण्ठाश्लेषेण पीडितस्येव निर्ययुः।
बाष्पाम्भसस्तयोर्धाराश्चिरं तत्रातिमांसलाः ॥६३॥

अन्वयः

तत्र तयोः अन्योन्यकण्ठाश्लेषेण पीडितस्य इव बाष्पाम्भसः अतिमांसलाः धाराः चिरं निर्ययुः।

व्याख्या

तत्र राजमन्दिरे तयोस्सोमदेवविक्रमाङ्कदेवयोरन्योन्यस्य परस्परस्य कण्ठाश्लेषेण कण्ठपरिरम्भणेन पीडितस्येव निष्ठ्यूतस्येव बाष्पमेवाम्भो बाष्पाम्भोऽश्रुजलं तस्याऽतिमांसला अतिबलवत्य अतिविशाला इत्यर्थः। 'बलवान्मांसलोंऽसलः' इत्यमरः। धाराः प्रवाहाश्चिरं बहुकालपर्यन्तं निर्ययुर्निस्सृताः। तौ चिरकालपर्यन्तमश्रूणि मुञ्चन्तौ रुरुदतुरिति भावः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

राजमन्दिर में एक दूसरे को कस कर गले लगाने से मानों दबने से आसुओं की विशाल धाराएँ चिरकाल तक निकलती रहीं।

क्रमात्ताभ्यामदुःखाभ्यामन्योन्यस्नेहवृत्तिभिः।
केऽपि कैतवबाह्याभिरत्यवाह्यन्त वासराः ॥६४॥

अन्वयः

क्रमात् अदुःखाभ्यां ताभ्यां कैतवबाह्याभिः अन्योन्यस्नेहवृत्तिभिः के अपि वासराः अत्यवाह्यन्त।

व्याख्या

क्रमात् क्रमशो नास्ति दुःखं ययोस्तौ ताभ्यां दुःखरहिताभ्यां ताभ्यां सोमदेवविक्रमाङ्कदेवाभ्यां कैतवेन कपटेन 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः। बाह्या बहिर्भूतास्ताभिर्निष्कपटाभिरन्योन्यस्य परस्परस्य स्नेहवृत्तिभिः प्रेमार्द्रव्यवहारैः केऽपि कियन्तोऽपि वासरा दिवसा अत्यवाह्यन्त यापिताः।

भाषा

धीरे धीरे दुःख से मुक्त दोनों भाइयों ने परस्पर कपट रहित, प्रेम भरे व्यवहारों में कुछ दिन बिताये।

ज्येष्ठं गुणैर्गरिष्ठोऽपि पितुस्तुल्यममंस्त सः।
महात्मनाममार्गेण न भवन्ति प्रवृत्तयः ॥९५॥

अन्वयः

सः गुणैः गरिष्ठः अपि ज्येष्ठं पितुः तुल्यम् अमंस्त। महात्मनाम् अमार्गेण प्रवृत्तयः न भवन्ति।

व्याख्या

स विक्रमाङ्कदेवो गुणैश्शौर्यदयादाक्षिण्यादिनृपोचितगुणैर्गरिष्ठोऽपि गुरुतमोऽपि श्रेष्ठोऽपीतिभावः। ज्येष्ठमग्रजं सोमदेवं पितुराहवमल्लदेवस्य तुल्यं सन्मानेन समानममंस्त विज्ञातवान्। यतो महात्मनां मनस्विनां महानुभावानाममार्गेणाऽनुचिताध्वना प्रवृत्तयोऽध्यवसाया न भवन्ति। 'ज्येष्ठोभ्राता पितुः समः' इति-स्मरणात्। अत्राऽर्थान्तरन्यासालङ्कारः।

भाषा

शौर्यादिगुणों में श्रेष्ठ होने पर भी विक्रमाङ्कदेव अपने बड़े भाई सोमदेव को पिता आहवमल्लदेव के समान ही आदरपूर्वक मानता था। बड़े लोगों के व्यवहार अनुचित तरीके से नहीं होते।

स दिग्वलयमालोड्य वस्तुजातमुपार्जितम्।
तस्मै समर्पयामास नास्ति लोभो यशस्विनाम् ॥९६॥

अन्वयः

सः दिग्वलयम् आलोड्य उपार्जितं वस्तुजातं तस्मै समर्पयामास। यशस्विनां लोभः न अस्ति ।

व्याख्या

स विक्रमाङ्कदेवो दिग्वलयं दिङ्मण्डलमालोड्य प्रमथ्योपार्जितं संगृहीतं वस्तुजातं सकलं वस्तु तस्मै सोमदेवाय समर्पयामास ददौ । यशस्विनां कीर्तिमतां लोभस्सम्पत्तिलोभो नास्ति न भवति । अत्राऽर्थान्तरन्यासालङ्कारः ।

भाषा

विक्रमाङ्कदेव ने दिग्विजय कर लाई हुई सब चीजें अपने बड़े भाई सोमदेव को दे दीं । यशस्वी लोगों में लोभ नहीं होता ।

जातः पापरतः कैश्चिद्दिनैः सोमेश्वरस्ततः ।
एषा भगवती केन भज्यते भवितव्यता ॥९७॥

अन्वयः

ततः कैश्चित् दिनैः सोमेश्वरः पापरतः जातः । एषा भगवती भवितव्यता केन भज्यते ।

व्याख्या

ततो विक्रमाङ्कदेवदत्तविभूतिग्रहणानन्तरं कैश्चिद्दिनैः कियद्भिर्दिवसैः कस्मिश्चित्काले गते सतीत्यर्थः । सोमेश्वरः सोमदेवः पापे पापयुक्तकर्मणि रत आसक्तो जातो बभूव । एषा प्रसिद्धा भगवती देवी भवितव्यता नियतिः केन पुरुषेण भज्यते विनाश्यते दूरीक्रियत इत्यर्थः ।

भाषा

इसके बाद कुछ समय बीतने पर सोमदेव पाप करने में प्रवृत्त हो गया । भगवती भवितव्यता को कौन टाल सकता है ।

मदिरेव नरेन्द्रश्रीस्तस्याभून्मदकारणम् ।
न विवेद परिभ्रष्टं यदशेषं यशोंशुकम् ॥९८॥

अन्वयः

तस्य नरेन्द्रश्रीः मदिरा इव मदकारणम् अभूत् । यत् (सः) परिभ्रष्टम् अशेषं यशोंशुकं न विवेद ।

व्याख्या

तस्य सोमदेवस्य नरेन्द्रश्री राजलक्ष्मीर्मदिरेव मद्यमिव मदकारणमविवेकहेतुरभूत् । यद्यस्मात्कारणात् सः सोमदेवः परिभ्रष्टं गलितमशेषमखिलं यशः कीर्तिरेवांशुकं वस्त्रं न विवेद न ज्ञातवान् । यथा कश्चिन्मदोन्मत्तो मदान्धत्वात् स्वशरीरात् गलितं वस्त्रं न जानाति तथैवाऽयं सोमदेवोऽविवेकित्वादखिलं यशो विनष्टमिति न जानाति स्मेति भावः ।

भाषा

सोमदेव की राजश्री ही मदिरा के समान उसे मदोन्मत्त बनाने में कारण हुई । इसीसे उसने पूर्णतया नष्ट होते हुए यश रूपी वस्त्र को नहीं जाना । अर्थात् जिस प्रकार किसी शराबी का शरीर पर का पूरा कपड़ा गिर जाता है तो भी उसे वह नशे में नहीं जान पाता । उसी प्रकार राजलक्ष्मी के मद में चूर अविवेकी सोमदेव को सम्पूर्ण कीर्ति नष्ट हो जाने का पता ही नहीं चला ।

बाधिर्यमिव मङ्गल्य-तूर्यध्वनिभिरागतः ।
ईषदप्येष नाश्रौषीद् वचनानि महात्मनाम् ॥९९॥

अन्वयः

एषः मङ्गल्यतूर्यध्वनिभिः बाधिर्यम् आगतः इव महात्मनां वचनानि ईषद् अपि न अश्रौषीत् ।

व्याख्या

एष सोमदेवो मङ्गल्यं माङ्गलिकं तूर्यं वाद्यविशेषः तस्य ध्वनिभिर्नादैर्बाधिर्यं बधिरतामागतः प्राप्त इव महात्मनां कुलवृद्धानां महानुभावानां वचनानि सद्वाक्यानीषदपि मनागपि नाऽश्रौषीत् नाऽऽकर्णितवान् । राजलक्ष्म्या मदोन्मत्तो माङ्गलिकवाद्यविशेषनादेन बधिरतामिवाऽऽपन्नः सोमदेवः श्रोत्रेन्द्रियाभावात् महानुभावैः समुपदिष्टानि वाक्यानि नाऽश्रृणोदिति भावः । उत्प्रेक्षालङ्कारः ।

भाषा

वह सोमदेव माङ्गलिक वाद्यविशेषों के शब्दों से मानों बहिरा होकर कुल-वृद्ध महानुभावों के सदुपदेशों को बिलकुल नहीं सुनता था ।

कुर्वन्नङ्गेषु वैक्लव्यमाविष्कृतमदज्वरः ।
स निनाय श्रियं राजा राजयक्ष्मेव संक्षयम् ॥१००॥

अन्वयः

आविष्कृतमदज्वरः सः राजा राजयक्ष्मा इव अङ्गेषु वैक्लव्यं कुर्वन् श्रियं संक्षयं निनाय ।

व्याख्या

आविष्कृतः प्रकटीकृतो मदः ज्वर इव मदज्वरो येन स राजा नृपस्सोमदेवो राजयक्ष्मेव क्षयरोग इवाऽङ्गेष्वयवेषु विक्लवः स्वाङ्गान्येव धारयितुमशक्तो विह्वलस्तस्य भावो वैक्लव्यं विह्वलत्वं कुर्वन् राजपक्षेऽमात्याद्यङ्गेषु वैक्लव्यं सम्यक् प्रबन्धराहित्यं दौर्मनस्यमित्यर्थः कुर्वन् सम्पादयन् श्रियं राजलक्ष्मीं, राजयक्ष्मापक्षे शोभां संक्षयं विनाशं निनाय नयति स्म । यथा क्षयरोगः पूर्वं ज्वरं समुत्पाद्य रोगिणोऽवयवेषु विकलतां जनयित्वा तस्य शरीरशोभां नाशयति तथैव मदाप्लुतः सोमदेवोऽमात्यादिराज्याङ्गेषु वैमनस्यरूपं वैक्लव्यं जनयित्वा राजलक्ष्मीं नाशयति स्मेति भावः । अत्रोपमालङ्कारः ।

भाषा

अभिमान के समान ज्वर को प्रकट करने वाले क्षयरोग के समान सोमदेव राजा ने (राजयक्ष्मा के पक्ष में) शारीरिक अवयवों में विकलता उत्पन्न कर (राजा के पक्ष में) अमात्य आदि राज्य के अङ्गों में वैमनस्य उत्पन्न कर, शोभा को (पक्ष में) राजलक्ष्मी को नष्ट कर दिया । अर्थात् जिस प्रकार क्षय रोग पहिले ज्वर प्रकट कर शरीर के अङ्ग प्रत्यङ्ग को विह्वल कर शरीर की शोभा को नष्ट कर देता है उसी प्रकार राजा ने मद प्रकट कर मन्त्री आदि राज्य के अङ्गों में वैमनस्य उत्पन्न कर राजलक्ष्मी को नष्ट कर दिया ।

अपास्तकुन्तलोल्लासा वैराग्यं दधती धरा ।
जीवत्येव धवे तस्मिन् विधवेव व्यराजत ॥१०१॥

अन्वयः

अपास्तकुन्तलोल्लासा वैराग्यं दधती धरा तस्मिन् धवे जीवति एव विधवा इव व्यराजत ।

व्याख्या

अपास्तः परित्यक्तो निरस्तो वा कुन्तलानां कर्णाटदेशानां केशानां वोल्लासस्समुन्नतिः प्रसाधनं वा यया सा वैराग्यं विरक्ततां दधती धारयन्ती धरा पृथ्वी तस्मिन् सोमदेवे धवे पत्यौ जीवत्येव विद्यमानेऽपि विगतो मृतो धवः पतिर्यस्याः सा विधवा सेव मृतपतिकानायिकेव व्यराजत विभाति स्म। कर्णाटदेशरूपकेशानामप्रसाधनादर्थात् कर्णाटदेशस्याऽवनतेः पृथ्वी सत्यपि कर्णाटदेशाधिपे सोमदेवे विधवेव स्थितेति भावः । विधवैव केशप्रसाधनं न करोतीति दिक् ।

भाषा

अपने कर्णाट देश रूपी केशों का श्रृङ्गार न करने वाली अर्थात् सोमदेव के पापाचरण से कर्णाटदेश की अवनती होने से, विरक्त पृथ्वी सोमदेवरूपी पति के जीवित रहने पर भी विधवा स्त्री के समान दिखाई देती थी। क्योंकि भारतवर्ष में पहिले काल में सधवा स्त्रियाँ ही केशों का श्रृङ्गार करती थीं।

चक्रुः स्तम्बेरमाः पृष्ठे तदारोहणदूषिते ।
अभ्युक्षणमिवोदस्त–हस्तशीकरवारिभिः ॥१०२॥

अन्वयः

स्तम्बेरमाः तदारोहणदूषिते पृष्ठे उदस्तहस्तशीकरवारिभिः अभ्युक्षणम् इव चक्रुः ।

व्याख्या

स्तम्बेरमा इभाः 'इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः' इत्यमरः । तस्य पापस्य सोमदेवस्याऽरोहणेन तत्रस्थितिं गतेन दूषिते कलुषिते पृष्ठे, उदस्तान्यूर्ध्वं क्षिप्तानि हस्तेन शुण्डादण्डेन शीकरवारीणि जलकणाम्बूनि 'शीकरोम्वुकणाः स्मृताः' इत्यमरः । तैरुदस्तहस्तशीकरवारिभिरभ्युक्षणं सिञ्चनमिव चक्रुः । अपवित्रस्थानं जलेनाभ्युक्ष्य पवित्रीक्रियते तथैव हस्तिनः पापसोमदेवस्थित्याऽपवित्रे पृष्ठे शीकराणि प्रक्षिप्य तत्पवित्रीचक्रुरिति भावः । उत्प्रेक्षालङ्कारः ।

भाषा

हाथी, पापी सोमदेव के बैठने से अपवित्र अपनी पीठ को, ऊपर उछाले हुए अपने सूँड के जलकणों के पानी से मानों पानी छिड़क कर पवित्र करते थे।

फालैर्दिव्यमिवागृण्हन् मण्डलभ्रमणोद्यताः ।
अयोग्यतां साधयितुं तस्य सेनातुरङ्गमाः ॥१०३॥

अन्वयः

तस्य अयोग्यतां साधयितुं मण्डलभ्रमणोद्यताः सेनातुरङ्गमाः फालैः दिव्यम् इव अगृण्हन् ।

व्याख्या

तस्य सोमदेवस्याऽयोग्यतां राजपदानर्हत्वं साधयितुं प्रमाणीकर्तुं मण्डलेन मण्डलाकरेण भ्रमणं परिभ्रमणं तस्मिन्नुद्यतास्तत्परा मण्डले शुचिदेशे यद्भ्रमणं गमनं तत्रोद्यता लग्ना वा सेनाया वाहिन्यास्तुरङ्गमा अश्वाः फालैः स्फालैरूर्ध्वमुत्प्लुत्य गमनैर्दिव्यं शपथमिवाऽगृण्हन् । यथा केचन मनुष्याः कमपि विषयं प्रमाणीकर्तुं पवित्रमण्डले गत्वोत्थाय शपथग्रहणं कुर्वन्ति । तथैव तैरश्वैर्मण्डलाकारभ्रमणव्याजेन पवित्रमण्डलमाश्रित्योत्फालैश्चोर्ध्वमुत्थाय सोमदेवस्याऽयोग्यतां साधयितुं शपथग्रहणमिव कृतम् । अथवा यथा केचिन्मनुष्याः प्रायश्चित्तग्रहणाय पवित्रमण्डलाख्यस्थानेषु धावित्वा उत्फालं कुर्वन्त स्तेन च स्वस्य निष्पापतां प्रमाणयन्ति, तथैव मण्डलाकार-क्रीडा-भ्रमणव्याजेन, उत्फालैश्चाश्वाः सोमदेवसंपर्कजन्यपापादात्मानं पापरहितं साधयितुं दिव्यमिवाऽकुर्वन्निति भावः ।

भाषा

उस सोमदेव की अयोग्यता सिद्ध करने के लिये उसकी सेना के घोड़े मण्डलाकार (गोल) घूमते हुए या प्रायश्चित्त भूमि में धूमते हुए अपनी उछलने की क्रीडा से या प्रायश्चित्त के लिये लम्बी छलांग मारने से मानों दिव्य का ग्रहण करने लगे। अथवा जिस प्रकार कोई मनुष्य खड़ा होकर शपथ ग्रहण करता है उसी प्रकार ये घोड़े गोल घूमते २ बीच २ में उछल कर मानों राजा सोमदेव की अयोग्यता की कसम खा रहे थे।

स जातु जातुषीं मेने मन्ये नरपतिश्रियम् ।
एतद्विलयभीत्येव क्षात्रं तेजो यदत्यजत् ॥१०४॥

अन्वयः

सः नरपतिश्रियं जातु जातुषीं मेने (इति अहम्) मन्ये । यत् एतद्विलयभीत्या इव (सः) क्षात्रं तेजः अत्यजत् ।

व्याख्या

सः सोमदेवो नरपते राज्ञः श्रियं लक्ष्मीं नरपतिश्रियं राजलक्ष्मीं जातु कदाचित् जतुषो लाक्षाया विकारो जातुषी तां जातुषीं लाक्षामयीं मेने विज्ञातवानित्यहं मन्ये कल्पयामि । यद्यस्मात्कारणादेतस्या लाक्षामयलक्ष्म्या विलयो द्रवीभूतत्वं तस्माद्भीतिस्तया लाक्षामयलक्ष्म्या द्रवीभूतत्वात्तस्या विलयो माऽभूदिति भीत्येव सः सोमदेवः क्षात्रं क्षत्रियसम्बन्धि तेजः प्रताप–मत्यजत् तत्याज । उष्णत्वादिति यावत् । क्षात्रतेजोहीनस्संजात इति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

मैं समझता हूँ कि सोमदेव ने राजलक्ष्मी को लाख की बनी समझ लिया था । इसी कारण से क्षात्र तेज की गर्मी से कहीं वह पिघल कर नष्ट न हो इस हेतु से उसने क्षात्र तेज को ही छोड़ दिया था ।

ज्ञातास्वादः स्वयं लक्ष्म्याः पिशाच्या इव चुम्बनात् ।
रुधिरं कण्ठरन्ध्रेभ्यः सर्वेषामाचकाङ्क्ष सः ॥१०५॥

अन्वयः

पिशाच्याः इव लक्ष्म्याः चुम्बनात् स्वयं ज्ञातास्वादः सः सर्वेषां कण्ठरन्ध्रेभ्यः रुधिरम् आचकाङ्क्ष ।

व्याख्या

पिशाच्या राक्षस्या इव लक्ष्म्याः श्रियश्चुम्बनात् मुखचुम्बनात् पिशाच्या रुधिराक्तमुखत्वात्तस्याः चुम्बनात् स्वयं सोमदेवो ज्ञातोऽनुभूतो रुधिरस्याऽऽस्वादः स्वादुत्वं येन सोऽनुभूतरुधिरास्वादः सः सोमदेवः सर्वेषां जनानां कण्ठरन्ध्रेभ्यो

गलच्छिद्रेभ्यो रुधिरं रक्तमाचकाङ्क्ष पातुमैच्छत् । प्रजानां महत्कष्टप्रदोभूत्वा तासां गलरक्तमपि पातुमैच्छदिति भावः । काव्यलिङ्गमलङ्कारः ।

भाषा

पिशाची के सदृश राजलक्ष्मी का मुख चुम्बन करने से पिशाची के मुख में लगे हुए रक्त के स्वाद का स्वयं अनुभव कर वह राजा प्रजाओं के गले घोंट कर उनका खून पीने की इच्छा करने लगा। अर्थात् कर आदि लगा कर प्रजाओं को अत्यधिक कष्ट देने लगा।

उद्धूतचामरोद्दाम—समीरासङ्गिनेव सः ।
रजसा पूर्यमाणोऽभून्मार्गं द्रष्टुमनीश्वरः ॥१०६॥

अन्वयः

उद्धूतचामरोद्दामसमीरासङ्गिना रजसा इव पूर्यमाणः सः मार्गं द्रष्टुम् अनीश्वरः अभूत् ।

व्याख्या

उद्धूतं वेगेन चालितञ्चामरं प्रकीर्णकं 'चामरं तु प्रकीर्णकम्' इत्यमरः । तस्योद्दाम उत्कटः समीरः पवनस्तस्याऽऽसङ्गः सम्बन्धोऽस्त्यस्येति तत्तेन वेगसंचालितप्रकीर्णकजनितोत्कटपवनसम्बन्धेनेव तत्सम्बन्धादागतेनेव रजसा धूल्या रजोगुणेन वा पूर्यमाणो पूरितनेत्रोऽत्यन्तं संपृक्तो वा स सोमदेवो मार्गं पन्थानं विवेकयुक्तकार्यं वा द्रष्टुमवलोकयितुं विचारयितुं वाऽनीश्वरोऽप्रभुरसमर्थ इवेत्यर्थः । अभूद् बभूव ।

भाषा

जोर से डुलाए जाने वाले चंवरों से जोर से बहने वाले वायु के सम्बन्ध से उड़ी हुई धूर (आँखों में पड़ जाने से) पक्ष में चंवर डुलाये जाने के राजकीय ऐश्वर्य के सम्बन्ध से उत्पन्न रजोगुण के कारण से वह राजा सन्मार्ग का अवलोकन करने में असमर्थ हो गया।

तेजोनिधीनां रत्नानां संभारं धारयन्नपि ।
बभूव दैवोपहतस्तमःस्तोमैस्तिरोहितः ॥१०७॥

अन्वयः

दैवोपहतः (सः) तेजोनिधीनां रत्नानां संभारं धारयन् अपि तमःस्तोमैः तिरोहितः बभूव।

व्याख्या

दैवेन विधिना 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः। भाग्येनोऽपहतो निरस्तो दुर्भाग्यकवलित इत्यर्थः। सः सोमदेवस्तेजसां प्रभाणां निधय आकरास्तेषां प्रभाकराणां रत्नानां मणीनां संभारं समूहो धारयन् वहन्नपि तमसामन्धःकाराणामज्ञानानां स्तोमैस्समहैस्तिरोहितः प्रच्छन्नो बभूवाऽभूत्॥ रत्नरूपस्य प्रकाशकारणस्य विद्यमानत्वेऽपि प्रकाशाभावस्य तमसो वर्णनाद्विशेषोक्तिरलङ्कारः। 'विशेषोक्तिरखण्डेषु कारेणषु फलावचः'।

भाषा

दुर्भाग्य से कवलित वह राजा तेजस्वी, व प्रकाश देने वाले रत्नसमूहों को धारण करते हुए भी अन्धकार से (अज्ञान से) आवृत हो गया।

उपरि प्रतिबन्धेन ध्यात्वेव नमतोऽखिलान्।
अधोगमनमेवासौ विह्वलो बह्वमन्यत ॥१०८॥

अन्वयः

असौ उपरि प्रतिबन्धेन विह्वलः (सन्) अखिलान् नमतः ध्यात्वा इव अधोगमनम् एव बहु अमन्यत।

व्याख्या

असौ सोमदेव उपरि ऊर्ध्वं प्रतिबन्धेन प्रतिरोधेन गन्तुमक्षमत्वेनाऽखिलान् सकलान् जनान् नमतो नतिं कुर्वतोऽधोगच्छतो वा ध्यात्वेव विचार्यैवाऽधोगमनमधः पतनमेव बहु नितान्तोपयोग्यमन्यत विज्ञातवान्। दैवहतस्य तस्योन्नतिकरणमसम्भवमिति स्वपुरतः सकलान् जनान् प्रणतान् दृष्ट्वा सोऽप्यधःपतनमेवोपयोगीति निर्धारितवानिति भावः। उत्प्रेक्षालङ्कारः।

भाषा

वह राजा उन्नति के मार्ग पर आरूढ न हो सकने के कारण घबड़ा कर सब लोगों को नीचे झुक कर नमस्कार करते हुए देख कर मानों वह नीचे झुकने को अर्थात् अधः पतन को ही उपयोगी समझने लगा।

पिशाच इव सर्वेषां छलान्वेषणतत्परः ।
नासौ किमपि कर्तव्यं विवेद मदमूर्च्छया ॥१०६॥

अन्वयः

असौ पिशाचः इव सर्वेषां छलान्वेषणतत्परः (सन्) मदमूर्च्छया किम् अपि कर्तव्यं न विवेद ।

व्याख्या

असौ सोमदेवः पिशाच इव राक्षस इव सर्वेषां जनानां छलस्य कपटव्यवहार-स्याऽन्वेषणे संपादने तत्परः परायणस्सन् मदेन राजमदेन या मूर्च्छा विवेकाविवेक-शून्यत्वं तया किमपि किञ्चिदपि कर्तव्यं राज्यभारवहनकर्त्तव्यं न विवेद न जानाति स्म । यथा पिशाचः सर्वान् जनान् दुःखयितुं तत्परो भवति तथैवाऽयं राजाऽपि मदेन सर्वाः प्रजाः कपटव्यवहारेण पीडयन् स्वकर्तव्यं न पालयति स्मेति भावः । उपमालङ्कारः ।

भाषा

वह राजा सोमदेव राजमद की बेहोशी में विवेक शून्य हो कर राक्षस के समान सब को कष्ट देने में तत्पर अर्थात् सबके साथ कपट व्यवहार करने में तत्पर होने से अपने कर्तव्य पथ से च्युत हो गया ।

व्यरज्यत समस्तोऽपि लोभैकवसतेर्जनः ।
त्यागो हि नाम भूपानां विश्वसंवननौषधम् ॥११०॥

अन्वयः

समस्तः अपि जनः लोभैकवसतेः (तस्मात्) व्यरज्यत । हि भूपानां त्यागः विश्वसंवननौषधं नाम (अस्ति)

व्याख्या

समस्तोऽखिलोऽपि जनः प्रजाजनः लोभस्याऽत्यागस्यैका वसतिः स्थानं तस्मादत्यन्तलोभसंपन्नात् सोमदेवात् व्यरज्यत विरक्तो जातः स्नेहराहित्यं संप्राप्त इति भावः । हि यस्मात्कारणात् भूपानां नृपाणां त्यागो लोभरहितदानादिकं विश्वस्य संसारस्य संवननस्य वशीकरणस्य 'वशक्रिया संवननं मूलकर्म तु कार्मणम्' इत्यमरः । औषधं भेषजं नामाऽस्ति । अत्रार्थान्तरन्यासालङ्कारः ।

भाषा

अत्यन्त लोभी उस राजा सोमदेव से सब प्रजा विरक्त हो गई अर्थात् उससे कोई स्नेह नहीं रखता था। क्योंकि राजाओं में, लोभ रहित दानादि क्रिया ही, संसार के समस्त प्राणियों को अपने वश में करलेने का प्रधान औषध है।

अकार्येऽपि कुमारस्य तात्पर्यमतनोदसौ।
किं लक्ष्मीसुखमुग्धानामसंभाव्यं दुरात्मनाम् ॥१११॥

अन्वयः

असौ अकार्ये अपि कुमारस्य तात्पर्यम् अतनोत्। लक्ष्मीसुखमुग्धानां दुरात्मनाम् असम्भाव्यं किम्।

अथवा

असौ कुमारस्य अपि अकार्ये तात्पर्यम् अतनोत्। शेषं पूर्ववत्।

व्याख्या

असौ सोमदेवोऽकार्येऽपि प्रजापीडनरूपदुराचारेपि कुमारस्य विक्रमाङ्कदेवस्य तात्पर्यमिच्छामतनोत् प्रकटीचकार। यत्प्रजाप्रपीडनं भवति तद्विक्रमाङ्कदेवेच्छयैव भवतीति प्रकटीचकारेति भावः। अथवा असौ सोमदेवः कुमारस्याऽपि विक्रमाङ्कदेवस्याऽप्यकार्ये मारणे तात्पर्यमिच्छामतनोदकरोत्। अथवा—असौ सोमदेवः कुमारस्य विक्रमाङ्कदेवस्य तात्पर्यं सद्विचारमप्यकार्येऽसद्विचारेऽतनोत् कृतवान् परिणतवानित्यर्थः। विक्रमाङ्कदेवस्य सत्परामर्शे दोषं निष्पाद्य तं हानिकरं स्वविरुद्धञ्च गृहीतवानित्यर्थः। यस्मात् लक्ष्म्याः सम्पात्त्याः सुखेनाऽऽनन्देन मुग्धानां मूढानामज्ञानिनां दुरात्मनां दुष्टस्वभावानां पापरतानामित्यर्थः। जनानामसम्भाव्यमकरणीयं किम् न किमपीत्यर्थः। अत्रार्थान्तरन्यासो नामालङ्कारः पूर्वार्द्धस्योत्तरार्द्धेन समर्थनात्।

भाषा

राजा सोमदेव अपने किये हुए प्रजापीडनादि बुरे कार्यों में कुमार विक्रमाङ्कदेव की भी सम्मति है ऐसा प्रकट करने लगा। अथवा राजा सोमदेव कुमार विक्रमाङ्कदेव को मारडालने की भी इच्छा करने लगा। अथवा राजा सोमदेव कुमार विक्रमाङ्कदेव की अच्छी सलाह को भी बुरी

समझने लगा। क्योंकि लक्ष्मी के सुख से मूढ़ता को प्राप्त दुष्ट पापियों के लिये क्या अकर्तव्य है अर्थात् वे सब प्रकार के अन्याय के कार्य कर सकते हैं।

भ्रामयन्नङ्कुशं दर्पात् द्विपेन्द्रमधिरुह्य सः।
अख्यातिबीजवापाय चखानेव नभस्थलीम् ॥११२॥

अन्वयः

सः द्विपेन्द्रम् अधिरुह्य दर्पात् अंकुशं भ्रामयन् अख्यातिबीजवापाय इव नभस्थलीं चखान।

व्याख्या

सः सोमदेवो द्वाभ्यां मुखशुण्डाभ्यां पिबन्तीति द्विपास्तेषामिन्द्रं श्रेष्ठं गजेन्द्रमधिरुह्य समारुह्य दर्पादहङ्कारादङ्कुशं सृणिं 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। गजनियन्त्रणकारकं शस्त्रं भ्रामयन् संचालयन्नख्यातेर्दुर्यशसो बीजानां वापायेव रोपणायेव नभस्थलीं गगनस्थलीं चखान निखातवान्। हस्तिपकादङ्कुशं गृहीत्वा दर्पेणाऽस्त्रमिव भ्रामयतस्तस्याऽपकीर्तिर्लोकहास्यञ्च जातम्। तत्कार्यं नभस्थल्यामख्यातिबीजरोपणायेव नभस्थलीकर्षणरूपमिति कविरुत्प्रेक्षते अर्थात् न केवलं पृथ्व्यां किन्तु नभस्थल्यामपि तस्याऽयशः प्रसृतमिति भावः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

उत्तम गज पर सवार होकर, अभिमान से अङ्कुश को आकाश में चारो ओर फेरने वाले सोमदेव ने मानो अपयश के बीज को बोने के लिये आकाश रूपी खेत को जोता। अर्थात् इस लोक में ही नहीं किन्तु ऊर्ध्व लोक में भी उसका अपयश फैल गया।

प्रणयप्रवणैवासीत् तस्य श्रीः सपरिग्रहा।
परं नाङ्गीकरोति स्म विक्रमाङ्कः कलङ्किनीम् ॥११३॥

अन्वयः

सपरिग्रहा श्रीः तस्य प्रणयप्रवणा एव आसीत् परं विक्रमाङ्कः कलङ्किनीं न अङ्गीकरोति स्म।

व्याख्या

सपरिग्रहा सपरिच्छदा श्री राज्यलक्ष्मीस्तस्य विक्रमाङ्कदेवस्य प्रणयेन प्रेम्णा प्रवणोन्मुखा प्रणयप्रवणा प्रीतितत्परैवाऽऽसीत् । परं किन्तु विक्रमाङ्को विक्रमाङ्कदेवः कलङ्किनीं सोमदेवसंसर्गात्कलुषितां तां नाऽङ्गीकरोति स्म न स्वीकरोति स्म । अमात्यादयः सर्वेऽपि राज्याङ्गभूतास्तं विक्रमाङ्कदेवं राजासने स्थापयितुमैच्छन् । परं सः सोमदेवसंसर्गादपवित्रं राजासनं न स्वीचकारेति भावः ।

भाषा

यद्यपि राज्याङ्गभूत मन्त्री आदि से युक्त राज्यलक्ष्मी विक्रमाङ्कदेव के पास उसके प्रेम में तत्पर होकर आ रही थी । अर्थात् मंत्री लोग सोमदेव को राजगद्दी से उतार कर इसे राजा बनाना चाहते थे । परन्तु उसने उस गद्दी को सोमदेव के संसर्ग से कलङ्कित समझ स्वीकार नहीं किया ।

बहुना किं प्रलापेन तथा राज्यं चकार सः ।
यथेन्दुमित्रे चालुक्य-गोत्रे प्राप कलङ्कताम् ॥११४॥

अन्वयः

बहुना प्रलापेन किम् । सः तथा राज्यं चकार यथा इन्दुमित्रे चालुक्य-गोत्रे (सः) कलङ्कतां प्राप ।

व्याख्या

बहुना प्रलापेनाऽतिसंलपनेन किं किं प्रयोजनं न किमपीत्यर्थः । स सोमदेवस्तथा तादृशं राज्यं राजकार्यं चकार कृतवान् यथा येनेन्दुमित्रे चन्द्रसदृशधवले चालुक्यगोत्रे चालुक्यनृपाणां वंशे सः सोमदेवः कलङ्कतां कलुषतां प्राप प्राप्तः । अनेनैव धवले चालुक्यवंशे कलङ्कः स्थापित इति भावः ।

भाषा

अधिक कहने से क्या लाभ ? सोमदेव राजा ने ऐसा राज्य किया जिससे चन्द्रमा के सदृश निर्मल चालुक्य वंश में वह कलङ्क हो गया ।

न शशाक निराकर्तुमग्रजस्य दुराग्रहम् ।
राज्यग्रहगृहीतानां को मन्त्रः किं च भेषजम् ॥११५॥

अन्वयः

(सः) अग्रजस्य दुराग्रहं निराकर्तुं न शशाक । राज्यग्रहगृहीतानां मन्त्रः कः भेषजं च किम् (अस्ति) ।

व्याख्या

स विक्रमाङ्कदेवोऽग्रजस्य ज्येष्ठभ्रातुर्दुराग्रहं दुराचारं प्रजापीडनरूपं निराकर्तुं दूरीकर्तुं न शशाक न समर्थो बभूव । राज्यमेव ग्रहो दुष्टग्रहः पिशाचादिर्वा तेन गृहीतानामाक्रान्तानामाविष्टानां वा नृपाणां मन्त्रो ग्रहपिशाचादिदूरीकरणमन्त्रविशेषः को, न कोऽपीत्यर्थः । भेषजमौषधं च किम् न किमपीत्यर्थः । राजमदेनाऽऽविष्टानां नृपाणां कृते न कोऽप्युपाय इति भावः ।

भाषा

कुमार विक्रमाङ्कदेव अपने बड़े भाई के दुराचार को न रोक सका । राज्य रूपी क्रूर ग्रह से या पिशाचादि से गृहीत या आविष्ट राजाओं के लिये न कोई मन्त्र है न दवा है ।

अचिन्तयच्च किं कार्यं विपर्यस्तधियामुना ।
अकीर्तिसंविभागस्य गमिष्याम्यत्र पात्रताम् ॥११६॥

अन्वयः

विपर्यस्तधिया अमुना किं कार्यम् अत्र अकीर्तिसंविभागस्य पात्रतां गमिष्यामि (इति) च अचिन्तयत् ।

व्याख्या

विपर्यस्ता विपरीता धीर्बुद्धिर्यस्य तेन विपर्यस्तधिया 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । विपरीतबुद्धियुक्तेनाऽमुना सोमदेवेन किं कार्यं मम किं प्रयोजनम् न किमपीत्यर्थः । अत्राऽस्मिन् स्थानेऽकीर्तेर्दुर्यशसः संविभागस्यांऽशस्य पात्रतां भाजनत्वं गमिष्यामि प्राप्स्यामि इति चाऽचिन्तयद्विचारितवान् । सोमदेवेन पापरतेन सहाऽत्रस्थितौ तेन सहाऽहमपि दुर्यशसोंऽशस्याऽऽश्रयो भविष्यामीति च विचारयामासेति भावः ।

भाषा

विपरीत अर्थात् निर्विवेक बुद्धिवाले सोमदेव से मुझे क्या करना है और यहाँ रहने से मैं भी दुर्यश के कुछ अंश का भागी हो जाऊँगा, ऐसा विक्रमाङ्कदेव ने विचार किया।

[1]त्यागमेव प्रशंसन्ति गुरोरुत्पथगामिनः।
तदितः साधयाम्येष दक्षिणाम्बुधिसम्मुखः ॥११७॥

अन्वयः

(यत् सत्पुरुषाः) उत्पथगामिनः गुरोः त्यागम् एव प्रशंसन्ति। तत् एषः (अहम्) दक्षिणाम्बुधिसम्मुखः सन् इतः साधयामि।

व्याख्या

यद्यस्मात्कारणात् (सत्पुरुषाः) उत्पथं कुमार्गं गच्छतीत्युत्पथगामी तस्योत्पथगामिनः कुमार्गस्थितस्य गुरोः पूज्यस्य ज्येष्ठस्य त्यागं सर्वथैवाऽसहयोगमेव प्रशंसन्ति समाद्रियन्ते। तत्तस्मात्कारणादेषोऽहं विक्रमाङ्कदेवो दक्षिणाम्बुधेर्दक्षिणसमुद्रस्य सम्मुख उन्मुखस्सन्नितोऽस्मात्स्थानात् साधयामि गच्छामि।

भाषा

बड़ों के कुमार्गगामी होने पर उनका त्याग करना ही सज्जन लोग ठीक समझते हैं। इसलिये मैं यहाँ से दक्षिण समुद्र की ओर चला जाऊँगा।

मया निपीड्यमानास्ते निबिडं द्रविडादयः।
आर्यं विपर्यस्तमपि प्रभवन्ति न बाधितुम् ॥११८॥

अन्वयः

मया निबिडं निपीड्यमानाः ते द्रविडादयः विपर्यस्तम् अपि आर्यं बाधितुं न प्रभवन्ति।

---

[1] गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ इत्यक्तेः।

व्याख्या

मया विक्रमाङ्कदेवेन निबिडमत्यन्तं निपीड्यमानास्संबाध्यमानाः पराजिता इत्यर्थः। ते द्रविडादयो द्रविड़देशनृपतिप्रभृतयो विपर्यस्तमत्याचारिणमप्याऽऽर्यं ज्येष्ठभ्रातरं सोमदेवं बाधितुं पीडयितुं विजेतुमित्यर्थः। न प्रभवन्ति न समर्था भविष्यन्ति। दुराचारिण्यपि भ्रातरि सहजस्नेहात्तस्त दुराचारेण सम्भाविताक्रमणकारिषु स्वयमाक्रमणं कृत्वा भातृरक्षणाद्विक्रमाङ्कदेवस्य महापुरुषत्वं व्यज्यते। दुराचारिणां राज्ञां पराजयोऽपि ध्वन्यते।

भाषा

दक्षिण समुद्र की ओर जाकर द्रविड देश के राजा आदि को खूब पीसूँगा अर्थात् हराऊँगा जिससे कुमार्ग में प्रवृत्त भी मेरे बड़े भाई को वे तंग न कर सकेंगे अर्थात् परास्त न कर सकेंगे।

इति स मनसा निश्चित्यार्थं चुलुक्यशिखामणिः
श्रवणसरणिं भिन्दन्भेरीरवेण विनिर्ययौ।
अपि च कुपितः क्ष्माभृत्सेनागजेषु निजेषुभिः
कतिषु विदधे धैर्यध्वंसं न साहसलाञ्छनः ॥११९॥

अन्वयः

चुलुक्यशिखामणिः सः इति अर्थं मनसा निश्चित्य भेरीरवेण श्रवणसरणिं भिन्दन् विनिर्ययौ। अपि च साहसलाञ्छनः कुपितः (सन्) निजेषुभिः कतिषु क्ष्माभृत्सेनागजेषु धैर्यध्वंसं न विदधे।

व्याख्या

चुलुक्यस्य चालुक्यवंशस्य शिखामणिश्चूडारत्नं स विक्रमाङ्कदेव इति पूर्वोक्तप्रकारेणाऽर्थं सर्वं वस्तुजातं मनसा हृदयेन निश्चित्य निर्धार्य भेर्या दुन्दुभे रवेण नादेन 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः। श्रवणयोः कर्णयोः सरणिं रन्ध्रं भिन्दन् विदारयन् विनिर्ययौ विनिर्जगाम। अपि चाऽन्यच्च साहसमेवोत्साह एव लाञ्छनं चिन्हं यस्य सः साहसलाञ्छन उत्साहवती कुपितस्सन् क्रुद्धस्सन् निजेषुभिस्स्वकीयबाणैः कतिषु कियत्सु क्ष्माभृतः नृपस्य सोमदेवस्य सेनाया वाहिन्या गजा हस्तिनस्तेषु धैर्यस्य धीरताया ध्वंसं विनाशं न विदधे न कृतवान्।

किन्तु सर्वेषां नृपसेनागजानां धैर्यनाशं चक्रे। हरिणीच्छन्दः। 'रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा' इति लक्षणात्।

भाषा

चालुक्य वंश के शिरोभूषण विक्रमाङ्कदेव ने मन में ऐसा निश्चय कर दुन्दुभी के निनाद से कान के पड़दों को फ़ाड़ते हुए, प्रस्थान कर दिया। साथ ही साथ साहसव्रती उसने क्रुद्ध होकर अपने बाणों से राजा की सेना के कितने ही हाथियों का धैर्य भंग नहीं किया अर्थात् राजा सोमदेव की सेना के सब हाथियों को बाण मार कर भगा दिया।

प्रत्यक्ता मधुनेव काननमही मौर्वीव चापोज्झिता
शुक्तिर्मौक्तिकवर्जितेव कविता माधुर्यहीनेव च।
तेनैकेन निराकृता न शुशुभे चालुक्यराज्यस्थितिः
सामर्थ्यं शुभजन्मनां कथयितुं कस्यास्ति वाग्विस्तरः ॥१२०॥

अन्वयः

एकेन तेन निराकृता चालुक्यराज्यस्थितिः मधुना प्रत्यक्ता काननमही इव, चापोज्झिता मौर्वी इव, मौक्तितवर्जिता शुक्तिः इव, माधुर्यहीना कविता इव च न शुशुभे। शुभजन्मनां सामर्थ्यं कथयितुं कस्य वाग्विस्तरः (अस्ति)।

व्याख्या

एकेन तेन केवलमेकेनैव तेन विक्रमाङ्कदेवेन निराकृता परित्यक्ता चालुक्यस्य चालुक्यराजवंशस्य राज्यस्थिती राज्यदशा राज्यमर्यादा वा मधुना वसन्तेन चैत्रेण वा 'स्याच्चैत्रे चैत्रिको मधुः' इत्यमरः। प्रत्यक्ता प्रकर्षेण त्यक्ता काननस्याऽरण्यस्य 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। मही भूमिरिव, चापेन धनुषोज्झिता दूरीकृता मौर्वी ज्येव, ''मौर्वी ज्या शिंजिनी गुणः' इत्यमरः। मौक्तिकैर्मुक्ताभिर्वर्जिता रहिता शुक्तिरिव मुक्तास्फोट इव 'मुक्तास्फोटः स्त्रियां शुक्तिः' इत्यमरः। माधुर्येण माधुर्यगुणेन हीना विरहिता कविता काव्यमिव, च न शुशुभे न शोभिता बभूव। शुभ माङ्गलिकं जन्म जनुर्येषां ते शुभजन्मानस्तेषां 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः' इत्यमरः। सामर्थ्यं शक्ति कथयितुं

वक्तुं कस्य पुरुषस्य कवेरित्यर्थः। वाचां वाणीनां विस्तरो विस्तारोऽस्ति। न कस्याऽपीत्यर्थः। मालोपमार्थान्तरन्यासालङ्कारयोः सङ्करः। शार्दूलविक्रीडितच्छन्दः। 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात्।

भाषा

अकेले विक्रमाङ्कदेव के चले जाने से अर्थात् न रहने से चालुक्य राज्य की परिस्थिति, वसन्त या चैत्र मास के विना वनभूमि के समान, मौर्वी के बिना धनुष के समान, मोती के बिना सींप के समान, और माधुर्यगुण के बिना कविता के समान शोभित नहीं होती थी। सुमुहूर्त में उत्पन्न महात्माओं की शक्ति के वर्णन करने का वाक्-सामर्थ्य कौन रख सकता है अर्थात् कोई नहीं।

इति श्री त्रिभुवनमल्लदेव—विद्यापति—काश्मीरकभट्ट श्री बिल्हण-विरचिते विक्रमाङ्कदेवचरिते महाकाव्ये चतुर्थः सर्गः।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाज-बुधोत्तमात्समुदितः श्री विश्वनाथः सुधीः।
चक्रे रामकुबेरपण्डितवरात्संप्राप्तसाहाय्यक-
ष्टीकायुग्ममिदं रमाकरुणया सर्गे चतुर्थे क्रमात्॥

ॐ शान्तिः शान्तिः शान्तिः

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

पञ्चमः सर्गः ।

नैष दुर्मतिरिमं सहिष्यते राज्यकण्टकविशोधनोद्यतः ।
अग्रजादिति विशङ्क्य सङ्कटं सिंहदेवमनुजं निनाय सः ॥१॥

अन्वयः

सः, राज्यकण्टकविशोधनोद्यतः दुर्मतिः एषः इमं न सहिष्यते इति अग्रजात् सङ्कटं विशङ्क्य अनुजं सिंहदेवं निनाय ।

व्याख्या

स विक्रमाङ्कदेवो, राज्यस्य स्वराष्ट्रस्य कण्टकाः शत्रुरूपदायादास्तेषां विशोधनेऽपसारणे मारणे इत्यर्थः । उद्यतस्तत्परो स्वराष्ट्रदायाददूरीकरणे समुद्यतो दुर्मतिर्दुर्बुद्धिरेष सोमदेव इमं सिंहदेवनामानं कनिष्ठभ्रातरं न सहिष्यते स्वानुकूल्येन न मंस्यते तस्याऽपि विनाशे समुद्यतो भवेदिति भावः । इति हेतोरग्रजात्सोमदेवात्संकटं बाधां विशङ्क्य वितर्क्याऽनुजं कनिष्ठभ्रातरं सिंहदेवं जयसिंहापरनामानं निनायऽऽत्मना सह नीतवान् । अस्मिन् सर्गे रथोद्धताच्छन्दः— 'रान्नराविह रथोद्धता लगौ' इति लक्षणात् ।

भाषा

निष्कण्टक राज्य करने की इच्छा से, राज्य में बाधक दायादों को दूर कर देने में तत्पर, यह कुबुद्धि सोमदेव, कहीं छोटे भाई सिंहदेव उर्फ जयसिंह का भी अस्तित्व सहन न कर सके, ऐसे संकट की आशंका से, विक्रमाङ्कदेव ने उसको भी साथ ले लिया ।

गुप्तभूषणरवेव सर्वतस्तूर्यमङ्गलनिनादशान्तितः ।
श्रीरलक्ष्यत विलक्ष्यचेतसा तस्य पृष्ठचलितेव भूभुजा ॥२॥

अन्वयः

विलक्ष्यचेतसा भूभुजा सर्वतः तूर्यमङ्गलनिनादशान्तितः गुप्तभूषणरवा इव श्रीः तस्य पृष्ठचलिता इव अलक्ष्यत ।

व्याख्या

विगतं विनष्टं लक्ष्यं ज्ञानविषयो यस्मात्तद्विलक्ष्यं ज्ञानविषयरहितं चेतश्चित्तं यस्य स तेनाऽज्ञानिना भुवं पृथ्वीं भुनक्ति स्वोपभोगे समानयतीति भूभुक् तेन भूमीश्वरेण सोमदेवेन सर्वतस्सर्वासु दिक्षु तूर्यस्य भेर्या मङ्गलनिनादः मङ्गलध्वनिस्तस्य शान्त्यास्तूर्यमङ्गलध्वनिसमाप्तितः 'पञ्चम्यास्तसिल्' इति तसिल् प्रत्ययः । गुप्तः प्रच्छन्नो भूषणानामलङ्काराणां रवस्स्वनो यस्याः सा भूषणशब्दरहितेव श्री राज्यलक्ष्मीस्तस्य विक्रमाङ्कदेवस्य पृष्ठे पृष्ठतश्चलितेव चलन्तीवाऽलक्ष्यत दृष्टा । गते विक्रमाङ्कदेवे राज्यलक्ष्मीमपि तत्पश्चाद्गतामिवाऽनुमाति स्मेति भावः । अत्र माङ्गलिकतूर्यध्वन्यभावाद्भूषणशब्दशून्यत्वस्य पश्चाच्चलनस्य चोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ।

भाषा

विक्रमाङ्कदेव के प्रस्थान समय चारों ओर कहीं भी तुरही का मङ्गलनाद न होने से अज्ञानी राजा सोमदेव ने, राज्य लक्ष्मी मानों अपने आभूषणों के झंकारों को दबाकर उसके पीछे चली जा रही है, ऐसा अनुभव किया ।

अङ्कवर्तिनमशङ्कमाः कथं नाहमेनमुपरुद्धवानिति ।
तल्पनिर्लुठनशीर्णचन्दनः पर्यतप्यत विभावरीषु सः ॥३॥

अन्वयः

आः । अङ्कवर्तिनम् अशङ्कम् एनम् अहं कथं न उपरुद्धवान् इति विभावरीषु तल्पनिर्लुठनशीर्णचन्दनः सः पर्यतप्यत ।

व्याख्या

आः । इत्यत्यन्तखेदे । अङ्के उत्सङ्गे वर्तते इत्यङ्कवर्ती तमङ्कवर्तिनं मदधीनं कल्याणपुरस्थं शङ्कया मत्तः स्वायत्तीकरणस्य सन्देहेन रहितमशङ्कमेनं विक्रमाङ्क-

देवमहं सोमदेवः कथं कस्मान्नोपरुद्धवान् प्रतिबद्धवान् । इति हेतोर्विभावरीषु रात्रिषु तल्पे शय्यायां निर्लुठनेनेतस्ततः परावर्तनेन शीर्णं गलितं चन्दनं गात्रे समुपलिप्तश्चन्दनपङ्को यस्य स तल्पनिर्लुठनशीर्णचन्दनः स सोमदेवः पर्यतप्यत विक्रमाङ्कदेव-निर्गमनजन्यपश्चात्तापेन संतप्तो बभूव ।

भाषा

अत्यन्त दुःख की बात है कि मैंने पास ही में विद्यमान निःशङ्क विक्रमाङ्कदेव को क्यों नहीं गिरफ्तार कर लिया—इस विचार से पलङ्ग पर बेचैनी से करवटें बदलते २ शरीर में लगा हुआ चन्दन मिटाते हुए सोमदेव रात्रियों में पश्चात्ताप करने लगता था ।

तस्य मग्नमवनीपतेर्मनस्त्रासपङ्कपटले पटीयसि ।
भूरिसंख्यभरकर्षणक्षमैरप्यकृष्यत न मत्तदन्तिभिः ॥४॥

अन्वयः

अवनीपतेः तस्य पटीयसि त्रासपङ्कपटले मग्नं मनः भूरिसंख्यभर-कर्षणक्षमैः मत्तदन्तिभिः अपि न अकृष्यत ।

व्याख्या

अवन्या भूमेः पतिस्स्वामी तस्याऽवनीपतेः पृथ्वीपतेस्तस्य सोमदेवस्याऽतिशयेन पटुरिति पटीयान् तस्मिन् पटीयस्यतिघने त्रासो भयमेव 'दरस्त्रासो भीतिर्भीः साध्वसं भयम्' इत्यमरः । पङ्कः कर्दमस्तस्य पटलं समूहः तस्मिन् भीतिरूप-कर्दमसमूहे मग्नं निपतितं मनश्चित्तं 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । भूरीणि भूयांसि 'पुरुहः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च' इत्यमरः । संख्यानि युद्धानि 'मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्' इत्यमरः । तेषां भरो भारस्तस्य कर्षणे वहने क्षमाः समर्थास्तैर्बहुयुद्धकरणक्षमैर्मत्ता मदान्धाश्च ते दन्तिनो गजाश्च 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः । तैर्मदान्धहस्तिभिरपि नाऽकृष्यत न समाकृष्टम् । विक्रमाङ्कदेवपराक्रमभया-द्व्याकुलं सोमदेवस्य मनो मत्तगजराजसमूहसंकुलाभिर्विद्यमानाभिस्सेनाभिरपि विक्रमाङ्कदेवस्य पराजयकरणे स्वविजये च विश्वस्तं न बभूवेति भावः । त्रासे पङ्काभेदाद्रूपकम् ।

भाषा

सोमदेव की सेना के आजाने पर विपक्षी राजाओं के लिये यमस्वरूप विक्रमाङ्कदेव ने क्रूरता से मार काट करने में प्रवृत्त उसकी सेना को, उन मदोन्मत्त हाथियों के पाँवों तले कुचला कर क्षण भर में नष्ट कर दिया।

किं बहुप्रलपितैः पुनः पुनः प्रत्यनीकपृतनाः समागताः।
कालवक्त्रकुहरे निवेश्य स स्वाङ्गशेषमकरोन्महीपतिम् ॥८॥

अन्वयः

पुनः पुनः बहुप्रलपितैः किम्। सः समागताः प्रत्यनीकपृतनाः कालवक्त्रकुहरे निवेश्य महीपतिं स्वाङ्गशेषम् अकरोत्।

व्याख्या

पुनः पुनः भूयो बहुप्रलपितैर्बहुभाषितैः किं न किमपि प्रयोजनम्। स विक्रमाङ्कदेवः समागताः समराङ्गणं प्रत्यागताः प्रत्यनीकस्य विपक्षस्य शत्रोरित्यर्थः। पृतनास्सेनाः (कर्म) 'अस्त्रियां समरानीकरणाः कलहविग्रहौ' इत्यमरः। ध्वजिनी वाहिनी सेना पृतनाऽनीकिनीचमूः' इत्यमरः। कालस्य यमस्य वक्त्रं मुखमेव कुहरं बिलं 'अथ कुहरं सुषिरं विवरं बिलम्' इत्यमरः। तस्मिन्निवेश्य प्रवेश्य महीपतिं पृथ्वीपतिं सोमदेवं स्वस्याऽङ्गं शरीरमेव शेषमवशिष्टांशो यस्य तं स्वशरीरमात्रावशेषं निस्सहायमित्यर्थः। अकरोत् कृतवान्।

भाषा

बार २ बहुत कहने से क्या लाभ। उसने आई हुई विपक्षी पलटनों को यमराज के मुख रूपी बिल में डालकर राजा सोमदेव को केवल शरीर मात्र शेष बना दिया। अर्थात् उसकी सब सेना नष्ट कर डाली।

राजहंसमिव बाहुपञ्जरे श्रीविलासभुवि लालयन्यशः।
तत्र तत्र शतपत्रलोचनश्चित्रमभ्युदयमाससाद सः ॥९॥

अन्वयः

शतपत्रलोचनः सः श्रीविलासभुवि बाहुपञ्जरे राजहंसम् इव यशः लालयन् (सन्) तत्र तत्र चित्रम् अभ्युदयम् आससाद।

व्याख्या

शतपत्रे कमले इव लोचने नेत्रे यस्य सः कमलनेत्रस्स विक्रमादित्यः श्रियो राजलक्ष्म्याः शोभाया वा विलासभुवि क्रीडास्थाने बाहुर्भुज एव पञ्जरस्तस्मिन् भुजपञ्जरे राजहंसमिव मरालमिव शुभ्रं यशः कीर्तिं लालयन् सुखपूर्वकं पालयन् सन् तत्र तत्र सर्वत्र स्थाने चित्रमाश्चर्ययुक्तमभ्युदयं समुन्नतिमाससाद प्राप्तवान् ।

भाषा

कमल के समान नेत्र वाले उस विक्रमाङ्कदेव ने राजलक्ष्मी या शोभा की विलास भूमि अपनी भुजा रूपी पिंजड़े में हंस के समान श्वेत यश को प्रेमपूर्वक पालन करते हुए सर्वत्र आश्चर्य जनक अभ्युदय प्राप्त किया। अर्थात् अपने भुजबल से शत्रुओं को परास्त कर यश फैलाते हुए सर्वत्र आश्चर्य जनक अभ्युदय किया ।

मन्युपङ्ककलुषं समुद्वहन् भ्रातृदुश्चरितचिन्तनान्मनः ।
सुप्रसन्नपयसा प्रसन्नतां द्रागनीयत स तुङ्गभद्रया ।।१०।।

अन्वयः

भ्रातृदुश्चरितचिन्तनात् मन्युपङ्ककलुषं मनः समुद्वहन् सः सुप्रसन्नपयसा तुङ्गभद्रया द्राक् प्रसन्नताम् अनीयत ।

व्याख्या

भ्रातुस्सोमदेवस्य दुश्चरितं कुचरित्रं तस्य चिन्तनात् स्मरणात् मन्युः क्रोध एव दैन्यमेव वा 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । पङ्कः कर्दमस्तेन कलुषं मलिनं मनो हृदयं समुद्वहन् धारयन् स विक्रमाङ्कदेवः सुप्रसन्नं निर्मलं पयो जलं यस्यास्तया तुङ्गभद्रया नद्या द्राग् झटिति प्रसन्नतां निर्मलत्वमनीयत प्राप्तः । तुङ्गभद्रादर्शनेन तत्र स्नात्वा च प्रसन्नचित्तो बभूवेति भावः । अत्र रूपकालङ्कारः ।

भाषा

अपने भाई सोमदेव के कुकर्मों का विचार करने से उत्पन्न क्रोध या विषाद रूपी कीचड़ से मलिन हृदय को धारण करने वाला विक्रमाङ्कदेव निर्मल जल वाली तुङ्गभद्रा नदी को देख कर (और उसमें स्नान कर) शीघ्र ही प्रसन्न हो गया ।

तत्करीन्द्रनिवहावगाहनैर्वाहिनी प्रतिपथेन सागमत् ।
दन्तिदानजलनिम्नगाः पुनर्लेभिरे प्रणयमापगापतेः ॥११॥

अन्वयः

सा वाहिनी तत्करीन्द्रनिवहावगाहनैः प्रतिपथेन अगमत् । दन्तिदान-जलनिम्नगाः आपगापतेः प्रणयं पुनः लेभिरे ।

व्याख्या

सा प्रसिद्धा वाहिनी तुङ्गभद्रानदी 'वाणिन्यौ नर्तकी दूत्यौ स्रवन्त्यामपि वाहिनी' इत्यमरः । तस्य विक्रमाङ्कदेवस्य करीन्द्रा गजेन्द्रास्तेषांनिवहाः समूहा-स्तेषामवगाहनानि स्नानानि तैस्तत्करीन्द्रनिवहावगाहनैः प्रतिपथेन विपरीत-मार्गेणाऽगमत् प्रवहति स्म । दन्तिनां करिणां दानजलस्य मदजलस्य निम्नगा नद्य आपगानां नदीनां 'स्रवन्ती निम्नगापगा' इत्यमरः । पतिस्समुद्रस्तस्य प्रणयं स्नेहं संगममित्यर्थः । पुनर्लेभिरे प्रापुश्च । तुङ्गभद्रायाः प्रतिकूलगमनेन मदजलनदीनाञ्च समुद्रसंगमेन गजेन्द्राणामत्याधिक्यं सूचितम् । अत्र लिङ्गसाम्या-न्नायक-नायिकाव्यवहारप्रतीतेः समासोक्तिरलङ्कारः । तुङ्गभद्रायां रुष्टनायिका-व्यवहारश्च प्रतीयते ।

भाषा

वह तुङ्गभद्रा नदी विक्रमाङ्कदेव के असंख्य बड़े २ हाथियों के एक साथ उसमें उतर कर स्नान करने से उलटी बहने लगी और हाथियों के मदजल की नदियाँ समुद्र में जा मिलीं ।

वारणः प्रतिगजं विलोकयंस्तद्विमर्दरसमांसलस्पृहः ।
आददे न विशदं नदीजलं शीलमीदृशममर्षशालिनाम् ॥१२॥

अन्वयः

प्रतिगजं विलोकयन् तद्विमर्दरसमांसलस्पृहः वारणः विशदं नदीजलं न आददे । अमर्षशालिनाम् ईदृशं शीलम् ।

व्याख्या

प्रतिगजं प्रतिमल्लहस्तिनं विलोकयन् संपश्यन् तस्य प्रतिगजस्य विमर्देन सम्मर्देन शरीरसंघट्टनेन वा यो रसो जलमानन्दो वा तस्मिन्मांसला बलवती

स्पृहाऽऽकाङ्क्षा यस्य स वारणो गजः 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः। विशदं निर्मलं नद्यास्तुङ्गभद्राया जलं पयो न आददे न जग्राह। अमर्षेण रोषेण शालन्ते शोभन्ते इत्यमर्षशालिनस्तेषां 'कोपक्रोधामर्षरोषप्रतिघा-रुट्क्रुधौ स्त्रियौ' इत्यमरः। क्रोधयुक्तानामीदृशमेवं विधं शीलं स्वभावः 'शीलं स्वभावे सद्वृत्ते' इत्यमरः। तद्गजो मदान्धत्वात्प्रतिमल्लगजेन साकं युद्धर-सानुभवेच्छया तदानन्दलोभपरवशस्सन् पिपासाशान्त्यै निर्मलं पेयमपि नदीजलं न पपाविति भावः। अत्राऽर्थान्तरन्यासोऽलङ्कारः।

भाषा

विरोधी हाथी को देखकर उसको धर दवाने के रस या जल की उत्कट इच्छा रखने वाले विक्रमाङ्कदेव के हाथी ने तुङ्गभद्रा नदी के निर्मल जल का पान नहीं किया। क्रोधियों का स्वभाव ही ऐसा होता है।

षट्पदध्वनिभिराकुलीकृतः पातुमैच्छदुदकं न कुञ्जरः।
तान्प्रविश्य पयसि न्यपीडयद्दूषणं हि मुखरत्वमर्थिनाम् ॥१३॥

अन्वयः

कुञ्जरः षट्पदध्वनिभिः आकुलीकृतः (सन्) उदकं पातुं न ऐच्छत्। (किन्तु) पयसि प्रविश्य तान् न्यपीडयत्। हि प्रार्थिनां मुखरत्वं दूषणम्।

व्याख्या

कुञ्जरो गजः षट्पदानां भ्रमराणां 'षट्पदभ्रमरालयः' इत्यमरः। ध्वनिभिः शब्दैराकुलीकृत उद्विग्नस्सन् उदकं जलं पातुं पानं कर्तुं नैच्छत् न चकमे। किन्तु पयसि जले प्रविश्य तन्मध्ये गत्वा तान् भ्रमरान् न्यपीडयद् बाधितवान्। हि यतोऽर्थिनां याचकानां मुखरत्वं वाचालत्वं दूषणं दोषः। अत्राऽर्थान्तर-न्यासालङ्कारः।

भाषा

विक्रमाङ्कदेव के हाथी ने भौरों की भनभनाहट से घबड़ा कर पानी पीने की इच्छा न की। किन्तु पानी में गोता लगा कर उनको तंग किया। क्योंकि अधिक बड़ बड़ करना याचकों का दोष है।

अत्यजत् प्रतिगजं मतङ्गजः पार्श्वसङ्गतकरेणुलोभतः ।
यत्र तत्र भुजदण्डचण्डिमा चित्रमप्रतिहतो मनोभुवः ॥१४॥

अन्वयः

मतङ्गजः पार्श्वसंगतकरेणुलोभतः प्रतिगजम् अत्यजत् । यत्र तत्र मनोभुवः भुजदण्डचण्डिमा अप्रतिहतः (इति) चित्रम् ।

व्याख्या

मतङ्गजो नागः 'मतङ्गजो गजो नागः' इत्यमरः । पार्श्वे समीपे संगता मिलिता करेणुर्हस्तिनी 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । तस्या लोभतः प्रलोभात् प्रतिगजं प्रतिमल्लनागमत्यजत् विजहौ । यत्र तत्र सर्वत्र मनसा भवतीति मनोभूः कामस्तस्य मनोभुवः कामस्य भुजदण्डस्य दोर्दण्डस्य चण्डिमा शौर्यमप्रतिहतो निर्बाधगतिरिति चित्रमाश्चर्यकरम् । कामशरताडितस्सर्वं परित्यज्य तद्वशे भवतीति भावः ।

भाषा

हाथी ने पास ही में विद्यमान एक हथिनी के लोभ से विपक्षी हस्ती को छोड़ दिया । क्या आश्चर्य की बात है कि कामदेव के भुजदण्ड के पराक्रम में रोक टोक करने वाला कोई नहीं है । अर्थात् सभी जीव कामदेव के वशीभूत हैं ।

रुद्धवर्त्मसु गजेषु वाजिनः प्रापुरम्भसि निमज्जनं चिरात् ।
लब्धतीरतरुकण्टकैः पुनर्नेप्सितापि तटिनी क्रमेलकैः ॥१५॥

अन्वयः

गजेषु रुद्धवर्त्मसु (सत्सु) वाजिनः अम्भसि चिरात् निमज्जनं प्रापुः । लब्धतीरतरुकण्टकैः क्रमेलकैः पुनः तटिनी ईप्सिता अपि न ।

व्याख्या

गजेषु हस्तिषु रुद्धं प्रतिरुद्धं वर्त्म मार्गो यैस्ते रुद्धवर्त्मानस्तेषु रुद्धवर्त्मसु प्रतिबद्धमार्गेषु सत्सु 'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः । वाजिनोऽश्वाः 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः । अम्भसि जले

चिरात् बहुकालमभिव्याप्य निमज्जनं स्नानं प्रापुः प्राप्तवन्तः। गजैर्मार्गे रुद्धे सति वाजिनां निस्सरणमार्गाभावात् तेऽश्वाश्चिरं स्नानावसरमवापुरिति भावः। लब्धानि प्राप्तानि तीरे नदीतटे तरूणां वृक्षाणां कण्टकानि यैस्तैः क्रमेलकैरुष्ट्रैः पुनस्तटिनी नदीक्षिताऽपि न दृष्टाऽपि न। उष्ट्राणां कण्टकप्रियत्वादत्र स्नानार्थं तैर्ध्यानमपि न दत्तमिति भावः।

भाषा

हाथियों के समूह से बाहर निकलने का रास्ता रुक जाने से घोड़ों ने चिरकाल तक नदी में स्नान किया। नदी के तट पर के वृक्षों के काँटे मिल जाने से ऊँटो ने नदी की ओर आँख उठा कर भी न ताका। अर्थात् सुन्दर जलाशय मिलने पर भी स्नान करने की अभिरुचि उनमें उत्पन्न न हुई।

अस्मरद्द्विरददानवारिणा तस्य[१] वारिनिधिराविलीकृतः।
हन्त संततमदस्य विभ्रमानभ्रमुप्रियतमस्य दन्तिनः ॥१६॥

अन्वयः

तस्य द्विरददानवारिणा आविलीकृतः वारिनिधिः संततमदस्य अभ्रमुप्रियतमस्य दन्तिनः विभ्रमान् हन्त! अस्मरत्।

व्याख्या

तस्य विक्रमाङ्कदेवस्य द्वौ रदौ दन्तौ येषां ते द्विरदा गजाः 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः। तेषां दानवारि मदजलं 'गण्डः कटो मदो दानम्' इत्यमरः। तेन गजमदजलेनाऽऽविलीकृतः कलुषीकृतो वारिनिधिः समुद्रः सन्ततोऽविच्छिन्नो मदो यस्य तस्य निरन्तरनिस्सरन्मदजलस्याऽभ्रमुर्नामैरावतगजस्याङ्गना 'ऐरावतोऽभ्रमातङ्गैरावणाभ्रमुवल्लभाः' इत्यमरः। तस्याः प्रियतमोऽत्यन्तप्रियः पतिस्तस्य दन्तिन ऐरावतस्य विभ्रमान् विलासान् हन्तेति खेदेऽधुना तत्समीपे देवैरपहृतस्यैरावतस्याऽभावादस्मरत् सस्मार। अत्र सेनागजसम्बन्धेन तत्सदृशैरावतस्मरणात्स्मरणालङ्कारः।

---

[१] तेनेति पाठात्तस्येति पाठः साधुतरः प्रतिभाति।

भाषा

विक्रमाङ्कदेव के हाथियों के मदजल से मटमैला समुद्र, मद को सतत चुवाने वाले अभ्रमु नाम की हथिनी के प्रिय पति ऐरावत नाम के इन्द्र के हाथी का स्मरण करने लगा। उच्चैःश्रवा नामक इन्द्र के घोड़े के समान ऐरावत हाथी भी पहिले समुद्र में ही था। बाद में समुद्र मन्थन से उत्पन्न इन दोनों को इन्द्र ने अपना वाहन बनाया।

स्नानसक्तपरिवारसुन्दरी-वृन्दमध्यमवधीरिताङ्कुशः ।
यज्जगाम मदलङ्घितः करी भाग्यसम्पदुपरि स्थितस्य सा ॥१७॥

अन्वयः

मदलङ्घितः अवधीरिताङ्कुशः करी स्नानसक्तपरिवारसुन्दरीवृन्दमध्यं यत् जगाम सा उपरि स्थितस्य भाग्यसम्पत्।

व्याख्या

मदेन लङ्घितोऽतिक्रान्तमर्यादो मदोन्मत्त इत्यर्थः। अवधीरित उपेक्षितोऽङ्कुशः सृणिर्येन स उपेक्षिताङ्कुशनियन्त्रणः गजः स्नानेऽवगाहने सक्ताः संलग्नाः परिवारसुन्दर्योऽन्तःपुराङ्गनास्तासां वृन्दं समूहस्तस्य मध्यं स्नानलग्नान्तःपुराङ्गनासमूहमध्यं यज्जगाम प्रविष्टवान् इति यत्; अत्र यच्छब्देन पादत्रयोक्तार्थस्य संग्रहः। सा उपरि गजोपरि स्थितस्य विद्यमानस्य हस्तिपकस्येत्यर्थः। भाग्यसंपत् भाग्यसम्पत्तिरासीत्। नारीसमूहमध्यं गजे प्रविष्टे सति तासां भयजन्यविविधवस्त्रस्खलनादिविलासदर्शनस्य सौभाग्यात् हस्तिपकस्य कृते सा घटना भाग्यसंपदेवेति भावः।

भाषा

मदोन्मत्त हाथी का, अंकुश की कुछ भी परवाह न कर स्नान करने में व्यस्त अन्तः पुर की सुन्दरियों के समूह के बीच में अचानक चला जाना, पीलवान के लिये बड़े भाग्य की घटना थी। अर्थात् हाथी के डर से अर्धनग्न या नग्न अन्तः पुर की कामिनीयों के प्राण छुड़ा कर भागने के हाव भावों को देखने का अवसर पीलवान को प्राप्त होना, बड़े भाग्य की बात है अन्यथा अन्तः पुर की स्त्रियों को देखना भी उसके लिये असम्भव है।

तां विधाय कतिचिद्दिनानि स प्रेयसीघुसृणपङ्किलां नदीम् ।
चोलसम्मुखमगाहताहव[१]-प्राप्तिदुर्ललितबाहुराग्रहम् ॥१८॥

अन्वयः

आहवप्राप्तिदुर्ललितबाहुः सः कतिचित् दिनानि तां नदीं प्रेयसीघुसृण-पङ्किलां विधाय चोलसम्मुखम् आग्रहम् अगाहत ।

व्याख्या

आहवानां युद्धानां 'अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः' इत्यमरः । प्राप्तौ लाभे दुर्ललितो दुश्चेष्टो बाहुर्भुजो यस्य स युद्धाप्राप्तिखिन्नभुजः स विक्रमाङ्कदेवः कतिचित् कियन्ति दिनानि दिवसांस्तां नदीं तुङ्गभद्रां प्रेयसीनामङ्गनानां घुसृणेन कुङ्कुमेन पङ्किलां कर्दमसंपन्नां विधाय कृत्वा चोलसम्मुखं चोलराज्याभिमुख-माग्रहमाक्रमणमगाहत कृतवान् ।

भाषा

युद्ध की प्राप्ति के लिये अत्यन्त लालायित या युद्ध की प्राप्ति न होने से दुश्चेष्ट भुजा वाले विक्रमाङ्कदेव ने कुछ दिनों तक उस तुङ्गभद्रा नदी को अङ्गनाओं के अङ्ग में विलिप्त केशर से मिश्रित करने के अनन्तर चोलदेश पर आक्रमण कर दिया ।

इतः परं पञ्चभिः श्लोकैर्वनवासमण्डलं वर्णयति कविः—

केलिकाननशकुन्तकूजितच्छाद्यमानगलकन्दलस्वनाः ।
प्राप्नुवन्ति न विदग्धतागुणं यत्र दर्शयितुमेणलोचनाः ॥१९॥

अन्वयः

यत्र केलिकाननशकुन्तकूजितच्छाद्यमानगलकन्दलस्वनाः एणनयनाः विदग्धतागुणं दर्शयितुं न प्राप्नुवन्ति ।

---

[१] चोलसम्मुखमगाहताहवाप्राप्तिदुर्ललितबाहुराग्रहम् । इतिपाठः साधुतरः प्रतिभाति ।

व्याख्या

यत्र वनवासमण्डले केलेः क्रीडायाः काननं वनं 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। तस्मिन् ये शकुन्ताः पक्षिणस्तेषां कूजितैश्शब्दैश्च्छाद्यमानोऽभिभूयमानो गलकन्दलस्य गलनलिकायाः स्वनश्शब्दो यासां ता एणलोचना मृगनयनाः, पक्षिकलकलस्योत्कटतया मृगलोचनाशब्दोऽभिभूतो माधुर्यातिशयादिति भावः। विदग्धताया वैदग्धस्य गुणं समुत्कर्षं दर्शयितुं प्रकाशयितुं न प्राप्नुवन्ति न शक्नुवन्ति। पक्षिणां कलकलाधिक्यादङ्गनानां कोमलशब्दा दुःश्रवा इति भावः। पक्षिणामाधिक्यात्तत्रस्थफलसम्पत्तिर्ध्वनिता। अतिशयोक्त्यलङ्कारः।

भाषा

बागों के पक्षियों के कूजित से दबे हुए गलों के शब्द वाली मृगनयनी स्त्रियाँ अपनी दक्षता के उत्कर्ष को प्रकट करने में समर्थ न हो सकीं। अर्थात् पक्षियों के जोर से होने वाले कलरव से उनकी कोमल व मधुर ध्वनि सुनाई नहीं पड़ सकती थी।

यत्र तिष्ठति विरोधमुद्वहन् दाहतः प्रभृति तेजसा सह।
मेचकक्रमुककाननावली-मीलितोष्णकिरणार्चिषि स्मरः ॥२०॥

अन्वयः

मेचकक्रमुककाननावलीमीलितोष्णकिरणार्चिषि यत्र स्मरः दाहतः प्रभृति तेजसा सह विरोधम् उद्वहन् तिष्ठति।

व्याख्या

मेचकानां कृष्णवर्णानां क्रमुकाणां पूगवृक्षाणां काननानि वनानि तेषामावली पंक्तिस्तया मीलितान्यवरुद्धान्युष्णकिरणस्य सूर्यस्याऽर्चींषि मयूखा यस्मिन्तस्मिन् मेचकक्रमुककाननावलीमीलितोष्णकिरणार्चिषि यत्र वनवासमण्डले स्मरः कामदेवो दाहतश्शिवतृतीयनेत्राग्निभस्मीकरणात्प्रभृति तेजसा येन केनाऽपि तेजस्सामान्येन सह विरोधं विद्वेषमुद्वहन् धारयन् तिष्ठति निवासं करोति। शिवनेत्राग्निविरोधेन तेजस्सामान्येन द्वेषात्सूर्यतेजसोऽप्यत्राऽनागमनादत्र वने स्मरः स्थितिमवलम्बते इति भावः। स्मरे तेजसा विरोधरूपस्य धर्मस्योत्प्रेक्षणादुत्प्रेक्षालङ्कारो गम्यते, तेन च काननानां क्रीडायोग्यत्वं ध्वन्यत इति वस्तुध्वनिः।

भाषा

श्यामवर्ण के सुपारी के वृक्षों के जंगलों में जहाँ सूर्य की किरणें भी भीतर प्रवेश नहीं कर सकतीं वहाँ (वनवास मण्डल में) शिव के तीसरे नेत्र की आग से जलने के दिन से, तेज मात्र से द्वेष करने वाला कामदेव निवास करता है।

[१]यत्र मारुतविधूतकेतक—व्रातधूलिधवलासु भूमिषु ।
कामिनीशरणमाश्रिते स्मरे भर्गवह्निरिव भस्मसादभूत् ॥२१॥

अन्वयः

स्मरे कामिनीशरणम् आश्रिते सति यत्र मारुतविधूतकेतकव्रातधूलिधवलासु भूमिषु भर्गवह्निः भस्मसात् अभूत् इव ।

व्याख्या

कामिनीनामङ्गनानां शरणं स्वरक्षार्थं रक्षितृत्वेनाऽऽश्रितेऽवलम्बिते सति यत्र वनवासमण्डले मारुतेन पवनेन विधूताः कम्पिताः केतकव्राताः केतकसमूहास्तेषां धूलिभिः परागैर्धवलासु शुभ्रासु भूमिषु भर्गवन्हिः शिवस्य तृतीयनेत्रजन्यवन्हिर्भस्मसादभूदिव भस्मशेषोऽभूदिव । कामिनीशरणागते कामदेवे यत्र भर्गवन्हिर्वायुकम्पितकेतकसमूहपरागपतनमिषेण शुभ्रत्वात् भस्मावशेषोऽभूदिवेति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

कामदेव के, अङ्गनाओं की शरण ले लेने से, वनवासमण्डल में हवा के झोंकों से हिलाए हुए केवड़ों के फूलों की धूलि से सफेद भई हुई भूमिओं पर मानों शंकर के तृतीय नेत्र की अग्नि, जल जाने पर राख होकर पड़ी थी ।

नारिकेलफलखण्डताण्डव—क्षुण्णतत्कुहरवारिवीचयः ।
यत्र यान्ति मरुतः स्मरास्त्रतां धूतपक्वकदलीसमृद्धयः ॥२२॥

अन्वयः

यत्र धूतपक्वकदलीसमृद्धयः नारिकेलफलखण्डताण्डवक्षुण्णतत्कुहरवारिवीचयः मरुतः स्मरास्त्रतां यान्ति ।

---

[१] दृशादग्धं मनसिजं जीवयन्ति दृशैव या ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः । इत्युक्तेः ।

व्याख्या

यत्र वनवासमण्डले धूताः कम्पिताः पक्वकदलीनां परिणतावस्थापन्नरम्भाफलानां समृद्धयः समूहा यैस्ते, नारिकेलफलानां खण्डास्समूहास्तेषां ताण्डवेनोद्धतनृत्येन, वृक्षात् सततपातनेन जलमध्ये प्रविश्यपुनर्निस्सरणेनेत्यर्थः। क्षुण्णाः सम्मर्दिता उत्पादिता इत्यर्थः। तस्य वनमण्डलस्य कुहरे मध्ये गर्ते वा वारिवीचयो जलतरङ्गा यैस्ते मरुतो वायवः स्मरस्य कामस्याऽस्त्रतां बाणत्वं कामोद्दीपनाय बाणस्यप्रहरणत्वमित्यर्थः। यान्ति व्रजन्ति। पक्वकदलीसुगन्धयुक्ता नारिकेलजनितशीकरशीतला वायवः कामोद्दीपका भवन्तीति भावः। तत्र कदलीफलानां नारिकेलफलानाञ्चाऽऽधिक्यं व्यज्यते।

भाषा

जिस वनवास मण्डल में पके हुए केलों के समूहों को झकझोरने वाले और नारियल के फल समूहों के लगातार गिराने से, नारियलों के भीतर डूबकर फिर ऊपर निकल आने से और छींटे उड़ाने से उस वनवास मण्डल के जल पूरित गड़हों में जल की तरङ्गों को उत्पन्न करने वाले वायु कामदेव के अस्त्र का काम करते थे अर्थात् कामोद्दीपक होते थे। अर्थात् जहाँ केले और नारियल के बहुत पेड़ थे, ऐसे वनवासमण्डल में पके हुए केलों की सुगन्ध से युक्त और गडहों में नारियलों के गिरने से उड़े हुए जल कणों से ठण्डे वायु कामोद्दीपक होते थे।

अध्युवास वनवासमण्डलं तद्दिनानि कतिचिन्नृपात्मजः।
योषितामुपवनस्थलीभुवः कर्तुमद्भुतविलाससाक्षिणीः ॥२३॥

अन्वयः

नृपात्मजः उपवनस्थलीभुवः योषिताम् अद्भुतविलाससाक्षिणीः कर्तुं कतिचित् दिनानि तत् वनवासमण्डलम् अध्युवास।

व्याख्या

नृपस्य राज्ञ आहवल्लदेवस्याऽऽत्मजः पुत्रो विक्रमाङ्कदेव उपवनस्योद्यानस्य स्थलीभुवोऽकृत्रिमभूमयस्ता उपवनस्थलीभुवो योषितां ललनानामद्भुतविलासानामाश्चर्यकारिविभ्रमाणां साक्षिण्योऽवलोकयित्र्यस्ताः कर्तुं विधातुं कतिचित् कियन्ति दिनानि दिवसानि तत् पूर्वोक्तं वनवासमण्डलं वनवास इति नामधेयं प्रदेशमध्युवासाऽध्यतिष्ठत्। तत्र वनवासमण्डले स्त्रीणां वनसमीपाकृत्रिमभूमेर्निरतिशयानन्दं प्रापयितुं कतिचिद्दिनान्युवासेति भावः।

भाषा

साथ की अङ्गनाओं को उस वनवास नामक स्थान के प्राकृतिक भूमियों के अद्‌भुत आनन्द को प्राप्त कराने के उद्देश्य से, राजपुत्र ने वहाँ कुछ दिन तक वास किया ।

इति पञ्चभिः श्लोकैः कुलकम् ।

उच्चचाल पुरतः शनैरसौ लीलया मलयदेशभूभुजाम् ।
पूर्वदर्शितपराक्रमस्मृतिं सैन्यतूर्यनिनदैः प्रबोधयन् ॥२४॥

अन्वयः

असौ सैन्यतूर्यनिनदैः मलयदेशभूभुजां पूर्वदर्शितपराक्रमस्मृतिं प्रबोधयन् लीलया शनैः पुरतः उच्चचाल ।

व्याख्या

असौ विक्रमाङ्कदेवः सैन्यानां सैनिकानां तूर्याणि वाद्ययन्त्रविशेषास्तेषां निनदैश्शब्दैः मलयदेशस्य मलयप्रान्तस्य भूभुजां राज्ञां पूर्वं दिग्विजयसमये दर्शितस्य प्रकटीकृतस्य पराक्रमस्य शौर्यस्य स्मृतिं स्मरणं प्रबोधयञ्जागरयन् लीलया विलासेन शनैर्मन्दं मन्दं पुरतोऽग्रे उच्चचाल प्रस्थितोऽभूत् ।

भाषा

मलयप्रान्त के राजाओं को सेना की तुरही के शब्दों से दिग्विजय के समय दिखाए हुए अपने शौर्य का स्मरण कराते हुए, विक्रमाङ्कदेव ने आराम से धीरे २ आगे प्रस्थान किया ।

एनमेत्य [1]जयकेशिपार्थिवः प्रार्थितादधिकमर्पयन्धनम् ।
निश्चलामकृत हासचन्द्रिकां कोङ्कणप्रणयिनीमुखेन्दुषु ॥२५॥

---

[1] अयं जयकेशी कादम्बकुलसमुत्पन्नो जयकेशी-द्वितीयः । गोपकपुरस्य (गोवा) शासकः । अस्य राज्ञी मैलालदेवी पर्माडी विक्रमादित्यस्य पुत्री । जयकेशिनः पुत्रीं मैणलदेवीमनहिलवाडस्य राजा कर्ण उपयेमे । तयोस्तनयः प्रसिद्धो जयसिंहसिद्धराजो गुर्जरदेशाधिपतिः । इति डा० व्यूह्लरमतम् । परं तच्चिन्त्यम् । कविवर्णितोऽयं जयकेशी प्रथम एव प्रतिभाति समयविचारात् ।

अन्वयः

जयकेशीपार्थिवः एनम् एत्य प्रार्थितात् अधिकं धनम् अर्पयन् (सन्) कोङ्कणप्रणयिनीमुखेन्दुषु हासचन्द्रिकां निश्चलाम् अकृत ।

व्याख्या

जयकेशी नाम कोङ्कणदेशाधिपो गुर्जरदेशाधिपस्य जयसिंहसिद्धराजस्य मातामह एनं विक्रमाङ्कदेवमेत्य प्राप्य प्रार्थितादभिकाङ्क्षितादधिकं महत्तरं धनं वित्तमर्पयन्वितरन् सन् कोङ्कणदेशस्य प्रणयिन्यो ललनास्तासां मुखेन्दवो वदन-चन्द्रास्तेषु हास एव चन्द्रिका कौमुदी 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः । तां हास्यकौमुदीं निश्चलां स्थिरामकृत कृतवान् । धनप्रदानेनाऽऽक्रमणाभावात् कोङ्कणदेशीया नार्यश्चिराय सुप्रसन्नाः कृता इति भावः । अत्र रूपकालङ्कारः ।

भाषा

(गुर्जर देश के राजा जयसिंह सिद्धराज के मातामह), कोंकण देश के राजा जयकेशी ने विक्रमाङ्कदेव के सन्मुख उपस्थित होकर, मांगे हुए से अधिक धन देकर, कोंकण देश की नारियों के मुख रूपी चन्द्रमा की हास्य रूपी चांदनी को अचल कर दिया । अर्थात् वहाँ की स्त्रियाँ युद्ध न होने से चिरकाल के लिये प्रसन्न हो गई ।

आलुपेन्द्रमवदातविक्रमस्त्यक्तचापलमसाववर्धयत् ।
दीपयत्यविनयाग्रदूतिका कोपमप्रणतिरेव तादृशाम् ॥२६॥

अन्वयः

अवदातविक्रमः असौ त्यक्तचापलम् आलुपेन्द्रम् अवर्धयत् । अविन-याग्रदूतिका अप्रणतिः एव तादृशाम् कोपं दीपयति ।

व्याख्या

अवदातो धवलो लोकोत्तरत्वेन विख्यात इत्यर्थः । विक्रमः पराक्रमो यस्य स असाधारणपराक्रमोऽसौ विक्रमाङ्कदेवस्त्यक्तं दूरीकृतं चापलमौद्धत्यं येन तमविन-यासम्पृक्तं विनीतमित्यर्थः । आलुपस्य देशविशेषस्येन्द्रं राजानमालुपदेशाधिपति-मवर्धयत्सम्यक् परिपालनेन समृद्धिमन्तमकरोत् । अविनयस्यौद्धत्यस्याऽग्रदूतिका परिचायिकाऽप्रणतिरेवाऽनतिरेव तादृशामवदातविक्रमाणां विक्रमाङ्कदेवसदृशानां कोपं क्रोधं दीपयति समुज्ज्वलयति । अत्राऽर्थान्तरन्यासालङ्कारः ।

भाषा

लोकोत्तर पराक्रम शाली विक्रमाङ्कदेव ने विनीत आलुप प्रान्त के राजा का संरक्षण कर उसकी उन्नति की। औद्धत्य का सूचक शरणागत न होना ही विक्रमाङ्कदेव सदृश महानुभावों का क्रोध उत्पन्न करता है।

व्यापृतैरविरतं शिलीमुखैः केरलक्षितिपवामचक्षुषाम्।
पूर्वकल्पितमसावदर्शयद् गण्डपालिषु निवासमश्रुणः ॥२७॥

अन्वयः

असौ अविरतं व्यापृतैः शिलीमुखैः पूर्वकल्पितं केरलक्षितिपवामचक्षुषां गण्डपालिषु अश्रुणः निवासम् अदर्शयत्।

व्याख्या

असौ विक्रमाङ्कदेवोऽविरतं निरन्तरं 'सततेऽनारताश्रान्तसन्तताविरतानिशम्' इत्यमरः। व्यापृतैस्संचालितैः शिली शल्यं मुखे येषां ते शिलीमुखा बाणास्तैः पूर्वं दिग्विजयकाल एव कल्पितं विहितं केरलदेशस्य ट्रावंकोरप्रान्तस्य क्षितिपो नृपस्तस्य वामचक्षुषां वामलोचनानां 'कामिनी वामलोचना' इत्यमरः। गण्डपालिषु कपोलस्थलेषु अश्रुणो बाष्पस्य निवासं स्थितिमदर्शयत्प्रकटयाञ्चकार। विक्रमाङ्कदेववैभवं दृष्ट्वा स्मृतपूर्ववृत्तान्ताः केरलदेशमहिष्यः बाष्पाम्बूनि मुञ्चन्त्यो भृशमदूयन्तेति भावः। अत्र भूतार्थस्य प्रत्यक्षायमाणत्वोक्त्या भाविकं नामालङ्कारः। "अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः। यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्" इति लक्षणात्।

भाषा

दिग्विजय के समय में विक्रमाङ्कदेव के लगातार चलाए हुए बाणों से केरलदेश की रानियों के गालों पर पड़े हुए पहिले आसुओं को विक्रमाङ्क देव ने दिखाया। अर्थात् विक्रमाङ्कदेव के वैभव को देखकर, पूर्व वृत्तान्त का स्मरण होकर वे रानियां आँसू गिराने लगीं और अत्यन्त दुःखित हुईं।

तं विभाव्य रभसादुपागतं क्ष्माभुजङ्गमुपजातसाध्वसा।
लोलवारिनिधिनीलकुण्डला द्राविडक्षितिपभूरकम्पत ॥२८॥

अन्वयः

लोलवारिनिधिनीलकुण्डला द्राविडक्षितिपभूः रभसात् उपागतं तं क्ष्माभुजङ्गं विभाव्य उपजातसाध्वसा (सती) अकम्पत ।

व्याख्या

लोलौ चञ्चलौ वारिनिधी पूर्वपश्चिमसमुद्रावेव नीले श्यामवर्णे कुण्डले कर्णभूषणे यस्याः सा, द्राविडदेशस्य पूर्वपश्चिमसमुद्रद्वयमध्ये विद्यमानत्वात् । लोलवारिनिधिनीलकुण्डला चञ्चलनीलसमुद्रद्वयरूपयुग्मनीलकर्णावतंसा द्रविडानामयमिति द्राविडः स चाऽसौ क्षितिपो भूपस्तस्य भूर्भूमिर्द्रविडाधिपभूमी रभसाद्वेगादुपागतं समागतं तं प्रसिद्धं पूर्वज्ञातं वा क्ष्मायाः पृथिव्याः द्रविडदेशभूमेर्वा भुजङ्गं पतिं विटं वा 'भुजङ्गो विटसर्पयोः' इत्यमरः । विभाव्य समालोच्योपजातं समुत्पन्नं साध्वसं भयं, समुत्पन्ना लज्जा वा 'साध्वसं भयलज्जयोः' इत्यमरः । यस्याः सा उपजातसाध्वसा भीता सती, लज्जायुक्ता सती वाऽकम्पत कम्पमाप । एकत्र भयेनाऽन्यत्र सात्विकभावेन । यथा रभसादागतं पूर्वपरिचितं कामुकं वीक्ष्य लज्जायुता कामिनी सात्विकभावेन कम्पते तथैव द्राविडराजभूमी रभसादागतं पूर्वज्ञातं विक्रमाङ्कदेवं निरीक्ष्य भयेन कम्पते स्मेति भावः । अत्र समासोक्त्यलङ्कारः श्लेषानुप्राणितः ।

भाषा

चंचल नीले रंग के पूर्वपश्चिम समुद्र रूपी नीले कुण्डलों को धारण करने वाली द्राविड राजा की भूमी रूपी कामिनी वेग से आए हुए पृथ्वी के राजा या कामुक विक्रमादित्य को देख कर भय से या लज्जा से कांपने लगी । अर्थात् जिस प्रकार नीलम के बने कुण्डलों को धारण करने वाली कामिनी पूर्व परिचित कामुक को वेग से आए हुए देखकर लज्जा से सात्विक भाव उत्पन्न होने के कारण रोमाञ्चित हो, कांपने लगती है उसी प्रकार नीले पूर्वपश्चिम समुद्ररूपी नीले (नीलम के) कुण्डलों को धारण करने वाली द्राविड राजा की भूमि वेग से आए हुए पूर्व परिचित विक्रमाङ्क देव को देख कर भय से कांपने लगी ।

तस्य सज्जधनुषः प्रतिक्रिया-शून्यपौरुषविशेषशालिनः ।
द्राविडेन्द्रपुरुषस्ततः सभामाजगाम नयमार्गकोविदः ॥२९॥

अन्वयः

ततः नयमार्गकोविदः द्राविडेन्द्रपुरुषः प्रतिक्रियाशून्यपौरुषविशेषशालिनः सज्जधनुषः तस्य सभाम् आजगाम ।

व्याख्या

ततो राजकुमारस्य द्राविडराजभूमिसन्मुखागमनानन्तरं नयस्य राजनीतेर्मार्गः पन्थास्तस्य कोविदो ज्ञाता नीतिज्ञ इत्यर्थः । द्राविडेन्द्रस्य द्रविडदेशनृपस्य चोलदेशाधिपवीरराजेन्द्रस्य पुरुषो दूतस्सन्देशहारक इत्यर्थः । प्रतिक्रिया प्रतीकारस्तया शून्यं रहितं पौरुषं पराक्रमस्तस्य विशेषोऽतिशयस्तेन शालते शोभते तस्याऽजेयपराक्रमातिशयजुषः सज्जं शरप्रक्षेपणाय पूर्णतयोद्युक्तं धनुः कोदण्डं यस्य स तस्य सज्जधनुषस्तस्य विक्रमाङ्कदेवस्य सभां संसदमाजगाम प्रविवेश ।

भाषा

बाद में नीतिशास्त्रपारङ्गत द्रविडदेश के राजा का दूत अजेय पौरुषविशेष से शोभित तथा युद्ध के लिये सदैव धनुष को तयार रखने वाले विक्रमाङ्कदेव की सभा में आया ।

मौलिचुम्बितवसुन्धरातलः कुन्तलेन्द्रतनयं प्रणम्य सः ।
व्याजहार दशनांशुपल्लव-न्यस्तकोमलपदां सरस्वतीम् ॥३०॥

अन्वयः

मौलिचुम्बितवसुन्धरातलः सः कुन्तलेन्द्रतनयं प्रणम्य दशनांशुपल्लवन्यस्तकोमलपदां सरस्वतीं व्याजहार ।

व्याख्या

मौलिना शिरसा चुम्बितं समालिङ्गितं वसुन्धरातलं पृथिवीतलं येन स दूतः कुन्तलेन्द्रस्याऽऽहवमल्लदेवस्य तनयं पुत्रं विक्रमाङ्कदेवं प्रणम्य नमस्कृत्य दशनानां दन्तानामंशवः किरणा एव पल्लवाः किसलयानि 'पल्लवोऽस्त्री किसलयम्' इत्यमरः । तेषु न्यस्ते निक्षिप्ते कोमले सुकुमारौ पदे चरणौ यया सा तां सरस्वतीं वाग्देवतां पक्षे दशनांशवः पल्लवा इव कान्तिमत्त्वात्तैस्सह न्यस्तानि प्रतिपादितानि कोमलानि मधुराणि पदानि शब्दाः यस्यां तां सरस्वतीं वाचं व्याजहार उवाच । मधुरपदविन्यासं यथास्यात्तथोवाचेति भावः ।

भाषा

उस दूत ने पृथ्वी पर मस्तक टेक के कुन्तलदेश के राजा आहवमल्लदेव के पुत्र विक्रमाङ्कदेव को प्रणाम कर दाँतों के किरण रूपी कोमल पत्तों पर अपने कोमल चरणों को रखने वाली सरस्वती को प्रकट किया या स्मित पूर्वक कोमल पत्तों के सदृश कोमल अर्थात् मधुर वाक्यों को कहा ।

कश्चुलुक्यनृपवंशमण्डन त्वद्गुणान्गणयितुं प्रगल्भते ।
धाम पङ्करुहिणीविलासिनः कस्य सङ्कलयितुं विदग्धता ॥३१॥

अन्वयः

हे चुलुक्यनृपवंशमण्डन कः त्वद्गुणान् गणयितुं प्रगल्भते । पङ्करुहिणीविलासिनः धाम सङ्कलयितुं कस्य प्रगल्भता ।

व्याख्या

चुलुक्यनृपवंशस्य चालुक्यराजकुलस्य मण्डनं भूषणं तत्सम्बुद्धौ, हे चुलुक्यनृपवंशमण्डन ! हे विक्रमाङ्कदेव ! कः पुरुषस्तव गुणास्त्वद्गुणास्तान् दयादाक्षिण्यादीन् गणयितुं संख्यातुं प्रगल्भते क्षमते । न कोऽपीत्यर्थः । पङ्करुहिणीनां कमलिनीनां विलासी सुखदायकस्सूर्यस्तस्य धाम तेजः किरणानित्यर्थः । संकलयितुं गणयितुं कस्य जनस्य विदग्धता पाण्डित्यं सामर्थ्यमित्यर्थः । न कस्यापीतिभावः । प्रतिवस्तूपमाऽलङ्कारः । "प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः । एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्" इति लक्षणात् ।

भाषा

हे चालुक्यराजकुल के भूषण ! विक्रमाङ्कदेव ! तुम्हारे दयादाक्षिण्यादि गुणों की गणना करने में कौन समर्थ हो सकता है अर्थात् कोई भी समर्थ नहीं हो सकता । कमलिनी को सुख देने वाले सूर्य की किरणों को गिनने की पण्डिताई या सामर्थ्य किसमें है अर्थात् किसी में नहीं है ।

वर्णयामि विमलत्वमम्भसः किं त्वदीयकरवालवर्तिनः ।
एति यत्प्रभवमैन्दवीं द्युतिं विश्वशुक्तिपुटमौक्तिकं यशः ॥३२॥

अन्वयः

त्वदीयकरवालवर्तिनः अम्भसः विमलत्वं किं वर्णयामि । यत्प्रभवं विश्वशुक्तिपुटमौक्तिकं यशः ऐन्दवीं द्युतिम् एति ।

व्याख्या

त्वदीये त्वत्सम्बन्धिनि करवाले खड्गे वर्तत इति त्वदीयकरवालवर्ती तस्य भवदीयखड्गे स्फुटतया प्रतीयमानस्याऽम्भसो जलस्य विमलत्वं विशदत्वं धावल्यमित्यर्थः । किं वर्णयामि केन प्रकारेण निरूपयामि । यस्मादम्भसः प्रभव उत्पत्तिर्यस्य तत् यत्प्रभवं यदुत्पन्नं, विश्वं सम्पूर्णब्रह्माण्डमेव शुक्तिपुटं तस्य मौक्तिकमेव यशः कीर्तिरिन्दोरियमित्यैन्दवी तामिन्दुसम्बन्धिनीं द्युतिं कान्तिमेति प्राप्नोति । त्वत्करवालप्रभावेण विश्वस्मिंस्ते चन्द्रवच्छुभ्रं यशः प्रसृतमिति भावः । शुभ्रत्वाद्यशसि मौक्तिकाभेदारोपाद्रूपकम् । अस्मिन्विश्वस्मिन् शुक्तिपुटत्वारोपः कारणमतः परम्परितरूपकम् । 'नियतारोपणोपायस्स्यादारोपः परस्य यः । तत्परम्परितमिति' लक्षणात् ।

भाषा

आपकी तलवार के (धार के) पानी की स्वच्छता का क्या वर्णन करें । जिससे उत्पन्न विश्वरूपी सीप का मौक्तिक रूपी यश चन्द्रमा की कान्ति को प्राप्त करता है अर्थात् आपकी तलवार से उत्पन्न चन्द्रमा के समान शुभ्र यश सम्पूर्ण विश्व में फैल गया है ।

खड्गवारि भवतः किमुच्यते लोलशैवलमिवारिकुन्तलैः ।
यत्र राजति निवेशितं त्वया राजहंसनिवहोपमं यशः ॥२३॥

अन्वयः

अरिकुन्तलैः लोलशैवलम् इव भवतः खड्गवारि किम् उच्यते । यत्र त्वया निवेशितं राजहंसनिवहोपमं यशः राजति ।

व्याख्या

अरीणां शत्रूणां कुन्तलैः केशैः (हेतुभिः) लोलश्चञ्चलश्शैवलश्शेवालं 'जलनीली तु शेवालं शैवलः' इत्यमरः । यस्मिंस्तल्लोलशैवलं प्रकम्पमान-शेवालमिव भवतस्तव विक्रमाङ्कदेवस्य खड्गवारि कृपाणधाराजलं किमुच्यते

जनैस्सर्वथैवाऽवर्णनीयमेवेत्यर्थः। यत्र कृपाणधाराजले त्वया भवता निवेशितं प्रतिष्ठापितं राजहंसानां मरालानां निवहस्समूह उपमोपमानं यस्य तन्मरालसमूह-सदृशं शुभ्रं यशः कीर्ती राजति शोभते। उपमालङ्कारः।

भाषा

शत्रुओं के केशों के लगे होने के कारण, चञ्चल सेवार से युक्त तलवार के पानी का कैसे वर्णन किया जाए। जहाँ तुम्हारे द्वारा स्थापित राजहंस के समूह के समान श्वेत यश शोभित होता है। अर्थात् तुमने शत्रुओं को काटकर अपना श्वेत यश स्थापित किया।

त्वद्भुजप्रणयिचापनिस्वनः कैरसौ समरसीम्नि सह्यते।
व्यक्तिमेति रिपुमन्दिरेषु यः क्रन्दितध्वनिभिरेणचक्षुषाम् ॥३४॥

अन्वयः

असौ त्वद्भुजप्रणयिचापनिस्वनः समरसीम्नि कैः सह्यते। यः रिपु-मन्दिरेषु एणचक्षुषां क्रन्दितध्वनिभिः व्यक्तिम् एति।

व्याख्या

असौ प्रसिद्धस्तव भुजो बाहुः 'भुजबाहू प्रवेष्टो दोः' इत्यमरः। त्वद्भुज-स्तस्य प्रणयी दृढसम्बद्धो यश्चापो धनुस्तस्य निस्वनः शब्दः समरसीम्नि युद्धभूमौ कैर्जनैः सह्यते सोढुं शक्यते। यो निस्वनो रिपूणां शत्रूणां मन्दिरेषु गृहेष्वेणस्य मृगस्य 'गोकर्णपृषतेणर्श्यरोहिताश्चमरो मृगाः' इत्यमरः। चक्षुरिव लोचनमिव चक्षुर्यासां तास्तासां मृगलोचनानां क्रन्दितानि रुदितानि 'क्रन्दितं रुदितं क्रुष्टम्' इत्यमरः। एव ध्वनयश्शब्दास्तैर्व्यक्ति प्रकाशं प्रकटतामित्यर्थः। एति प्राप्नोति। समरे यदीयचापनिर्गतबाणैर्मृतान् भर्तॄन् श्रुत्वा राजपत्न्यः स्वभवनेषु रुदन्तीति भावः। अत्र चापनिस्वन-तत्प्रतिध्वन्योर्वैय्यधिकरण्येन वर्णनादसङ्गतिरलङ्कारः।

भाषा

तुम्हारी भुजा से घनिष्ठता रखने वाले इस धनुष की टङ्कार को युद्ध-भूमि में कौन सहन कर सकते हैं। जिसका साक्षात्कार शत्रुओं के घरों में मृग-नयनियों की रोने की ध्वनि से होता है। अर्थात् तुम्हारे धनुष का टङ्कार होते ही शत्रु मरता है और उसके घर की नारियाँ रोने लगती हैं।

निर्मदत्वमुपयान्ति हन्त ते ज्यारवैः करटिनो दिशामपि ।
कश्मलैः परिहृता इवालिभिर्यद्भजन्ति ककुभः प्रसन्नताम् ॥३५॥

अन्वयः

ते ज्यारवैः दिशां करटिनः अपि हन्त निर्मदत्वम् उपयान्ति । यत् अलिभिः इव कश्मलैः परिहृताः ककुभः प्रसन्नतां भजन्ति ।

व्याख्या

ते तव विक्रमाङ्कदेवस्य ज्याया मौर्व्या रवाः स्वनास्तैर्ज्यारवैः शिञ्जिनीनिर्घोषैः 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । दिशां ककुभां करटिनो गजा अपि दिग्गजा अपीत्यर्थः । हन्तेति हर्षे, 'हन्त दानेऽनुकम्पायां वाक्यारम्भविषादयोः । निश्चये च प्रमोदे च' इत्यमरः । निर्मदत्वं भयेन मदराहित्यमुपयान्ति प्राप्नुवन्ति । ते ज्यारवं श्रुत्वा दिग्गजाः स्वाहंकारं परिहृत्य भीतास्सन्तो मदरहिता भवन्तीति भावः । यद्यस्मात्कारणादलिभिरिव भ्रमरैरिव कश्मलैर्मोहैः 'मूर्छा तु कश्मलं मोहोऽप्यवमर्दस्तु पीडनम्' इत्यमरः । कुनृपकृतदुष्कर्मभिरित्यर्थः । परिहृता रहिता ककुभो दिशः प्रसन्नतां नैर्मल्यं भजन्ति समाश्रयन्ति । कश्मलस्याऽलिभिस्साम्यादुपमा ।

भाषा

यह कहते हर्ष होता है कि आप की प्रत्यञ्चा के शब्द को सुन कर दिग्गज भी भय से मद रहित हो जाते हैं । मद जल के न बहने से भ्रमरों के न आने के कारण, भ्रमर रूपी दुष्ट राजाओं के कुकृत्य स्वरूप कालिमा के दूर हो जाने से दिशाएँ प्रसन्न हो जाती हैं ।

त्वादृशेन विजिगीषुणा विना क्षत्रमक्षममसाध्यसाधने ।
प्लावनाय जगतः प्रगल्भते नो युगान्तसमयं विनाम्बुधिः ॥३६॥

अन्वयः

क्षत्रं, त्वादृशेन विजिगीषुणा विना असाध्यसाधने अक्षमम् । अम्बुधिः युगान्तसमयं विना जगतः प्लावनाय नो प्रगल्भते ।

व्याख्या

क्षतात् त्रायत इति क्षत्रं क्षत्रियजातिः क्षात्रधर्मो वा त्वादृशेन भवादृशेन विजिगीषुणा विजयैषिणा विनाऽसाध्यानां कर्तुमशक्यानां कार्याणां साधने सम्पादनेऽक्षमं सामर्थ्यहीनम्। अम्बुधिस्समुद्रो युगान्तसमयं विना प्रलयकालागमनं विना जगतो भुवनस्य 'विष्टपं भुवनं जगत्' इत्यमरः। प्लावनाय निमज्जनाय नो प्रगल्भते न प्रभुः। अत्र प्रतिवस्तूपमालङ्कारः। 'सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिरिति' लक्षणात्।

भाषा

क्षत्रिय जाति, तुम्हारे ऐसे विजय की इच्छा रखने वाले के विना असाध्य कार्य की सिद्धि करने में समर्थ नहीं हो सकती। समुद्र प्रलय काल के बिना जगत् को पानी के अन्दर डुबाने में समर्थ नहीं होता।

अग्रजे तृणवदर्पितं निजं राज्यमूर्जितगुणेन यत्त्वया।
वज्रलेपघटितेव तेन ते निश्चला जगति कीर्तिचन्द्रिका ॥३७॥

अन्वयः

यत् ऊर्जितगुणेन त्वया निजं राज्यं तृणवत् अग्रजे अर्पितम्। तेन ते कीर्तिचन्द्रिका जगति वज्रलेपघटिता इव निश्चला (जाता।)

व्याख्या

यद्यस्मात्कारणादूर्जिताः श्रेष्ठा गुणा दयादाक्षिण्यादयो यस्य स तेन प्रशस्यगुणेन त्वया निजं स्वकीयं राज्यमग्रजे ज्येष्ठभ्रातरि सोमदेवे तृणवत्तृणेन तुल्यं लोभरहितमित्यर्थः। अर्पितं निवेदितं तेन कारणेन ते तव कीर्तिरेव चन्द्रिका कीर्तिज्योत्स्ना वज्रलेपेन कुलिशलेपेन चिरकालस्थायिना लेपद्रव्येण निश्चलाऽचला स्थिरेत्यर्थः। जाता।

भाषा

चूँकि श्रेष्ठ गुणों से युक्त तुमने अपना राज पाट तृणवत् समझ कर अपने बड़े भाई सोमदेव को दे दिया इससे तुम्हारी कीर्ति रूपी चांदनी वज्रलेप के समान अचल हो गई।

किं करोषि निजयाथवा भुवा त्वं समस्तवसुधातलेश्वरः ।
केसरी[१] वसति यत्र भूधरे तत्र याति मृगराजतामसौ ॥३८॥

अन्वयः

अथवा समस्तवसुधातलेश्वरः त्वं निजया भुवा किं करोषि । यत्र भूधरे केसरी वसति तत्र असौ मृगराजतां याति ।

व्याख्या

अथवेति पक्षान्तरे । समस्तस्य समग्रस्य वसुधातलस्य भूतलस्येश्वरः प्रभुस्त्वं निजया स्वकीयया भुवा पृथिव्या राज्येनेत्यर्थः । किं करोषि किम्प्रयोजनं धारयसि । न किमपीत्यर्थः । यत्र यस्मिन्भूधरे पर्वते केसरी सिंहो 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः । वसति गच्छति तत्र तस्मिन् स्थानेऽसौ सिंहो मृगराजतां मृगराजपदवीं याति प्राप्नोति ।

भाषा

अथवा सम्पूर्ण पृथ्वी के स्वामी, तुमको अपनी पृथ्वी की अर्थात् राज्य की क्या परवाह है । शेर जिस पर्वत पर जा बैठता है वहीं वह मृगराजपद को प्राप्त कर लेता है ।

याति पुण्यफलपात्रतामसौ यां भुवं निवससे महाभट ।
सा कुपार्थिवकदर्थनोज्झिता त्वां पतिं हि लभते गुणोज्ज्वलः ॥३९॥

अन्वयः

हे महाभट ! (त्वं) यां भुवं निवससे असौ पुण्यफलपात्रतां याति हि, सा कुपार्थिवकदर्थनोज्झिता (या) गुणोज्ज्वलं त्वां पतिं लभते ।

व्याख्या

हे महाभट ! हे महावीर ! त्वं यां भुवं पृथिवीं निवससे स्थितिं करोषि, असौ भूः पुण्यस्य सुकृतस्य फलानां सुखैश्वर्यसमृद्धीनां पात्रतां भाजनत्वं याति हि निश्चयेन प्राप्नोति । सा भूमिः कुपार्थिवस्य कुत्सितनृपस्य

---

[१] 'यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्' इति कालिदासः ।

कदर्थनेन पीडनेनोज्झिता परित्यक्ता भवति या पृथिवी गुणैर्दयादाक्षिण्यशौर्यादि-गुणैरुज्ज्वलं प्रशस्यं त्वां भवन्तं पतिं स्वामिनं लभते प्राप्नोति ।

भाषा

हे महावीर ! आप जिस पृथ्वी पर अर्थात् जहाँ रहोगे वह भूमि पुण्य के सुख ऐश्वर्य समृद्धि आदि फलों को अवश्य प्राप्त करेगी । वह भूमि दुष्टराजाओं की पीडा से मुक्त हो जाएगी जो दया दाक्षिण्य शौर्य आदि गुणों से देदीप्यमान आपको अपना स्वामी पाएगी । अर्थात् आप जहाँ रहोगे वह भूमि अवश्य समृद्धि-शाली हो जाएगी और उसको कभी भी दुष्ट राजा लोग पीड़ित न कर सकेंगे ।

त्वद्भिया गिरिगुहाश्रये[१] स्थिताः साहसाङ्क गलितत्रपा नृपाः ।
ज्यारवप्रतिरवेण तानपि त्वद्धनुः समरसीम्नि बाधते ॥४०॥

अन्वयः

हे साहसाङ्क ! (ये) नृपाः गलितत्रपाः (सन्तः) त्वद्भिया गिरिगुहाश्रये स्थिताः तान् अपि त्वद्धनु समरसीम्नि ज्यारवप्रतिरवेण बाधते ।

व्याख्या

हे साहसाङ्क ! साहसं विक्रम एवाऽङ्को विजयलक्षणं 'कलङ्काङ्कौ लाञ्छनञ्च चिन्हं लक्ष्म च लक्षणम्' इत्यमरः । यस्य स तत्सम्बोधने हे साहसाङ्क हे विक्रमाङ्कदेव ! ये नृपा भूपा गलिता विनिर्गता त्रपा लज्जा येषां ते विगत-लज्जास्सन्तस्त्वत्तो भीस्तया भवद्भयेन गिरीणां पर्वतानां गुहाः कन्दरा एवाऽऽश्रयः रक्षास्थानं तस्मिन् स्थितास्तानपि तव धनुश्चापः समरसीम्नि समराङ्गणे ज्याया मौर्व्या रवस्य शब्दस्य प्रतिरवः प्रतिध्वनिस्तेन बाधते पीडयति । पर्वतकन्दरा-स्वपि विक्रमाङ्कदेवस्याऽऽगमनभयादिति भावः ।

भाषा

हे विक्रमाङ्कदेव ! जो राजा लोग लज्जा को छोड़ तुम्हारे डर से पर्वतों की कन्दराओं में छिप कर बैठ जाते हैं उनको भी तुम्हारा धनुष समर भूमि में प्रत्यञ्चा की टङ्कार की प्रतिध्वनि से पीड़ित करता है ।

---

१ 'गिरिगुहासु ये' इत्यपि पाठान्तरम् ।

उत्प्रतापदहनं मुखं वहन्नाहवे त्वदसिरिन्द्रजालिकः ।
दिव्यमस्तकसमागमं द्विषां लूनमर्त्यशिरसां करोति यत् ॥४१॥

अन्वय

आहवे त्वदसिः उत्प्रतापदहनं मुखं वहन् इन्द्रजालिकः (भवति) यत् लूनमर्त्यशिरसां द्विषां दिव्यमस्तकसमागमं करोति ।

व्याख्या

आहवे युद्धे तव असिस्त्वदसिर्भवदीयखड्ग उद्गत ऊर्ध्वं प्रसारितः प्रताप एव दहनोऽग्निर्यस्मात्तदुत्प्रतापदहनं मुखमाननमग्रभागञ्च वहन् धारयन्निन्द्रजालिक इन्द्रजालविद्याप्रवीणो मायावी भवति । यद्यस्मात्कारणात् स लूनं छिन्नं मर्त्यं मरणशीलं विनाशीत्यर्थः । शिरो येषां ते लूनमर्त्यशिरसस्तेषां छिन्नविनाशिमस्तकानां दिव्यानां स्वर्गीयाणां मस्तकानां शिरसां समागमं प्रापणं करोति । यथा कश्चिदिन्द्रजालिको मुखादग्निनिस्सरणं प्रदर्शयन् चमत्कारयुक्तानि कार्याणि करोति तथैव तव खड्ग ऊर्ध्वप्रसारितप्रतापरूपदहनयुक्तं मुखं धारयन् लूनशिरसां शत्रूणां रणे मरणात्तेषां स्वर्गप्राप्तिर्निश्चितेति हेतोस्तेषां नूतनदिव्यमस्तकान् संदधाति । अत्रोत्तरार्धगतवाक्यार्थस्येन्द्रजालिकत्वे हेतुतया कथनात्काव्यलिङ्गमलङ्कारः ।

भाषा

युद्ध में, ऊपर उठने वाले तेज रूपी अग्नि से युक्त मुख या नोक वाली तुम्हारी तलवार, इन्द्र जालिक हो जाती है । क्यों कि कटे हुए मानवी मस्तक वाले शत्रुओं को वह दिव्य मस्तकों से युक्त कर देती है । अर्थात् युद्ध में जो वीर मरते हैं वे स्वर्ग में जाते हैं यह प्रसिद्धि है । इसलिये तुम्हारी तलवार इन्द्रजालिक के समान सिर कटे शत्रुओं को काल्पनिक दिव्य मस्तकों से युक्त कर स्वर्ग में भेज देती है ।

भाग्यभूमिमपि भारतादिषु त्वादृशं न शृणुमः प्रतापिनम् ।
दर्शनेन विजयश्रियं रणेष्वन्यसङ्गविमुखीं करोति यः ॥४२॥

अन्वयः

भारतादिषु अपि त्वादृशं भाग्यभूमिं प्रतापिनं न शृणुमः । यः रणेषु दर्शनेन विजयश्रियम् अन्यसङ्गविमुखीं करोति ।

व्याख्या

भारतादिष्वपि महाभारतप्रभृतिप्राचीनेतिहासग्रन्थेष्वपि भारतादिदेशेष्वपि वा त्वादृशं भवादृशं भाग्यस्य भागधेयस्य 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः। भूमिमाश्रयं भाग्यवन्तं प्रतापिनं प्रभाववन्तं न श्रृणुमो नाऽऽकर्णयामः। यो रणेषु युद्धेषु दर्शनेन स्व-स्वरूपप्रकाशनेनैव विजयश्रियं जयलक्ष्मीमन्येषां राज्ञां सङ्गात्सम्बन्धाद्विमुखीं पराङ्मुखीं करोति। युद्धेषु तव दर्शनेनैन शत्रवो भयभीता भवन्ति तस्मात्तेषां राज्यश्रीरनुपमरूपलावण्ययुक्तं कामुकं कामिनीव ताँस्त्यक्त्वा त्वत्समीपे समायातीति भावः। समासोक्तिरलङ्कारः।

भाषा

महाभारत आदि प्राचीन ऐतिहासिक ग्रन्थों में या भारत आदि देशों में तुम्हारे ऐसा भाग्यशाली प्रतापी कोई भी सुनने में नहीं आता। युद्धों में जिसके दर्शनमात्र से शत्रुओं की राजश्री शत्रुभूत राजाओं के पास रहना ही नहीं चाहती। अर्थात् युद्धों में तुम्हारे दर्शन मात्र से विपक्षी राजा भयभीत हो जाते हैं अत एव उनकी राजश्री, अति सुन्दर कामुक के दर्शन मात्र से, कामिनी के समान, उनको छोड़ कर तुम्हारे पास चली आती है।

किं किरीटमणयः क्षमाभुजां लोहकर्षकदृषत्सहोदराः।
आनयन्ति यदुपान्तवर्त्मनि त्वत्कृपाणमतिदूरवर्तिनम् ॥४३॥

अन्वयः

क्षमाभुजां किरीटमणयः लोहकर्षकदृषत्सहोदराः किम्? यत् अतिदूरवर्तिनं त्वत्कृपाणम् उपान्तवर्त्मनि आनयन्ति।

व्याख्या

क्षमां पृथ्वीं भुञ्जन्ति स्वोपभोगे समानयन्ति ते क्षमाभुजो विपक्षभूमिपतयस्तेषां किरीटेषु मुकुटेषु मणयो रत्नानि 'मण्डनं चाथ मुकुटं किरीटं पुंनपुंसकम्' इत्यमरः। लोहस्य लौहस्य कर्षिका दृषदश्चुम्बकशिलास्तासां सहोदरास्सदृशाः किम्? यद्यस्मात्कारणादतिदूरे वर्तत इत्यतिदूरवर्ती तं विप्रकृष्टदेशस्थं त्वत्कृपाणं त्वत्खड्गमुपान्तवर्त्मनि समीपप्रदेशे आनयन्ति समाकर्षन्ति। अत्रोत्प्रेक्षालङ्कारः।

भाषा

विपक्षी राजाओं के मुकुटों के मणी क्या लोहे को आकर्षण करने वाले चुम्बक पत्थर के समान हैं ? क्योंकि बहुत दूर देश में रहने वाले तुम्हारे लोहे के खड्ग को वे अपनी ओर आकर्षित कर लेते हैं।

चोलभूमिपतिरुज्ज्वलैर्गुणैः किं नु वक्ति भवतानुरञ्जितः ।
पश्यतस्तृणसमां तव श्रियं श्रीप्रदानकथनेन लज्जते ॥४४॥

अन्वयः

भवता उज्ज्वलैः गुणैः अनुरञ्जितः चोलभूमिपतिः किं नु वक्ति। श्रियं तृणसमां पश्यतः तव श्रीप्रदानकथनेन लज्जते।

व्याख्या

भवता विक्रमाङ्कदेवेनोज्जलैः श्रेष्ठैर्गुणैर्दयादाक्षिण्यादिभिरनुरञ्जितस्समाकर्षितश्चोलभूमिपतिश्चोलदेशाधिपो वीरराजेन्द्रः किं नु वक्ति न किमपि वक्तुं पारयति। श्रियं लक्ष्मीं तृणसमां तृणसदृशीं तुच्छां पश्यतो भावयतस्तव श्रियो लक्ष्म्याः प्रदानं त्वदायत्तीकरणं तत्कथनेन लक्ष्मीसमर्पणकथनेन लज्जते ह्रियमाप्नोति। विशिष्टलक्ष्मीत्यागमूर्तेस्तव पुरतः स्वाल्पलक्ष्मीप्रदानप्रस्तावेऽपि लज्जां धत्ते इति भावः।

भाषा

आप के श्रेष्ठ दया दाक्षिण्य आदि गुणों से आकर्षित चोलदेश का वीरराजेन्द्र नाम का राजा आप के सामने क्या कहे। वह, लक्ष्मी को तृण के समान तुच्छ समझने वाले आप को धन देने की बात कहने में भी लज्जित होता है।

अन्यपौरुषगुणेष्वपि श्रुतिं प्राप्तवत्सु घनगर्जितेष्विव ।
राजहंसवनितेव मानसान्नास्य निःसरति तावकी स्तुतिः ॥४५॥

अन्वयः

घनगर्जितेषु इव अन्यपौरुषगुणेषु अपि श्रुतिं प्राप्तवत्सु अस्य मानसात् राजहंसवनिता इव तावकी स्तुतिः न निःसरति।

व्याख्या

घनानां मेघानां गर्जितानि स्तनितानि 'स्तनितं गर्जितं मेघनिर्घोषे रसितानि-च' इत्यमरः। तेष्विवाऽन्येषां प्रतापिनां पौरुषस्य पुरुषार्थस्य गुणेषु महत्त्वेष्वपि श्रुतिं कर्णं प्राप्तवत्सु गतेषु, अस्य चोलनृपतेर्मानसान्मनसो 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। मानससरसो वा राजहंसवनितेव मरालीव तावकी त्वदीया स्तुतिः स्तवः 'स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यमरः। न निःसरति न पृथग्भवति। तन्मनस्येव निश्चला तिष्ठत इति भावः। घनगर्जितं श्रुत्वा यथा मराली मानससरोवरादन्यत्र न गच्छति तत्रैव तिष्ठति च तथैव बहूनां राज्ञामपि पुरुषार्थकथां श्रुत्वा तव स्तुतिश्चोलदेशाधिपतेर्मनसो न पृथग्भवतीत्यर्थः। अत्रोपमालङ्कारः।

भाषा

मेघ की गरज के समान अन्य राजाओं के भी पुरुषार्थ के महत्त्व को सुन कर चोलदेश के राजा वीरराजेन्द्र के मन से तुम्हारी स्तुति मानस सरोवर से राजहंसी के समान नहीं हटती है। अर्थात् जैसे मेघ के शब्द सुनकर राजहंसी मानस सरोवर में ही रहती है और वहां से अन्यत्र नहीं हटती वैसे ही अन्य राजाओं के पौरुष के महत्त्व को सुनने पर भी तुम्हारी स्तुति उस चोल राजा के मन से नहीं हटती किन्तु उसके मन में विद्यमान है।

कन्यकां कुलविभूषणं गुणैरद्भुतैस्त्रिभुवनातिशायिनीम्।
त्वत्करप्रणयिनीं विधाय सः प्राप्तुमिच्छति समस्तवन्द्यताम् ॥४६॥

अन्वयः

सः कुलविभूषणम् अद्भुतैः गुणैः त्रिभुवनातिशायिनीं कन्यकां त्वत्करप्रणयिनीं विधाय समस्तवन्द्यतां प्राप्तुम् इच्छति।

व्याख्या

स वीरराजेन्द्रनामकश्चोलदेशराजः कुलस्य वंशस्य भूषणमलङ्कारभूतामद्भुतैराश्चर्यकरैर्गुणैः शीललज्जादिभिस्त्रयाणां भुवनानां समाहारस्त्रिभुवनं तमतिशेते लङ्घयतीति त्रिभुवनातिशायिनी तां त्रिभुवनातिशायिनीं लोकत्रयेष्वनुपमां कन्यकां स्वात्मजां तव करस्य हस्तस्य प्रणयिनी सङ्गिनी तां विधाय कृत्वा त्वां विवाह्येत्यर्थः। समस्तैस्सकलैर्लोकैर्वन्द्यतां नमस्यतां प्राप्तुं लब्धुमिच्छत्यभिवाञ्छति।

भाषा

वह वीरराजेन्द्र नामक चोल देश का राजा कुल की अलङ्कार स्वरूप और शील लज्जा आदि अद्भुत गुणों से तीनों लोकों में अनुपम, अपनी कन्या का तुमसे पाणिग्रहण अर्थात् विवाह कर सब लोगों में वन्दनीय होना चहता है ।

तेन तस्य वचनेन चारुणा प्राप [१]कुन्तलपतिः प्रसन्नताम् ।
तीव्ररोषविषवेगशान्तये भेषजं विनय एव तादृशाम्[२] ॥४७॥

अन्वयः

कुन्तलपतिः तस्य चारुणा तेन वचनेन प्रसन्नतां प्राप । तादृशां तीव्ररोषविषवेगशान्तये विनयः एव भेपजम् (अस्ति) ।

व्याख्या

कुन्तलपतिः कुन्तलदेशाधिपतिर्विक्रमाङ्कदेवस्तस्य द्राविडेन्द्रदूतस्य चारुणा मनोहारिणा तेन पूर्वोक्तेन वचनेन वाक्प्रपञ्चेन प्रसन्नतां प्रसादं 'प्रसादस्तु प्रसन्नता' इत्यमरः । प्रापोपजगाम । तादृशां विक्रमाङ्कदेवसदृशानां विजिगीषूणां तीव्रस्तीक्ष्णो रोषः क्रोध एव विषं गरलं तस्य वेगो रयस्तस्य शान्तये शमनाय विनय एव नम्रत्वमेव भेषजमौषधं 'भेषजौषधभेषज्यान्यगदो जायुरित्यपि' इत्यमरः । अस्ति । विजिगीषूणां वीराणां पुरतो विनयदर्शनं तेषां क्रोधनिवारणपूर्वकप्रसन्नतासम्पादनार्थमेक एवोपाय इति भावः । रोषे विषतादात्म्याद्रूपकम् ।

भाषा

कुन्तलदेशाधिपति विक्रमाङ्कदेव, द्रविडदेश के राजा के दूत की पूर्वोक्त मीठी बातों से प्रसन्न हो गया । ऐसे महापुरुषों के तीव्र क्रोध रूपी विष के वेग को रोकने के लिये केवल विनय ही औषध है ।

[१] कुन्तलदेशः कृष्णातुङ्गभद्रासङ्गमात् कावेरीनद्युद्गमस्थानपर्यन्तं प्रसृतः पूर्वपश्चिमाद्रिमध्यभागः ।

[२] भावोऽयमत्राऽपि प्रदर्शितः—

उत्कन्धरानेव रणाङ्गणेषु यस्यातितुङ्गस्य हठात्प्रहर्तुः ।
न नम्रभावादपरो नृपाणामासीत् कृपाणप्रतिषेधमार्गः ॥ (३ सर्ग ६९ श्लोकः)

कीदृशी शशिमुखी भवेदिति स्पृश्यते स्म हृदये स चिन्तया ।
कामुकेषु मिषमात्रमीक्षते नित्यकुण्डलितकार्मुकः स्मरः ॥४८॥

अन्वयः

सः शशिमुखी कीदृशी भवेत् इति चिन्तया हृदये स्पृश्यते स्म । नित्यकुण्डलितकार्मुकः स्मरः कामुकेषु मिषमात्रम् ईक्षते ।

व्याख्या

स विक्रमाङ्कदेवः शशिमुखी चन्द्रमुखी द्रविडदेशराजकुमारी कीदृशी किंस्वरूपा भवेदिति चिन्तया विचारेण हृदये मनसि 'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । स्पृश्यते स्म चिन्तितो बभूव । नित्यं सदैव कुण्डलितं समाकृष्टं कार्मुकं धनुर्येन स सततसज्जधनुः स्मरः कामदेवः कामुकेषु कामिषु कान्ताम्प्रत्यनुरागसम्भृतेष्वित्यर्थः । मिषमात्रं व्याजमात्रमीक्षते पश्यति । चिन्तोत्पादनव्याजेनैव कामबाणव्यापारः सफल इति भावः । अत्राऽर्थान्तरन्यासोऽलङ्कारः ।

भाषा

वह विक्रमाङ्कदेव, द्रविड देश के राजा की चन्द्रवदनी कन्या कैसी होगी इस विचार से चिन्तित हो उठा । कामियों के प्रति सदा धनुष सज्ज रखने वाला कामदेव, कामियों को पीड़ित करने में कोई बहाना ही खोजता रहता है ।

अब्रवीच्च मनसः प्रसन्नतां दन्तकान्तिभिरुदीरयन्निव ।
ओष्ठपृष्ठलुठितस्मिताञ्चलः कुन्तलीनयनपूर्णचन्द्रमाः ॥४९॥

अन्वयः

ओष्ठपृष्ठलुठितस्मिताञ्चलः कुन्तलीनयनपूर्णचन्द्रमाः (सः) दन्तकान्तिभिः मनसः प्रसन्नताम् उदीरयन् इव अब्रवीत् च ।

व्याख्या

ओष्ठयोः पृष्ठं तत्र लुठितो लुलितः स्मितस्येषद्धासस्याऽञ्चलः प्रान्तभागो यस्य स ओष्ठपृष्ठलुठितस्मिताञ्चलो लज्जयेषद्धासयुक्तः कुन्तलीनां कुन्तलदेश-कामिनीनां नयनानि नेत्राणि 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इत्यमरः ।

तेषां कृते पूर्णचन्द्रमाः पूर्णेन्दुवदाल्हादकारकः स विक्रमाङ्कदेवो दन्तकान्तिभि-रीषद्धासे प्रदर्शितदन्तप्रभाभिर्मनसश्चित्तस्य प्रसन्नतां प्रसादमुदीरयन् प्रकट-यन्निवाऽब्रवीच्च कथयामास च । दशनकान्तिमिषेण मनः प्रसादोदीरणस्योत्प्रेक्षि-तत्वादुत्प्रेक्षालङ्कारः ।

भाषा

ओठों के पृष्ठ भाग पर स्मितरूपी आँचल से युक्त अर्थात् कुछ लज्जा से मुस्कुराने वाला कुन्तल देश की ललनाओं के नेत्रों का पूर्णचन्द्र अर्थात् पूर्णचन्द्र के समान आनन्द देने वाला वह विक्रमाङ्कदेव, मानों दातों की कान्ति से अपने मन की प्रसन्नता को प्रकट करता हुआ बोला भी ।

ईदृशीं सुजनतामजानता कार्मुकेण मुखरत्वमत्र मे ।
यत्कृतं किमपि तेन लज्जया भारती कथमपि प्रवर्तते ॥५०॥

अन्वयः

ईदृशीं सुजनताम् अजानता मे कार्मुकेण अत्र यत् किम् अपि मुखरत्वं कृतं तेन लज्जया (मे) भारती कथम् अपि प्रवर्तते ।

व्याख्या

ईदृशीं पूर्वोक्तेन वाक्यकदम्बेन सम्यग् व्यक्तां सुजनतां सज्जनतामजानता तस्याः सुजनताया अज्ञानान्मे मम कार्मुकेण धनुषाऽत्राऽस्मिन्नृपे यत्किमपि यत्किञ्चिदपि मुखरत्वं वाचालत्वं धाष्टर्यसूचकं निन्दितं कर्मेति भावः । कृतं सम्पादितं तेनौद्धत्येन हेतुना लज्जया ह्रिया मे मम भारती वाणी 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः । कथमपि कृच्छ्रादेव महताकष्टे-नेत्यर्थः । प्रवर्तते प्रस्फुरति ।

भाषा

इस प्रकार पूर्व प्रकाशित सौजन्य को न जानने वाले मेरे धनुष ने इस राजा के साथ जो कुछ ज्यादती की है उस लज्जा से मेरी वाणी किसी प्रकार कठिनता से निकलती है अर्थात् मैंने राजा की सुजनता को न समझ, अपने धनुष से जो जो क्रूर काम किये हैं उसके लिये मैं लज्जित हूँ ।

दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृण्हते वारिधेः सलिलमेव वारिदाः ॥५१॥

अन्वयः

सज्जनाः दोषजातम् अवधीर्य मानसे गुणम् एव धारयन्ति । वारिदाः वारिधेः क्षारभावम् अपनीय सलिलम् एव गृण्हते ।

व्याख्या

सज्जनाः सत्पुरुषा दोषाणां निन्द्यवस्तूनां जातं समूहं दोषजातं दुर्गुणकुलमित्यर्थः । अवधीर्य परित्यज्याऽवहेलनं विधायेति भावः । मानसे हृदये 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः । गुणमेव धारयन्ति समादरेण गृह्णन्ति । वारिदा मेघा वारिधेः समुद्रस्य क्षारभावं लवणत्वमपनीय दूरीकृत्य सलिलमेव शुद्धं माधुर्यवज्जलमेव गृह्णते समाददति । दृष्टान्तालङ्कारः ।

भाषा

सज्जनलोग दोषों को छोड़ कर मन में गुण को ही धारण करते हैं । मेघ, समुद्र के खारेपन को छोड़ कर विशुद्ध मधुर जल ही ग्रहण करते हैं ।

दिग्जयव्यसनिना पुनः पुनस्तस्य किं प्रियमनुष्ठितं मया ।
रज्यते मयि दृढं तथाप्यसौ वेत्ति कश्चरितमुन्नतात्मनाम् ॥५२॥

अन्वयः

पुनः पुनः दिग्जयव्यसनिना मया तस्य किं प्रियम् अनुष्ठितम् । तथापि असौ मयि दृढं रज्यते । कः उन्नतात्मनां चरितं वेत्ति ।

व्याख्या

पुनः पुनर्भूयो भूयो दिशां जयो दिग्जयस्तस्य व्यसनमस्याऽस्तीति दिग्जयव्यसनी तेन सर्वदिग्वर्तमाननृपमण्डलपराजयदुर्ललितचेतसा मया विक्रमाङ्कदेवेन तस्य द्राविडेन्द्रस्य किं प्रियं हितमनुष्ठितं कृतम् । तथापि मया किञ्चिदुपकारेऽकृतेऽप्यसौ द्राविडेन्द्रो मयि मत्सम्बन्धे दृढं रज्यते गाढं स्नेहं कुरुते । कः पुरुष उन्नत उत्कृष्ट आत्मा येषां ते तेषामुन्नतात्मनां महात्मनां चरितं माहात्म्यं वेत्ति जानाति । अत्रार्थान्तरन्यासालङ्कारः

भाषा

बार २ दिग्विजय करने में लम्पट मैंने उस द्रविडदेश के राजा का क्या प्रिय किया है। तो भी वह मुझ मे घनिष्ठ प्रेम रखता है। महात्माओं के चरित्र को कौन समझ सकता है।

तस्य भूरिगुणरत्नशालिनः स्नेहपूतहृदयस्य वाञ्छितम्।
पारयामि न विधातुमन्यथा यत्स्थितं मनसि तद्विधीयताम् ॥५३॥

अन्वयः

भूरिगुणरत्नशालिनः स्नेहपूतहृदयस्य तस्य वाञ्छितम् अन्यथा विधातुं न पारयामि। यत् मनसि स्थितं तत् विधीयताम्।

व्याख्या

गुणाः सौजन्यादिगुणा एव रत्नानि गुणरत्नानि भूरीणि बहूनि गुणरत्नानि भूरिगुणरत्नानि तैश्शालते शोभते स तस्य बहुगुणरत्नशोभितस्य स्नेहेन प्रेम्णा पूतं पवित्रं हृदयं मनो यस्य तस्य प्रेमपावनीकृतविशुद्धमनसस्तस्य द्राविडेन्द्रस्य वाञ्छितमभीष्टं कन्यादानादिकमन्यथा वैपरीत्येन विधातुं कर्तुं न पारयामि न शक्नोमि। यदभीप्सितं मनसि स्वान्ते 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। स्थितं विद्यमानं तद्विधीयतां क्रियताम्। मनसैवाऽनुमोदयामि तव प्रस्तावमिति भावः।

भाषा

अनेक गुणरत्नों से सुशोभित, प्रेम से पवित्र हृदय वाले द्राविडदेश के राजा की अभीप्सित कन्यादान की बात को न मानने में मैं असमर्थ हूँ। जो उसके मन में हो, वह करे।

दर्शयन्तममृतद्रवोपमां वाचमिन्दुकरनिर्मलामिति।
विक्रमाङ्कमपयातसाध्वसः साधुरेनमथ स व्यजिज्ञपत् ॥५४॥

अन्वयः

अथ अपगतसाध्वसः साधुः सः अमृतद्रवोपमाम् इन्दुकरनिर्मलाम् इति वाचं दर्शयन्तम् एनं विक्रमाङ्कं व्यजिज्ञपत्।

व्याख्या

अथ विक्रमाङ्कदेवोक्त्यनन्तरमपगतं दूरीभूतं साध्वसं भयं यस्य स विगतभीस्साधुस्सज्जनस्स चोलदूतोऽमृतस्य सुधाया द्रवः प्रवाह उपमोपमानं यस्यास्तां पीयूषप्रवाहसदृशीमिन्दुकरवच्चन्द्रकिरणवन्निर्मला विशदा तामिति पूर्वोक्तप्रकारां वाचं वाणीं दर्शयन्तं प्रकटयन्तं ब्रुवाणमित्यर्थः । एनं प्रसिद्धं विक्रमाङ्कं विक्रमाङ्कदेवं व्यजिज्ञपत् निवेदितवान् ।

भाषा

विक्रमाङ्कदेव के बोलने के अनन्तर भय से रहित उस सज्जन चोलराजदूत ने अमृत के प्रवाह के ऐसी तथा चन्द्रमा के किरणों के ऐसी मीठी और निर्मल उपर्युक्त बातें बोलने वाले विक्रमाङ्कदेव से कहा ।

किं तवान्यदुचितं वदान्यता यत्समादिशति तत्त्वया कृतम् ।
प्रार्थितार्थपरिपन्थितामगात् कश्चुलुक्यकुलपार्थिवोऽर्थिनाम् ॥५५॥

अन्वयः

तव अन्यत् उचितं किम् । वदान्यता यत् समादिशति तत् त्वया कृतम् । कः चुलुक्यकुलपार्थिवः अर्थिनां प्रार्थितार्थपरिपन्थिताम् अगात् ।

व्याख्या

तव भवतो विक्रमाङ्कदेवस्याऽन्यदितरदुचितं योग्यं किम् । अर्थात् भवता सर्वमुचितमेवाऽनुष्ठितम् । वदान्यतोदारता 'स्युर्वदान्यस्थूललक्ष्यदानशौंडा बहुप्रदे' इत्यमरः । तावकीनेति भावः । यत्समादिशति यदाज्ञापयति तत्त्वया भवता कृतं विहितम् । सर्वथैव हृदयस्य विशालतैव भवता प्रदर्शितेति भावः । कश्चुलुक्यकुलस्य चालुक्यवंशस्य पार्थिवो नृपोऽर्थिनां याचकानां प्रार्थितोऽभिवाञ्छितोऽर्थः प्रयोजनं तस्य परिपन्थितां प्रतिकूलतामगात् गतवान् न कोऽपीत्यर्थः । चालुक्यकुलोत्पन्नानां राज्ञां याचकमनोरथपूरणं स्वाभाविकमिति भावः । अत्रार्थापत्त्यलङ्कारः ।

भाषा

इससे बढ़ कर आपका और दूसरा क्या उचित कार्य हो सकता है । आपने अपने औदार्य के अनुरूप कार्य किया । चालुक्य वंश के किस राजा ने अर्थियों की प्रार्थना का निषेध किया है अर्थात् किसी ने नहीं ।

वेत्सि मे पतिमवञ्चकं यदि स्वच्छतां स्पृशति चात्र ते मनः ।
तन्निवृत्य कुरु तुङ्गभद्रया मुद्रिते पदमुपान्तवर्त्मनि ॥५६॥

अन्वयः

यदि मे पतिम् अवञ्चकं वेत्सि, अत्र ते मनः च स्वच्छतां स्पृशति तत् निवृत्य तुङ्गभद्रया मुद्रिते उपान्तवर्त्मनि पदं कुरु ।

व्याख्या

(हे राजन् !) यदि त्वं मे मम पतिं स्वामिनं द्राविडेश्वरमवञ्चकं निष्कपटहृदयं स्वच्छान्तःकरणमित्यर्थः वेत्सि जानासि । अत्राऽस्मिन्विषये ते तव मनश्च चेतश्च स्वच्छतां नैर्मल्यं स्पृशत्यालिङ्गति तर्हि निवृत्याऽस्मात्स्थानात्परावृत्य तुङ्गभद्रया तन्नामनद्या मुद्रिते चिन्हित उपान्ते वर्त्म तस्मिन् सीमान्तप्रदेशे पदं स्थितिं स्वनिवासमित्यर्थः । कुरु विधेहि ।

भाषा

यदि आप मेरे स्वामी द्राविडेश्वर को निष्कपट समझते हैं और इस सम्बन्ध में आप का मन यदि सन्देह रहित है तो आप यहाँ से लौट कर तुङ्गभद्रा नदी से चिन्हित सीमान्तप्रदेश में अपना डेरा डालिये ।

कैश्चिदेव सततप्रयाणकैस्तत्र शुद्धहृदयः करिष्यति ।
स त्वया परिचयं प्रतापिना पर्वणीन्दुरिव तिग्मरश्मिना ॥५७॥

अन्वयः

तत्र शुद्धहृदयः सः कैश्चित् एव सततप्रयाणकैः प्रतापिना त्वया पर्वणि इन्दुः तिग्मरश्मिना इव परिचयं करिष्यति ।

व्याख्या

तत्र तुङ्गभद्रासीमान्तप्रदेशे शुद्धं निष्कपटं हृदयं मनो यस्य स निर्मलमानसः स द्राविडेश्वरः कैश्चिदेव कियद्भिरेव सततं निरन्तरं प्रयाणकानि गमनानि प्रस्थानानि वा तैः प्रतापिना प्रभावशालिना त्वया भवता सह पर्वण्यमायामिन्दुश्चन्द्रस्तिग्मरश्मिना सूर्येणेव परिचयं सम्मेलनं करिष्यति विधास्यति । अत्रोपमालङ्कारः ।

भाषा

तुङ्गभद्रा के सीमान्त प्रदेश में निष्कपट हृदय वाले मेरे स्वामी द्राविडेश्वर, प्रतापी आप से, अमावस्या को, चन्द्रमा के तेजस्वी सूर्य से मिलने के समान, रास्ते में लगातार कुछ ही डेरे डालते हुए, आ मिलेंगे ।

गाहतेऽत्र धृतकार्मुके त्वयि प्रीतिदानमपि भीतिदानताम् ।
तेन तस्य महती विलक्षता यत्र वेत्सि गुणपक्षपातिताम् ।।५८।।

अन्वयः

अत्र धृतकार्मुके त्वयि प्रीतिदानम् अपि भीतिदानतां गाहते तेन यत्र गुणपक्षपातितां वेत्सि तस्य महती विलक्षता ।

व्याख्या

अत्राऽस्मिन् चोलराजप्रधाननगर्यां धृतं गृहीतं कार्मुकं धनुर्येन स तस्मिन् सज्जधनुषि त्वयि विक्रमाङ्कदेवे प्रीत्या प्रेम्णा दानं कन्यायाः प्रदानमपि भीत्या भयेन दानं तस्य भावस्तां भीतिदानतां भयजन्यदानत्वं गाहते प्राप्नोति । सज्जधनुषाय तुभ्यं यत्प्रीतिपूर्वकमपि दास्यते तद्भयेन दत्तमिति सर्वेषां ज्ञानं भवेदिति भावः । तेन कारणेन यत्र यस्य द्राविडराजस्य विषये गुणेषु तदीयेषु गुणेषु सौजन्यादिषु यस्ते पक्षपातस्समादरस्तस्य भावो गुणपक्षपातिता तां वेत्सि जानासि धारयसीत्यर्थः । तस्य द्राविडाधिपस्य महती विपुला विलक्षता सलज्जत्वम् । अथवा तं प्रति सर्वेषां विस्मयान्वितत्वं यदेवं शौर्ययुक्तोऽपि भयात् कन्यां ददातीति । 'विलक्षो विस्मयान्विते' इत्यमरः । त्वद्भयात्तेन कन्या प्रदत्तेति तस्य महदपयशस्तेन यस्य कृते तव गुणपक्षपातित्वं वर्तते स लज्जास्पदं मा भूयादिति हेतोः सीमान्तप्रान्त एव तव दर्शनं वरमिति भावः ।

भाषा

उस द्राविड राजा के राज्य की प्रधान नगरी में धनुष लेकर (अपनी सेना के साथ) आये हुए तुमको जो प्रेम पूर्वक भी दिया जाएगा वह लोगों की दृष्टि में भय से दिया गया समझा जाएगा । इस कारण से जिसके गुणों के प्रति आप का समादर है उस चोलदेश के राजा को लज्जित होना पड़ेगा । या सब लोग उसके सम्बन्ध में आश्चर्य करने लगेंगे कि इतना पराक्रमी और शौर्ययुक्त होने पर भी उसने भय से अपनी लड़की कैसे दे दी ।

नाद्य यावदवलोकिता जनैः क्वापि तस्य वचसामसत्यता ।
मादृशां शुभविपर्ययाद्यदि व्यक्तिमेष्यति भवादृशेषु सा ॥५९॥

अन्वयः

अद्य यावत् जनैः तस्य वचसाम् असत्यता क्व अपि न अवलोकिता। यदि मादृशां शुभविपर्ययात् सा भवादृशेषु व्यक्तिम् एष्यति ।

व्याख्या

अद्य यावदाधुनिककालपर्यन्तं जनैर्लोकैस्तस्य वचसां वाणीनामसत्यता मिथ्यात्वं क्वाऽपि कस्मिन्नपि विषये नाऽवलोकिता न दृष्टा नानुभूतेत्यर्थः । यदि परं मादृशां मत्सदृशानां शुभस्य पुण्यस्य विपर्ययो वैपरीत्यं तस्मात्पापात् दुर्भाग्याद्वा साऽसत्यता भवादृशेषु त्वादृशेषु महानुभावेषु व्यक्तिं प्रकाशमेष्यति प्राप्स्यति । अयमस्माकं दौर्भाग्यस्यैव प्रभावः स्याद्यदि तस्य वचसामसत्यता भवत्सु प्रकटीभवेदिति भावः ।

भाषा

आज तक लोगों को किसी भी विषय में द्राविडेश्वर की वाणी की असत्यता का अनुभव नहीं हुआ है । यदि आपके अनुभव में ऐसी बात आवे तो वह मेरे ऐसों के पाप से या दुर्भाग्य से ही हो सकता है ।

एवमादिभिरनेन बोधितः कोविदेन वचनैः पुनः पुनः ।
ज्ञातचोलहृदयः स्वयं च स प्राङ्निवेदितमगान्नदीतटम् ॥६०॥

अन्वयः

कोविदेन अनेन एवम् आदिभिः वचनैः पुनः पुनः बोधितः स्वयं च ज्ञातचोलहृदयः सः प्राक् निवेदितं नदीतटम् अगात् ।

व्याख्या

कोविदेन पण्डितेन लौकिकव्यवहाराभिज्ञेनेत्यर्थः । अनेन दूतेनैवमादिभिरेतादृशैर्वचनैः पुनः पुनो भूयो भूयो बोधितो विज्ञापितः स्वयञ्च गुप्तचरादिभिर्ज्ञातं परीक्षितं चोलस्य चोलदेशाधिपस्य हृदयं येन स विज्ञातचोलराजहार्दिकभावः स विक्रमाङ्कदेवः प्राक् पूर्वं निवेदितं सूचितं नदीतटं तुङ्गभद्रानदीतीरमगाज्जगाम ।

भाषा

इस चतुर व लौकिकव्यवहार में कुशल दूत द्वारा ऐसी ऐसी बातों से बार बार समझाया हुआ और स्वयं भी अपने गुप्तचरों से चोल राजा के हार्दिक भाव को जान लेने वाला, विक्रमाङ्कदेव, पूर्व सूचित तुङ्गभद्रानदी के तट पर गया।

चोलभूमिपतिरप्यनन्तरं निर्जगाम नगरात्कृतोत्सवः।
पुष्पसायकपताकया तया कन्यया सह सहासवक्त्रया ॥६१॥

अन्वयः

अनन्तरं कृतोत्सवः चोलभूमिपतिः अपि सहासवक्त्रया पुष्पसायकपताकया तया कन्यया सह नगरात् निर्जगाम।

व्याख्या

अनन्तरं विक्रमाङ्कदेवस्य तुङ्गभद्रानदीतटप्राप्त्यनन्तरं कृतो विहित उत्सवो महो 'मह उद्धव उत्सवः' इत्यमरः। येन स विहितमहश्चोलस्य चोलदेशस्य भूमिपतिः पृथ्वीपतिश्चोलेश्वरोऽपि हासेन सहितं सहासं वक्त्रमाननं यस्यास्सा तया प्रफुल्लाननया पुष्पाण्येव सायका बाणा यस्य स पुष्पसायकः कामस्तस्य पताका वैजयन्ती 'पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्' इत्यमरः। कामोद्बोधकत्वात्तत्स्वरूपा तया मन्मथध्वजरूपया तया प्रसिद्धया कन्यया स्वसुतया सह नगरान्निजराजधान्या निर्जगाम बहिर्निःसृतवान्।

भाषा

विक्रमाङ्कदेव के तुङ्गभद्रा नदी के तट पर पहुँचने पर चोलदेश का राजा भी मंगलोत्सव मनाकर, प्रसन्न वदन और कामदेव की ध्वजा के समान अपने स्वरूप से कामोद्दीपन करने वाली अपनी कन्या के साथ अपनी राजधानी से बाहर निकल पड़ा।

सन्धिबन्धमवलोक्य निश्चलं तस्य कुन्तलनरेन्द्रसूनुना।
शान्तसाध्वसमहारुजः प्रजाः स्वेषु धामसु बबन्धुरादरम् ॥६२॥

अन्वयः

प्रजाः तस्य कुन्तलेन्द्रसूनुना निश्चलं सन्धिबन्धम् अवलोक्य शान्तसाध्वसमहारुजः (सत्यः) स्वेषु धामसु आदरं बबन्धुः।

व्याख्या

प्रजा जनास्तस्य द्राविडेश्वरस्य कुन्तलेन्द्रस्य कुन्तलराजस्याऽऽहवमल्लदेवस्य सूनुः पुत्रो विक्रमाङ्कदेवस्तेन सह निश्चलं दृढं सन्धेः स्नेहस्य बन्धं बन्धनं सन्धिबन्धं प्रेमबन्धनमवलोक्य ज्ञात्वा शान्तं समाप्तं साध्वसं भयमेव महारुक् महापीड़ा यासां ता दूरीकृतमहाव्यथाः सत्यः स्वेषु निजेषु धामसु गृहेष्वादरं प्रेम बबन्धुर्दधुः । अयं विक्रमाङ्कदेवः स्नेहसम्बन्धेन न तु दिग्विजयार्थमत्राऽऽगत इति विनिश्चित्य त्यक्तचिन्ता जना आक्रमणकालिकगृहत्यागादिकं सम्प्रत्यनावश्यकमिति सुखेन स्वगृहेषु निवासं चक्रुरिति भावः ।

भाषा

प्रजागण अपने राजा द्रविडेश्वर का कुन्तलराज आहवमल्लदेव के पुत्र विक्रमाङ्कदेव से दृढ़ प्रेम सम्बन्ध जानकर भय रूपी महाव्यथा से शान्त होकर, अपने अपने घरों में सुख से रहने लगे । अर्थात् आक्रमण काल में जो अपना घर छोड़ सुरक्षित स्थान में रहने जाना पड़ता था उसकी आवश्यकता न समझ वे सुख से अपने अपने घर में ही रहे ।

दिग्गजश्रवणभङ्गकारिभिर्दुन्दुभिध्वनिभिरस्य भैरवैः ।
अभ्रमभ्रमुभुजङ्गडिण्डिम-ध्वाननिर्भरमिव व्यराजत ॥६३॥

अन्वयः

अस्य दिग्गजश्रवणभङ्गकारिभिः भैरवैः दुन्दुभिध्वनिभिः अभ्रम् अभ्रमुभुजङ्गडिण्डिमध्वाननिर्भरम् इव व्यराजत ।

व्याख्या

अस्य चोलदेशाधिपस्य दिशां ककुभां 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । गजा हस्तिनो दिग्गजास्तेषां श्रवणानि कर्णास्तेषां भङ्गो बधिरीकरणं तत्कुर्वन्तीति तैर्दिङ्नागकर्णबधिरीकरणसम्पादकैर्भैरवैर्भयानकैर्दुन्दुभीनां भेरीणां 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः । ध्वनयस्स्वनास्तैर्भेरीस्वनैरभ्रं नभोऽभ्रमुरैरावतकान्ता हस्तिनी 'ऐरावतोभ्रमातङ्गैरावणाभ्रमुवल्लभाः' इत्यमरः । तस्या भुजङ्गः पतिरैरावतस्तस्य डिण्डिमो वाद्यविशेषः डिण्डमसवशो ध्वनिर्वा 'वाद्यप्रभेदा डमरुमड्डडिण्डिमझर्झराः' इत्यमरः । तस्य ध्वानेन

कठोरशब्देन निर्भरमिव व्याप्तमिव व्यराजताऽजायत । दुन्दुभिध्वनिष्वैरावत-डिण्डिमध्वनित्वस्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ।

भाषा

दिग्गजों के कानों को बहिरा कर देने वाले इस चोल राजा की तुरहियों के भयंकर शब्दों से मानों ऐरावत के नगाड़े की ध्वनि से या नगाड़े के समान शब्द से आकाश गूंज उठा हो, ऐसा प्रतीत होने लगा ।

सर्वतः श्रवणभैरवस्फुरद्—दुन्दुभिप्रतिरवापदेशतः ।
सस्वनं द्विरदवृन्दघट्टनादस्फुटन्निव दिगन्तभित्तयः ॥६४॥

अन्वयः

सर्वतः श्रवणभैरवस्फुरद्दुन्दुभिप्रतिरवापदेशतः द्विरदवृन्दघट्टनात् दिगन्तभित्तयः सस्वनम् अस्फुटन् इव ।

व्याख्या

सर्वतः सकलेषु प्रदेशेषु श्रवणेभ्यः कर्णेभ्यो भैरवा भयानका ये स्फुरन्तः प्रकटीभवन्तो दुन्दुभीनां भेरीणां प्रतिरवाः प्रतिध्वनयस्तेषामपदेशतो व्याजाद् द्विरदानां गजानां वृन्दानि समूहास्तेषां घट्टनात्संघर्षणाच्च दिशामन्ता दिगन्तास्तेषां दिगन्तप्रदेशानां भित्तयः कुड्यानि 'भित्तिः स्त्री कुड्यम्' इत्यमरः । सस्वनं सशब्दमस्फुटन्निवाऽपतन्निव विदारिता इव जाता इति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

चारों ओर जोर २ से बजने वाली भेरियों के कर्णकटु प्रतिध्वनियों के मिष से और हाथियों के समूहों के परस्पर धक्कों से मानों दिगन्तप्रदेशों की दीवालें शब्द करती हुई फट रही थीं ।

कर्णतालपवनोर्मिशीतलैः सिञ्चति स्म करशीकराम्बुभिः ।
दिग्गजानिव भयेन मूर्छितांस्तस्य वारणपरम्परा पुरः ॥६५॥

अन्वयः

तस्य वारणपरम्परा कर्णतालपवनोर्मिशीतलैः करशीकराम्बुभिः पुरः भयेन मूर्छितान् दिग्गजान् सिञ्चति स्म इव ।

व्याख्या

तस्य चोलदेशाधिपस्य वारणानां गजानां परम्परा श्रेणिर्गजयूथा इत्यर्थः। कर्णास्ताला इवेति कर्णतालास्तालपत्रसदृशश्रोत्राणि तेषां पवना वायवस्तेषामूर्मिभिस्तरङ्गैश्शीतलानि तैस्तालपत्राकारविशालश्रोत्रस्फुरणजनितवायुतरङ्गशीतैः कराणां शुण्डानां शीकराम्बूनि जलकणजलानि 'शीकरोऽम्बुकणाः स्मृताः' इत्यमरः। तैर्हस्तिशुण्डानिस्सरज्जलबिन्दुधाराभिः पुरोऽग्रे भयेन महाशब्दजनितभीत्या मूर्च्छितान् चेतनारहितान् दिग्गजान् दिङ्नागान् सिञ्चति स्मेव पुनरपि चेतनाप्राप्त्यर्थं शीतजलोपचारेण सेवत इव। अत्रोत्प्रेक्षालङ्कारः।

भाषा

चोलदेश के राजा के हाथियों का झुण्ड, अपने कान रूपी ताड के पत्तों या पंखों से उत्पन्न वायु की लहरों से ठण्ढे भए हुए सूंड से छूटने वाले फुवारों के जल से, मानों सामने दिखाई देने वाले भय से मूछित दिग्गजों को फिर से होश में लाने के लिये, शीतोपचार कर रहा था।

तच्चमूरजसि दूरमुद्गते यन्न दिग्भ्रममधत्त भास्करः।
हेतुरत्र रजसां निवारणं कुञ्जरध्वजपटान्तवीजनैः ॥६६॥

अन्वयः

तच्चमूरजसि दूरम् उद्गते (सति) भास्करः यत् दिग्भ्रमं न अधत्त अत्र कुञ्जरध्वजपटान्तवीजनैः रजसां निवारणं हेतुः।

व्याख्या

तस्य चोलराजस्य चमूस्सेना 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः' इत्यमरः। तस्या रजो धूलिस्तस्मिन् तत्सेनाधूलौ दूरमत्यूर्ध्वमुद्गते उत्पतिते सति भास्करः सूर्यो यद्दिशां भ्रमं दिग्भ्रान्तिं नाऽधत्त न बभाराऽत्राऽस्मिन्नर्थे कुञ्जराणां हस्तिनां ध्वजपटान्तानां पताकापटप्रान्तभागानां वीजनैस्संचलनैर्गजोपरिस्थितपताकावस्त्राञ्चलसंचलनसमुद्भूतपवनैरित्यर्थः। रजसां धूलीनां निवारणं समुत्सारणमेव हेतुः कारणम्। काव्यलिङ्गमलङ्कारः।

भाषा

उसकी सेना के चलने से उड़ी धूलि के वहुत ऊँचाई तक छा जाने पर,

सूर्य को जो रास्ते का भ्रम न हुआ अर्थात् भुलावा न पड़ा, इसका कारण, हाथियों पर के झण्डों की झण्डियों के हिलते रहने से, उसकी हवा से धूलि का हट जाना ही है। अर्थात् झण्डियों के, खूब ऊपर फड़फड़ाते रहने से उसकी हवा से धूलि के हट जाने से सूर्य को साफ़ २ मार्ग दिखाई देता था।

क्षोणिरेणुमिषतः सदाध्वगः स्यन्दने रचयति स्म भास्करः।
पश्चिमाद्रिविषमस्थलीभुवां पूरणार्थमिव संग्रहं मृदः ॥६७॥

अन्वयः

सदाध्वगः भास्करः क्षोणिरेणुमिषतः पश्चिमाद्रिविषमस्थलीभुवां पूरणार्थम् इव स्यन्दने मृदः संग्रहं रचयति स्म।

व्याख्या

सदा निरन्तरमध्वनि मार्गे गच्छतीति सदाध्वगः सदैव गमनशीलः पान्थ इत्यर्थः। अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि' इत्यमरः। भास्करः सूर्यः क्षोणेः पृथिव्या रेणुर्धूलिस्तस्य मिषतो व्याजात् पृथ्वीधूलिव्याजात् पश्चिमाद्रिः पश्चिमपर्वतस्तस्य विषमा उन्नतानताः स्थल्यो भूमिभागास्तासामस्ताचलस्थितगर्तानां पूरणार्थमिव भरणार्थमिव समीकरणार्थमित्यर्थः। स्यन्दने स्वरथे मृदो मृत्तिकायास्संग्रहमेकत्रीकरणं रचयति स्म सम्पादयति स्म। अत्रोत्प्रेक्षालङ्कारः।

भाषा

सदैव चलते रहने वाला सूर्य, पृथ्वी की धूलि के बहाने से मानों पश्चिमाचल अर्थात् अस्ताचल की ऊंची नीची जमीन को भर कर समथल बनाने के लिये अपने रथ पर मिट्टी एकत्रित कर रहा था।

नन्दनद्रुमनिकुञ्जपुञ्जितैः पांसुभिः कुसुमधूलिवासितैः।
चौर्यकेलिशयनोपयोगतस्तुष्यति स्म सुरपांसुलाजनः ॥६८॥

अन्वयः

सुरपांसुलाजनः कुसुमधूलिवासितैः नन्दनद्रुमनिकुञ्जपुञ्जितैः पांसुभिः चौर्यकेलिशयनोपयोगतः तुष्यति स्म।

व्याख्या

सुराणां देवानां पांसुलाजनः स्वैरविहारिणीजनः कुसुमानां पुष्पाणां धूलयः परागः 'परागः सुमनोरजः' इत्यमरः। ताभिर्वासितास्सुरभीकृतास्तैः पुष्परेणु-सुरभीकृतैर्नन्दनस्येन्द्रवनस्य द्रुमा वृक्षास्तेषां निकुञ्जा लतादिपिहितोदराः 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। तेषु पुञ्जिता एकत्री-भूतास्तैर्नन्दनोद्यानवृक्षकुञ्जसञ्चितैः पांसुभिः क्षितितलोत्थितरेणुभिश्चौर्येणाऽ-प्रशस्तरूपेण केलिः क्रीडा चौर्यकेलिः परपुरुषैस्समं परनारीणां रतोत्सवस्तदर्थं शयनं शय्या तस्मिन् शयनरचनार्थमुपयोगस्तस्मात् चौर्यरतिशय्यानिर्माणार्थोप-योगात् तुष्यति स्म सन्तोषं प्राप्नोति स्म। नन्दनोद्यानपर्यन्तमुत्थितायास्तदा-च्छाद्य स्थितायाश्च धूलेः कोमलत्वाच्चौर्यक्रीडारतसुरपांसुलाजनस्य कोमलशय्या-प्राप्त्या सुमहान् सन्तोषो जात इति भावः। अत्रातिशयोक्तिरलङ्कारः।

भाषा

स्वच्छन्द विहार करने वाला स्वर्गीय स्त्री समूह, पृथ्वी से उठ कर नन्दन वन के कुञ्जों में फैली हुई और पुष्परज से सुवासित धूलि के कारण (उस भूमि के नरम हो जाने से) छिपकर विषयादि करने में कोमल शय्या के सदृश उस भूमि का उपयोग होने से, सन्तुष्ट हुआ।

वीक्ष्य पुष्पमधु पांसुदूषितं नन्दनं ध्रुवममुच्यतालिभिः।
अन्धकारपटलच्छलेन यद् भृङ्गपूरितमिवाभवन्नभः ॥६६॥

अन्वयः

पांसुदूषितं पुष्पमधु वीक्ष्य अलिभिः नन्दनं ध्रुवम् अमुच्यत। यत् नभः अन्धकारपटलच्छलेन भृङ्गपूरितम् इव अभवत्।

व्याख्या

पांसुभिः क्षोणीसमुत्थितरजोभिः 'रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः' इत्यमरः। दूषितं कलुषीकृतं पुष्पाणां कुसुमानां मधु रसं मकरन्दं वीक्ष्य दृष्ट्वा-ऽलिभिर्भ्रमरैः 'षट्पदभ्रमरालयः' इत्यमरः। नन्दनं सुरेन्द्रोद्यानं ध्रुवं निश्चयेनाऽमुच्यत परित्यक्तम्। यद्यस्मात्कारणान्नभ आकाशमन्धकारस्य धूलिजनितध्वान्तस्य पटलं समूहस्तस्य छलेन व्याजेन भृङ्गैर्भ्रमरैः पूरितं व्याप्तमिवाऽभवज्जातम्। कृष्णत्वादन्धकारे भृङ्गपटलस्योत्प्रेक्षणादुत्प्रेक्षा-लङ्कारः।

भाषा

पृथ्वी से उठी धूलि से पुष्पों का मकरन्द, गन्दा हुआ देखकर, भ्रमरों ने नन्दन वन को निश्चय ही त्याग दिया था। क्यों कि धूलिजनित अंधकार के आधिक्य के मिष से आकाश मानों भौरों से छाया हुआ था। अर्थात् धूलि जनित कृष्णवर्ण अन्धकार मानों कृष्णवर्ण के भौंरे ही थे।

जैत्रवाजिपृतना–खुरक्षत-क्षोणिधूलिपटलीभिरध्वसु ।
तद्बलस्य सुगमत्वमागमन् पूरितानि विषमस्थलान्यपि ॥७०॥

अन्वयः

अध्वसु जैत्रवाजिपृतनाखुरक्षोणिधूलिपटलीभिः पूरितानि विषमस्थलानि अपि तद्बलस्य सुगमत्वम् आगमन्।

व्याख्या

अध्वसु मार्गेषु जैत्रा जयशीला 'जैत्रस्तु जेता योऽगच्छत्यलं विद्विषतः प्रति' इत्यमरः। या वाजिनामश्वानां पृतनाः सेनाः 'पृतनाऽनीकिनी चमूः' इत्यमरः। तासां खुरैः शफैः क्षता विदारिता क्षोणिः पृथ्वी तस्या धूलयो रजांसि तासां पटलीभिस्समुहैर्जयनशीलाश्वसेनाशफविदारितभूमिसमुत्थितरजस्समूहैः पूरितानि व्याप्तानि समीकृतानीत्यर्थः। विषमस्थलान्युच्चावचस्थानान्यपि तस्य चोलराजस्य बलं सैन्यं तस्य तद्बलस्य सुगमत्वं सुखपूर्वकगमनार्हत्वमागमन् प्रापुः। मार्गेषु तत्सेनाया अनायासेन गमनाय सेनाश्वखुरविदारितपृथ्वीरजोभिर्विषमस्थलानि पूरितानीति भावः अत्र समाधिर्नामाऽलङ्कारः। "समाधिः सुकरे कार्ये दैवाद्वस्त्वन्तरागमात्" इति लक्षणात्।

भाषा

मार्गों में, विजयी घोड़ों की सेनाओं के खुरों से खुदी भूमि के धूलि समूहों से भरी गई हुई नीची ऊँची जमीन, समथल होकर, चोल राजा की सेना के सुगमता से चलने के काम में आई।

चेतसोऽपि दधतीरलङ्घ्यतां लङ्घयद्भिरवटस्थली भुवः।
तस्य वाजिभिरजायत क्षितिर्भ्रान्तवातहरिणेव सर्वतः ॥७१॥

अन्वयः

चेतसः अपि अलङ्घ्यतां दधतीः अवटस्थलीभुवः लङ्घयद्भिः तस्य वाजिभिः क्षितिः सर्वतः भ्रान्तवातहरिणा इव अजायत ।

व्याख्या

चेतसोऽपि चित्तस्याऽपि 'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मन': इत्यमरः । अलङ्घ्यतामप्राप्यतां पारं गन्तुमशक्यतामित्यर्थः । दधतीर्धारयतीरवटा गर्ताः 'गर्तावटौ भुवि श्वभ्रे' इत्यमरः । तेषां स्थलीभुवस्ता गर्तबहुला भूमीर्लङ्घयद्भिः पारं गच्छद्भिस्तस्य चोलराजस्य वाजिभिरश्वैः क्षितिः पृथ्वी सर्वतः सर्वत्र भ्रान्ता भयाच्चकिता वातहरिणा वातमृगाः 'वातप्रमीर्वातमृगः कोकस्त्वीहामृगो वृकः' इत्यमरः । यस्यां सेव निजस्थानपरिभ्रष्ट-भयचकितवातमृगयुक्तेवाऽराजत शुशुभे । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

मन से भी लांघने की कल्पना न की जाने योग्य ऊबड़ खाबड़ जमीन को लांघने वाले उस चोलराज के घोड़ों से मानों पृथ्वी चारो ओर घबड़ाए हुए वातमृगों से युक्त शोभित हो रही थी ।

तेन सैन्यधनुषां शिलीमुख-ज्यालताप्रणयिनां विभूतिभिः ।
तत्र तत्र विजयश्रियः कृते केलिकाननमिव व्यधीयत ॥७२॥

अन्वयः

तेन शिलीमुखज्यालताप्रणयिनां सैन्यधनुषां विभूतिभिः विजयश्रियः कृते तत्र तत्र केलिकाननम् इव व्यधीयत ।

व्याख्या

तेन चोलराजेन शिली शल्यं मुखेऽग्रे येषां ते शिलीमुखा बाणा भ्रमराश्च 'अलिबाणौ शिलीमुखौ' इत्यमरः । ज्यालताश्च मौर्वीरूपलताश्च तासां प्रणयिनः स्नेहिनः सम्बन्धिनस्तेषां, सैन्यानां चमूनां धनूंषि चापाः प्रियालवृक्षाश्च 'धनुः प्रियाले ना न स्त्री राशिभेदे शरासने' इत्यमरः । तेषां विभूतिभिः समृद्धिर्भिर्विजयश्रियो विजयलक्ष्म्याः कृतेऽर्थे तत्र तत्र तत्तत्स्थाने केलिकाननं क्रीड़ोद्यानमिव व्यधीयत रचितम । चोलराजेन बाणज्यालतासम्बन्धिसैन्यचापप्रतापैस्तत्र तत्र

विजयं प्राप्य विजयलक्ष्म्याः कृते विजयप्राप्तिस्थानेषु शान्तिं प्रस्थाप्य क्रीड़ोद्यानमिव रचितम्। पक्षे भ्रमरज्यारूपलताप्रणयिप्रियालवृक्षाणां समृद्धिभिस्तेन राजलक्ष्म्याः कृते क्रीडोद्यानमिव रचितमिति भावः। श्लेषानुप्राणितोत्प्रेक्षालङ्कारः।

भाषा

चोल देश के राजा ने बाण तथा मौर्वी से सम्बन्धरखने वाले सेना के धनुषों के प्रभाव से जहाँ तहाँ शान्ति स्थापन कर मानों विजयलक्ष्मी के सैल सपाटे के लिये बाग बना दी थी। पक्ष में भौंरे और लता से प्रेम करने वाले प्रियाल वृक्षों के आधिक्य से मानों विजयलक्ष्मी के लिये जहाँ तहाँ विहार करने के लिये बाग बना दी थी।

अप्रयाणरहितैः स पार्थिवः प्राप कैरपि दिनैस्तरङ्गिणीम्।
कार्यजातमसमाप्य धीमतां निद्रया परिचयोऽपि कीदृशः ॥७३॥

अन्वयः

सः पार्थिवः अप्रयाणरहितैः कैः अपि दिनैः तरङ्गिणीं प्राप। धीमतां कार्यजातम् असमाप्य निद्रया परिचयः अपि कीदृशः।

व्याख्या

सः पार्थिवश्चोलदेशनृपोऽप्रयाणं विश्रामस्तेन रहिता हीनास्तैर्विश्रान्तिरहितैः कैरपि कैश्चिदेव दिनैर्दिवसैस्तरङ्गिणीं तुङ्गभद्रानदीं प्राप संप्राप्तः। धीमतां बुद्धिमतां जनानां कार्यजातं कार्यसमूहमसमाप्य परिपूर्णमकृत्वा निद्रया विश्रामेण परिचयोऽपि सम्बन्धोऽपि कीदृशो भवति। न भवतीत्यर्थः। बुद्धिमन्तो विनैव कार्यसमाप्तिं विश्रामं नाऽऽश्रयन्तीति भावः। पूर्वार्द्धस्योत्तरार्द्धेन समर्थनादर्थान्तरन्यासालङ्कारः।

भाषा

वह चोलदेश का राजा रास्ते में कहीं बिना विश्राम लिए कुछ ही दिनों में तुङ्गभद्रा नदी के पास पहुँच गया। बुद्धिमान् लोगों को बिना कार्य समाप्त किये निद्रा का परिचय कैसा? अर्थात् बुद्धिमान् लोग बिना सम्पूर्ण कार्य पूरा किए विश्राम नहीं लेते।

रञ्जितः परिजनोऽस्य शीतल–स्वच्छया सपदि तुङ्गभद्रया ।
आगताः किमपि पृष्ठतस्तु ये पङ्कशेषमलभन्त ते जलम् ॥७४॥

अन्वयः

अस्य परिजनः सपदि शीतलस्वच्छया तुङ्गभद्रया रञ्जितः । ये तु किम् अपि पृष्ठतः आगताः ते पङ्कशेषं जलम् अलभन्त ।

व्याख्या

अस्य चोलदेशाधिपस्य परिजनोऽनुचरवर्गस्सपदि तत्क्षणं 'सद्यः सपदि तत्क्षणे' इत्यमरः । शीतला शीता चाऽसौ स्वच्छा निर्मला च तया शीतलनिर्मलाम्बुयुक्तया तुङ्गभद्रया नद्या रञ्जितः प्रसन्नो जातः । ये तु जनाः किमपि पृष्ठतः किञ्चित्कालानन्तरमागतास्तुङ्गभद्रां प्राप्तास्ते पङ्क एव शेषो यस्मिँस्तत्पङ्कशेषं कर्दमावशिष्टं जलं सलिलमलभन्त प्राप्तवन्तः । अनेन चोलराजेन सहाऽगतस्य जनसमूहस्याऽऽधिक्यं सूचितम् ।

भाषा

उस चोल राजा के नौकर चाकर शीघ्र ही ठंढे और निर्मल जल वाली तुङ्ग भद्रा नदी से प्रसन्न हो गए । अर्थात् तुङ्गभद्रा नदी के शीतल और निर्मल जल में स्नान आदि कर उस राजा के नौकरों को बहुत आनन्द मिला । परन्तु जो लोग कुछ देर करके आए उनको गंदला पानी ही मिला । अर्थात् उस राजा के साथ में अत्यधिक नौकर चाकर आदि आए थे ।

दक्षिणार्णवतटादुपागतैस्तद्गजैः पिशुनतां गतैरिव ।
शीघ्रमक्रियत मध्यवर्तिभिः सा प्रतीपगतिरब्धिवल्लभा ॥७५॥

अन्वयः

सा अब्धिवल्लभा दक्षिणार्णवतटात् उपागतैः मध्यवर्तिभिः तद्गजैः पिशुनतां गतैः इव शीघ्रं प्रतीपगतिः अक्रियत ।

व्याख्या

सा प्रसिद्धा अब्धेस्समुद्रस्य वल्लभा प्रिया समुद्रसीमन्तिनी तुङ्गभद्रा नदी दक्षिणोऽर्णवस्समुद्रस्तस्य तटात्तीरादवाचीनसमुद्रकूलादुपागतैस्समागतैर्मध्यवर्ति-

भिर्नदीजलमध्यावस्थितैस्तस्य चोलदेशनृपस्य गजा हस्तिनस्तैः पिशुनतां दुर्जनतां गतैः प्राप्तैरिव शीघ्रं द्रुतं प्रतीपा प्रतिकूला गतिर्गमनं यस्यास्सा प्रतीपगतिः प्रतिकूलगामिन्यक्रियत सम्पादिता । यथा केचन पिशुना अन्योन्यं भेदमुत्पाद्योभयथाऽपि मध्यस्थाः सन्तः सीमन्तिनीं स्वपत्युर्विपरीतमार्गगामिनीं कुर्वन्ति तथैव पिशुनतामिव गतैस्तैर्गजैर्नदीमध्यस्थैः प्रवाहावरोधेन तुङ्गभद्रा समुद्राद्विपरीत-देशवाहिनी कृतेति भावः । गजेषु दुर्जनत्वस्योत्प्रेक्षणादुत्प्रेक्षा । गजव्यवहारे दुर्जनव्यवहारारोपात्समासोक्तिश्च । अतस्तयोस्संकरः ।

भाषा

जिस प्रकार स्त्री पुरुष में, दोनों ओर से मध्यस्थ बन कर, परस्पर भेद भाव उत्पन्न करने वाले दुर्जन चतुर लोग शीघ्र ही स्त्री को पति के प्रतिकूल बना देते हैं वैसे ही इस चोल राजा के दक्षिण समुद्रतट से आए हुए हाथियों ने, तुङ्गभद्रा नदी के बीच में खड़े होकर, प्रवाह के विपरीत बहने से मानों दुर्जनता को प्राप्त भए के समान, तुङ्गभद्रा नदी को समुद्र से विपरीत दिशा में बहने वाली बना दिया ।

सिन्धुतीरनिलयानुरोधतस्तत्तथा बलमवाप दीर्घताम् ।
अन्तरक्षपितरात्रिभिर्जनैः प्राप्यते स्म नृपमन्दिरं यथा ॥७६॥

अन्वयः

तत् बलं सिन्धुतीरनिलयानुरोधतः तथा दीर्घताम् अवाप यथा अन्तर-क्षपितरात्रिभिः जनैः नृपमन्दिरं प्राप्यते स्म ।

व्याख्या

तत् चोलराजस्य बलं सैन्यं सिन्धोस्तुङ्गभद्राया नद्यास्तीरं तटं तस्मिन्निलयो निवासस्तस्याऽनुरोधोऽनुवर्तनं 'अनुरोधोऽनुवर्तनम्' इत्यमरः । तस्मात्तुङ्गभद्रा-नदीतटनिवासानुवर्तनात्तथा तादृशीमपूर्वामतिमहतीं दीर्घतां विशालतामवाप प्राप्तं यथा येन प्रकारेणाऽन्तरे मध्ये 'अन्तरमवकाशावधिपरिधानान्तर्धिभेद तादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इत्यमरः । क्षपिता यापिता रात्रिर्निशा यैस्ते तैर्मार्गगमनेनैव व्यतीतरात्र्यवच्छिन्नकालैर्जनैः प्रजाभि-र्नृपस्य राज्ञो मन्दिरं राजभवनं प्राप्यते स्म गम्यते स्म । तीरभूमेस्संकीर्णत्वा-त्तीरे सेनाया बहुदूरपर्यन्तं श्रेणिबद्धनिवासेन पश्चादागता ये केचन राजमन्दिरं

जिगमिषवस्ते नदीतीरमार्गे सम्पूर्णैकरात्रिसमयं व्यतीत्यैव राजभवनं प्राप्ता इति सेनाया विशालत्वं दूरदेशव्यापित्वञ्च सूचितम् ।

भाषा

चोलराज की उस सेना के तुङ्गभद्रा नदी के किनारे पर ही डेरा रखने के अनुरोध से, (किनारे की संकीर्णता से कतार में बहुत दूर तक टिकी होने से) वह सेना इतनी अधिक विशाल व दूरदेश व्यापी हो गई थी कि राजभवन में जाने वाले सम्पूर्ण रात भर का समय चलने में लगाने पर ही, राज भवन में पहुँच पाते थे ।

चोलकेलिसलिलावगाहन-प्राप्तभूरिघनसारपाण्डुरा ।
सा हिमाचलविटङ्कनिर्गता जाह्नवीव तटिनी व्यराजत ॥७७॥

अन्वयः

चोलकेलिसलिलावगाहनप्राप्तभूरिघनसारपाण्डुरा सा तटिनी हिमाचलविटङ्कनिर्गता जाह्नवी इव व्यराजत ।

व्याख्या

चोलस्य चोलदेशनृपतेश्चोलजनस्य च यत्केलिसलिलावगाहनं क्रीडार्थजलस्नानं तेन प्राप्तो लब्धो भूरि घनसारः प्रचुरकर्पूरस्तेन पाण्डुरा शुभ्रवर्णा सा प्रसिद्धा तटिनी तुङ्गभद्रानदी 'तरङ्गिणी शैवलिनी तटिनी ह्लादिनी धुनी' इत्यमरः । हिमाचलस्य तुषाराद्रेर्विटङ्कं शिखरं 'कपोतपालिकायान्तु विटङ्कं पुंनपुंसकम्' इत्यमरः । तस्मान्निर्गता निस्सृता जाह्नवीव गङ्गेव व्यराजत शुशुभे । कर्पूरसंमिश्रणात्तुङ्गभद्रायाः कृष्णं जलं गङ्गेव शुभ्रं जातमिति भावः । विटङ्कं कपोतपालिकावाचकमत्र लक्षणया शिखरवाचकमिति । अत्रोपमालङ्कारः ।

भाषा

चोलदेशीय राजा और प्रजा के जलक्रीडा सहित स्नान करने से, उनके शरीर में पोते हुए कपूर से श्वेतवर्ण को प्राप्त तुङ्गभद्रानदी, हिमालय के शिखरों से निकली गङ्गानदी के समान शोभित हुई ।

तत्र दक्षिणतटे कृतस्थितिः कुन्तलेन्दुरवलोक्य तद्बलम् ।
बाहुमाहवसहस्रदीक्षितं वन्दते स्म परिचुम्बति स्म च ॥७८॥

अन्वयः

तत्र दक्षिणतटे कृतस्थितिः कुन्तलेन्दुः तद्बलम् अवलोक्य आहवसहस्र-दीक्षितं बाहुं वन्दते स्म परिचुम्बति स्म च ।

व्याख्या

तत्र तस्मिन् दक्षिणतटे तुङ्गभद्राया दक्षिणतीरे कृता सम्पादिता स्थितिर्निवासो येन सः कुन्तलेन्दुः कुन्तलदेशचन्द्रो विक्रमाङ्कदेवस्तस्य चोलराजस्य बलं सैन्यमवलोक्य दृष्ट्वाऽऽहवानां युद्धानां सहस्रं तस्मिन् दीक्षितं संजातदीक्षं युद्धसहस्रकृतानुभवं बाहुं स्वभुजं वन्दते स्म प्रणमति स्म परिचुम्बति स्म च वदनसंयुक्तं करोति स्म च । स्वबाहोर्महती श्लाघा कृतेति भावः ।

भाषा

तुङ्गभद्रा नदी के दक्षिण किनारे पर निवास करने वाले कुन्तलेन्दु विक्रमाङ्कदेव ने चोल देश के राजा की सेना को देखकर हजारों युद्धों का अनुभव करने वाली अपनी भुजा को प्रणाम किया और चूम लिया । अर्थात् अपनी भुजा का आदर व प्रेम किया ।

द्राविडोऽपि नृपतिः कुतूहलाद्वीक्ष्य तत्कटकमुत्कटद्विपम् ।
राज्यमुद्धृतमनर्थपङ्कतः कन्यकावितरणादमन्यत ॥७६॥

अन्वयः

द्राविडः नृपतिः अपि उत्कटद्विपं तत्कटकं कुतूहलात् वीक्ष्य कन्यकावितरणात् राज्यम् अनर्थपङ्कतः उद्धृतम् अमन्यत ।

व्याख्या

द्राविडो द्रविडदेशीयो नृपतिश्चोलदेशाधिपो वीरराजेन्द्रनामको भूपतिरप्युत्कटा मदान्धा द्विपा गजा यस्मिंस्तन्मदमत्तगजप्रचुरं तस्य विक्रमाङ्कदेवस्य कटकं सैन्यं कुतूहलात्कौतुकात् 'कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्' इत्यमरः । वीक्ष्याऽवलोक्य कन्यकायाः स्वात्मजाया वितरणं दानं तस्मात् स्वसुताप्रदानात् राज्यं स्वचोलराज्यमनर्थ एवाऽनिष्टमेव पङ्कः कर्दमस्तस्मादनिष्टकर्दमत उद्धृतं बहिर्निस्सारितममन्यत विज्ञातवान् ।

भाषा

द्रविडदेश के चोलवंशीय राजा वीरराजेन्द्र ने भी कौतुक से विक्रमाङ्कदेव की मदोन्मत्त हाथियों से युक्त सेना को देखकर कन्या प्रदान से अनिष्ट रूपी कीचड़ से अपने राज्य का उद्धार हुआ ऐसा माना।

प्रेषितैरथ तयोः परस्परं प्रेम्णि योग्यपुरुषैः प्रपञ्चिते।
संगमः सकललोकसंमतो जायते स्म गुरुपुष्ययोरिव ॥८०॥

अन्वयः

अथ प्रेषितैः योग्यपुरुषैः परस्परं प्रेम्णि प्रपञ्चिते तयोः गुरुपुष्ययोः इव सकललोकसम्मतः संगमः जायते स्म।

व्याख्या

अथ विक्रमाङ्कदेववीरराजेन्द्रयोस्तुङ्गभद्रातटप्राप्त्यनन्तरं प्रेषितैरुभयपक्षात्प्रापितैर्योग्यपुरुषैश्चतुरजनैः परस्परं मिथः प्रेम्णि स्नेहे प्रपञ्चिते सम्वर्धिते सति तयोर्विक्रमाङ्कदेववीरराजेन्द्रयोर्गुरुपुष्ययोर्बृहस्पतिपुष्यनक्षत्रयोरिव सकललोकैस्सम्पूर्णजनैस्सम्मतस्समर्थितः संगमः सम्मेलनं जायते स्म जातम्। [1]ज्यौतिषशास्त्रे गुरुपुष्ययोगः प्रशस्यत्वेन वर्णितः। सर्वे जना तद्योगस्य शुभफलप्रदत्वञ्चाऽऽमनन्ति। अत्रोपमालङ्कारः

भाषा

विक्रमाङ्कदेव और वीरराजेन्द्र चोल के तुङ्गभद्रानदी के तटपर आ जाने पर, दोनों ने भेजे हुए कार्यकुशल पुरुषों के परस्पर वार्तालाप से प्रेमवृद्धि होने पर, सब लोगों को अभीष्ट गुरुपुष्ययोग के समान उनदोनों का योग अर्थात् मिलाप हुआ।

एष स प्रियतमः श्रियः स्वयं कर्मणा मम शुभेन दर्शितः।
इत्युदश्रुनयनः प्रभावतः कुन्तलाधिपतेरमंस्त सः ॥८१॥

---

[1] गुरुपुष्ययोगः पञ्चसंख्याकामृतसिद्धियोगेष्वेकतमः।
यदि विष्टिर्व्यतीपातो दिनं वाऽप्यशुभं भवेत्।
हन्यतेऽमृतयोगेन भास्करेण तमो यथा॥
मुहूर्तचिन्तामणिटीकायां पीयूषधारायां दीपिकाकारस्य वचनम्।

अन्वयः

सः कुन्तलक्षितिपतेः प्रभावतः एषः स्वयं सः श्रियः प्रियतमः मम शुभेन कर्मणा दर्शितः इति उदश्रुनयनः सन् अमंस्त ।

व्याख्या

स वीरराजेन्द्रचोलः कुन्तलक्षितिपतेः कुन्तलदेशाधिपस्याऽऽहवमल्लदेवस्य प्रभावतः प्रतापस्य माहात्म्यादेष विक्रमाङ्कदेवः स्वयं साक्षात् स प्रसिद्धः श्रियो लक्ष्म्याः प्रियतमो विष्णुर्मम शुभेन कर्मणा मम पुण्येन दर्शितः प्रत्यक्षीकृत इति पूर्वोक्तमुद्गतान्युत्थितान्यश्रूणि हर्षाश्रूणि ययोस्ते उदश्रुणी नयने नेत्रे 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणि' इत्यमरः । यस्य स प्रेमाश्रुपूर्णनयनस्सन्नमंस्त ज्ञातवान् । वैदिकपद्धत्या कन्याप्रदानं विष्णुरूपिणे वरायैव क्रियत इति तस्य विष्णुस्वरूपत्वमङ्गीकृतमिति भावः ।

भाषा

वीरराजेन्द्र चोल ने, कुन्तलराज आहवमल्लदेव के प्रभाव के माहात्म्य से यह विक्रमाङ्कदेव साक्षात् लक्ष्मी का पति, मेरे पुण्य से मेरे दृष्टिगोचर कराया गया है ऐसा, आनन्द के आँसुओं को नेत्रों से बहाते हुए, माना ।

पादयोः प्रणतये कृतोद्यमं तं मुदा द्रविडपार्थिवं ततः ।
विक्रमाङ्कनृपतिर्न्यवर्तयत् तस्य संभ्रमविशेषतोषितः ॥८२॥

अन्वयः

ततः विक्रमाङ्कनृपतिः तस्य संभ्रमविशेषतोषितः (सन्) मुदा पादयोः प्रणतये कृतोद्यमं तं द्रविडपार्थिवं न्यवर्तयत् ।

व्याख्या

ततः साक्षात्कारानन्तरं विक्रमाङ्कनृपतिस्तस्य वीरराजेन्द्रचोलस्य सम्भ्रमविशेषेण हर्षजनितविशिष्टत्वरया समादरविशेषेण वा तोषितः प्रसादितस्सन् मुदा हर्षेण पादयोर्विक्रमाङ्कदेवचरणयोः प्रणतये प्रणामाय कृतस्सम्पादित उद्यम उद्योगो येन स तं कृतोत्साहं तं प्रसिद्धं द्रविडपार्थिवं द्रविडनृपं वीरराजेन्द्रं न्यवर्तयत् न्यवारयन्निषेधति स्मेत्यर्थः ।

भाषा

सामना होने के अनन्तर विक्रमाङ्कदेव ने, वीरराजेन्द्र चोल के हर्ष जनित त्वरा से या आदर से प्रसन्न होकर, आनन्द से अपने पाओं पर पड़ कर प्रणाम करने का उत्साह दिखाने वाले द्रविड राजा को वैसा करने से रोका।

किं करोषि वयसाधिकेन मे क्षिप्यतां शिरसि पादपल्लवः।
अद्यजातमपि मूर्ध्नि धार्यते किं न रत्नममलं वयोधिकैः ॥८३॥

अन्वयः

अधिकेन वयसा किं करोषि, मे शिरसि पादपल्लवः क्षिप्यताम्। किं वयोधिकैः अद्यजातम् अपि अमलं रत्नं मूर्ध्नि न धार्यते।

व्याख्या

अधिकेन त्वदपेक्षयाऽधिकेन वयसाऽवस्थया वार्धक्यविचारेणेत्यर्थः। किं करोषि कथं निषेधसि। मे मम शिरसि मूर्ध्नि पादश्चरण एव पल्लवः कोमल-पत्रं चरणपल्लवः क्षिप्यताम् निधीयताम्। किं कथं वयसाऽवस्थयाऽधिकाः श्रेष्ठास्तैर्वयोवृद्धैरद्यजातमद्यैवोत्पन्नं शाणादिना सज्जीकृतं नवीनमित्यर्थः। अप्यमलं निर्मलं रत्नं मणिर्मूर्ध्नि शिरसि न धार्यते नोह्यते, अपि तु धार्यत एव। दृष्टान्तालङ्कारः।

भाषा

मैं अवस्था में बड़ा हूँ ऐसा विचार कर क्यों मुझे चरण पर पड़ने से रोकते हो। मेरे मस्तक पर अपना चरणपल्लव रक्खो अर्थात् मुझे चरण पर पड़कर प्रणाम करने दो। क्या वयोवृद्ध आज ही प्राप्त अर्थात् नवीन निर्मल मणि को अपने मस्तक पर नहीं धारण करते अर्थात् करते ही हैं।

इत्युदीरितवता निरन्तरं तेन हर्षजलपूर्णचक्षुषा।
कुन्तलेन्दुरगमन्मुदं परां द्राविडक्षितिपमालिलिङ्ग च ॥८४॥

अन्वयः

इति उदीरितवता निरन्तरं हर्षजलपूर्णचक्षुषा तेन कुन्तलेन्दुः परां मुदम् अगमत् द्राविडक्षितिपम् आलिलिङ्ग च।

व्याख्या

इति पूर्वोक्तमुदीरितवतोक्तवता निरन्तरमविच्छिन्नं हर्षजलेन प्रेमाश्रुणा पूर्णे व्याप्ते चक्षुषी नेत्रे यस्य तेनाऽऽनन्दाश्रुपरिप्लुतनयनेन तेन द्रविडाधिपेन कुन्तलेन्दुः कुन्तलदेशचन्द्रो विक्रमाङ्कदेवः परामुत्कृष्टां मुदं हर्षमगमत् प्राप्तो द्राविडक्षितिपं द्रविडदेशाधिपं वीरराजेन्द्रमालिलिङ्ग च आश्लिष्टवांश्च। प्रेम्णा तस्याऽऽलिङ्गनञ्चकारेत्यर्थः।

भाषा

पूर्वोक्त बातें कहने वाले और निरन्तर प्रेमाश्रुओं से भरे नेत्र वाले द्रविड देश के राजा से कुन्तलदेश का चन्द्र विक्रमाङ्कदेव बहुत प्रसन्न हुआ और उसको गले लगा लिया।

अर्धासनप्रणयपूर्णमनोरथोऽथ
श्रीकुन्तलेश्वरमवोचत चोलभूपः।
प्रत्यादिशन्दशनचन्द्रिकया किरीट-
रत्नातपं सदसि राजपरम्पराणाम् ॥८५॥

अन्वयः

अथ अर्धासनप्रणयपूर्णमनोरथः चोलभूपः सदसि दशनचन्द्रिकया राजपरम्पराणां किरीटरत्नातपं प्रत्यादिशन् (सन्) श्रीकुन्तलेश्वरम् अवोचत।

व्याख्या

अथ परस्परालिङ्गनानन्तरं (सिंहासने) अर्धासनस्य प्रणयेन कृपयाऽर्धासनप्रदानकृपयेत्यर्थः। पूर्णस्सफलो मनोरथो वाञ्छितार्थो यस्य स चोलभूपश्चोलनृपो वीरराजेन्द्रः सदसि सभायां 'समज्या परिषद्गोष्ठी सभासमितिसंसदः। आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः' इत्यमरः। दशनानां दन्तानां चन्द्रिका प्रकाशस्तया दन्तकान्त्या राजपरम्पराणां नृपश्रेणीनां किरीटे मुकुटे रत्नानि मणयस्तेषामातपं प्रकाशं प्रत्यादिशन् निराकुर्वन् सन् श्रीकुन्तलेश्वरं विक्रमाङ्कदेवं प्रत्यवोचतोवाच। एतेन द्राविडेश्वरस्य स्वात्मनि गौरवविशेषो ध्वन्यते। वसन्ततिलकावृत्तम्। 'उक्ता वसन्ततिलका तभजाः जगौगः'। इति लक्षणात्।

भाषा

परस्पर आलिङ्गन के पश्चात् आधे सिंहासन पर बैठाने की कृपा से पूर्ण मनोरथ चोलराज वीरराजेन्द्र ने सभा में अपने दाँतों के प्रकाश से अन्य राजाओं के मुकुटमणियों के प्रकाश को निस्तेज करते हुए, कुन्तलेश्वर विक्रमाङ्कदेव से कहा ।

अङ्गानि चन्दनरसादपि शीतलानि
चन्द्रातपं वमति बाहुरयं यशोभिः ।
चालुक्यगोत्रतिलक क्व वसत्यसौ ते
दुर्वृत्तभूपपरितापगुरुः प्रतापः ॥८६॥

अन्वयः

अङ्गानि चन्दनरसात् अपि शीतलानि (सन्ति) । अयं बाहुः यशोभिः चन्द्रातपं वमति । चालुक्यगोत्रतिलक ! ते दुर्वृत्तभूपपरितापगुरुः असौ प्रतापः क्व वसति ।

व्याख्या

अङ्गानि ते शरीरावयवाश्चन्दनस्य श्रीखण्डस्य रसो द्रवस्तस्मादपि शीतलानि शीतानि सन्ति । अयं प्रसिद्धो बाहुर्भुजो यशोभिः कीर्तिभिश्चन्द्रस्येन्दोरातपं ज्योत्स्नां चन्द्रकिरणसमानशीतकान्ति वमति प्रकटयति । हे चालुक्यगोत्रतिलक ! हे चालुक्यवंशविभूषण ! ते तव दुर्वृत्तानां दुश्चरित्राणां भूपानां राज्ञां परितापस्य संतापस्य गुरुराचार्यो महीयाँश्चाऽतिशयसंतापकारीत्यर्थः । अथवा परितापेन गुरुः प्रबलः प्रतापः । 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः । क्व कुत्र वसति । तवाऽऽलिङ्गनेन तवाऽवयवेषु सर्वत्र शैत्यमेवाऽनुभूतम् । तव शत्रुदाहकरं तेजस्तव शरीरे कुत्र वसतीति तु न ज्ञायते इति भावः । अत्रैवंविधशीतलाङ्गात्तादृशप्रतापोदयो विस्मयावह इति विषमालङ्कारः ।

भाषा

हे चालुक्य कुलभूषण ! तुम्हारे शरीर के विभिन्न अवयव, चन्दन के रस से भी शीतल हैं । तुम्हारी भुजा (श्वेत) कीर्तियों के कारण से चांदनी के

ऐसी ठंडी कान्ति फैलाती है। तुम्हारा दुश्चरित राजाओं को विशेष तपाने वाला वह प्रताप तुम्हारे शरीर में कहाँ रहता है ?

धैर्यस्य धाम निधिरद्भुतचेष्टितानां
दृष्टान्तभूरनवधेः करुणारसस्य ।
त्वं वेधसा विरचितः सकलादिराज-
निर्माणसारपरमाणुसमुच्चयेन ॥८७॥

अन्वयः

वेधसा सकलादिराजनिर्माणसारपरमाणुसमुच्चयेन त्वं धैर्यस्य धाम, अद्भुतचेष्टितानां निधिः अनवधेः करुणारसस्य दृष्टान्तभूः विरचितः ।

व्याख्या

वेधसा ब्रह्मणा सकलास्समस्ता आदिराजानो मान्धातृदिलीपप्रभृतय आदिनृपतयस्तेषां निर्माणस्य रचनायाः सारभूताः श्रेष्ठांशा ये परमाणवस्सूक्ष्मतमभागास्तेषां समुच्चयेन समूहेन सर्वादिमान्धातृप्रभृतिनृपरचनासारांशरूपसूक्ष्मतमभागकदम्बेन त्वं भवान् धैर्यस्य गाम्भीर्यस्य धाम कुलगृहमद्भुतान्याश्चर्योत्पादकानि चेष्टितानि व्यापारास्तेषां निधिराकरोऽनवधेर्निर्मर्यादस्य करुणारसस्य दयार्द्रभावस्य दृष्टान्तभूर्दृष्टान्तभूमिरुदाहरणमित्यर्थः । विरचितो निर्मितः । अत्र राज्ञि धामनिध्यादेरभेदारोपान्मालारूपकालङ्कारः ।

भाषा

ब्रह्मा ने समग्र प्राचीन मान्धाता दिलीप आदि राजाओं को बनाने के सारभूत परमाणुओं के संग्रह से गाम्भीर्य के घर, आश्चर्यजनककार्यों का खजाना और असीम दयार्द्रभाव के उदाहरण स्वरूप, आप की रचना की ।

कन्या विभूषणमियं भुवनत्रयस्य
सिंहासनं विपुलमेतदयं ममात्मा ।
व्यस्तं समस्तमथवा तदिदं गृहाण
पुण्यैर्मम प्रणयमेतु यशःपताका ॥८८॥

अन्वयः

इयं भुवनत्रयस्य विभूषणं कन्या, एतत् विपुलं सिंहासनम्, अयं मम आत्मा। तत् इदं व्यस्तम् अथवा समस्तं गृहाण। मम पुण्यैः यशः-पताका प्रणयम् एतु।

व्याख्या

इयं पुरतो दृश्यमाना भुवनानां लोकानां त्रयं तस्य त्रिभुवनस्य विभूषण-मलङ्कारः कन्या ममात्मजा, एतदग्रे वर्तमानं विपुलं विशालं सिंहासनं राज्या-धिष्ठातृसमुपवेशनस्थानं, अयं प्रत्यक्षदृश्यो मम मदीय आत्मा शरीरावच्छिन्न आत्मा। तदिदं पूर्वोक्तं वस्तुजातं व्यस्तमेकैकमथवा पक्षान्तरे समस्तं सर्वं मिलितं गृहाण स्ववशमानय। मम पुण्यैश्शुभकर्मजन्यादृष्टराशिभिर्यशःपताका मम कीर्तिवैजयन्ती 'पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्' इत्यमरः। प्रणयमेतु स्फुरतु।

भाषा

तीनों लोकों की विभूषणस्वरूप यह मेरी लड़की, यह विशाल राजसिंहासन और यह इस शरीर से आवृत मेरी आत्मा, इन सब वस्तुओं का एक एक करके अथवा इन सभी वस्तुओं का इकठ्ठा ही आप स्वीकार करें। मेरे पुण्यों से मेरी कीर्तिपताका प्रसन्नता पूर्वक फहराती रहे। अर्थात् मेरे पुण्यों से आपके सम्बन्ध से मेरा यश चिरस्थायी हो।

कन्यान्तःपुरधाम्नि धैर्यनिधिना माधुर्यधुर्यैः पदै
रित्यादि द्रविडेश्वरेण निबिडप्रेम्णा मुहुर्व्याहृतः।
चोलीनां कुटिलासु कुन्तललतादोलासु लोलां दृशं
देवः सोऽथ विनोदयन्मुदमगाच्चालुक्यविद्याधरः ॥८६॥

अन्वयः

अथ कन्यान्तःपुरधाम्नि धैर्यनिधिना द्रविडेश्वरेण माधुर्यधुर्यैः पदैः इत्यादि निबिडप्रेम्णा मुहुः व्याहृतः सः चालुक्यविद्याधरः देवः चोलीनां कुटिलासु कुन्तललतादोलासु लोलां दृशं विनोदयन् मुदम् अगात्।

व्याख्या

अथाऽनन्तरं कन्यायाः स्वात्मजाया अन्तःपुरमवरोधनं 'स्त्र्यगारं भूभुजामन्तः-पुरं स्यादवरोधनम्' इत्यमरः। एव धाम गृहं तस्मिन् कन्यावरोधगृहे धैर्यस्य गाम्भीर्यस्य निधिराकरस्तेन महाधैर्यवता द्रविडेश्वरेण द्रविडाधिपेन वीरराजेन्द्रेण माधुर्याणां मधुरभावानां धुर्या धौरेया अग्रगण्या इत्यर्थः। 'धूर्वहे धुर्य धौरेय धुरीणाः सधुरंधराः' इत्यमरः। तैर्विशेषमधुरैः पदैश्शब्दैरित्यादि पूर्वोक्तमन्यच्च निबिडप्रेम्णा सान्द्रस्नेहेन मुहुर्वारं वारं व्याहृतः कथितः सः प्रसिद्धः चालुक्यस्य चालुक्यवंशस्य विद्याधरः श्रेष्ठजनो देवो विक्रमाङ्कदेवः 'नामैकदेशग्रहणे नाम-ग्रहणमिति'। चोलीनां चोलाङ्गनानां कुटिलासु वक्रासु कुन्तललतादोलासु केशवल्लीरूपान्दोलिकासु लोलां चञ्चलां दृशं दृष्टिं विनोदयन् व्यापारयन्मुद-मानन्दमगात्प्राप। शार्दूलविक्रीडितच्छन्दः। सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्। रूपकमलङ्कारः।

भाषा

इसके अनन्तर, कन्या के अन्तः पुर में, अत्यन्त धीर, द्रविड देश के राजा, वीरराजेन्द्र द्वारा, विशेष मधुर शब्दों में बार २ घनिष्ट प्रेम से ऐसी २ बातों से सम्बोधित उस चालुक्यवंश में श्रेष्ठ, विक्रमाङ्कदेव ने चोलदेश की अङ्गनाओं के घुंघराले केशलता रूपी झूलों पर अपनी चञ्चल नजर फेरते हुए, आनन्द प्राप्त किया। अर्थात् हवा से हिलने वाले घुंघराले बालवाली अङ्गनाओं को देख कर उसे हर्ष हुआ।

इति श्री त्रिभुवनमल्लदेव–विद्यापति–काश्मीरकभट्ट श्री बिल्हण विरचिते विक्रमाङ्कदेवचरिते महाकाव्ये पञ्चमः सर्गः।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाजबुधोत्तमात्समुदितः श्री विश्वनाथः सुधीः।
चक्रे रामकुबेरपण्डितवरात्संप्राप्तसाहाय्यक-
ष्टीकायुग्ममिदं रमाकरुणया सर्गे शुभे पञ्चमे॥

ॐ शान्तिः शान्तिः शान्तिः।

॥ श्रीः ॥

महाकवि श्री बिल्हण विरचितं

विक्रमाङ्कदेवचरितम्

षष्ठः सर्गः ।

सह विभवभरेण तत्र पुत्रीं गुणनिधये नृपनन्दनाय दत्वा ।
कथमपि परिणेतुरभ्यनुज्ञामथ समवाप्य चचाल चोलराजः ॥१॥

अन्वयः

अथ चोलराजः तत्र गुणनिधये नृपनन्दनाय विभवभरेण सह पुत्रीं दत्वा कथमपि परिणेतुः अभ्यनुज्ञां समवाप्य चचाल ।

व्याख्या

अथ विक्रमाङ्कदेवचोलराजयोस्समेलनानन्तरं चोलवंशस्य नृपो राजा वीरराजेन्द्रस्तत्र तुङ्गभद्रातटे गुणानां शौर्यादिगुणानां निधिराकरस्तस्मै गुणाकराय नृपस्य राज्ञ आहवमल्लदेवस्य नन्दनाय पुत्राय विक्रमाङ्कदेवाय विभवस्य सम्पत्तेर्भरस्समूहस्तेन समृद्धिराशिना सह साकं पुत्रीं स्वात्मजां दत्वा समर्प्य कथमपि केनाऽपि प्रकारेण परिणेतुर्विवाहकर्तुरभ्यनुज्ञामाज्ञां समवाप्य लब्ध्वा चचाल स्वराजधानीं प्रति प्रतस्थे । पुष्पिताग्रावृत्तम् । "अयुजि नयुगरेफतो यकारो युजि च न जौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ।

भाषा

विक्रमाङ्कदेव और चोलराज से मिलाप होने के अनन्तर, चोलदेश के राजा ने तुङ्गभद्रा नदी के तट पर उस गुण की खान, राजपुत्र विक्रमाङ्कदेव को बहुत सी सम्पत्ति के साथ कन्या प्रदान कर, बड़ी कठिनता से विवाह करने वाले विक्रमाङ्कदेव की आज्ञा पाकर अपनी राजधानी की ओर प्रस्थान किया ।

द्रविडनरपतेरदत्त वित्तं निरवधि कुन्तलनाथनन्दनोऽपि ।
यशसि रसिकतामुपागतानां तृणगणना गुणरागिणां धनेषु ॥२॥

अन्वयः

कुन्तलनाथनन्दनः अपि द्रविडनरपतेः निरवधि वित्तम् अदत्त । यशसि रसिकताम् उपागतानां गुणरागिणां धनेषु तृणगणना ।

व्याख्या

कुन्तलनाथस्याऽऽहवमल्लदेवस्य नन्दनः पुत्रो विक्रमाङ्कदेवोऽपि द्रविडस्य द्रविडदेशस्य नरपते राज्ञश्चोलराजस्य नास्त्यवधिस्सीमा यस्य तन्निरवधि प्रभूतं वित्तं धनमदत्त दत्तवान् याचकेभ्य इत्यर्थः । यशसि कीर्तौ 'यशः कीर्तिः समज्ञा च' इत्यमरः । रसिकतामानन्दानुभूतिमुपागतानां प्राप्तानां गुणेषु सौजन्यादिगुणेषु रागिणोऽनुरागवन्तस्तेषां गुणस्नेहिनां धनेषु वित्तेषु वित्तविषय इत्यर्थः । तृणस्य घासस्य 'शष्पं बालतृणं घासः' इत्यमरः । इव गणना दृष्टिर्भवति । यशस्विनां धनं तृणवन्निर्मूल्यमिति भावः । पूर्वार्द्धस्योत्तरार्द्धेन समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

भाषा

कुन्तलदेश के राजा आहवमल्लदेव के पुत्र विक्रमाङ्कदेव ने भी द्रविड राजा के अपरिमित वित्त को याचकों को दे दिया । यश में रसिकता रखने वाले गुणग्राही जन, धन को तृणवत् समझते हैं ।

मुदितमनसि जातमानसिद्धौ गतवति तत्र गुणैकपक्षपाती ।
प्रतिपदमुदकण्ठत क्षितीन्दुः कुसुममृदूनि मनांसि निर्मलानाम् ॥३॥

अन्वयः

गुणैकपक्षपाती क्षितीन्दुः जातमानसिद्धौ मुदितमनसि तत्र गतवति (सति) प्रतिपदम् उदकण्ठत । निर्मलानां मनांसि कुसुममृदूनि (भवन्ति) ।

व्याख्या

गुणेष्वेव सौजन्यादिगुणेष्वेवैको मुख्यः पक्षपातः स्नेहो यस्य स गुणैकानुरक्तः क्षितेः पृथ्वा इन्दुश्चन्द्रो विक्रमाङ्कदेवो (आल्हादकत्वात्) जाता सम्पन्ना मानस्याऽऽदरस्य सिद्धिर्निष्पत्तिर्यस्य स तस्मिन् मुदितं हृष्टं मनश्चित्तं यस्य स तस्मिन्

प्रहृष्टचेतसि तत्र द्रविडनृपतौ गतवति सति स्वनगरं प्रति प्रस्थिते सति प्रतिपदं प्रतिक्षणमुदकण्ठत समुत्सुको बभूव । तस्य स्मरणेन प्रसन्नो बभूवेत्यर्थः। निर्मलानां स्वच्छहृदयाणां मनांसि चेतांसि कुसुमवत्पुष्पवन्मृदूनि कोमलानि भवन्ति ।

भाषा

केवल गुणों से ही स्नेह करने वाला, पृथ्वी भर के लोगों को सुख देने वाला विक्रमाङ्कदेव, अपने आदर की सिद्धि से प्रसन्न चित्त, द्रविड राजा के चले जाने पर, क्षण २ में उसके लिये उत्कण्ठित होता था। स्वच्छ हृदय वाले मनुष्यों के मन, फूल के ऐसे कोमल होते हैं।

द्रविडपतिकथाद्भुत क्षणेषु क्षितिपति सूनुरसौ गुणानुरागी ।
पुलकपरिकरैः कपोलपालीं विपुलमतिः परिपूरयाञ्चकार ॥४॥

अन्वयः

विपुलमतिः गुणानुरागी असौ क्षितिपतिसूनुः द्रविडपतिकथाद्भुत-क्षणेषु पुलकपरिकरैः कपोलपालीं परिपूरयाञ्चकार ।

व्याख्या

विपुला विशुद्धोदारेत्यर्थः। मतिर्बुद्धिः 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः। यस्य स उदारप्रज्ञो गुणेषु सौजन्यादिगुणेष्वनुरागः प्रेम यस्य स गुणस्नेह्यसौ प्रसिद्धः क्षितिपतेर्नृपस्याऽऽहवमल्लदेवस्य सूनुः पुत्रो विक्रमाङ्कदेवो द्रविडपतेश्चोलराजस्य कथानां वार्तानामद्भुता आश्चर्यान्विताः क्षणा अवसरास्तेषु चोलराजसम्बन्धिवृत्तान्तचर्चाकालेषु पुलकानां रोमाञ्चानां परिकरास्समूहास्तै रोमाञ्चप्रकरैः कपोलपालीं गण्डस्थलीं परिपूरयाञ्चकार परिपूर्णाञ्चकार। तस्य चोलराजस्य स्मरणमात्रेण प्रेम्णा स रोमाञ्चितोऽभूदिति भावः ।

भाषा

निर्मल बुद्धि वाले गुणग्राही राजा आहवमल्लदेव के पुत्र विक्रमाङ्कदेव के गाल, चोलराज की अद्भुत बातचीत के सिलसिले में रोमाञ्चित हो उठते थे ।

किमिति न गमनान्निवारितोऽसौ परिचयमेष्यति चक्षुषोः पुनः किम् ।
इति सुजनशिखामणिः कुमारः किमपि चिरं परिचिन्तयाञ्चकार ॥५॥

अन्वयः

असौ गमनात् किम् इति न निवारितः। सुजनशिखामणिः किम् पुनः चक्षुषोः परिचयम् एष्यति इति कुमारः किमपि चिरं परिचिन्तयाञ्चकार।

व्याख्या

असौ द्रविडनरपतिर्गमनात्स्वनगरप्रयाणात् किमिति न कुतो न निवारितः प्रतिषिद्धः। सुजनानां सज्जनानां शिखामणिश्शिरोरत्नं श्रेष्ठ इत्यर्थः। द्रविडाधिराजः किमिति प्रश्ने पुनः भूयश्चक्षुषोर्नयनयोः परिचयं गोचरत्वमेष्यति समागमिष्यतीतीत्थं प्रकारेण कुमारो विक्रमाङ्कदेवः किमपि विचित्रमवर्णनीयं चिरं बहुकालं परिचिन्तयाञ्चकार विचारं कृतवान्।

भाषा

मैंने द्रविडराजा को अपने घर जाने से क्यों नहीं रोका ? क्या वह सज्जन शिरोमणि फिर कभी दृष्टि-गोचर होगा ? वह राजकुमार विक्रमाङ्कदेव ऐसी २ चिरकाल तक चिन्ता किया करता था।

द्रविडनृपतिपुत्रिकां चकार त्रिभुवनदुर्लभसम्पदास्पदं सः।
प्रणयिषु शुभचेतसां प्रसादः प्रसरति सन्ततिमप्यनुग्रहीतुम् ॥६॥

अन्वयः

सः द्रविडनृपतिपुत्रिकां त्रिभुवनदुर्लभसम्पदास्पदं चकार। प्रणयिषु शुभचेतसां प्रसादः सन्ततिम् अपि अनुग्रहीतुं प्रसरति।

व्याख्या

स विक्रमाङ्कदेवो द्रविडनृपतेश्चोलाधीश्वरस्य पुत्रिकामात्मजां त्रिभुवनस्य त्रैलोक्यस्य दुर्लभा दुष्प्राप्या या सम्पत्सम्पत्तिस्तस्या आस्पदं स्थानं चकार निष्पादितवान्। विक्रमाङ्कदेवस्तत्कन्यायै प्रभूतसम्पत्तिं ददावित्यर्थः। प्रणयिषु स्नेहाद्रिनम्रेषु शुभं कल्याणकारि चेतश्चित्तं येषां ते तेषां महोपकारिणां महाजनानां प्रसादः प्रसन्नता 'प्रसादस्तु प्रसन्नता' इत्यमरः। सन्ततिं सन्तानमपि कन्यापुत्रादीनपीत्यर्थः। अनुग्रहीतुं कृपां प्रदर्शयितुं प्रसरति प्रवर्तते। द्रविडराजप्रेम्णा तत्पुत्रीमप्यनुगृह्णाति स्मेति भावः। पूर्वार्धस्योत्तरार्धेन समर्थनादर्थान्तरन्यासालङ्कारः।

भाषा

उसने द्रविडराज की लड़की को तीनों लोकों में दुर्लभ सम्पत्ति दी। अपने स्नेहियों के सम्बन्ध में कल्याण करने की चित्तवृत्तिवालों की कृपा, उनके कन्या पुत्रादि पर भी हो जाती है।

रणरभसविलासकौतुकेन स्थितिमथ बिभ्रदसौ यशोवतंसाम्।
विधिहतकदुराग्रहादकाण्डे गतमशृणोद्द्रविडेन्द्रमिन्द्रधाम्नि ॥७॥

अन्वयः

अथ रणरभसविलासकौतुकेन यशोवतंसां स्थितिं बिभ्रत् असौ विधिहतकदुराग्रहात् अकाण्डे द्रविडेन्द्रम् इन्द्रधाम्नि गतम् अशृणोत्।

व्याख्या

अथ किञ्चित्कालानन्तरं रणो युद्धं तस्य रभसो हर्षः 'रभसो हर्षवेगयोः' इति विश्वः। तस्य विलासः क्रीडा लीला तस्य कौतुकं कुतूहलं तेन युद्धजनितहर्षलीला-कुतूहलेन यशः कीर्तिरवतंसो भूषणं यस्यास्सा तां कीर्तिभूषणां स्थितिमवस्थां बिभ्रद्धारयन्नसौ विक्रमाङ्कदेवो विधिर्ब्रह्मा स एव हतको नीचस्तस्य दुराग्रहाद्-दुरभिनिवेशादकाण्डेऽनवसरे द्रविडेन्द्रं चोलराजमिन्द्रधाम्नि स्वर्गे गतं प्राप्तं मृतमित्यर्थः। अशृणोदाकर्णितवान्।

भाषा

कुछ काल के अनन्तर, युद्ध जनित हर्ष की लीला के कुतूहल द्वारा यश से विभूषित अवस्था में विद्यमान उस विक्रमाङ्कदेव ने क्रूर दैव के दुराग्रह से द्रविडदेश के राजा की असमय में ही स्वर्ग में जाने की बात सुनी।

मृदुहृदयतया गुणानुरागादतिमहतः प्रणयाच्च राजपुत्रः।
हिमकरकरकाण्डपाण्डुगण्ड-स्थलगलदश्रजलश्चिरं ललाप ॥८॥

अन्वयः

राजपुत्रः मृदुहृदयतया गुणानुरागात् अतिमहतः प्रणयात् च हिमकर करकाण्डपाण्डुगण्डस्थलगलदश्रुजलः (सन्) चिरं ललाप।

व्याख्या

राजपुत्रो नृपनन्दनो विक्रमाङ्कदेवो मृदु कोमलं हृदयं चित्तं यस्य स मृदुहृदयस्तस्य भावो मृदुहृदयता तया कोमलचित्तत्वात् गुणेषु सौजन्यादिगुणेष्वनुरागः प्रेम तस्माद्गुणपक्षपातित्वादतिमहतोऽतिबृहतः प्रणयाच्च स्नेहाच्च हिमाश्शीतलाः कराः किरणा यस्य स हिमकरश्चन्द्रस्तस्य करा अंशवः 'किरणोस्त्रमयूखांशुगभस्तिघृणिरश्मयः। भानुः करो मरीचिः स्त्री पुंसयोर्दीधितिः स्त्रियाम्' इत्यमरः। तेषां काण्डानि समूहास्तद्वत्पाण्डु श्वेतं गण्डस्थलं कपोलस्तस्माद्गलत्परिपतदश्रुजलं बाष्पाम्भो यस्य स चन्द्रकिरणश्वेतकपोलगलद्बाष्पाम्बुस्सन् चिरं बहुकालं ललाप विललाप विलापं चकारेत्यर्थः। अत्राऽनुप्रासः शब्दालङ्कारः। अत्र 'ललाप' इति क्रियापदे अवाचकत्वं नाम दोषः, उपसर्ग विनाऽर्थबोधकत्वाऽभावात्।

भाषा

वह राजपुत्र, कोमल हृदय होने से, गुणों के अनुराग के कारण तथा अत्यधिक प्रेम से, चन्द्रमा की किरणों के समान सफेद पड़ गए हुए गालों पर से आसुओं को गिराता हुआ बहुत देर तक विलाप करता रहा।

द्रविडविषयराज्यविप्लवेन श्रवणपथातिथिना ततः सखेदः।
अभिजनवति चोलराजपुत्रे श्रियमभिषेक्तुमसौ समुच्चचाल ॥९॥

अन्वयः

ततः असौ श्रवणपथातिथिना द्रविडविषयराज्यविप्लवेन सखेदः (सन्) अभिजनवति चोलराजपुत्रे श्रियम् अभिषेक्तुं समुच्चचाल।

व्याख्या

ततश्चोलराजविषयकशोकानन्तरमसौ विक्रमाङ्कदेवः श्रवणयोः कर्णयोः पन्था मार्ग इति श्रवणपथः कर्णकुहरमार्गस्तस्याऽतिथिर्विषयस्तेन श्रुतेनेत्यर्थः। द्रविडविषयो द्रविडदेशस्तस्य राज्यं शासनं तस्मिन् विप्लवो डिम्बः 'डिम्बे डमरविप्लवौ' इत्यमरः। तेन, खेदेन दुःखेन सहितः सखेदो दुःखाक्रान्तस्सन्नभिजनवति कुलीने 'सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ' इत्यमरः। चोलराजपुत्रे वीरराजेन्द्रात्मजेऽधिराजराजेन्द्रनामके श्रियं राज्यलक्ष्मीमभिषेक्तुं प्रतिष्ठापयितुं समच्चचाल प्रतस्थे।

भाषा

शोक मनाने के बाद, द्रविडदेश के राज्य में विप्लव होने की खबर सुन कर, दुःखित हो, वह विक्रमाङ्कदेव, कुलीन चोलराजा वीर राजेन्द्र के अधिराज-राजेन्द्र नामक पुत्र को राजगद्दी पर बैठाने के लिये चल पड़ा ।

करटिशतविकीर्णकर्णताल-व्यजनसमीरणशीतलीकृतानि ।
अथ धरणिभुजां पिबन्यशांसि क्षितिपतिरादिपुरीमवाप काञ्चीम् ॥१०॥

अन्वयः

अथ क्षितिपतिः करटिशतविकीर्णकर्णतालव्यजनसमीरणशीतलीकृतानि धरणिभुजां यशांसि पिबन् आदिपुरीं काञ्चीम् अवाप ।

व्याख्या

अथ चोलदेशम्प्रति प्रस्थानानन्तरं क्षितिपतिः पृथिव्या अधिष्ठाता करटिनां गजानां शतं तेन विकीर्णानि विक्षिप्तानि कर्णा एव तालाः तालवृक्षपर्णानि तान्येव व्यजनानि तालवृन्तानि तेषां समीरणेन पवनेन शीतलीकृतानि, अशीतलानि शीतलानि कृतानीति शीतलीकृतानि 'च्विः' प्रत्ययः । विपक्षनृपाणां प्रतापजनितोष्माणं निवार्य हिमीकृतानि धरणिभुजां पृथ्वीपालानां यशांसि कीर्तीः दुग्धमिव पिबन् गृह्णन्नादिपुरीं प्रथमनगरीं काञ्चीं तन्नामचोलराजधानीमवाप संप्राप्तः । यशसः श्वैत्यं प्रसिद्धमिति दुग्धरूपता व्यज्यते, एवं शत्रुभूपानां यशोदुग्धं पिबन्निव तत्राऽऽजगामेति भावः ।

भाषा

चोलदेश के प्रति प्रस्थान करने के अनन्तर, सैकड़ों हाथियों के हिलाए हुए कान रूपी ताल पत्र के पंखों से उत्पन्न वायु से ठण्डे किए हुए विपक्षी राजाओं के यशों का पान करते हुए वह पृथ्वी का संरक्षक विक्रमाङ्कदेव प्राचीन नगरी काञ्ची में पहुँच गया । अर्थात् हाथी की सेना से शत्रुओं को परास्त कर उनकी प्रताप की गर्मी शान्त होने से उनका शीतल दुग्ध के समान यश, अपने परिश्रम से लगी प्यास को मिटाने के लिए, पान करता हुआ काञ्ची नगरी में पहुँचा ।

समजनि कलमेखलाकलाप-ध्वनिजयडिण्डिमसज्जपुष्पचापम् ।
अथ चटुलकटाक्षबाणवर्ष-प्रगुणममुष्य पुरः पुरन्ध्रिचक्रम् ॥११॥

अन्वयः

अथ अमुष्य पुरः पुरन्ध्रिचक्रं कलमेखलाकलापध्वनिजयडिण्डिम-सज्जपुष्पचापं चटुलकटाक्षबाणवर्षप्रगुणं समजनि ।

व्याख्या

अथ काञ्चीपुरीसमागमानन्तरममुष्य विक्रमाङ्कदेवस्य पुरोऽग्रे पुरन्ध्रीणां साध्वीनां ललनानां 'पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता' इत्यमरः । चक्रं समूहो मेखलानां काञ्चीनां कलापस्समूहस्तस्य ध्वनिस्स्वन इति मेखलाकलाप-ध्वनिः कलो मधुरो यो मेखलाकलापध्वनिः स एव जयडिण्डिमो विजयसूचक-वाद्यविशेषशब्दस्तेन सज्जस्सुसज्जितः पुष्पचापः कुसुमायुधः कामो येन तत्, चटुलाश्चञ्चलाः कटाक्षा एव बाणाश्शरास्तेषां वर्षं वृष्टिस्तेन प्रगुणं प्रकृष्टगुण-युक्तं समजन्यभूत् । तत्र नागरीणां काञ्चीशब्देन कटाक्षवीक्षणेन च काम-साम्राज्यमिव प्रदर्शितमिति भावः ।

भाषा

विक्रमाङ्कदेव के काञ्चीनगरी में पहुँचने पर इसके सामने वहाँ की नागरिक ललनाएँ मानों सुन्दर करधनियों के शब्द रूप जयध्वनि के नगाड़े के शब्द से कामदेव को उत्साहित करने वालीं तथा चञ्चल कटाक्ष रूपी बाणों की वृष्टि करने वालीं, हो गईं ।

अधरहसितकिंशुका शुकाय क्रमुकदलं वदनस्थमर्पयन्ती ।
क्षितिपतितनयेऽत्र कापि नेत्र-प्रणयिनि चुम्बनचातुरीमुवाच ॥१२॥

अन्वयः

अधरहसितकिंशुका का अपि वदनस्थं क्रमुकदलं शुकाय अर्पयन्ती (सती) नेत्रप्रणयिनि अत्र क्षितिपतितनये चुम्बनचातुरीम् उवाच ।

व्याख्या

अधरेण अधरोष्ठेन रक्तवर्णत्वात् हसितः अधरीकृतः किंशुको रक्तवर्णपला-शपुष्पं यया सा स्वरक्तवर्णाधरेणाधरीकृतरक्तवर्णकिंशुका रक्तवर्णाधरोष्ठेति

भावः। काऽपि नगररमणी वदने मुखे तिष्ठतीति तं मुखान्तर्वर्तिनं क्रमुकस्य पूगस्य दलं खण्डं शुकाय कीराय मुखेनैवाऽर्पयन्ती ददती सती नेत्रयोः कामिनीनयनयोः प्रणयः स्नेहोस्त्यस्मिन्निति नेत्रप्रणयी तस्मिन्नेत्रप्रणयिनि दृष्टिगोचरेऽत्राऽस्मिन् क्षितिपते राज्ञ आहवमल्लदेवस्य तनये पुत्रे विक्रमाङ्कदेवे चुम्बनस्य वक्त्रसंयोगस्य चातुरी वैदग्ध्यं तां चुम्बनवैदग्ध्यमुवाच प्रकटयाम्बभूव।

भाषा

अपने लाल अधर पल्लव से पलास के लाल फूल की हंसी उड़ाने वाली नागरी ललना, अपने मुख में विद्यमान सुपाड़ी के टुकड़े को अपनें मुख से ही सुग्गे के मुख में देती हुई मानों राजा आहवमल्लदेव के पुत्र विक्रमाङ्कदेव के प्रति चुम्बन करने के कौशल को प्रकट करती थी।

गृहशिखरमगम्यमध्यरोहद् द्रुतमवधीरितपातभीतिरन्या।
मरणमपि तृणं समर्थयन्ते मनसिजपौरुषवासितास्तरुण्यः ॥१३॥

अन्वयः

अन्या अवधीरितपातभीतिः (सती) अगम्यं गृहशिखरं द्रुतम् अध्यरोहत्। मनसिजपौरुषवासिताः तरुण्यः मरणम् अपि तृणं समर्थयन्ते।

व्याख्या

अन्याऽपरा रमण्यवधीरिता तिरस्कृता त्यक्तेत्यर्थः। पातस्य पतनस्य भीतिर्भयं यया सा त्यक्तपतनभया सती गन्तुं योग्यं गम्यं न गम्यमगम्यमारोढुमनर्हं गृहाणां गेहानां 'गृहं गेहोऽध्यवसितम्' इत्यमरः। शिखरं श्रृङ्गं सर्वोच्चस्थानमित्यर्थः। द्रुतं शीघ्रमध्यरोहदारुरोह। मनसिजस्य कामस्य पौरुषेण विक्रमेण वासिता युक्ताः कामवासनाभिभूतास्तरुण्यो युवत्यो मरणमपि मृत्युमपि तृणं तृणवत्तुच्छं समर्थयन्ति मन्यन्ते। अत्र पूर्वार्धस्योत्तरार्धेन समर्थनादर्थान्तरन्यासो नामालङ्कारः।

भाषा

कोई नागरी इसको देखने के लिये, गिरने का भय छोड़ कर जल्दी से न चढ़े जाने योग्य घर के सबसे ऊँचे भाग पर चढ़ गई। कामदेव के पराक्रम से अभिभावित अर्थात् कामासक्त युवतियाँ, मौत को भी तृण के समान तुच्छ समझती हैं।

कलकलमपरा मुधा विधाय क्षितितिलकान्नयनान्तमाससाद ।
अवतरति मृगीदृशां तृतीयं मनसिजचक्षुरुपायदर्शनेषु ॥१४॥

अन्वयः

अपरा मुधा कलकलं विधाय क्षितितिलकात् नयनान्तम् आससाद । मृगीदृशां तृतीयं मनसिजचक्षुः उपायदर्शनेषु अवतरति ।

व्याख्या

अपरा काचित् कामिनी मुधा व्यर्थमेव प्रयोजनमन्तरेणैवेत्यर्थः । कलकलं कोलाहलं 'कोलाहलः कलकलः' इत्यमरः । विधाय कृत्वा क्षितितिलकाद्भूमिभूषणाद् विक्रमाङ्कदेवान्नयनयोर्नेत्रयोरन्तमपाङ्गभागमाससाद प्राप । कलकलमिषेण तस्य दृष्टिमाचकर्षेति भावः । मृगीणां हरिणीनां दृशो नेत्राणीव दृशो यासां तास्तासां हरिणनयनानां तृतीयं तृतीयसंख्याकं मनसिजः कामः एव चक्षुर्नयनं कामनयनमुपायानां यत्किञ्चिद्व्याजरूपोपायानां दर्शनमवलोकनं प्रयोग इत्यर्थः । तेषु स्वाभीष्टसिद्ध्युपायप्रयोगेष्ववतरति फलति । काम एव तरुणीनां विभ्रमादिचमत्कृतानन्यसाधारणव्यवहारशिक्षक इति भावः । पूर्वार्धस्योत्तरार्धेन समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

भाषा

किसी अन्य स्त्री ने, अकारण कोलाहल मचाकर, विक्रमाङ्कदेव का दृष्टिकोण अपनी ओर आकर्षित कर लिया । मृगनयनियों का कामरूपी तृतीय नेत्र, (ऐसे २) उपायों को सुझा देता है ।

हृदि विहितपदेन शुद्धभासा कृतमधरं धरणीन्द्रसूनुनेव ।
निपतितमवधीर्य हारमन्या हरिणविलोलविलोचना जगाम ॥१५॥

अन्वयः

हरिणविलोलविलोचना अन्या शुद्धभासा हृदि विहितपदेन धरणीन्द्रसूनुना अधरं कृतम् इव निपतितं हारम् अवधीर्य जगाम ।

व्याख्या

हरिणस्य मृगस्य इव विलोले चञ्चले विलोचने नेत्रे यस्याः सा मृगचञ्चलनयनाऽन्या काचिल्ललना शुद्धा निर्मला भाः कान्तिर्यस्य तेन निर्मलकान्तिमता 'स्यः

प्रभारुग्रुचिस्त्विड्भा भाश्छविद्युतिदीप्तयः' इत्यमरः। हृदि वक्षःस्थलेऽन्तःकरणे च विनिहितं स्थापितं पदं स्थानं येन स तेन कृतस्थानेन धरणीन्द्रस्य नृपतेराहवमल्लदेवस्य सूनुः पुत्रस्तेन विक्रमाङ्कदेवेनाऽधरं निम्नस्थानस्थितं गुणैर्न्यूनञ्च कृतमिव सम्पादितमिवाऽत एव निपतितमधोभ्रष्टं हारं मुक्तामालामवधीर्य परित्यज्य जगाम गता। कुमारं द्रष्टुं गताऽन्या काऽपि स्त्री रभसात् निपतितां हृदिस्थां मुक्तामालां परित्यज्य जगाम। यतः हारस्य स्थाने ललनाहृदयं शुद्धभासा कुमारेणऽऽश्रितत्वात्तस्य निम्नस्थानगतत्वात्पतनमुत्प्रेक्षितमिति भावः। श्लेषानुप्राणितोत्प्रेक्षा।

भाषा

मृग के समान चञ्चल नेत्र वाली कोई ललना, निर्मलकान्तिवाले और ललना के हृदय में स्थान बनाने वाले राज पुत्र से, मानों नीचे खसकाए गये हुए अतएव वक्षः स्थलपर से गिरे हुए हार की परवाह न कर चली गई।

उरसि मनसिजावतंसलीला–समुचितकोमलपल्लवानुकाराम्।
नखलिपिमपरा प्रकाशयन्ती सुरतविमर्दसहत्वमाचचक्षे ॥१६॥

अन्वयः

अपरा उरसि मनसिजावतंसलीलासमुचितकोमलपल्लवानुकारां नखलिपिं प्रकाशयन्ती सुरतविमर्दसहत्वम् आचचक्षे।

व्याख्या

अपराऽन्या कामिन्युरसि वक्षःस्थले मनसिजस्य कामस्य याऽवतंसलीला भूषणरूपविलासस्तस्याः समुचितो योग्यः कोमलपल्लवो मृदुकिसलयं 'पल्लवोऽस्त्री किसलयम्' इत्यमरः। तस्याऽनुकारोऽनुकरणं यस्यां सा तां मन्मथभूषण विलासयोग्यमृदुकिसलयसदृशाकृतिमर्द्धवृत्ताकारामित्यर्थः। नखलिपिं नखक्षतपरम्परां प्रकाशयन्ती प्रदर्शयन्ती सुरते निधुवनक्रीडायां यो विमर्दः संघर्षस्तं सहते इति सुरतविमर्दसहस्तस्य भावस्तत् सुरतक्रीडासंघर्षक्षमत्वमाचचक्षे कथितवती।

भाषा

अन्य किसी नारी ने अपनी छाती पर कामदेव के भूषण की शोभा के योग्य कोमल पत्तों की आकृति के अर्धवृत्ताकार नखक्षतों को दिखाते हुए, अपनी सुरत कालीन झकझोर को सहने की योग्यता प्रकट की।

अभजत मणिकुण्डलं परस्याः श्रवणपरिच्युतमंसदेशमेत्य ।
गलविगलितपुष्पबाणचक्र-श्रियमसितोत्पलचारुलोचनायाः ॥१७॥

अन्वयः

असितोत्पलचारुलोचनायाः परस्याः मणिकुण्डलं श्रवणपरिच्युतं (सत्) अंसदेशम् एत्य गलविगलितपुष्पबाणचक्रश्रियम् अभजत ।

व्याख्या

असितं नीलमुत्पलं कमलं तद्वच्चारुणी सुन्दरे लोचने नेत्रे यस्याः सा तस्या नीलकमलवत्सुन्दरनेत्रायाः परस्या अन्यस्याः ललनाया मणिकुण्डलं रत्नावतंसः श्रवणाभ्यां कर्णाभ्यां परिच्युतं पतितं सत् अंसदेशं स्कन्धस्थलमेत्य संप्राप्य गले कण्ठदेशे विगलितास्सम्प्राप्ताः पुष्पबाणाः कुसुमसायकास्तेषां चक्रं समूहस्तस्य श्रियं शोभामभजत धारयामास । मणिकुण्डलस्य पुष्पबाणेन साम्यादुपमा । मणिकुण्डलस्य वर्तुलाकारत्वात् कामस्य चक्रश्रियमभजतेत्यर्थः समीचीनः । परन्तु कामस्य चक्रधारणमप्रसिद्धम् ।

भाषा

किसी नीले कमल के ऐसे सुन्दर नेत्रवाली नारी के कान में का मणिकुण्डल गिर कर उसके गले पर आ पड़ने से वह गले पर पड़े हुए कामदेव के फूल के बाण समूहों की शोभा को प्राप्त करता था । कान के अभूषण के गोल होने से कामदेव के चक्र की शोभा अर्थ ही ठीक है । परन्तु कामदेव का चक्र धारण अप्रसिद्ध है ।

परिकलितचुलुक्यराजपुत्र-प्रथमविलोकनकौतुकत्वराणाम् ।
इति नगरकुरङ्गलोचनाना-मभवदनङ्गविलोभनो विलासः ॥१८॥

अन्वयः

परिकलितचुलुक्यराजपुत्रप्रथमविलोकनकौतुकत्वराणां नगरकुरङ्गलोचनानाम् इति अनङ्गविलोभनः विलासः अभवत् ।

व्याख्या

परिकलितो विदितः कैश्चिच्चिह्नविशेषैर्विज्ञात इत्यर्थः । यश्चुलुक्यराजपुत्रो

विक्रमाङ्कदेवस्तस्य प्रथमविलोकनस्य सर्वप्रथमसंदर्शनस्य यत्कौतुकं कौतूहलं तस्मिन् त्वरा सम्भ्रमो यासां तास्तासां नगरस्य काञ्चीपुर्याः कुरङ्गलोचना मृगनयनास्तासां कामिनीनामिति पूर्वोक्तप्रकारोऽनङ्गस्य कामस्य विलोभनो विमोहनोऽनङ्गविलोभनो मदनमोहनो विलासो नानाविधकामसम्बन्धिचेष्टाविशेषोऽभवत् प्रादुर्बभूव ।

भाषा

किसी प्रकार चिह्नादि से पहिचान में आए हुए चुलुक्य वंशीय राजकुमार विक्रमाङ्कदेव के पहिले पहिल दर्शन की उत्कण्ठा से त्वरा करने वाली नागरिक मृगनयनियों की पूर्वोक्त प्रकार की काम सम्बन्धि चेष्टाएँ हुईं ।

[१]नरपतितनयः कयापि कोप-स्फुरितरदच्छदलेखयालुलोके ।
प्रकटितपटुपञ्चबाणलीला-कलकिलकिञ्चितमीक्षणाञ्चलेन ॥१६॥

अन्वयः

कोपस्फुरितरदच्छदलेखया कया अपि ईक्षणाञ्चलेन प्रकटितपटुपञ्चबाणलीलाकलकिलकिञ्चितं नरपतितनयः आलुलोके ।

व्याख्या

कोपेन क्रोधेन स्फुरितस्संचलितः कम्पमानो वा यो रदच्छदोऽधरस्तस्य लेखा अधरदेशः 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः । यस्याः सा तया क्रोधकम्पितसूक्ष्माधररेखया कयाऽपि नायिकया ईक्षणयोर्नेत्रयोरञ्चलः प्रान्तभागस्तेन कटाक्षेण प्रकटिता प्रकाशिता पटुर्विविधवैदग्ध्यसमेता या पञ्चबाणस्य कामस्य लीला क्रीडा तया कलं मधुरं किलकिञ्चितं कामजनितक्रोधाश्रुहर्षभीत्यादिमिश्रितभावविशेषो यस्मिन्कर्मणि तद्यथास्यात्तथा नरपतितनयो राजपुत्रो विक्रमाङ्कदेव आलुलोके संदृष्टः ।

भाषा

क्रोध से फुरफुराने वाले ओंठ से युक्त, किसी नारी ने कामदेव की चातुरी युक्त मनोहर लीला से आभ्यन्तरिक राग क्रोधादि भावों को प्रकट करते हुए, राजपुत्र विक्रमाङ्कदेव को कटाक्ष से देखा ।

---

[१] सन्दर्भदृष्ट्या श्लोकोऽयं पूर्वश्लोकात्प्रागेव स्थानमपेक्षते ।

कनकसदनवेदिकान्तराल-ग्रथितपदः क्षितिपालनन्दनोऽसौ ।
सुरशिखरितटीविटङ्कमध्य-प्रणयिनमुष्णकरं निराचकार ॥२०॥

अन्वयः

कनकसदनवेदिकान्तरालग्रथितपदः असौ क्षितिपालनन्दनः सुरशिखरितटीविटङ्कमध्यप्रणयिनम् उष्णकरं निराचकार ।

व्याख्या

कनकस्य सुवर्णस्य यत्सदनं गृहं तस्य वेदिका समुपवेशनाय परिष्कृता भूमिः 'वेदिः परिष्कृता भूमिः' इत्यमरः । तस्या अन्तरालं मध्यं 'अभ्यन्तरं त्वन्तरालम्' इत्यमरः । तस्मिन् ग्रथितं विहितं पदं चरणं येन स असावयं क्षितिपालस्याऽऽहवमल्लदेवस्य नन्दनः कुमारो विक्रमाङ्कदेवः सुराणां देवानां शिखरी पर्वतस्सुवर्णाद्रिः सुमेरुस्तस्य तटी प्रान्तभाग एव विटङ्कमुन्नतस्थानं तस्य मध्यं मध्यभागस्तस्य प्रणयी स्नेहवशंवदस्तद्वर्तीत्यर्थः । तमुष्णकरं सूर्यं निराचकार तिरश्चकार । निजोग्रप्रतापेन स्वर्णवेदिविद्यमानत्वेनाऽनुपमशोभया तिरश्चकारेति भावः ।

भाषा

सोने के घर के चौतरे पर चरण रखने वाले राजा आहवमल्लदेव के पुत्र विक्रमाङ्कदेव ने (सोने के) सुमेरु पर्वत के प्रान्त भाग की उच्च भूमि के मध्य में विराजित सूर्य को नीचा दिखाया । अर्थात् सूर्य के समान तेजस्वी विक्रमाङ्कदेव के सोने के बने घर की वेदिका पर विराजित होने से इसकी शोभा के सामने सुमेरु पर्वत के प्रान्तभाग में विराजित सूर्य की शोभा फीकी पड़ गई ।

कतिचिदपि दिनानि तत्र नीत्वा परिसरभूमिषु भूरिभिर्विलासैः ।
चरणतलनिविष्टदुष्टवर्गः पुरमवलोकयति स्म गाङ्गकुण्डम् ॥२१॥

अन्वयः

चरणतलनिविष्टदुष्टवर्गः (असौ) तत्र परिसरभूमिषु भूरिभिः विलासैः कतिचित् अपि दिनानि नीत्वा गाङ्गकुण्डं पुरम् अवलोकयति स्म ।

व्याख्या

चरणतले पादतले निविष्टा दलिता दुष्टवर्गाः शत्रुसमूहा येन स असौ

विक्रमाङ्कदेवस्तत्र काञ्चीनगरे परिसरभूमिषु नगरबहिर्भागेषु भूरिभिर्बहुविधैर्विलासैर्मनोविनोदकृत्यैः कतिचिदपि कानिचिदपि दिनान्यहानि नीत्वा व्यतीत्य गाङ्गकुण्डं पुरं राजेन्द्रचोलनिर्मापितां गाङ्गकुण्डचोलपुराख्यां चोलदेशस्थैकां राजधानीम् अवलोकयति स्म पश्यति स्म तत्र गतवानित्यर्थः ।

भाषा

विपक्षी दुष्ट राजाओं को अपने पैर तले कुचलने वाले राजपुत्र विक्रमाङ्कदेव ने काञ्ची नगरी के आस पास के प्रदेशों के विहार में कुछ दिन बिताकर राजेन्द्रचोल द्वारा बसाए हुए गाङ्गकुण्ड चोल पुर को देखा अर्थात् वहाँ गया ।

श्लोकद्वयेन गाङ्गकुण्डचोलपुरं वर्णयति कविः—

द्रविडनरपतिप्रतापभीत्या किमपि गते पयसां निधौ परस्तात् ।
यदविहितविवाहमङ्गलाया बहिरिव निर्गतमादिधाम लक्ष्म्याः ॥२२॥

अन्वयः

यत् पयसां निधौ द्रविडनरपतिप्रतापभीत्या किमपि परस्तात् गते (सति) अविहितविवाहमङ्गलायाः लक्ष्म्याः आदिधाम बहिः निर्गतम् इव ।

व्याख्या

यद्गाङ्गकुण्डचोलपुरं पयसां जलानां निधावाकरे समुद्रे द्रविडस्य नरपतिर्नृपस्तस्य प्रतापः प्रभावस्तस्माद्भीतिर्भयं तया चोलदेशनृपभयेन किमपि किञ्चिदपि परस्तात् पृष्ठभागे गते प्राप्ते सति स्वस्थानं विमुच्य किञ्चित्पृष्ठप्रदेशमपसृते सति न विहितमविहितमसम्पादितं विवाहमङ्गलं पाणिग्रहणोत्सवो यस्याः सा तस्या अपरिणीताया लक्ष्म्याः श्रिय आदिधाम प्रथमगृहं बहिर्निर्गतमिव समुद्राद्बहिरागतमिव । गाङ्गकुण्डचोलपुरस्य लक्ष्मीप्रथमगृहत्वेनोत्प्रेक्षणादपरिमितसम्पत्तिशालित्वञ्च द्योत्यते । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

जो गाङ्गकुण्डचोलपुर द्रविड देश के राजा के प्रताप के भय से (डरकर) समुद्रके कुछ पीछे सरक जाने से, अविवाहित अवस्था में समुद्र में लक्ष्मी के रहने का आदिनिवास स्थान ही मानों बाहर निकल आया था ।

गगनमुपगतेन शोभते य–न्निरुपमकाञ्चनवप्रमण्डलेन ।
सुरपुरमिव हेमशैलमध्ये विबुधविभूतिभरात्कृतप्रवेशम् ॥२३॥

अन्वयः

यत् विबुधविभूतिभरात् गगनम् उपगतेन निरुपमकाञ्चनवप्रमण्डलेन हेमशैलमध्ये कृतप्रवेशं सुरपुरम् इव शोभते ।

व्याख्या

यद्गाङ्गकुण्डचोलपुरं बिबुधानां देवानां पण्डितानां वा विभूतिभरादैश्वर्यातिशयाद्धेतोरन्यत्र भारात्—इदं साधर्म्यनिष्पादकहेतुनिरूपकं पदम् । गगनमाकाशमुपगतेन प्राप्तेन नास्ति उपमा सादृश्यं यस्य तन्निरुपममद्वितीयं यत्काञ्चनस्य सुवर्णस्य वप्रमण्डलं प्राकारपरम्परा (छड़दिवाली इति भाषायाम्) तेनाऽनुपमसुवर्णनिर्मितप्राकारपरम्पराहेतुना हेम्नः सुवर्णस्य शैलः पर्वतः सुमेरुस्तस्य मध्येऽभ्यन्तरे कृतो विहितः प्रवेशोऽभ्यन्तरस्थितिर्येन तद्विहितप्रवेशं सुराणां देवानां पुरं नगरममरावतीव शोभते विलसति । काञ्चनप्राकारान्तर्गतगाङ्गकुण्डचोलपुरस्योपरि सुमेरुपर्वतान्तर्गतसुरपुरत्वस्योत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

जो गाङ्गकुण्ड चोलपुर, विद्वानों की अधिक समृद्धि से और आकाश चुम्बि अनुपम सोने की चाहार दिवारी से मानों देवों की अधिक समृद्धि से (अर्थात् बोझे से स्वर्ग से नीचे आई हुई) और (ऊंचे) सोने के पर्वत सुमेरु के बीच में प्रविष्ट, अमरावती नगरी के समान शोभित होता था ।

विघटितपरिपन्थिसैन्यसार्थः पदमधिरोप्य स तत्र चोलसूनुम् ।
नयनचुलुकलुण्ठ्यमानकान्तिर्द्रविडवधूभिरुवास मासमात्रम् ॥२४॥

अन्वयः

विघटितपरिपन्थिसैन्यसार्थः सः चोलसूनुं पदम् अधिरोप्य तत्र द्रविडवधूभिः नयनचुलुकलुण्ठ्यमानकान्तिः सन् मासमात्रम् उवास ।

व्याख्या

विघटिताः शकलीकृताः परिपन्थिनां शत्रूणां सैन्यसार्थाः सैनिकसमूहा येन

सः शकलीकृतविपक्षिसैनिकसमूहः स विक्रमाङ्कदेवश्चोलसूनुं चोलदेशाधिराजपुत्र-मधिराजराजेन्द्रनामकं पदं राज्यसिंहासनमधिरोप्य तत्र प्रतिष्ठाप्य तत्र गाङ्ग-कुण्डचोलपुरे द्रविडवधूभिर्द्रविडाङ्गनाभिर्नयनानि द्रविडाङ्गनानेत्राण्येव चुलुकान्य-ञ्जलयः—विक्रमाङ्कदेवदर्शनकौतुकानन्दातिशयेन विकासितत्वाच्चुलुकत्वारोपः। तैर्नयनचुलुकैर्लुण्ठ्यमाना ह्रियमाणा पीयमाना वा कान्तिः शरीरलावण्यामृतं यस्य स नेत्राञ्जलिपुटगृह्यमाणकान्तिः सन् मासमात्रमेकमासपर्यन्तमुवास निवासं विदधौ। यथात्युत्कटपिपासया बाध्यमाना जलपात्रादिकमनपेक्ष्याऽविलम्बं चुलुकेनैवाऽधिकं जलमग्रे मिलिष्यति न वेति धिया परिपीय पूर्णां तृप्तिं भजन्ते तथैव प्रमदा रामणीयकं नृपरूपमग्रे दृष्टिगोचरं भविष्यति न वेति धियाऽतिकौतू-हलेनाऽहमहमिकया स्वनयनैर्नृपवपुर्लावण्यं चिरं पश्यन्त्योऽपरिमितां मानसतृप्तिं वहन्ति स्मेति भावः।

भाषा

प्रतिपक्षी राजाओं के सेनासमूहों को नष्ट करने वाले विक्रमाङ्कदेव ने चोलराज के राजकुमार अधिराज राजेन्द्र को राजसिंहासन पर बैठाकर द्रविडदेश की ललनाओं को नेत्ररूपी अंजुलियों से अपने रूपलावण्यामृत का पान कराते हुए केवल एकमास तक गाङ्गकुण्ड चोलपुर में निवास किया। अर्थात् उसके अनुपम रूप से आकर्षित होकर आगे फिर ऐसा रूप देखने का अवसर आवेगा या नहीं इस भावना से द्रविडाङ्गनाएँ उसे आँखे गड़ा कर चिरकाल तक देखती रहीं।

विघटनमटवीधनुर्धराणां विषमपथेषु विधाय लीलयैव।
पुनरपि स जगाम तुङ्गभद्रां विरचितवन्दनमालिकां तरङ्गैः ॥२५॥

अन्वयः

सः विषमपथेषु अटवीधनुर्धराणां लीलया एव विघटनं विधाय तरङ्गैः विरचितवन्दनमालिकां तुङ्गभद्रां पुनः अपि जगाम।

व्याख्या

स विक्रमाङ्कदेवो विषमा दुर्गमाः पन्थानो मार्गा इति विषमपथास्तेषु दुर्गम-मार्गेष्वटव्या वनस्य 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। धनुर्धरा धानुष्का भिल्लकिरातादयस्तेषां धनुर्विद्याविशारदानां वनेचराणां लीलयैव

क्रीडयैव विघटनं विशृङ्खलनं विधाय सम्पाद्य तरङ्गैर्वीचिभिर्विरचिता राजकुमारस्य स्वागतसंस्कारार्थं सम्यक् संघटिता (माङ्गलिकी) वन्दनमालिका तोरणस्रक् (बन्दनवार इति भाषायां प्रसिद्धा ।) यया सा तां तुङ्गभद्रां तन्नाम्नीं नदीं पुनरपि मुहुर्जगाम ययौ । तरङ्गाणां वन्दनमालिकाभीरूपणाद्रूपकम् ।

भाषा

वह विक्रमाङ्कदेव, दुर्गम मार्गों में आक्रमण करने वाले कोलभिल्लादि जंगली धनुर्धारियों को सहज में भगाकर, अपने स्वागत में, लहरों से बन्दन वार बांधने वाली तुङ्गभद्रा नदी पर फिर से गया ।

अथ कतिपुचिदेव दैवयोगात् परिगलितेषु दिनेषु चोलसूनोः ।
श्रियमहरत राजिगाभिधानः प्रकृतिविरोधहतस्य वेङ्गिनाथः ॥२६॥

अन्वयः

अथ कतिषुचित् एव दिनेषु परिगलितेषु दैवयोगात् राजिगाभिधानः वेङ्गिनाथः प्रकृतिविरोधहतस्य चोलसूनोः श्रियम् अहरत ।

व्याख्या

अथाऽनन्तरं कतिषुचिदेव कियत्स्वेव दिनेषु दिवसेषु परिगलितेषु व्यतीतेषु सत्सु दैवयोगाद्भाग्यवशात् राजिग इत्यभिधानं नाम 'आख्याह्वे ह्यभिधानञ्च नामधेयञ्च नाम च' इत्यमरः । यस्य स राजिगाख्यो वेङ्गिनाथो वेङ्गिदेशाधिपती राजेन्द्रचोलः प्रकृतीनां प्रजानां प्रकृतेः स्वभावस्य वा विरोधेन प्रातिकूल्येन वैरेण वा हतस्य मारितस्य चोलसूनोश्चोलराजपुत्रस्याऽधिराजराजेन्द्रस्य श्रियं लक्ष्मीं राज्यमित्यर्थः । अहरत गृहीतवान् ।

भाषा

इसके अनन्तर कुछ ही दिन बीतने पर राजिग उपनामक वेङ्गिदेश के राजा राजेन्द्र चोल ने प्रजा के विरोध मे या स्वाभाविक वैर से चोल के राजपुत्र अधिराज राजेन्द्र को मारकर उसका राज्य छीन लिया ।

कुटिलमतिरसौ विशङ्कमानः पुनरमुमेव पराभवप्रगल्भम् ।
प्रगुणमकृत पृष्ठकोपहेतोः प्रकृतिविरोधिनमस्य सोमदेवम् ॥२७॥

अन्वयः

कुटिलमतिः असौ पराभवप्रगल्भम् अमुम् एव पुनः विशङ्कमानः (सन्) पृष्ठकोपहेतोः अस्य प्रकृतिविरोधिनं सोमदेवं प्रगुणम् अकृत ।

व्याख्या

कुटिला कुटिलनीतियुक्ता मतिर्बुद्धिः 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । यस्य सः कुटिलमतिरसौ वेङ्गिनाथो राजिगः पराभवे शत्रूणां पराजयकरणे प्रगल्भं निष्णातममुं विक्रमाङ्कदेवमेव पुनः शश्वद्विशङ्कमान आतङ्कहेतुं मन्यमानः सन् पृष्ठेन पृष्ठभागेन कोप आक्रमणमेव हेतुः कारणं तस्माद्विक्रमाङ्कदेवस्य पृष्ठभागादाक्रमणार्थं छलेन विक्रमाङ्कदेवं विजेतुमित्यर्थः । अस्य विक्रमाङ्कदेवस्य प्रकृत्या स्वभावेनैव विरोधिनं प्रतिकूलं सोमदेवं विक्रमाङ्कदेवज्येष्ठभ्रातरं प्रगुणं समुद्यतमकृत कृतवान् ।

भाषा

कुटिलनीति में कुशल राजिग-वेङ्गिनाथ-राजेन्द्र-चोल ने, शत्रुओं को परास्त करने में कुशल विक्रमाङ्कदेव की फिर से काञ्ची में आने की आशंका से, विक्रमाङ्कदेव के स्वाभाविक विरोधी उसके बड़े भाई सोमदेव को, विक्रमाङ्कदेव पर पीछे से आक्रमण करने के लिये तैयार कर लिया ।

सुभटशतनिशातखड्गधारा-विहरणसव्रणपादपल्लवेव ।
अपि नयनिपुणेषु नो भरेण क्षिपति पदं किमुत प्रमादिषु श्रीः ॥२८॥

अन्वयः

श्रीः सुभटशतनिशातखड्गधाराविहरणसव्रणपादपल्लवा इव नयनिपुणेषु अपि भरेण पदं नो क्षिपति प्रमादिषु किमुत ।

व्याख्या

श्री राज्यलक्ष्मीः सुभटानां सुयोधानां शतं सुभटशतं तस्य निशातास्तीक्ष्णा खड्गानां करवालानां धारा अग्राणि तासु विहरणेन सविलाससंचरणेन सव्रणौ सक्षतौ पादपल्लवौ चरणकिसलये यस्याः सा इव नये नीतौ निपुणाः प्रगल्भास्तेषु नीतिप्रगल्भेष्वपि भरेण शरीरभारेण सामस्त्येन सर्वतोभावेनेत्यर्थः । पदं चरणं नो क्षिपति न निदधाति । सक्षतपादपल्लवस्य व्यथाभयात । दृश्यते च लोके

सव्रणचरणा भूमौ शरीरस्य सम्पूर्णभारेण सुतरां पदं न निदधत इति । प्रमादिषु प्रमादप्रसक्तेष्वनवहितेषु जनेषु तु सुखेन पदनिक्षेपणं किमुत वक्तव्यम् । अर्थात् प्रमादिषु नीतिरहितेषु तु लक्ष्म्याः प्रेमप्रवणत्वमत्यन्तमसम्भाव्यमितिभावः । अत्र पादपल्लवे खड्गधारा-विरहण-जन्यव्रण-सहितत्वस्योत्कटैककोटिकसंभावना-दुत्प्रेक्षालङ्कारः ।

भाषा

सैकड़ों योद्धाओं की तीखी खड्गधाराओं पर घूमने से मानों जिसके चरणों में घाव हो गए हैं ऐसी लक्ष्मी, नीति युक्त कार्य करने वाले राजाओं के पास भी शरीर का पूर्ण बोझा देकर अर्थात् सर्वतो भावेन अपना पद नहीं रखती अर्थात् स्थान ग्रहण नहीं करती। अनीति युक्त कार्य करने वाले प्रमादियों के पास लक्ष्मी के निवास के सम्बन्ध में कहना ही क्या है। अर्थात् प्रमादियों के पास तो लक्ष्मी आ ही नहीं सकती। जिसके पावों में घाव रहता है वह स्वभाव से ही अपने चुटीले पांव पर शरीर का कुल बोझा देकर कभी नहीं चलता है। जख्मी पाँव वाली लक्ष्मी इसी से नीति निपुणों के पास भी अपने पांव पर शरीर का पूरा बोझा देकर नहीं रहती अर्थात् सर्वतो भावेन नहीं रहती।

अवतरति मतिः कुपार्थिवानां सुकृतविपर्ययतः कुतोऽपि तादृक् ।
झटिति विघटते यया नृपश्रीस्तटगिरिसंघटितेव नौः पयोधेः ॥२६॥

अन्वयः

कुपार्थिवानां सुकृतविपर्ययतः कुतः अपि तादृक् मतिः अवतरति यया नृपश्रीः पयोधेः तटगिरिसंघटिता नौः इव झटिति विघटते।

व्याख्या

कुपार्थिवानां निन्द्यचरित्राणां नृपाणां सुकृतस्य पुण्यकर्मणो विपर्ययो दुष्कृतं तस्मात्पापादित्यर्थः। कुतोऽपि कस्मादपि वचोऽविषयात् तादृक् तादृशी विचित्रा मतिर्बुद्धिरवतरति संजायते यया दुर्बुद्ध्या नृपश्री राजलक्ष्मीः पयोधेः समुद्रस्य तटे तीरे गिरिः पर्वतस्तेन संघटिता संघट्टमासादिता नौरिव नौकेव झटिति द्राग् विघटते विपन्ना भवति समुद्रे मज्जति इति भावः। उपमालङ्कारः।

भाषा

दुश्चरित्र राजाओं के पाप से उनमें न जाने कहाँ से ऐसी बुद्धि अर्थात् कुबुद्धि आ जाती है जिससे राजलक्ष्मी, समुद्र के किनारे के पर्वतों से टकराई हुई नाव के समान शीघ्र नष्ट हो जाती है।

व्रतमिदमिह शस्त्रदेवतानां दृढमधुनापि कलौ निरङ्कुशेऽपि।
अविनयपथवर्तिनं यदेताः प्रबलमपि प्रधनेषु वञ्चयन्ति ॥३०॥

अन्वयः

इह निरङ्कुशे अपि कलौ शस्त्रदेवतानाम् इदं दृढं व्रतं यत् एताः अधुना अपि अविनयपथवर्तिनं प्रबलम् अपि प्रधनेषु वञ्चयन्ति।

व्याख्या

इहाऽस्मिन् जगति निरङ्कुशेऽपि निष्प्रतिबन्धेऽपि कलौ कलियुगे शस्त्राणामायुधानां देवतास्तदधिष्ठातृदेवतास्तेषामधुनाऽपि साम्प्रतमपीदमेतद् दृढं निश्चितं व्रतं नियमो यद्यस्मात्कारणादेताः शस्त्राधिष्ठातृदेवता अविनयस्यौद्धत्यस्य पन्था मार्गोऽविनयपथस्तस्मिन् वर्तत इत्यविनयपथवर्ती तं कुमार्गगामिनं प्रबलमपि प्रकृष्टबलवन्तं शूरमपि प्रधनेषु युद्धेषु 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्' इत्यमरः। वञ्चयन्ति नाऽनुगृह्णन्ति तत्समीहितं नोपनयन्ति। काव्यलिङ्गमलङ्कारः।

भाषा

इस जगत् में इस निरङ्कुश कलियुग में भी, शस्त्रों की अधिष्ठातृ देवताओं का सम्प्रति भी यह निश्चित नियम है कि वे अनीतिमार्गारूढ बलवान् से बलवान् को भी युद्धों में धोखा देती हैं। अर्थात् उनका साथ नहीं देती।

इति मुषितधियः श्रिया प्रयान्त्या रभसवशादविचिन्त्य दग्धभूपाः।
बलभरबहुमानतः पतङ्ग-व्रतमुपयान्ति परप्रतापदीपे ॥३१॥

अन्वयः

इति प्रयान्त्या श्रिया मुषितधियः दग्धभूपाः रभसवशात् अविचिन्त्य बलभरबहुमानतः परप्रतापदीपे पतङ्गव्रतम् उपयान्ति।

व्याख्या

इति पूर्वोक्तापथगामित्वाद्धेतोः प्रयान्त्या नृपमेकं परित्यज्याऽन्यत्र गच्छन्त्या श्रिया राजलक्ष्म्या मुषिताऽपहृता धीः सदसद्विवेकिनी बुद्धिर्येषां तेऽपहृतसन्मतयो दग्धभूपा दुष्टराजानो रभसवशादविमृश्यकारित्वादविचिन्त्याऽज्ञात्वैव बलस्य सैन्यस्य भरोऽतिशयस्तस्य बहुमानोऽतिदर्पस्तस्मात् स्वसैन्याधिक्यातिदर्पतः परेषां शत्रूणां प्रतापस्तेज एव दीपस्तस्मिन् पतङ्गानां शलभकीटानां व्रतं गतिं शलभत्वमित्यर्थः । उपयान्ति प्राप्नुवन्ति । शलभवत्परप्रतापदीपशिखायां भस्मसाद्भवन्तीति भावः । पतङ्गानां व्रतमिव व्रतं प्राप्नुवन्तीत्यर्थपरामर्शात् पदार्थनिदर्शनालङ्कारः ।

भाषा

अनीतिमार्ग पर आरूढ़ होने से, उन राजाओं को छोड़ कर अन्यत्र जाने वाली राजलक्ष्मी के द्वारा अपहृत सुबुद्धि वाले दुष्ट राजा लोग, बिना बिचारे शीघ्रता से कार्य करने के कारण, बड़ी पलटन होने के अधिक गर्व से अनजान में ही शत्रु के प्रताप रूपी दीपक में फतिङ्गों के समान जलकर भस्म हो जाते हैं ।

सकलमपि विदन्ति हन्तशून्यं क्षितिपतयः प्रतिहारवारणाभिः ।
क्षणमपि परलोकचिन्तनाय प्रकृतिजडा यदमी न संरभन्ते ॥३२॥

अन्वयः

क्षितिपतयः प्रतिहारवारणाभिः सकलम् अपि शून्यं विदन्ति हन्त । यत् प्रकृतिजडाः अमी परलोकचिन्तनाय क्षणम् अपि न संरभन्ते ।

व्याख्या

क्षितिपतयो राजानः प्रतिहारैर्द्वारपालैर्वारणाः सर्वजनप्रवेशनिषेधकरणानि तैर्द्वारपालकृतसकललोकापसारणैः सकलमपि सम्पूर्णमपि जगत् शून्यं स्वं विहायान्यनियन्तृरहितं विदन्ति जानन्ति हन्तेति खेदे अथवा सर्वशून्यमिति बौद्धमतमवलम्बते । यद्यस्मात्कारणात् प्रकृत्या स्वभावेन जडा मूर्खा अमी भूपाः परलोकस्य मर्त्यलोकं विहायाऽन्यलोकस्येहकृतकर्मफलभोगाश्रयभूतस्य जन्मान्तरस्य वा चिन्तनमस्तित्वविचारस्तस्मै परलोकचिन्तनाय क्षणमपि स्वल्पकालमपि न संरभन्ते न चेष्टां विदधति । बौद्धा अपि पुनर्जन्म नोररीकुर्वन्ति । पूर्ववाक्या-

र्थेऽपरवाक्यार्थस्य हेतुत्वप्रदर्शनात् काव्यलिङ्गमलङ्कारः। अथवा पूर्वोत्तर वाक्यार्थयोः परस्परं व्याप्त्याऽनुमानालङ्कारः।

भाषा

दुःख की बात है कि ये दुष्ट राजा लोग द्वारपालों के रोकने से भीतर किसी का प्रवेश न होने के कारण भीतर एकान्त होने से सम्पूर्ण जगत् को शून्य अर्थात् अपने को छोड़ कर दूसरा कोई भी इस जगत् का नियन्ता नहीं है—ऐसा समझने लगते हैं। क्योंकि ये स्वाभाविक मूर्ख राजागण इस लोक को छोड़ कर परलोक में जाने पर उनकी क्या दशा होगी इसका क्षण भर भी विचार नहीं करते। अथवा 'सर्वं शून्यं' मानकर बौद्ध हो जाते हैं इसीलिये पुनर्जन्म नही मानते।

विदधति कुधियोऽत्र देवबुद्धिं स्फटिकशिलाघटनासु वर्तुलासु।
इति मनसि निधाय दग्धभूपास्त्रिनयनलिङ्गमपि स्पृशंति मिथ्या॥३३॥

अन्वयः

दग्धभूपाः, अत्र कुधियः वर्तुलासु स्फटिकशिलाघटनासु देवबुद्धिं विदधति इति मनसि निधाय त्रिनयनलिङ्गम् अपि मिथ्या स्पृशन्ति।

व्याख्या

दग्धभूपा दुष्टनृपा, अत्राऽस्मिन् संसारे कुधियो निन्दितबुद्धयो मूर्खा इत्यर्थः। वर्तुलासु वर्तुलाकारासु स्फटिकस्य शिलाः पाषाणास्ताभिर्घटना निर्माणं यासां तास्तासु स्फटिकनिर्मितशङ्करलिङ्गमूर्तिषु देवबुद्धिं देवत्वज्ञानं तदास्थां वा विदधति कुर्वन्ति। जगति मूर्खा एव स्फटिकनिर्मितदेवमूर्तिषु देवबुद्धिं धारयन्तीति भावः। इतीत्थं मनसि हृदये निधाय निश्चित्य त्रीणि नयनानि यस्य स त्रिनयनस्त्रिनेत्रः शिवस्तस्य लिङ्गं लिङ्गरूपां मूर्तिं मिथ्या मिथ्यात्वरूपेण स्पृशन्ति स्पर्शं कुर्वन्ति गृण्हन्तीत्यर्थः।

भाषा

इस संसार में, मूर्ख लोग, स्फटिक की गोल शङ्कर की लिङ्ग मूर्तियों पर देवत्व बुद्धि रखते हैं, ऐसा मन में निश्चय कर, दुष्ट राजा लोग शिव के ज्योतिर्लिङ्ग को भी मिथ्या समझते हैं।

अविरततरुणीसहस्रमध्य-स्थितिविगलत्पुरुषव्रता इवैते ।
प्रतिपदमतिकातराः क्षितीशाः परिकलयन्ति भयं समन्ततोऽपि ॥३४॥

अन्वयः

एते क्षितीशाः अविरततरुणीसहस्रमध्यस्थितिविगलत्पुरुषव्रताः इव प्रतिपदम् अतिकातराः (सन्तः) समन्ततः अपि भयं परिकलयन्ति ।

व्याख्या

एते इमे दुष्टाः क्षितीशा राजानोऽविरतं सन्ततं तरुणीनां युवतीनां सहस्रं तस्य मध्ये या स्थितिर्निवासस्तया विगलत्परिपतत्पुरुषाणां नराणां व्रतं धर्मः पौरुषमित्यर्थः । येषां ते निरन्तरयुवतीसहस्रमध्यस्थित्या नश्यत्पौरुषा इव प्रतिपदं प्रतिक्षणमतिकातरा अत्यन्तसंभीतास्सन्तः समन्ततोऽपि परितोऽपि भयं भीतिं परिकलयन्ति परिपश्यन्ति विचारयन्तीत्यर्थः । अत्र तरुणीमध्यस्थितेर्नष्ट-पुरुषबले हेतुत्वेन संभावनादुत्प्रेक्षालङ्कारः ।

भाषा

सदैव हजारों युवतियों के बीच में रहने से मानों जिनका पुरुषत्व ही नष्ट हो गया है, ऐसे ये दुष्ट राजा लोग, पद पद पर अत्यन्त कायर होकर, चारों ओर भय ही देखते हैं। अर्थात् उनको चारों ओर से भय की ही प्रतीति होती है।

अभिसरणपरा सदा वराकी समरमहाध्वसु रक्तपङ्किलेषु ।
हृदि धरणिभुजामियं नृपश्रीर्निहितपदैव कलङ्कमातनोति ॥३५॥

अन्वयः

रक्तपङ्किलेषु समरमहाध्वसु सदा अभिसरणपरा इयं वराकी नृपश्रीः धरणिभुजां हृदि निहितपदा एव कलङ्कम् आतनोति ।

व्याख्या

रक्तेन रुधिरेण पङ्किलाः कर्दमयुक्तास्तेषु समरा युद्धस्थलान्येव महाध्वानो विषममार्गास्तेषु सदा निरन्तरमभिसरणं यानं तस्मिन्पराऽऽसक्ता अभिसारिका वा रक्तपङ्किलयुद्धेषु सदा विहरमाणेत्यर्थः । इयमेषा वराकी असन्तुष्टा दुराचारिणी वा नृपश्री राजलक्ष्मी धरणिभुजां महीभुजां दुष्टानां राज्ञामित्यर्थः । हृदि

मनसि निहितं स्थापितं चरणं यया सा निहितपदेव राज्ञां मनसि तस्या विचार-मात्रेणैवेति भावः। कलङ्कं पङ्कचिह्नं 'कलङ्काङ्कौ लाच्छनञ्च चिह्नं लक्ष्म च लक्षणम्' इत्यमरः। पक्षे चरित्रे लाच्छनमातनोति विस्तारयति। यथा कस्याश्चिद्धूलिधूसरितपदायाः स्त्रियः पादस्य संयोगेन तत्स्थानं मलिनं भवति तथैव राजलक्ष्म्याः मनसि विचारमात्रेणैव दुष्टानां राज्ञां हृदयं कलुषितं भवति किं पुनस्तल्लाभादिति भावः। अथवा शौर्यैकप्राप्याया राजलक्ष्म्या स्त्रैणनृप-मनसि तस्याः संप्राप्तिविचारमात्रेणैव तेषां हृदयं कलङ्कितं भवतीति भावः। अथवा दुराचारिणीसम्बन्धान्नृपा अपि दुर्यशसो भवन्तीति भावः।

भाषा

खून के कीचड़ से भरे संग्राम रूपी विषम मार्गों पर घूमने में आसक्त, असन्तुष्ट राजलक्ष्मी या अभिसारिका रूपी दुराचारिणी राजलक्ष्मी दुष्ट राजाओं के हृदय में पैर रखते ही उसको कलङ्कित कर देती है। अर्थात् शौर्यमात्र से प्राप्त हो सकने वाली राजलक्ष्मी, स्त्रैण राजाओं के उसको प्राप्त करने की हार्दिक इच्छा ही से उनके हृदयों को कलुषित कर देती है। अथवा दुराचारिणी अभिसारिका रूपी राजलक्ष्मी के विचार से ही दुष्ट राजा कलङ्कित हो जाते हैं।

गुणिनमगुणिनं वितर्कयन्ती स्वजनममित्रमनाप्तमाप्तवर्गम्।
वितरति मतिविप्लवं नृपाणामियमुपसर्पणमात्रकेण लक्ष्मीः ॥३६॥

अन्वयः

इयं लक्ष्मीः उपसर्पणमात्रकेण गुणिनम् अगुणिनं स्वजनम् अमित्रम् आप्तवर्गम् अनाप्तं वितर्कयन्ती (सती) नृपाणां मतिविप्लवं वितरति।

व्याख्या

इयमेषा लक्ष्मी राज्यश्री उपसर्पणमेव समीपगमनमेवेत्युपसर्पणमात्रमुप सर्पणमात्रमेवोपसर्पणमात्रकं तेन सामीप्यप्राप्त्यैव गुणिनं गुणवन्तं पुरुषमगुणिनं गुणशून्यं स्वजनमात्मीयजनं मित्रमित्यर्थः। अमित्रं शत्रुमाप्तवर्गमाप्तानां विश्वासपात्राणां वर्गं समूहमनाप्तं सन्देहस्थानं वितर्कयन्तीविचिन्तयन्ती (प्रयोज-कार्थे णिच्।) नृपाणां राज्ञां मतिविप्लवं बुद्धिविभ्रमं वितरति प्रयच्छति। राजलक्ष्मीसंसर्गादेव नृपाणां मतिविभ्रमो भवतीति भावः।

भाषा

यह राजलक्ष्मी पास में आते ही राजाओं में गुणी को गुणरहित, मित्र को शत्रु और विश्वासपात्रों को अविश्वासपात्र समझने का भाव उत्पन्न कर उनकी बुद्धि में भ्रम उत्पन्न कर देती है।

विधिलिखितमिदं कुटुम्बमध्ये नृपतिपदं समुपैति कश्चिदेव।
इति हृदि न विचारयन्ति भूपाः कुलमपि निर्दलयन्ति राज्यलुब्धाः ३७

अन्वयः

भूपाः, इदं विधिलिखितं (यत्) कुटुम्बमध्ये कश्चित् एव नृपतिपदं समुपैति, इति हृदि न विचारयन्ति (किन्तु) राज्यलुब्धाः (सन्तः) कुलम् अपि निर्दलयन्ति।

व्याख्या

भूपा राजान, इदं वक्ष्यमाणं वस्तु विधिना ब्रह्मणा लिखितं लेखद्वारा संघटितं, यतो लिखितमेव निश्चितं भवति न तु भाषितम्। यत् कुटुम्बमध्ये कश्चिदेव भाग्यशाली जनो नृणां पतिर्नृपतिः स्वामी तस्य पदं स्थानं राज्यपदवीं समुपैति संप्राप्नोतीति विषयं हृदि मानसे न विचारयन्ति न परिशीलयन्ति किन्तु राज्ये राजपदे लुब्धा लोलुपास्सन्तः कुलमपि स्ववंशमपि निर्दलयन्ति विनाशयन्ति। स्वायोग्यतया स्वकीर्तिमन्तमपि वंशमपकीर्त्या कलङ्कयन्तीति भावः।

भाषा

राजा लोग यह नहीं विचार करते कि यह ब्रह्मा का लेख है कि कुल में (सब नहीं, किन्तु) कोई ही राजपद को प्राप्त करने योग्य होता है। किन्तु राज्य के लोभी बनकर ये राजा लोग अपने कुल को भी कलङ्कित कर डालते हैं।

अनुचितममुना किमग्रजस्य व्यवसितमुन्नतचेतसा यदस्मिन्।
अपकरणधिया चकार सन्धिं कुलरिपुणा सह चोलराजिगेन ॥३८॥

अन्वयः

उन्नतचेतसा अमुना अग्रजस्य अनुचितं किं व्यवसितं यत् (सः) अस्मिन् अपकरणधिया कुलरिपुणा चोलराजिगेन सह सन्धिं चकार।

व्याख्या

उन्नतं समुदारं चेतश्चित्तं 'चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। यस्य स उन्नतचेतास्तेनाऽमुना विक्रमाङ्कदेवेनाऽग्रजस्य ज्येष्ठ-भ्रातुः सोमदेवस्य किमनुचितं प्रतिकूलं व्यवसितं कृतं यद्यस्मात्कारणादस्मिन्विक्रमाङ्कदेवेऽपकरणस्याऽपकारस्य धीर्बुद्धिस्तया कुलरिपुणा वंशपरम्परागत-शत्रुणा चोलराजिगेन वेङ्गिचोलदेशाधिपतिराजेन्द्रेण सह साकं सन्धिं गुप्त-मैत्रीं चकार सम्पादितवान्।

भाषा

उदारचित्त विक्रमाङ्क देव ने अपने बड़े भाई सोमदेव का क्या बिगाड़ा था जो इसने, विक्रमाङ्क देव का अपकार करने की इच्छा से चालुक्य वंश के शत्रु वेङ्गिचोलदेशाधिपति राजेन्द्र से सन्धि कर ली।

अथ नृपतनये कृतप्रयाणे गलितनयस्य वधाय राजिगस्य।
त्वरिततरमुपागतोऽस्य पृष्ठे सह सकलेन बलेन सोमदेवः ॥३६॥

अन्वयः

अथ नृपतनये गलितनयस्य राजिगस्य वधाय कृतप्रयाणे (सति) सोमदेवः सकलेन बलेन सह अस्य पृष्ठे त्वरिततरम् उपागतः।

व्याख्या

अथाऽनन्तरं नृपयाऽऽहवमल्लदेवस्य तनये पुत्रे विक्रमाङ्कदेवे गलित औचित्य-मार्गात्परिभ्रष्टो नयो नीतिमार्गो यस्य स तस्य राजिगस्य वेङ्गि-राजेन्द्रस्य वधाय नाशाय कृतं विहितं प्रयाणं प्रस्थानं येन स तस्मिन्, प्रस्थिते सति सोमदेवो ज्येष्ठभ्राता सकलेन सम्पूर्णेन बलेन सैन्येन 'अनीकिनी बलं सैन्यं चक्रं चानीक-मस्त्रियाम्' इत्यमरः। सह साकमस्य विक्रमाङ्कदेवस्य पृष्ठे पृष्ठभागे त्वरिततरं द्रुततरमुपागतस्संप्राप्तः।

भाषा

बाद में, राजपुत्र विक्रमाङ्क देव के, अनुचितनीति मार्ग पर आरूढ वेङ्गि-राजेन्द्र का वध करने के लिये रवाने होने पर, सोमदेव अपनी सब पलटनों के साथ इसके पीछे जल्दी से आ गया।

अथ षड्भिः पद्यैः सोमदेवहस्तिनो वर्णयति कविः—

अनुसरदसितातपत्रमैत्रीं मधुकरमण्डलमाससाद येषाम् ।
अतिविपुलकपोलदानपङ्क-प्रभवसरोरुहिणीदलानुकारम् ॥४०॥

अन्वयः

असितातपत्रमैत्रीम् अनुसरत् मधुकरमण्डलं येषाम् अतिविपुलकपोल-दानपङ्कप्रभवसरोरुहिणीदलानुकारम् आससाद ।

व्याख्या

असितस्य कृष्णवर्णस्याऽऽतपत्रस्य छत्रस्य मैत्रीं सादृश्यं तामनुसरत्संधारयन्म-धुकराणां भ्रमराणां मण्डलं समूहो, येषां सोमदेव गजानामतिविपुलेष्वत्यन्त-प्रशस्तेषु कपोलेषु गण्डस्थलेषु दानं मद एव पङ्कः कर्दमः स एव प्रभव उत्पत्तिस्थानं यासां तासां सरोरुहिणीनां कमलिनीनां दलानां पत्राणां 'पत्रं पलाशं छदनं दलं पर्ण छदः पुमान्' इत्यमरः । अनुकारं साम्यमाससाद भेजेऽनुप्रापेत्यर्थः ।

भाषा

काले रंग के छत्र के समान कृष्णवर्ण भौरों के समूह, सोमदेव के हाथियों के अति विशाल गण्डस्थलों पर के मद रूपी कीचड़ में उत्पन्न नीले रंग की कमलिनी के पत्तों की समानता प्राप्त कर रहे थे । अर्थात् नील कमलिनी के पत्तों के ऐसे शोभित होते थे ।

अगणितसृणिभिः प्रधावितैर्यैः कुलगिरयः परिघट्टितास्तटेषु ।
मुमुचुरिव मुखैरजस्रमस्रं विगलितधातुतरङ्गिणीमिषेण ॥४१॥

अन्वयः

अगणितसृणिभिः प्रधावितैः यैः तटेषु परिघट्टिताः कुलगिरयः मुखैः विगलितधातुतरङ्गिणीमिषेण अजस्रम् अस्रं मुमुचुः इव ।

व्याख्या

अगणिता उपेक्षिताः सृणयोऽङ्कुशा यैस्ते तैरङ्कुशनिक्षेपाऽनियन्त्रितैः प्रधावितैस्तीक्ष्णवेगेन संचलद्भिर्यैर्गजैस्तटेषु प्रान्तभागेषु परिघट्टिताः संघट्टं प्रापिताः कुलगिरयः कुलपर्वताः 'महेन्द्रो मलयः सह्यः शक्तिमानक्षपर्वतः । विन्ध्यश्च

पारियात्रश्च सप्तैते कुलपर्वताः' । मुखैरुर्ध्वभागैर्विगलिता स्रवन्ती धातुतरङ्गिणी गैरिकादिधातुनदी तस्या मिषेण व्याजेनाऽजस्त्रं निरन्तरमस्त्रं रुधिरं 'रुधिरेऽसृक्लोहितास्त्ररक्तक्षतजशोणितम्' इत्यमरः । मुमुचुरिव संतत्यजुरिव ववमुरिवेत्यर्थः । गजसंघट्टनात्ताडिताः कुलपर्वता उपरिष्टात्पतद्गैरिकादिरक्तधातुनदीमिषेण मुखैरस्त्रं निरन्तरं ववमुरिवेति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

अङ्कुश की परवाह न कर, वेग से दौड़ने वाले इन हाथियों से, तट भाग में टक्कर खाए हुए, अत एव चुटीले महेन्द्रादि कुलपर्वत, ऊपर से बहने वाली लाल रंग की गेरू आदि धातुओं की नदी के बहाने से मानों मुखों से लगातार खून की कय कर रहे थे ।

निजदशनयुगैकबद्धवासां श्रियमिव कर्तुमुपोढकौतुका ये ।
स्मरणशरणपङ्कजानि चक्रुः सततममर्षपुरःसराः सरांसि ॥४२॥

अन्वयः

श्रियं निजदशनयुगैकबद्धवासां कर्तुम् इव उपोढकौतुकाः अमर्षपुरस्सराः ये सरांसि सततं स्मरणशरणपङ्कजानि चक्रुः ।

व्याख्या

श्रियं लक्ष्मीं निजं स्वीयं यद्दशनयोर्दन्तयोर्युगं युगलमेवैकं केवलं तस्मिन् बद्धो दृढतया कृतो वासः संस्थितिर्यया सा तां कर्तुमिव विधातुमिवोपोढं संजातं कौतुकं कुतूहलं येषां ते 'कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम्' इत्यमरः । अमर्षः क्रोधः पुरस्सरो मुख्यो येषां ते ये सोमदेवनृपस्य गजाः सरांसि तडागान् सततं निरन्तरं स्मरणं स्मृतिरेव शरणं रक्षास्थानं येषां तानि स्मृतिशरणानि स्मृतिगोचराणि न तु लोके प्रत्यक्षविषयाणि पङ्कजानि कमलानि येषु तानि स्मृतिगोचरकमलानि पद्मरहितानीत्यर्थः । चक्रुर्विदधुः । हस्तिनां दन्तेषु श्रियः स्थानं प्रसिद्धम् । तदुत्पत्तिमुत्प्रेक्षते कविः । यत्सरोवरगतलक्ष्मी-निवासस्थानकमलसमूहविनाशेन स्वदन्तेषु स्थिरं लक्ष्मीनिवासस्थानं ते चक्रुरिति भावः ।

भाषा

मानों लक्ष्मी को केवल अपने दोनों दातों की ही निवासिनी बनाने के ध्येय से अत्यन्त उत्सुक तथा क्रोध से भरे सोमदेव के हाथियों ने तलावों को स्मृतिमात्र

में आने योग्य कमल वाले बनादिया अर्थात् लक्ष्मी के निवास स्थान कमलों को नष्ट कर दिया जिससे उनके दातों में ही लक्ष्मी वास करे ।

श्रवणमधुरविस्फुरद्ध्वनीनां व्यधुरुपकारधियेव षट्पदानाम् ।
मदसलिलमुदारसौरभं ये विटपिविधूननपातिभिः प्रसूनैः ॥४३॥

अन्वयः

ये श्रवणमधुरविस्फुरद्ध्वनीनां षट्पदानाम् उपकारधिया इव विटपिविधूननपातिभिः प्रसूनैः मदसलिलम् उदारसौरभं व्यधुः ।

व्याख्या

ये सोमदेवगजाः श्रवणयोः कर्णयोर्मधुरः सुश्राव्यः कोमल इत्यर्थः । विस्फुरद्विलसद् ध्वनिः शब्दो येषां ते तेषां श्रवणमधुरविलसच्छब्दानां षट्पदानां भ्रमराणां 'षट्पदभ्रमरालयः' इत्यमरः । उपकारधिया हितसम्पादनबुद्ध्येव विटपिनां वृक्षाणां विधूननेनाऽऽन्दोलनेन पातिभिरधःपतनशीलैः प्रसूनैः पुष्पैर्मदसलिलं मदजलमुदारोऽधिकः सौरभः सुगन्धो यस्मिंस्तद्व्यधुः संचक्रुः । कर्णमधुरशब्देनोपकृता गजाः स्वमदं पुष्परसेनाऽधिकं सुस्वादु विधाय भ्रमरान् प्रत्युपकुर्वन्ति स्मेति कविरुत्प्रेक्षते । गज-भ्रमरयोः परस्परमादानप्रदानाभ्यां परिवृत्तिर्नामालङ्कारः ।

भाषा

इन सोमदेव के हाथियों ने कान में आनन्द देने वाली गुंजार करने वाले भौंरों पर मानों उपकार करने की बुद्धि से वृक्षों को झकझोरने से गिरे हुए फूलों से अपने मद जल को अधिक सुगन्धित बना दिया । अर्थात् भ्रमरों के शब्द द्वारा आनन्द देने से उपकृत होकर उनके लिये अपने मद जल को फूलों से अधिक सुगन्धित बनाकर उनका प्रत्युपकार किया ।

निजतनुभरगौरवाद्गलन्तीं क्षितिमिव ये दधति स्म शैलतुङ्गाः ।
मदमुकुलितलोचनाश्चलन्तः किमपि करैः सविलासमुन्नमद्भिः ॥४४॥

अन्वयः

शैलतुङ्गाः मदमुकुलितलोचनाः सविलासं चलन्तः ये उन्नमद्भिः करैः निजतनुभरगौरवात् गलन्तीं क्षितिं किमपि दधति स्म इव ।

व्याख्या

शैलवत्पर्वतवत्तुङ्गा उन्नता पर्वतवद्विशालोच्चशरीरा मदेन दानेन मुकुलितानि निमीलितानि लोचनानि नयनानि येषां ते सविलासं सलीलं चलन्तो मन्दविक्षेपं कुर्वन्तो ये सोमदेवगजा उन्नमद्भिरूर्ध्वं क्रियमाणैः करैः शुण्डादण्डैर्निजाः स्वकीयास्तनवो देहास्तेषां भरस्य भारस्य गौरवात् स्थूलत्वेन गुरुत्वाद्गलन्तीमधो विशन्तीं क्षितिं भूमिं किमपि किञ्चिदपि दधति स्मेवोपरि गृह्णन्ति स्मेव ।

भाषा

पर्वत के ऐसे ऊँचे, मद से अधखुली आंखवाले व मस्ती से झूम झूम कर धीरे धीरे चलने वाले सोमदेव के हाथी, अपने शरीर के बोझे से नीचे धँसने वाली पृथ्वी को मानों अपनी सूँड ऊपर उठा कर कुछ उभार रहे थे ।

रणजलधिविलोडनप्रचण्डा गिरय इव द्विरदेश्वरास्तदीयाः ।
दधुरतिमहतीमतीतसंख्याः श्रियमधिरोहितयोधमण्डलास्ते ॥४५॥

अन्वयः

अतीतसंख्याः अधिरोहितयोधमण्डलाः रणजलधिविलोडनप्रचण्डाः गिरयः इव ते तदीयाः द्विरदेश्वराः अतिमहतीं श्रियं दधुः ।

व्याख्या

अतीतसंख्याः संख्यामतिक्रम्य वर्तन्त इत्यतीतसंख्या गणनारहिता अधिरोहितानि स्वपृष्ठोपरि स्थापितानि योधानां सुभटानां मण्डलानि समूहा यैस्ते रणो युद्धमेव जलधिस्समुद्रस्तस्य विलोडनेऽवगाहने मन्थने प्रचण्डा निष्णाता गिरय इव पर्वता इव विशाला इत्यर्थः । ते प्रसिद्धास्तस्य सोमदेवस्येमे इति तदीया द्विरदेश्वरा गजेन्द्रा 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः । अतिमहतीमत्यधिकां श्रियं शोभां दधुः धारयामासुः । गिरिपक्षेऽसंख्याका योधमण्डलयुक्ता, जलधी रण इव तद्विलोडने मन्दराचलवत्प्रचण्डा गिरय इवेति दिक् ।

भाषा

असंख्य, योधाओं को अपनी पीठ पर धारण करने वाले पक्ष में अपने शिखरों पर रखने वाले, रणरूपी समुद्र को मन्थन करने में प्रवीण, पक्ष में समुद्र कोरण

मन्दराचल के समान मन्थन करने वाले पर्वतों के समान सोमदेव के गजेन्द्र अत्यन्त शोभा को प्राप्त हो रहे थे ।

इति सम्बन्धकुलकम्—कुलकमित्यर्थः ।

अथ सोमदेवसेनाश्वान्पञ्चभिः श्लोकैर्वर्णयति कविः—

कुलिशकठिनलोहबन्धयोगान्निजगृहकुट्टिमवद्विलङ्घ्यते स्म ।
विशिखशकलकण्टकावकीर्णा रणखुरली खुरमण्डलैर्यदीयैः ॥४६॥

अन्वयः

यदीयैः खुरमण्डलैः कुलिशकठिनलोहबन्धयोगात् विशिखशकलकण्टकावकीर्णा रणखुरली निजगृहकुट्टिमवत् विलङ्घ्यते स्म ।

व्याख्या

येषामश्वानामिमे इति यदीयास्तैः खुरमण्डलैः शफसमूहैः 'शफं क्लीबे खुरः पुमान्' इत्यमरः । कुलिशवद्वज्रवत्कठिनानां कठोराणां लोहबन्धानां खुरेषु कीलितलोहानां "नाल" इति भाषायां प्रसिद्धानां, योगात्सम्बन्धाद्विशिखानां बाणानां शकलानि खण्डान्येव कण्टकास्तैरवकीर्णा व्याप्ता रणखुरली युद्धभूमिर्निजानि स्वकीयानि गृहाणि गेहाः 'गृहं गेहोदवसितम्' इत्यमरः । तेषां कुट्टिमा निबद्धा भूस्तद्वत् 'कुट्टिमोऽस्त्री निबद्धा भूः' इत्यमरः । विलङ्घ्यते स्माऽतिक्राम्यते स्म ।

भाषा

जिन घोड़ों के खुरों से, वज्र के समान कड़ी नाँल बंधी होने के कारण, बाणों के टुकड़े रूपी कांटों से आच्छादित युद्धभूमी, घुड़साल की फरशबन्दी के समान लांघी जाती थी अर्थात् घोड़े, खुरों में कड़ी नाल जड़ी होने के कारण आराम से घुडसाल की पक्की सतह पर चलन के समान बाणों के टुकड़े रूपी काटों से आच्छादित रणभूमि पर भी आराम से चलते थे ।

व्यजनचटुलवालधिप्रपञ्च-प्रचुरसमीरणपुञ्जमध्यवर्ती ।
त्वरितगमन लङ्घितोऽपि येषां मरुदविभाव्यतया न लज्जते स्म ॥४७॥

अन्वयः

व्यजनचटुलवालधिप्रपञ्चप्रचुरसमीरणपुञ्जमध्यवर्ती मरुत् येषां त्वरित-गमनलङ्घितः अपि अविभाव्यतया न लज्जते स्म ।

व्याख्या

व्यजनानि तालवृन्तानीव चटुलाश्चपला वालधयः पुच्छकेशपुञ्जाः 'पुच्छोऽस्त्री लूमलांगूले वालहस्तश्च वालधिः' इत्यमरः । तेषां प्रपञ्चा विस्तारास्तेभ्यः प्रचुरा बहुलाः समीरणा वायवस्तेषां पुञ्जस्य समूहस्य मध्ये वर्तत इति व्यजनचटुलवालधिप्रपञ्चप्रचुर-समीरणपुञ्जमध्यवर्ती मरुद्वायुर्येषा-मश्वानां त्वरितगमनेन शीघ्रगतिविशेषेण लङ्घितोऽप्यतिक्रान्तोऽप्यविभाव्य-तयाऽलक्ष्यतया न लज्जते स्म न त्रपते स्म । मरुद्गतिस्तु प्रसिद्धैव । परमश्वानां गतिस्तस्मादधिकेति लज्जास्थानम् । किन्तु मरुतो व्यजनचटुल-वालधिप्रपञ्चप्रचुरसमीरणपुञ्जवर्तित्वादविभाव्यतया को मां पश्यतीति भावेन लज्जा न संजातेति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

ताड़ के पंखों के समान चंचल पूँछों के हिलने से उत्पन्न अधिक हवाओं के समूह के मध्य में विद्यमान पवन, घोड़ों से तीव्रगति में पराजित होने पर भी अदृश्य होने से लज्जित न हुआ । अर्थात् घोड़ों से गति में हरा दिये जाने पर भी अन्य वायुओं के मध्य में रहने से मुझे कौन पहचान सकेगा इस भावना से मरुत् लज्जित न हुआ ।

प्रतिफलननिभात्सहस्रभासा मणिमयपल्ययनप्रतिष्ठितेन ।
निजरथवहनार्थमथिता ये स्वयमधिरुह्य परीक्षिता इवासन् ॥४८॥

अन्वयः

ये प्रतिफलननिभात् मणिमयपल्ययनप्रतिष्ठितेन सहस्रभासा निजवाह-नार्थम् अथिताः (सन्तः) स्वयम् अधिरुह्य परीक्षिताः इव आसन् ।

व्याख्या

येऽश्वाः प्रतिफलनस्य प्रतिबिम्बस्य निभात् व्याजात् 'निभं व्याजसदृक्षयोः' इति कोशः । मणीनां विकार इति मणिमयं तादृशं पल्ययनं पर्याणं (काठीति

भाषायाम्) तस्मिन् प्रतिष्ठितेन समुपविष्टेन मणिमयपल्ययनप्रतिबिम्बितेनेत्यर्थः ॥ सहस्रं भासो मयूखा यस्य तेन सहस्रभानुना सूर्येण तेषामश्वानां सर्वश्रेष्ठत्वान्निजवहनार्थं स्ववाहनकल्पनार्थमर्थिता अपेक्षिताः सन्तः स्वयं साक्षात्स्वयमेव तानधिरुह्याऽश्वोपरि समुपविश्य परीक्षितास्तीव्रतमा गतिरस्ति न वेति निरीक्षिता इवाऽऽसन् । सूर्याश्वतोऽपि तेषामश्वानां श्रेष्ठत्वमिति भावः ॥ सापन्हवोत्प्रेक्षालङ्कारः ।

भाषा

इन घोड़ों की रत्न जडित काठियों पर सूर्य के प्रतिबिम्ब पड़ने के मिष से (अपने घोड़ों से अच्छे समझ) सूर्य द्वारा अपना वाहन बनाने के लिये मांगे हुए इन घोड़ों पर मानों स्वयं सूर्य ने सवारी कर उनकी परीक्षा की हो ।

जवसमुचितधावनानुरूपा किमिति कृता पृथुला न नाथ पृथ्वी ।
नभसि खुरपुटैरिति स्फुरद्भिर्विधिमिव ये स्म मुहुः प्रतिक्षिपन्ति ४६

अन्वयः

(हे) नाथ ! पृथ्वी जवसमुचितधावनानुरूपा पृथुला किमिति न कृता इति नभसि स्फुरद्भिः खुरपुटैः ये विधिं मुहुः प्रतिक्षिपन्ति स्म इव ।

व्याख्या

हे नाथ ! हे स्वामिन् ब्रह्मन् । पृथ्वी मेदिनी जवस्य वेगस्य समुचितं योग्यं धावनं तीव्रगमनं तस्याऽनुरूपाऽनुकूला पृथुला विस्तृता महतीत्यर्थः 'विशङ्कटं पृथुबृहद्विशालं पृथुलं महत्' इत्यमरः । किमिति कस्माद्धेतोर्न कृता न विहिता । इति हेतोरीदृशमनौचित्यं मनसि परिज्ञाय नभसि व्योम्नि स्फुरद्भिरितस्ततः समुच्छलद्भिः खुरपुटैः शफसंपुटैः येऽश्वा विधिं ब्रह्माणं मुहुर्भूयः प्रतिक्षिपन्ति स्मेव समुपालभन्ते स्मेव । खे खुरपुटस्फुरणे ब्रह्मण उपालम्भस्याहार्यसंभावनादुत्प्रेक्षालङ्कारः ।

भाषा

हे ब्रह्मा जी । आपने इस पृथ्वी को वेग के अनुसार दौड़ लगाने योग्य विस्तृत क्यों नहीं बनाया । इसीलिए मानों वे घोड़े आकाश में ऊपर दिखाई देने वाले अपने खुरपुटों से ब्रह्मा को उलाहना दे रहे थे या ब्रह्मा की लिहाड़ी ले रहे थे ।

प्रतिदिशमधिरोहिताश्ववाराः परिचितकाञ्चनचित्रवर्मबन्धाः ।
अगणितकृतपङ्क्तयो हयास्ते कमिव न चक्रुरुपक्रमं तदीयाः ॥५०॥

अन्वयः

अधिरोहिताश्ववाराः परिचितकाञ्चनचित्रवर्मबन्धाः अगणितकृत-पङ्क्तयः ते तदीयाः हयाः प्रतिदिशं कम् इव उपक्रमं न चक्रुः ।

व्याख्या

अधिरोहितास्स्वपृष्ठोपरि समुपवेशिता अश्ववाराः सादिनः 'अश्वारोहास्तु सादिनः' इत्यमरः । यैस्ते परिचितानि गात्रेषु शोभार्थं निर्मितानि काञ्चनस्य सुवर्णस्य चित्राः विचित्राः वर्मबन्धाः कवचानि येषां तेऽगणिताः संख्यामतिक्रान्ताः कृता बद्धाः पङ्क्तयः श्रेणयो येषां ते तथोक्तास्ते प्रसिद्धास्तदीयास्सोमदेव-सम्बन्धिनो हया अश्वाः प्रतिदिशं दिशि दिशि कमिवोपक्रमं समुद्योगं न चक्रुः न विदधुः सर्वमेवोपक्रमं चक्रुरिति भावः । अनेन तेषामश्वानामतिसाहसकर्मकारित्वं सूचितम् ।

भाषा

घोड़सवारों को अपने पीठ पर बैठाए हुए, अपनी शोभा और रक्षा के लिये सोने के विचित्र कवचों को धारण करने वाले, असंख्य कतारें बनाए हुए उन प्रसिद्ध सोमदेव के घोड़ों ने प्रत्येक दिशा में कौनसा साहसयुक्त कार्य नहीं किया ।

इति पञ्चभिः कुलकम् ।

असितविलसितेन तद्बलानामसिलतिकानिवहेन निर्मलेन ।
गगनगिरितटी नवेन्द्रनील-द्रुतिशतनिर्भरधारिणीव रेजे ॥५१॥

अन्वयः

गगनगिरितटी तद्बलानाम् असितविलसितेन निर्मलेन असिलतिका-निवहेन नवेन्द्रनीलद्रुतिशतनिर्भरधारिणी इव रेजे ।

व्याख्या

गगनमाकाशमेव गिरिः पर्वतंस्तस्य तटी प्रान्तभागः (कर्त्री) तस्य सोमदेवस्य बलानि सैन्यानि 'अनीकिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम' इत्यमरः । तेषां

सोमदेवसैन्यानां असितं कृष्णं विलसितं चेष्टितं स्वरूपं वा यस्य स तेन श्याम-वर्णेन निर्मलेन विशदेनाऽसयः खड्गा एव लतिका लतास्तासां निवहेन समूहेन हेतुना नवो नवीनो य इन्द्रनीलो मरकतमणिस्तस्य द्रुतीनां द्रवीभूतपदार्थानां शतानि तेषां निर्झरान् वारिप्रवाहान् 'वारिप्रवाहो निर्झरो झरः' इत्यमरः। धारयतीति नवेन्द्रनीलद्रुतिशतनिर्झरधारिणीव नवीनमरकतमणिद्रवीभूतपदार्थ-शतप्रवाहधारिणीव रेजे शुशुभे। खड्गलतानिवहे कृष्णत्वसाम्यादिन्द्रनीलद्रव-शतनिर्झरत्वस्य सम्भावनादुत्प्रेक्षालङ्कारः।

भाषा

आकाशरूपी पर्वत का प्रान्तभाग, सोमदेव की सेना के कृष्णवर्ण निर्मल तलवार रूपी लताओं के समूह से मानों नये मरकत मणी (पन्ने) के पानी के सैकड़ों झरनों को धारण करता हुआ शोभित होता था।

क्व नु न विलसति स्म कुन्तमाला कलितशिखण्डिशिखण्डमण्डनश्रीः।
क्षणमविरहिता विपक्षसेना–भटशिरसामिव मण्डलैस्तदीया ॥५२॥

अन्वयः

कलितशिखण्डिशिखण्डमण्डनश्रीः तदीया कुन्तलमाला विपक्षसेना-भटशिरसां मण्डलैः क्षणम् अविरहिता इव क्व नु न विलसति स्म।

व्याख्या

कलिता धारिता शिखण्डिनां मयूराणां शिखण्डः पिच्छमेव मण्डनं भूषणं, तस्य श्रीः शोभा यया सा तदीया सोमदेवसैन्यसम्बन्धिनी कुन्तमाला प्रासपङ्क्तिः 'प्रासस्तु कुन्तः' इत्यमरः। विपक्षाणां शत्रूणां सेना सैन्यं तासां भटा योद्धार-स्तेषां शिरांसि मूर्धानस्तेषां मण्डलैस्समूहैः क्षणमीषत्कालायाऽविरहितेव युक्तेव क्व नु कस्मिन्समराङ्गणप्रदेशे न विलसति स्म न प्रस्फुरति स्म। सर्वत्र विलसति स्मेति भावः। मयूरपिच्छशोभितास्तदीयसेनाकुन्ताः क्षणं शत्रुमस्तक-धारिण इव सर्वत्र दृश्यन्ते स्मेत्यर्थः।

भाषा

मोरपंख की सजावट से सजाया हुआ सोमदेव के भालों का समूह, थोड़ी देर के लिये, शत्रु की सेना के योद्धाओं के मस्तक समूहों से युक्त होने के समान, कहाँ नहीं दिखाई देता था अर्थात् सर्वत्र दिखाई देता था।

**बहुभिरभिहितैः किमद्भुतैर्वा भयजननं भुवनैकमल्लसैन्यम् ।
रणरसचलितं विलोक्य केषामलभत चेतसि नान्तरं विकल्पः ॥५३॥**

अन्वयः

बहुभिः अद्भुतैः अभिहितैः किं वा । भयजननं भुवनैकमल्लसैन्यं रणरसचलितं विलोक्य केषां चेतसि विकल्पः अन्तरं न अलभत ।

व्याख्या

बहुभिरनेकैरद्भुतैराश्चार्यकारिभिरभिहितैः कथितैर्वर्णनैरित्यर्थः । किं वा किम्फलं न किमपीत्यर्थः । भयस्य त्रासस्य जननमुत्पत्तिर्यस्मात्तत भयोत्पादकं भुवने जगत्येकोऽद्वितीयो मल्लो वीरस्सोमदेवस्तस्य सैन्यं बलं रणस्य युद्धस्य रसेनोत्साहेन चलितं समापतन्तं विलोक्य दृष्ट्वा केषां नृपाणां चेतसि हृदये विकल्पः संशयोऽन्तरमवकाशं 'अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये' इत्यमरः । नाऽलभत न प्राप । राजानोऽपि तदबलं वीक्ष्य विजये संशययुक्ता अभूवन्निति भावः ।

भाषा

बहुत सी आश्चर्य जनक बातें कहने मे क्या लाभ ? भयजनक, जगत् के अद्वितीय वीर सोमदेव की सेना को, युद्ध के उत्साह से आई हुई देखकर किन राजाओं के हृदय में सन्देह को अवकाश नहीं मिलता था अर्थात् सभी राजा इसकी पलटन देखकर विजय के विषय में सन्दिग्ध हो जाते थे ।

**द्रविडबलभरे क्रमादवाप्ते निकटमुदारभुजस्य राजसूनोः ।
अपि नृपतिरसौ समीपमागादपकरणावसरं चिरादवाप्य ॥५४॥**

अन्वयः

द्रविडबलभरे उदारभुजस्य राजसूनोः क्रमात् निकटं अवाप्ते (सति) असौ नृपतिः अपि अपकरणावसरं चिरात् अवाप्य समीपम् आगात् ।

व्याख्या

द्रविडबलानि द्रविडदेशाधिपति । चोलराजराजिगसैन्यानि तेषां भरस्समूहः 'नित्यानवरताजस्रमप्यथातिशयो भरः" इत्यमरः । तस्मिन द्रविडराजसैन्य

समूह उदारौ महाशक्तिमन्तौ भुजौ बाहू यस्य तस्य राजसूनो राजपुत्रस्य विक्रमाङ्कदेवस्य क्रमात् क्रमशो निकटं समीपमवाप्ते प्राप्ते सत्यसौ प्रसिद्धो नृपतिर्भूपतिस्सोमदेवोऽप्यपकरणस्य वैरनिर्यातनस्याऽवसरं समुचितसमयं चिराद्बहुकालानन्तरमवाप्याऽधिगत्य समीपं विक्रमाङ्कदेवसमीपमागादाजगाम ।

भाषा

धीरे २, द्रविडदेश के राजा चोलराज राजिग की भारी पलटन के, महाशक्तिशाली भुजावाले राजपुत्र विक्रमाङ्कदेव के पास आने पर, राजा सोमदेव भी चिरकाल के बाद बैर निकालने का अवसर प्राप्त कर, उसके (विक्रमाङ्क देव के) समीप आ गया ।

ग्रहकलितमिवाग्रजं विलोक्य प्रहरणसम्मुखमश्रुपूर्णनेत्रः ।
किमपि किमपि विक्रमाङ्कदेवश्चिरमनुचिन्त्य निवेदयाञ्चकार ॥५५॥

अन्वयः

विक्रमाङ्कदेवः प्रहरणसम्मुखम् अग्रजं ग्रहकलितम् इव विलोक्य अश्रुपूर्णनेत्रः (सन्) किमपि चिरम् अनुचिन्त्य किमपि निवेदयाञ्चकार ।

व्याख्या

विक्रमाङ्कदेवः प्रहरणाय शस्त्रैः प्रहारं कर्तुं सम्मुखं समक्षमागतमग्रजं ज्जेष्ठभ्रातरं सोमदेवं ग्रहैः शनैश्चरादिपापग्रहैः कलितं ग्रस्तमिव विलोक्य दृष्ट्वाऽश्रुभिर्बाष्पैः पूर्णे व्याप्ते नेत्रे नयने यस्य स बाष्पाम्बुपूरितनयनस्सन् किमपि वस्तु चिरं बहुकालमनुचिन्त्य विचार्य किमपि वस्तु निवेदयाञ्चकार कथितवान् शनैरुवाचेत्यर्थः ।

भाषा

विक्रमाङ्कदेव ने प्रहार करने के लिये उद्यत, दुष्टग्रहों से गृहीत होने के समान, अपने बड़े भाई सोमदेव को देखकर आँखो में आँसु भरकर बहुत देर तक कुछ सोच कर कुछ कहना प्रारम्भ किया ।

अहह महदनर्थबीजमेतद् विधिहतकेन विरोधसारिणीभिः ।
अभिनयरसपूरपूरिताभिर्विहितमकीर्तिफलप्रदानसज्जम् ॥५६॥

अन्वयः

विधिहतकेन अविनयरसपूरपूरिताभिः विरोधसारिणीभिः अहह ! एतत् अकीर्त्तिफलप्रदानसज्जं महत् अनर्थबीजं विहितम् ।

व्याख्या

विधिर्ब्रह्मैव भाग्यमेव वा हतको नीचस्तेन विधिहतकेन दुर्दैवेन 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः । अविनयो दुराचार एव रसो जलं तस्य पूरेण प्रवाहेण पूरिता परिपूर्णास्ताभिर्दुराचारपूरपरिपूर्णाभिर्विरोधो वैरमेव सारिणी जलप्रणालिकाऽल्पनद्यो वा ताभिरहहेतिखेदे ! एतद् भ्रातृयुद्धमकीर्ति-रयश एव फलं परिणामस्तस्य प्रदाने समुत्पादने सज्जं समुद्यतमकीर्तिफलप्रदान-समुद्यतं महत् विशिष्टमनर्थस्याऽनुचितकार्यस्य बीजं कारणं विहितं सम्पादितम् ।

भाषा

अरे रे ! दुर्भाग्य ने, दुराचार रूपी जल की बाढ़ से भरे वैर रूपी नालों (की सहायता) से, यह, अपयश रूपी फल को पैदा करने में सन्नद्ध, एक विशिष्ट अनुचित कार्य (रूपी वृक्ष) के बीज को बो दिया है। अर्थात् बड़े दुःख की बात है कि दुर्दैव से यह भाइयों का परस्पर युद्ध होकर जगत् में अपकीर्ति फैल जाएगी ।

इह निहतनयः समागतो यत् सममुना परिपन्थिनाग्रजो मे ।
समरशिरसि सञ्चरन्पृषत्कैः कथमपरामृशता मया निवार्यः ॥५७॥

अन्वयः

यत् निहतनयः मे अग्रजः अमुना परिपन्थिना समं इह समागतः (तत्) समरशिरसि सञ्चरन् (अयं) पृषत्कैः अपरामृशता मया कथं निवार्यः !

व्याख्या

यद्यस्मात्कारणान्निहतो न्याययुक्तधर्ममार्गात्परिच्युतो नयो राजनीतिर्यस्य सः परिभ्रष्टनीतिमार्गो मे ममाऽग्रजो ज्येष्ठभ्राता सोमदेवोऽमुनाऽनेन परिपन्थिना शत्रुणा 'अभिघाति-परारति-प्रत्यर्थिपरिपन्थिनः' इत्यमरः । द्रविडाधिपति-राजिगेन समं सह 'साकं सत्रा समं सह' इत्यमरः । इहाऽस्मिन्प्रदेशे संग्रामभूमौ

समागतः प्राप्तः । तत्तस्मात्कारणात् समरस्य रणस्य शिरस्यग्रे सञ्चरन्निर्भयं परिभ्रमन्नयं सोमदेवः पृषत्कैर्बाणैरपरामृशता स्पर्शमकुर्वता मया विक्रमाङ्कदेवेन कथं केन प्रकारेण निवार्यो दूरीकरणीयः । युद्धाय कृतनिश्चयोऽयं सोमदेवो मत्कृतबाणप्रहारमन्तरा समराङ्गणं विहाय कथं गमिष्यतीति भावः ।

भाषा

चूँकि नीतिमार्ग से च्युत मेरा बड़ा भाई सोमदेव मेरे इस शत्रु द्रविडाधिपति राजिग के साथ यहाँ आया है इसलिए युद्ध में आए हुए अपने बड़े भाई को मैं किस प्रकार बिना बाणों से आघात पहुँचाए दूर करूँ ?

पितुरपि परिपन्थिनीं विधाय श्रियमहमत्र निवेशयाम्बभूव ।
सपदि कथमिमं कदर्थयामि व्यथयति मामहहा महाननर्थः ॥५८॥

अन्वयः

अहं श्रियं पितुः अपि परिपन्थिनीं विधाय अत्र निबेशयाम्बभूव (अहं) इमं सपदि कथं कदर्थयामि । अहहा ! महान् अनर्थः मां व्यथयति ।

व्याख्या

अहं विक्रमाङ्कदेवः श्रियं राज्यलक्ष्मीं पितुराहवमल्लदेवस्याऽपि परिपन्थिनीं विरुद्धां पित्राऽप्यननुमोदितामित्यर्थः । विधाय रचयित्वाऽत्र सोमदेवे निवेशयाम्बभूव स्थापयाञ्चकार । अहं सपदि सद्य इमं सोमदेवं कथं कस्मात्कदर्थयामि पीडयामि अहहेति खेदे । महाननर्थो भाविमहदनिष्टं मां व्यथयति मे मनसि विपुलाधिं जनयति ।

भाषा

मैंने ही अपने पिता आहवमल्लदेव की इच्छा के विरुद्ध, इसको राज्यलक्ष्मी दिलाई । अब मैं तुरन्त ही अपने बड़े भाई सोमदेव को (जिसको मैं ने ही राजगद्दी दिलाई है) कैसे कुचलूँ । अरे रे ! बड़ा भारी (भावी) अनर्थ मुझे पीड़ित कर रहा है ।

अपसरणमितः करोमि किंस्वित् प्रसरति गोत्रवधाय नैष बाहुः ।
परमयमयशांसि दुष्टलोकः किमपि निपात्य मयि प्रमोदमेति ॥५९॥

अन्वयः

किंस्वित् इतः अपसरणं करोमि । एष बाहुः गोत्रवधाय न प्रसरति । परम् अयं दुष्टलोकः अयशांसि मयि निपात्य किम् अपि प्रमोदम् एति ।

व्याख्या

किंस्विदथवा किमितोऽस्माद्रणाङ्गणादपसरणं पलायनं करोमि । एष मे बाहुर्भुजो गोत्रस्य मत्कुलोत्पन्नस्य ज्येष्ठभ्रातुस्सोमदेवस्य वधाय नाशाय न प्रसरति व्यापारं न कुरुते । परं किन्त्वयं दुष्टलोको दुर्जनसमूहोऽयशांस्यपकीर्तीर्मयि विक्रमाङ्कदेवे निपात्य निक्षिप्य किमप्यनिर्वचनीयं प्रमोदमानन्दमेति । सज्जनास्तुभ्रातुः संरक्षणार्थं रणं विहाय गत इति यथार्थं कथयिष्यन्ति परन्तु दुर्जना भीत्यैवाऽयं पलायित इति मनसि निर्धार्याऽपयशः प्रसार्य प्रमोदमुद्वहिष्यन्तीति भावः ।

भाषा

अथवा क्या मैं रणभूमि से भाग चलूं ? यह मेरी भुजा अपने कुल के प्राणी का नाश करने मे अग्रसर नहीं होती है । परन्तु दुष्ट लोग भय से रण छोड़कर भाग गया—ऐसा मेरा अपयश फैलाकर आनन्द करेंगे ।

इति गिरमभिधाय निष्कलङ्कां विशदमनाः शनकैर्यशोधनोऽसौ ।
अनुनयवचनानि तस्य पार्श्वे कति न विसर्जयति स्म राजपुत्रः ॥६०॥

अन्वयः

विशदमनाः यशोधनः असौ राजपुत्रः इति निष्कलङ्कां गिरं शनकैः अभिधाय कति अनुनयवचनानि तस्य पार्श्वे न विसर्जयति स्म ।

व्याख्या

विशदं निर्मलं मनश्चित्तं यस्य स निर्मलचित्तो यश एव कीर्तिरेव धनं वित्तं यस्य सःकीर्तिवित्तोऽसौ राजपुत्रो विक्रमाङ्कदेव इति पूर्वोक्तां निष्कलङ्कां कालुष्यरहितां गिरं वाणीं शनकैः शनैरभिधाय व्याहृत्य कति कियन्त्यनुनयस्य प्रार्थनाया वचनान्युक्तीस्तस्य सोमदेवस्य पार्श्वे सन्निधौ न विसर्जयतिस्म न प्रेषयतिस्म । किन्तु दूतद्वारा बहुतरं प्रार्थनमकरोदिति भावः ।

भाषा

निर्मलचित्त, यशोधन इस राजपुत्र ने पूर्वोक्त कालुष्य रहित बातें धीरे से कह कर कितने प्रार्थना के सन्देश सोमदेव के पास नहीं भेजे। अर्थात् बहुत से प्रार्थना के संदेसे युद्ध में सम्मिलित न होने के लिये भेजे।

स तु शपथशतैः प्रपद्य सर्वं वितथवचाः कुलपांसनत्वमाप्तः।
क्षणमनुगुणमैक्षत प्रहर्तुं मलिनधियां धिगनार्जवं चरित्रम् ॥६१॥

अन्वयः

वितथवचाः कुलपांसनत्वम् आप्तः सः तु शपथशतैः सर्वं प्रपद्य प्रहर्तुं अनुगुणं क्षणम् ऐक्षत। मलिनधियां चरित्रं अनार्जवं धिक्।

व्याख्या

वितथं मिथ्या वचो वचनं यस्य स मिथ्याभाषी कुलस्य गोत्रस्य पांसनः कलङ्कस्तस्य भावः कुलपांसनत्वमाप्तो वंशकलङ्कत्वमुपागतः स तु सोमदेवस्तु शपथानां शतानि तैरसंख्यशपथग्रहणैः सर्वं विक्रमाङ्कदेवप्रार्थितं प्रपद्य तथेत्यङ्गीकृत्य विक्रमाङ्कदेवं प्रहर्तुं मारयितुमनुगुणमनुकूलं क्षणमवसरमैक्षत दृष्टवान् प्रतीक्षते स्मेत्यर्थः। मलिना मलीमसा 'मलीमसं तु मलिनं कच्चरं मलदूषितम्' इत्यमरः। धीर्बुद्धिर्येषां ते तेषां मलीमसबुद्धिमतां चरित्रं वृत्तमनार्जवं कुटिलं कौटिल्यपूर्णमित्यर्थः। इति धिक्। अत्राऽर्थान्तरन्यासालङ्कारः।

भाषा

मिथ्याभाषी, कुलाङ्गारता को प्राप्त यह सोमदेव तो विक्रमाङ्कदेव की प्रार्थनाओं को, सैकड़ों कसमें खा, स्वीकार कर, उसको मार डालने के लिए अनुकूल मौका खोजता था। मलिन बुद्धि वालों के चरित्र को धिक्कार है जो कि सर्वदा कौटिल्यपूर्ण होता है।

किमिदमुपनतं यशोविरोधि त्रिदिवगतः किमु वक्ष्यते पिता मे।
इति मनसि निधाय जातनिद्रं नृपतनयं शशिमौलिरादिदेश ॥६२॥

अन्वयः

शशिमौलिः 'यशोविरोधि इदं किम् उपनतं, त्रिविगतः मे पिता किमु वक्ष्यते' इति मनसि निधाय जातनिद्रं नृपतनयम् आदिदेश।

व्याख्या

शशोऽस्यास्तीति शशी चन्द्रो मौलौ शिरसि यस्य सः शशिमौलिः शङ्करो, यशसः कीर्तेर्विरोधि विपरीतमयशस्करमित्यर्थः। इदं सोमदेवप्रेरितसमररूपकार्यं किमुपनतं कथं प्राप्तम्। त्रिदिवं स्वर्गं 'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः' इत्यमरः। गतः प्राप्त इति त्रिदिवगतः स्वर्गतो मे मम विक्रमाङ्कदेवस्य पिताऽऽहवमल्लदेवः किमु वक्ष्यते किं कथयिष्यति। इति सर्वं मनसि हृदये निधाय संस्थाप्य जातनिद्रं जाता समागता निद्रा स्वापो यस्य स तं सुप्तं नृपतनयं राजकुमारं विक्रमाङ्कदेवमादिदेशाऽऽज्ञप्तवान्।

भाषा

अपयश पैदा करने वाला यह मौका कैसे आ गया? स्वर्गवासी मेरे पिता आहवमल्लदेव मुझे क्या कहेंगे? ऐसी बातें मन में रख कर, सोए हुए उस राजकुमार को चन्द्रशेखर महादेव ने (स्वप्न में) आज्ञा दी।

त्वमिह महति वत्स देवकार्ये ननु गुणवानवतारितो मयैव।
तरलयति मुधा विकल्पदोला किमिति मनस्तव शुद्धधैर्यधाम्नः ॥६३॥

अन्वयः

हे वत्स! मया एव इह महति देवकार्ये गुणवान् त्वं अवतारितः ननु। विकल्पदोला शुद्धधैर्यधाम्नः तव मनः किम् इति मुधा तरलयति।

व्याख्या

हे वत्स! हे प्रिय बालक! मयैव शिवेनैवेत्यर्थः। इहाऽस्मिन् जगति महति विशाले देवकार्ये सुरकार्यार्थं गुणवान् दयादाक्षिण्यशौर्यादिगुणशाली त्वं विक्रमाङ्कदेवोऽवतारितः समुत्पादितो ननु निश्चयेन। विकल्पः सन्देह एवोभय-पक्षस्य समबलत्वेनाऽऽश्रयणाद्दोला प्रेंखा 'दोला प्रेंखादिका स्त्रियाम्' इत्यमरः। शुद्धस्य चाञ्चल्यरहितस्य धैर्यस्य धीरताया धाम स्थानं तस्य तव मनश्चित्तं किमिति कथं मुधा व्यर्थं तरलयति चञ्चलयति। संशयं विहाय समरोद्यतो भवेति भावः।

भाषा

हे प्रिय बालक! इस संसार में देवताओं के बड़े महत्वयुक्त कार्य करने के लिये दया दाक्षिण्य शौर्य आदि गुणों से युक्त तुम (विक्रमाङ्कदेव) को निश्चय-

पूर्वक मैंने ही उत्पन्न कराया है। संदेह रूपी हिंडोला, निर्दोष धैर्य के आश्रय स्थान, तुम्हारे मन को व्यर्थ ही क्यों चलायमान कर रहा है। अर्थात् सन्देह छोड़ कर युद्ध करो।

सपदि न शुभमस्ति भोगहेतोस्तिलपरिमाणमपि त्वदग्रजस्य।
इह हि विहितभूरिदुष्कृतानां विगलति पुण्यचयः पुरातनोऽपि ॥६४॥

अन्वयः

सपदि त्वदग्रजस्य भोगहेतोः तिलपरिमाणम् अपि शुभं न अस्ति। हि इह विहितभूरिदुष्कृतानां पुरातनः अपि पुण्यचयः विगलति।

व्याख्या

सपदि झटिति 'स्राक् झटित्यञ्जसाऽऽह्नाय द्राङ्मंक्षु सपदि द्रुते' 'सद्यः सपदि तत्क्षणे' इत्यमरः। त्वदग्रजस्य तव ज्येष्ठभ्रातुस्सोमदेवस्य भोगहेतोः सुखभोगार्थं तिलपरिमाणमप्यल्पमात्रमपि शुभं पुण्यकर्म नाऽस्ति न विद्यते नाऽवशिष्टं भविष्यतीति भावः। हि यस्मात्कारणादिहाऽस्मिञ्जगति विहितानि कृतानि भूरीणि बहूनि दुष्कृतानि कुकर्माणि यैस्ते तेषां कृतपापानां पुरातनोऽपि प्राचीनोऽपि पूर्वसञ्चित इत्यर्थः। पुण्यचयः सुकृतसमुदायो विगलति नश्यति समाप्तिमेतीत्यर्थः।

भाषा

जल्दी ही तुम्हारे बड़े भाई सोमदेव की सुखानुभूति के लिये रत्तीभर भी पुण्यकर्म (अवशिष्ट) न रहेगा। क्योंकि इस संसार में अत्यधिक पाप करने वालों का प्राचीन सञ्चित पुण्य भी क्षीण हो जाता है।

भव भुवनमहोत्सवे तदत्र प्रगुणधनुः परिपन्थिनां प्रमाथे।
स्मरसि न किमिति स्थितिस्तवैषा ननु भुवि धर्मविरोधिनां वधाय ॥६५॥

अन्वयः

तत् अत्र भुवनमहोत्सवे परिपन्थिनां प्रमाथे प्रगुणधनुः भव। भुवि एषा तव स्थितिः धर्मविरोधिनां वधाय ननु, इति किं न स्मरसि।

व्याख्या

तत्तस्मात्कारणादत्राऽस्मिन् भुवनानां जगतां 'विष्टपं भुवनं जगत्' इत्यमरः। महोत्सवो हर्षो यस्मात्स तस्मिन् भुवनमहोत्सवे युद्ध इत्यर्थः। परिपन्थिनां शत्रूणां प्रमाथे मन्थने विनाशायेत्यर्थः। प्रगुणं सज्जं धनुश्चापो यस्य सः सज्जधनुर्भव संपद्यस्व। भुवि पृथिव्यामेषा तव ते स्थितिस्तावकीनाऽवस्थानं धर्मस्य सुकृतस्य विरोधिनः प्रतिकूलास्तेषां पापात्मनां वधाय ननु निश्चयेन तेषां विनाशायैवेति किं न, कथं न स्मरसि स्मरणगोचरं करोषि।

भाषा

इसलिये पृथ्वी को हर्षित करने वाले इस युद्ध में शत्रुओं का नाश करने के लिये धनुष तान कर तयार हो जाओ। इस पृथ्वी पर तुम्हारी स्थिति निश्चय पूर्वक पापियों के नाश के लिये ही है यह बात तुम्हें क्यों स्मरण नहीं है।

गिरमिति स निशम्य विश्वभर्तुर्गिरितनयादयितस्य मुक्तनिद्रः।
वचनमिदमलङ्घ्यमिन्दुमौलेरिति रणकर्मणि निश्चयं चकार ॥६६॥

अन्वयः

सः विश्वभर्तुः गिरितनयादयितस्य इति गिरं निशम्य मुक्तनिद्रः (सन्) इन्दुमौलेः इदं वचनम् अलङ्घ्यम् इति रणकर्मणि निश्चयं चकार।

व्याख्या

स विक्रमाङ्कदेवो विश्वस्य सकलसंसारस्य भर्ता पालकस्तस्य गिरेर्हिमाद्रेस्तनयायाः कन्यायाः पार्वत्या दयितः पतिस्तस्य शिवस्येति पूर्वोक्तां गिरं वाणीं निशम्य श्रुत्वा मुक्ता त्यक्ता निद्रा स्वापो येन स जागृतस्सन्निन्दुश्चन्द्रो मौलौ मस्तके यस्य स तस्य चन्द्रशेखरस्य शङ्करस्येदं स्वप्नोक्तं वचनं वचोऽलङ्घ्यमनतिक्रमणीयमिति हेतो रणकर्मणि युद्धकार्ये योद्धुमित्यर्थः। निश्चयं व्यवसायात्मिकां बुद्धिं चकार कृतवान्।

भाषा

विक्रमाङ्कदेव ने समस्त संसार का भरण पोषण करने वाले पार्वती के पति महादेव की ऐसी वाणी सुन, जागकर, चन्द्रशेखर शङ्कर की यह वाणी (आज्ञा) अलङ्घनीय है, इस हेतु से युद्ध करने की ठान ली।

प्रसरदुभयतः प्रहारसज्जं बलयुगलं तदवेक्ष्य वीक्षते स्म ।
समुचितसमरोपभोगलोभात् प्रतिकलमुत्पुलकं भुजद्वयं सः ॥६७॥

अन्वयः

सः उभयतः प्रसरत् प्रहारसज्जं तत् बलयुगलम् अवेक्ष्य समुचित-समरोपभोगलोभात् उत्पुलकं भुजद्वयं प्रतिकलम् वीक्षते स्म ।

अन्वयः

स विक्रमाङ्कदेव उभयतोऽग्रतः पृष्ठतश्च प्रसरद्विस्तारमाप्नुवत्प्रहारे प्रहार-करणे सज्जं तत्परं तदद्भुतं बलयुगलं सेनाद्वयमवेक्ष्य विलोक्य समुचितो योग्य-स्समरो युद्धं तस्योपभोगस्याऽऽस्वादस्य लोभादिच्छात उद्गतः समुत्पन्नः पुलको रोमाञ्चो यस्मिँस्तद्भुजद्वयं बाहुयुगलं प्रतिकलं प्रतिक्षणं वीक्षते स्म दृष्टवान् ।

भाषा

वह विक्रमाङ्कदेव, आगे और पीछे दोनों ओर से, विस्तृत तथा प्रहार करने में तत्पर, उन आश्चर्य जनक दोनों सेनाओं को देखकर, अपनी वीरता के अनुरूप युद्ध का आस्वादन करने के लोभ से, रोमाञ्च से युक्त अपनी दोनों भुजाओं को क्षण क्षण में अर्थात् बार २ देखता था ।

मदकरटिनमुत्कटप्रतापः प्रकटितवीरमृदङ्गधीरनादः ।
मथनगिरिमिवाधिरुह्य वेगात् प्रतिबलवारिधिलोडनं चकार ॥६८॥

अन्वयः

उत्कटप्रतापः प्रकटितवीरमृदङ्गधीरनादः (सः) मदकरटिनं मथनगिरिम् इव अधिरुह्य वेगात् प्रतिबलवारिधिलोडनं चकार ।

व्याख्या

उत्कट उत्कृष्टः प्रतापः प्रभावो यस्य स उत्कृष्टप्रभावः प्रकटितः प्रकाशितो वीराणां शक्तिशालिनां मृदङ्गानामिव धीरो गम्भीरो नादो ध्वनिर्यस्य स मदकरटिनं मदान्धगजं मथनगिरिमिव मन्दराचलमिवाऽधिरुह्य तदुपरि स्थित्वा वेगाज्जवात् प्रतिबलमेव शत्रुसैन्यमेव वारिधिः समुद्रस्तस्य लोडनं मथनं चकार विदधे विनाशं चकारेत्यर्थः । उपमारूपकयोः सङ्करालङ्कारः ।

भाषा

उत्कृष्ट प्रभाव वाले, मृदङ्ग के ऐसे बीरो के गम्भीर शब्दों को प्रकट करन वाले विक्रमाङ्कदेव ने मन्दराचल के समान मदोन्मत्त हाथी पर सवार होकर वेग से शत्रु सेना रूपी समुद्र को मथ डाला। अर्थात् शत्रु की सेना को नष्ट कर दिया।

अहमहमिकया प्रधाविताभ्यां मिलितममुष्य बलं तयोर्बलाभ्याम्।
सलिलमभिमुखं सहाम्बुराशेस्तदनु महानदयोरिवोदकाभ्याम् ॥६६॥

अन्वयः

तदनु अमुष्य बलम् अहमहमिकया अभिमुखं प्रधाविताभ्यां तयोः बलाभ्यां सह अम्बुराशेः सलिलम् अभिमुखं प्रधाविताभ्यां महानदयोः उदकाभ्यां सह इव मिलितम्।

व्याख्या

तदनु शत्रुसेनासम्मर्दनानन्तरममुष्याऽस्य विक्रमाङ्कदेवस्य बलं सैन्यमहमहमिकया परस्पराहङ्कारेण 'अहमहमिका तु सा स्यात्परस्परं यो भवत्यहङ्कारः' इत्यमरः। अभिमुखं सम्मुखं प्रधाविताभ्यां द्रततरमाक्रममाणाभ्यां तयोस्सोमदेवराजिगयोः बलाभ्यां सेनाभ्यां सहाऽम्बूनां जलानां राशिः समुद्रस्तस्य समुद्रस्य सलिलं जलमभिमुखं प्रधाविताभ्यां वेगेन सम्मुखं प्रवहद्भ्यां महानदयोर्विशालनदयोरुदकाभ्यां जलाभ्यां सहेव मिलितं सङ्गतम्। अत्र पूर्णोपमालङ्कारः।

भाषा

शत्रु की सेना को कुचलने के बाद, इस विक्रमाङ्कदेव की सेना, परस्पर अहङ्कार से सामने दौड़ पड़ी हुई सोमदेव और राजिग की सेनाओं के साथ, समुद्र का जल, सामने से बह कर आते हुए दो विशाल नदों के जलों के समान, मिल गई अर्थात् जिस प्रकार समुद्र में दो तरफ से आने वाले दो महानद मिल जाते हैं उसी प्रकार दोनों ओर से आने वाली दो सेनाएं विक्रमाङ्कदेव की सेना से गुथ गईं।

मुखमसितपताकया पतन्त्या ध्वजगरुडः परिचुम्बितं दधानः।
वदनपरिगृहीतपन्नगस्य व्यतनुत सत्यगरुत्मतः प्रतिष्ठाम् ॥७०॥

अन्वयः

आपतन्त्या असितपताकया परिचुम्बितं मुखं दधानः ध्वजगरुडः वदन-परिगृहीतपन्नगस्य सत्यगरुत्मतः प्रतिष्ठां व्यतनुत ।

व्याख्या

आपतन्त्या सम्मुखमागच्छन्त्याऽसितपताकया कृष्णवर्णध्वजेन परिचुम्बितं संयुक्तं मुखमग्रभागं दधानो धारयन् ध्वजगरुडः केतुचिह्नभूतोगरुडो वदने मुखे परिगृहीतः संधारितः पन्नगस्सर्पो येन स तस्य मुखधृतसर्पस्य सत्यगरुत्मतो वास्तविकगरुडस्य 'गरुत्मान् गरुडस्ताक्ष्यो वैनतेयः खगेश्वरः' इत्यमरः । प्रतिष्ठां स्थितिं साम्यमित्यर्थः । व्यतनुत प्राप्तवान् विस्तारितवानित्यर्थः । कृष्णत्व-साम्यादसितपताकायां सर्पत्वकल्पना । उपमालङ्कारो, निदर्शना वा ।

भाषा

सामने से आने वाली सेना के काले झण्डे के, गरुड के चिह्न वाले झण्डे के अग्रभाग में मिलने से वह झण्डे में का गरुड, मुख में सर्प को पकड़े हुए सच्चे गरुड़ की शोभा को प्रकट करता था । अर्थात् काला झण्डा मानों काला साँप ही था ।

प्रकटितपटुमौक्तिकावतंस-द्विरदशिरःस्थलसङ्गतिं प्रपद्य ।
अलभत परमार्थसिंहलीलां करिवरकेतुपरिच्युतो मृगेन्द्रः ॥७१॥

अन्वयः

करिवरकेतुपरिच्युतः मृगेन्द्रः प्रकटितपटुमौक्तिकावतंसद्विरदशिरःस्थल-सङ्गतिं प्रपद्य परमार्थसिंहलीलाम् अलभत ।

व्याख्या

करिवरस्य हस्तिश्रेष्ठस्य केतुर्ध्वजस्तस्मात्परिच्युतः परिभ्रष्टो मृगेन्द्रः पताका-संलग्नश्चिह्नभूतः सिंहः प्रकटितानि प्रकाशितानि पटूनि स्थूलान्युज्वलानि च मौक्तिकानि गजमुक्ताफलान्येवाऽवतंसाः शिरोभूषणानि येषां ते द्विरदा गजास्तेषां शिरःस्थलानि शिरांसि तैस्सह सङ्गतिं समागमं प्रपद्य प्राप्य परमार्थो वास्तविकश्चाऽसौ सिंहश्च परमार्थसिंहस्तस्य लीलां विलासमलभत प्राप । गजमौक्तिकाभूषणेषु प्रतिबिम्बरूपेण पतितो ध्वजमृगेन्द्रः परमार्थसिंहलीलां

प्रकटयाञ्चकारेति भावः। यतो मृगेन्द्राः पूर्वं गजशिरांस्येव विदारयन्तीति प्रसिद्धिः। निदर्शनालङ्कारः।

भाषा

श्रेष्ठ हाथी की, सिंह के चिन्ह से अङ्कित ध्वजा में से नीचे आ पड़ा हुआ सिंह, प्रत्यक्ष दिखाई पड़ने वाले बड़े बड़े चमकदार गजमौक्तिक रूपी शिर के आभूषणों से युक्त हाथियों के मस्तकों का समागम प्राप्त कर अथवा शिरोभूषण रूप हाथियों के मस्तकों पर के गजमौक्तिकों के आभूषणों में प्रतिबिम्बित होकर सच्चे सिंह की लीला को अर्थात् हाथी के गण्डस्थल पर सवार होकर उसी को पहिले विदारण करने की शोभा को प्राप्त हुआ।

कथमपि विनिपत्य सञ्चरन्तः क्षतजतरङ्गवतीषु चिन्हमत्स्याः।
सुरयुवतिविलोचनानि संख्ये विदधुरकृत्रिममत्स्यशङ्कितानि ॥७२॥

अन्वयः

संख्ये क्षतजतरङ्गवतीषु कथम् अपि विनिपत्य सञ्चरन्तः चिन्हमत्स्याः सुरयुवतिविलोचनानि अकृत्रिममत्स्यशङ्कितानि विदधुः।

व्याख्या

संख्ये समरे 'मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्। अस्त्रियां समरानीकरणाः कलहविग्रहौ' इत्यमरः। क्षतजस्य रुधिरस्य तरङ्गवतीषु नदीषु रुधिरनदीषु कथमपि केनाऽपि प्रकारेण विनिपत्य पतित्वा सञ्चरन्तः परिभ्रमन्तो वहन्त इत्यर्थः। चिन्हमत्स्याः पताकासंलग्नचिन्हभूतमीनाः सुराणां देवानां युवतयो नार्यस्तासां विलोचनानि नयनान्यकृत्रिममत्स्यैर्यथार्थमीनैः शङ्कितानि तदभिन्नत्वेन सम्भावितानि विदधुश्चक्रुः। अत्र भ्रान्तिमानलङ्कारः।

भाषा

युद्ध में खून की नदियों में किसी प्रकार गिर कर बहने वाली पताका में की चिन्ह भूत मछलियों ने (युद्ध में वीरों को ले जाने के लिये आई हुई) देवों की नारियों के नेत्रों को सच्ची मछलियों के होने की शङ्का उत्पन्न कराई।

रुधिरपटलकर्दमेन दूरं रणभुवि दुर्गमतामुपागतायाम्।
गमनमनिमिषप्रियाजनस्य प्रियमकरोदवलम्बनानपेक्षम् ॥७३॥

अन्वयः

(सः) रुधिरपटलकर्दमेन रणभुवि दूरं दुर्गमताम् उपागतायाम् (सत्याम्) अनिमिषप्रियाजनस्य अवलम्बनानपेक्षं गमनं प्रियम् अकरोत् ।

व्याख्या

(स विक्रमाङ्कदेवः) रुधिरस्य शोणितस्य पटलं समूहस्तस्य कर्दमः पङ्कस्तेन रणभुवि युद्धभूमौ दूरमत्यन्तं दुर्गमतां दुःखेन गन्तुं शक्यतामुपागतायां प्राप्तायां सत्यां न निमिषन्तीत्यनिमिषा देवास्तेषां प्रियाजनस्याऽङ्गनाजनस्य नास्त्यपेक्षा यस्मिंस्तदनपेक्षमवलम्बनस्याऽऽश्रयरूपसाहाय्यस्य पृथिव्यादेरित्यर्थः । अनपेक्षमित्यवलम्बनानपेक्षं गमनं निराश्रया गगनगतिः प्रियमभीष्टमकरोत् कृतवान् । रणस्य दुर्गमत्वाद्देवाङ्गनानां निराश्रया गगनगतिः समरावलोकने तासामिष्टसाधिकाऽभूदिति भावः ।

भाषा

खून के आधिक्य से कीचड़ होजाने से युद्ध भूमि के दुर्गम होजाने पर, देवाङ्गनाओं की आश्रयरहित आकाशगति को उसने उनके लिये अभीष्टसाधक बना दिया । अर्थात् उनको युद्ध देखने में कोई रुकावट न पड़ी ।

प्रहतिनिवहमूर्छितोऽधिरोहः स्वकरटिकर्णपुटानिलैः प्रबुध्य ।
अपरसुभटपातिते प्रहर्तर्यनुशयमापदलब्धवैरशुद्धिः ॥७४॥

अन्वयः

प्रहतिनिवहमूर्छितः अधिरोहः स्वकरटिकर्णपुटानिलैः प्रबुध्य प्रहर्तरि अपरसुभटपातिते (सति) अलब्धवैरशुद्धिः (सन्) अनुशयम् आपत् ।

व्याख्या

प्रहतीनां प्रहरणानां निवहस्समूहस्तेन मूर्छितो विगतचेतनोऽधिरोहो गजारोही योद्धा स्वस्याऽऽत्मनो करटी गजस्तस्य कर्णपुटौ श्रोत्रपुटौ तयोरनिला वायवस्तैः प्रबुध्य संज्ञां प्राप्य प्रहर्तरि स्वस्योपरिप्रहारकर्तरि भटेऽपरोऽन्यः सुभटो योद्धा तेन पातिते प्रहारेण भूमौ निपातिते सति हते सतीत्यर्थः । अलब्धाऽप्राप्ता वैरस्य शत्रुभावस्य शुद्धिर्निष्क्रमो येन सः स्वप्रहर्तारं स्वयमेव यन्न भूमावपातयदिति हेतोरनुशयं पश्चात्तापमापत्प्राप्तः । मयैव करणीयमन्येन कृतमिति सन्तप्तमना अभदिति भावः ।

भाषा

शस्त्रों की मार से बेहोश हाथी सवार, अपने हाथी के कानों की हवा से होश में आकर अपने को मारने वाले को दूसरे ने मारकर गिराया हुआ देख कर बदला न ले सकने के कारण पश्चात्ताप करने लगा।

नयनगतमरातिवीरचूडा-मणिदलनप्रभवं परागमेकः।
करिदशनविदारितात्मवक्षः-स्थलरुधिराञ्जलिभिर्निराचकार ॥७५॥

अन्वयः

एकः नयनगतम् अरातिवीरचूडामणिदलनप्रभवं परागं करिदशनविदारितात्मवक्षःस्थलरुधिराञ्जलिभिः निराचकार।

व्याख्या

एकः कश्चिद्भटो नयनयोर्नेत्रयोर्गतं प्राप्तमरातयः शत्रवो वीराश्शूरा इत्यरातिवीरास्तेषां चूडामणयोऽलङ्कारभूताः शिरोमणयस्तेषां दलनं चूर्णनमेव प्रभव उत्पत्तिस्थानं यस्य स तं परागं धूलिं करिणां हस्तिनां दशनैर्दन्तैर्विदारितं भिन्नमात्मनस्स्वस्य वक्षःस्थलं तस्य रुधिरस्य शोणितस्याऽञ्जलयस्तैर्निराचकार दूरीकृतवान्। येन वीरेण कस्यचिद्भटस्य चूडामणिः खण्डितस्तस्य केनाऽपि करिणा वक्षः स्थलं विदारितमिति तुमुलं युद्धं समजनीति भावः। अतिशयोक्त्यलङ्कारः।

भाषा

किसी योद्धा ने अपने आंख में पड़ी, विपक्षी वीरों के शिरोमणियों को चूर २ कर देने से उत्पन्न धूलि को हाथी के दातों से चीरी हुई अपनी छाती से निकलने वाले खूनों की अंजुलियों से धो डाला। अर्थात् आंख में पड़ी धूल को पानी न होने से खून से ही धोकर सफा कर दिया तात्पर्य यह कि घोर संग्राम होने लगा।

महति समरसङ्कटे भटोऽन्यः प्रतिभटनिर्दलनात्समाप्तशस्त्रः।
अगणितमरणः प्रविश्य वेगादरिकरतः करवालमाचकर्ष ॥७६॥

अन्वयः

महति समरसङ्कटे प्रतिभटनिर्दलनात् समाप्तशस्त्रः अन्यः भटः अगणितमरणः (सन्) वेगात् प्रविश्य अरिकरतः करवालम् आचकर्ष।

व्याख्या

महति विशाले समरसङ्कटे तुमुले रणे प्रवृत्ते सति युद्धसम्बाधेन प्रतिभटानां विपक्षयोद्धृणां निर्दलनान्निःशेषेण खण्डनात् नाशादित्यर्थः। समाप्तं निरन्तर-युद्धकरणान्नष्टं भ्रष्टञ्च शस्त्रमायुधं यस्य स अन्यः कश्चिद्भटस्सुयोद्धाऽगणि-तमकिञ्चित्करत्वेनाऽवबुद्धं मरणं प्राणनाशो येन स एवम्भूतः सन् वेगाज्जवा-त्प्रविश्य शत्रुसैन्यसमूहं प्रसभं समाक्रम्याऽरिकरतो वैरिणो हस्तात्करवालं खड्गमाचकर्षाऽऽकृष्टवान्।

भाषा

घोर संग्राम होने पर विपक्षी शत्रुओं का दलन करन के कारण जिसके शस्त्र समाप्त हो चुके हैं ऐसा एक वीर, मरने की कुछ भी परवाह न कर वेग से शत्रुओं के बीच में घुस कर उनके हाथ से तलवार छीनने लगा।

असुभिरपि यियासुभिः प्रविश्य प्रतिभटमूर्धनि कोऽपि दत्तपादः।
फलममनुत जन्मनोऽपि लब्धं यशसि रतिर्महतां न देहपिण्डे ॥७७॥

अन्वयः

कः अपि असुभिः यियासुभिः अपि (सद्भिः) प्रविश्य प्रतिभटमूर्धनि दत्तपादः (सन्) जन्मनः फलम् अपि लब्धम् अमनुत। महतां रतिः यशसि (भवति) न देहपिण्डे।

व्याख्या

कोऽप्यन्यः कश्चिद्भटोऽसुभिः प्राणैः 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः। यियासुभिरपि गन्तुमिच्छुभिरपि सद्भिरासन्नमरणोऽपीत्यर्थः। प्रविश्य मध्येरणं हठात्प्रवेशं लब्ध्वा प्रतिभटस्य विपक्षवीरस्य मूर्धनि शिरसि दत्तस्स्थापितः पादश्चरणं येन सः सन् जन्मनः स्वजनुषः 'जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः' इत्यमरः। फलमपि प्रयोजनमपि लब्धं प्राप्तममनुत कृतवान् मन्यते स्म। वीराणां निहतशत्रौ पादाघातो महान्पुरुषार्थ इति भावः। महतां महामहिम-शालिनां रतिः प्रीतिर्यशसि कीर्तौ भवति न तु देहपिण्डे शरीरे। अत्रार्थान्तर-न्यासालङ्कारः।

भाषा

किसी वीर ने मरणासन्न अवस्था में भी युद्ध में घुसकर विपक्षी वीर के मस्तक पर लात देकर अपने जीवन का फल भी प्राप्त भया समझा। बड़े लोगों का प्रेम यश में होता है शरीर में नहीं।

विघटितकवचश्चचार कश्चित् प्रतिभटमुज्झितकङ्कटं विलोक्य।
विमलविजयलालसाः खलानामवसरमल्पमपि प्रतिक्षिपन्ति ॥७८॥

अन्वयः

कश्चित् उज्झितकङ्कटं प्रतिभटं विलोक्य विघटितकवचः सन् चचार। विमलविजयलालसाः खलानाम् अल्पम् अपि अवसरं प्रतिक्षिपन्ति।

व्याख्या

कश्चित्सुभट उज्झितः परित्यक्तः कङ्कटः कवचो 'उरच्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्' इत्यमरः। येन स तं प्रतिभटं विपक्षवीरं विलोक्य दृष्ट्वा, मल्लयुद्धाय सन्नद्धं त्यक्तकवचं प्रतिभटं विलोक्येत्यर्थः। विघटितः स्वशरीरात्पृथक् कृतः कवचो येन सः, प्रतिभटेन साकं मल्लयुद्धाय कवचं देहात्पृथक्कृत्य रणेऽवतीर्णस्सन्नित्यर्थः। चचार बभ्राम। विमला शुद्धा विजयस्य लालसाऽतिप्रीतिर्येषां ते वीराः खलानां नीचानां निन्दकानामित्यर्थः। अल्पमपि क्षुद्रमप्यवसरं समयं प्रतिक्षिपन्ति दूरीकुर्वन्ति। विमलविजयलालसास्तथा व्यवहरन्ति यथा खलाः स्वल्पमपि निन्दावसरं न प्राप्नुवन्तीतिभावः।

भाषा

कवच को उतार कर रख देने वाले और मल्लयुद्ध को तयार विपक्षी योद्धा को देखकर कोई वीर अपना कवच उतार कर मल्लयुद्ध के लिये तयार होकर टहलने लगा। विशुद्ध विजय से प्रेम रखने वाले वीर खलों को निन्दा करने का थोड़ा भी अवसर नहीं देते।

रुधिरभृतकपालपङ्क्तिमध्ये मदकरटी विनिपत्य कर्णतालैः।
शिशिरमिव चकार पानपात्र-प्रणयिनमासवमागतस्य मृत्योः ॥७९॥

अन्वयः

मदकरटी रुधिरभृतकपालपङ्क्तिमध्ये विनिपत्य आगतस्य मृत्योः पानपात्रप्रणयिनम् आसवं कर्णतालैः शिशिरम् इव चकार ।

व्याख्या

मदकरटी मदान्धगजो रुधिरेण शोणितेन भृतानि परिपूरितानि कपालानि शिरोऽस्थीनि तेषां पङ्क्तिः श्रेणी तस्या मध्ये विनिपत्य शस्त्रप्रहारेण भग्नस्सन्नधः पतित्वाऽऽगतस्य गजार्थं समुपयातस्य मृत्योर्यमस्य पानपात्रे चषके प्रणयिनं स्थितमासवं मद्यं कर्णतालैः श्रोत्ररूपतालवृन्तैस्तज्जनितपवनैरित्यर्थः । शिशिरमिव शीतलमिव चकार कृतवान् । उत्प्रेक्षालङ्कारः ।

भाषा

कोई मदान्धहाथी खून से भरी गण्डस्थल की हड्डियों की कतार के बीच में, चोट खा जाने से गिरकर, उसको लेने को आए हुए यमराज के कटोरों में के मद्य को मानों अपने कानरूपी ताड़ के पंखों से हवा कर ठण्डा कर रहा था ।

उपरि निपतितः कपालशुक्तेः श्रवणपुटः करिणः कृपाणलूनः ।
समरभुवि कृतान्तपानलीलाचषकपिधानविलासमाससाद ॥८०॥

अन्वयः

समरभुवि कपालशुक्तेः उपरि निपतितः कृपाणलूनः करिणः श्रवणपुटः कृतान्तपानलीलाचषकपिधानविलासम् आससाद ।

व्याख्या

समरभुवि युद्धभूमौ कपालशुक्तेः शिरोऽस्थिरूपशुक्तेरुपरि निपतितः संप्राप्तः कृपाणेन खड्गेन लूनश्छिन्नः करिणो कस्यचिद्गजस्य श्रवणपुटः कर्णपुटः कृतान्तस्य यमस्य 'कृतान्तो यमुनाभ्राता शमनो यमराड्यमः' इत्यमरः । पानस्य मद्यपानस्य लीलाचषकं प्रियपात्रं तस्य पिधानमाच्छादनं तस्य विलासं शोभामाससाद प्राप । निदर्शनालङ्कारः ।

भाषा

समराङ्गण में गण्डस्थल की हड्डी रूपी सीपपर, तलवार से कटकर गिरा

हुआ हाथी का कान, यमराज के मद्यपान के प्रिय प्याले पर ढक्कन की शोभा को प्राप्त हो रहा था ।

अनियतविजयश्रियि प्रवृत्ते चिरमिति तत्र महाहवप्रबन्धे ।
प्रतिसुभटकपालपाटनाय द्विरदमुदञ्चयति स्म राजसूनुः ॥८१॥

अन्वयः

तत्र अनियतविजयश्रियि इति महाहवप्रबन्धे चिरं प्रवृत्ते (सति) राजसूनुः प्रतिसुभटकपालपाटनाय द्विरदम् उदञ्चयति स्म ।

व्याख्या

तत्र तस्मिन्ननियताऽनिश्चिता विजयस्य श्रीर्जयलक्ष्मीर्यस्मिँन्स तस्मिन्नितीत्थं महाहवप्रबन्धे तुमुलसंग्रामे चिरं बहुकालपर्यन्तं प्रवृत्ते सञ्चलिते सति राजसूनुराहवमल्लदेवपुत्रो विक्रमाङ्कदेवः प्रतिसुभटानां विपक्षयोधानां कपालानि शिरांसि तेषां पाटनाय विदारणाय द्विरदं स्वगजमुदञ्चयतिस्म प्रवर्त्तयति स्म ।

भाषा

उस अनिश्चित विजयश्री वाले, इस प्रकार घनघोर युद्ध के चिरकाल तक होते रहने पर राजपुत्र विक्रमाङ्कदेव ने विपक्षी योद्धाओं के मस्तकों को काटने के उद्देश्य से अपने हाथी को आगे बढ़ाया ।

क्षणमुदचलदुच्चलत्पताके द्रविडबले क्षणमग्रजस्य सैन्ये ।
रणभुवि स चचार यत्र यत्र न्यपिबदरातियशांसि तत्र तत्र ॥८२॥

अन्वयः

सः उच्चलत्पताके द्रविडबले क्षणम् उदचलत् । (उच्चलत्पताके) अग्रजस्य सैन्ये क्षणम् उदचलत् । (सः) यत्र यत्र रणभूवि चचार तत्र तत्र अरातियशांसि न्यपिबत् ।

व्याख्या

स विक्रमाङ्कदेव उच्चलन्त्यूर्ध्वं स्फुरन्ती पताका ध्वजो यस्मिँन्स तस्मिन्नुच्चलत्पताके द्रविडबले चोलदेशाधिपतिराजिगसैन्ये क्षणं क्षणमात्रमुदचलदुच्चचाल ।

उच्चलत्पताकेऽग्रजस्य ज्येष्ठभ्रातुः सोमदेवस्य सैन्ये बले क्षणमुदचलत्। स विक्रमाङ्कदेवो यत्र यत्र यस्मिन् यस्मिन् स्थाने रणभुवि युद्धभूमौ चचार जगाम तत्र तत्र तस्मिन् तस्मिँस्थानेऽरातीनां शत्रूणां यशांसि कीर्तीर्न्यपिबत्पपौ। यत्र संग्रामे स गतस्तत्रैव शत्रून् पराजितवानित्यर्थः।

भाषा

वह विक्रमाङ्कदेव झण्डे को फहराने वाले चोल देश के राजा राजिग की सेना में और अपने बड़े भाई सोमदेव की सेना में थोड़ी २ देर के लिये गया। जहाँ २ युद्धभूमि में वह गया वहाँ २ उसने शत्रुओं के यश को पी लिया अर्थात् उनको हराकर निस्तेज कर दिया।

पददलितबृहत्कपालजाले करटिनि तस्य दुरापभाजनानाम्।
सुभटरुधिरसीधुपानकेलिर्व्यघटत तत्र पिशाचसुन्दरीणाम् ॥८३॥

अन्वयः

तत्र तस्य करटिनि पददलितबृहत्कपालजाले (सति) दुरापभाजनानां पिचाशसुन्दरीणां सुभटरुधिरसीधुपानकेलिः व्यघटत।

व्याख्या

तत्र युद्धे तस्य विक्रमाङ्कदेवस्य करटिनि गजे पदैश्चरणैर्दलितानि खण्डितानि बृहन्ति विशालानि बहूनीत्यर्थः। कपालानां कर्पराणां जालानि समूहा येन स तस्मिन्नेवं भूते सति दुरापानि दुर्लभानि भाजनानि चषकापरपर्यायमद्यपात्राणि यासां तास्तासां पिशाचानां सुन्दर्यस्तासां पिशाचिनीनां सुभटानां सुयोधानां रुधिरस्य शोणितस्य शोणितरूपस्येत्यर्थः। सीधोर्मद्यस्य पानकेलिः पानक्रीडा व्यघटत भङ्गमाप खण्डिता बभूवेत्यर्थः। हस्तिना कपालेषु चूर्णितेषु पात्राभावात् पिशाचिनीनां रुधिररूपमद्यपानक्रीडा समाप्तेति भावः।

भाषा

युद्ध में विक्रमाङ्कदेव के हाथी के पांव तले बहुत सी खोपड़ियों के चूर २ हो जाने पर, पानपात्रों को न प्राप्त करने वाली पिशाचिनियों की, योद्धाओं के रुधिर रूपी शराब को पीने की क्रीडा बन्द हो गई।

ध्रुवमरिषु पदं व्यधत्त लक्ष्मीः सुरभिकुशेशयकोशकेलिसक्ता।
नृपसुतकरवाललेखया यन्मधुकरमालिकयेव चुम्ब्यते स्म ॥८४॥

अन्वयः

सुरभिकुशेशयकोशकेलिसक्ता लक्ष्मीः ध्रुवम् अरिषु पदं व्यधत्त। यत् मधुकरमालिकया इव नृपसुतकरवाललेखया चुम्ब्यते स्म।

व्याख्या

सुरभिः सुगन्धिः 'सुरभिर्घ्राणतर्पणः' इत्यमरः। यः कुशेशयस्य कमलस्य "सहस्रपत्रं कमलं शतपत्रं कुशेशयम्' इत्यमरः। कोशः कुड्मलं 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः। तस्मिन्या केलिः क्रीडा तत्र सक्ता संलग्ना लक्ष्मी राज्यलक्ष्मीः, कमलं लक्ष्म्या निवासस्थानमिति हेतोस्तत्र सक्तेत्यर्थः। ध्रुवं निश्चयेनाऽरिषु शत्रुषु शत्रुशिरःस्वित्यर्थः। पदं स्थानं चरणं वा व्यधत्त कृतवती। यद्यस्मात्कारणान्मधुकराणां भ्रमराणां मालिका समूहस्तया भ्रमरश्रेण्येव नृपसुतो विक्रमाङ्कदेवस्तस्य करवाललेखा कृष्णवर्णा खड्गरेखा तया चुम्ब्यते स्म प्रेम्णा परिचुम्बिता बभूव। यतो मधुकरमालिकेव कृष्णवर्णा खड्गरेखा शत्रुशिरःसु पतति तस्मात् कुशेशयसक्ता लक्ष्मीरवश्यमेव शत्रुशिरःसु पदं व्यधत्त। कमलाभावे मधुकरमालागमनासम्भवादिति भावः। अत्रोत्प्रेक्षालङ्कारः।

भाषा

सुगन्धयुक्त कमल की कली में क्रीड़ा करने में आसक्त लक्ष्मी अवश्यमेव शत्रुओं के मस्तकों पर जा बैठी थी। क्योंकि भ्रमर श्रेणी के समान काले रंग की विक्रमाङ्कदेव के तलवार की धार शत्रुओं के शिरों में विद्यमान लक्ष्मी का चुम्बन करती थी। अर्थात् शत्रुओं की गर्दन काटती थी।

अनुकृतसमवर्तिपानलीला-चषककरालकपालशुक्तिमध्ये।
करिदशनपरम्परा निपत्य श्रियमतनोदुपदंशमूलकानाम् ॥८५॥

अन्वयः

करिदशनपरम्परा अनुकृतसमवर्तिपानलीला-चषककरालकपालशुक्ति-मध्ये निपत्य [१]उपदंशमूलकानां श्रियम् अतनोत्।

---

[१] यथा वेणीसंहारनाटके तृतीयाङ्के—"रुधिर प्रिय! गृहाणैतत् हस्तिशिरःकपालसंचितमग्रमांसोपदंशं पिब नवशोणितासवम्।"

व्याख्या

करीणां गजानां दशनानि दन्तास्तेषां परम्परा श्रेणिरनुकृतोऽनुहृतः समवर्तिनो यमस्य 'धर्मराजः पितृपतिः समवर्ती परेतराट्' इत्यमरः। पानलीलाचषको सुरापानपात्रं 'चषकोऽस्त्री पानपात्रम्' इत्यमरः। यैस्तानि करालानि भयङ्कराणि कपालानि शिरोऽस्थीनि 'स्यात्कर्पटः कपालोऽस्त्री' इत्यमरः। तान्येव शुक्तयस्तासां मध्यं तस्मिन्निपत्य पतनं विधायोपदंशमूलकानां मद्यपानान्तराले चर्व्यमाणमूलकानां ('मूली' इति भाषायां प्रसिद्धः।) श्रियं शोभामतनोद्विस्तारयामास। मूलकश्रीसमश्रीविस्ताररूपार्थस्य प्रतीत्या पदार्थनिदर्शनालङ्कारः।

भाषा

हाथियों के दाँतों की कतार, यमराज के शराब पीने के प्याले का अनुकरण करने वाली, भयङ्कर माथे की हडडियाँ रूपी सीपों में गिर कर शराब पीते समय बीच २ में चबाई जाने वाली मूलियों की शोभा दे रही थी।

वशमवनिपतिद्वयं नयन्ती चटुलपृषत्ककटाक्षमालिकाभिः।
क्षितिपतितनयेन वीरलक्ष्मीः सुचिरमनर्त्यत सङ्गराग्ररङ्गे ॥८६॥

अन्वयः

सङ्गराग्ररङ्गे क्षितिपतितनयेन चटुलपृषत्ककटाक्षमालिकाभिः अवनिपतिद्वयं वशं नयन्ती वीरलक्ष्मीः सुचिरम् अनर्त्यत।

व्याख्या

सङ्गरस्य संग्रामस्य 'प्रतिज्ञाजि संविदापत्सु सङ्गरः' इत्यमरः। अग्रमेव रङ्गो नाट्यशाला रङ्गमञ्च इत्यर्थः। तस्मिन् क्षितिपतेराहवमल्लदेवस्य तनयेन पुत्रेण विक्रमाङ्कदेवेन चटुलाश्चञ्चलाः पृषत्का बाणा 'पृषत्कबाणविशिखा अजिह्मगखगाशुगाः' इत्यमरः। एव कटाक्षा नेत्रप्रान्तदर्शनानि 'अपाङ्गौ नेत्रयोरन्तौ कटाक्षोऽपाङ्गदर्शने' इत्यमरः। तेषां मालिकाः पङ्क्तयस्ताभिरवनेः पृथिव्याः पतिः स्वामीत्यवनीपतिः तयोर्द्वयं युगलं राजिगं सोमदेवञ्च वशं स्वाधीनतायां नयन्ती प्रापयन्ती वीरलक्ष्मीर्युद्धवीराणां राजलक्ष्मीः सुचिरं बहुकालमनर्त्यत नर्तनाय प्रवर्तिता। रङ्गमञ्चाधिकारिणा रङ्गमञ्चे सचञ्चलकटाक्षा नर्तकीव विक्रमाङ्कदेवेन समराङ्गणे सचञ्चलबाणवर्षं वीरलक्ष्मीरनर्त्यतेति भावः।

भाषा

युद्ध के अग्रभाग रूपी रङ्गमञ्च पर राजपुत्र विक्रमाङ्कदेव ने चञ्चल बाण रूपी कटाक्षों की पङक्तियों से दोनों राजाओं को अर्थात् राजिग तथा सोमदेव को वश में लाने वाली वीरश्री को चिरकाल तक नचाया। अर्थात् दोनों राजाओं को बाण मार कर अपनी वीरता से अपने काबू में लाते हुए चिरकाल तक घोर संग्राम किया।

कुलिशनिशितकङ्कपत्रभिन्ना-स्त्रिभुवनभीमभुजस्य राजसूनोः।
प्रतिभटकरटिस्थिताः प्रवीराः प्रणतिपरा इव सम्मुखा निपेतुः ॥८७॥

अन्वयः

त्रिभुवनभीमभुजस्य राजसूनोः कुलिशनिशितकङ्कपत्रभिन्नाः प्रतिभट-करटिस्थिताः प्रवीराः प्रणतिपराः इव सम्मुखाः निपेतुः।

व्याख्या

त्रयाणां भुवनानां समाहारस्त्रिभुवनं लोकत्रयं तस्मिन् भीमो भयङ्करो 'भयङ्करं प्रतिभयं घोरं भीमं भयानकम्' इत्यमरः। भुजो बाहुर्यस्य स तस्य राजसूनो राजपुत्रस्य विक्रमाङ्कदेवस्य कुलिशवद्वज्रवन्निशितं तीक्ष्णं कङ्कपत्रं बाणविशेषस्तेन भिन्ना विदारिताः प्रतिभटानां शत्रुपक्षीययोधानां करटिनो गजास्तेषु स्थिताः समारूढाः प्रवीराः प्रकृष्टवीराः प्रणतिपरा इव प्रणामप्रवणा इव प्रणमन्त इवेत्यर्थः। सम्मुखा अभिमुखाः पुरतो निपेतुर्भूमौ निपतितवन्तः। गजोपरिस्थिताः प्रवीरा अस्य बाणैः क्षतास्तस्य पुरतो निपेतुरिति भावः। उत्प्रेक्षालङ्कारः।

भाषा

तीनों लोकों में भयङ्कर भुजावाले अर्थात् भुजशक्ति वाले उस राजकुमार विक्रमाङ्कदेव के वज्र के समान तीखे २ कङ्कपत्रों से घायल शत्रुपक्षीय योधाओं के हाथियों पर बैठे हुए प्रधान वीरगण मानों विक्रमाङ्कदेव को प्रणाम करते हुए उसके सामने (हाथियों पर से) गिरने लगे।

द्विरदपतिरमुष्य शत्रुसेना-भटमुखपद्मविमर्दकेलिकालः।
झटिति रणसरश्चकार लक्ष्मी-करधृतविभ्रमपुण्डरीकशेषः ॥८८॥

अन्वयः

अमुष्य शत्रुसेनाभटमुखपद्मविमर्दकेलिकालः द्विरदपतिः रणसरः झटिति लक्ष्मीकरधृतविभ्रमपुण्डरीकशेषं चकार ।

व्याख्या

अमुष्याऽस्य विक्रमाङ्कदेवस्य शत्रूणामरीणां सेना चमूस्तस्यां ये भटा योधास्तेषां मुखान्याननान्येव पद्मानि कमलानि तेषां विमर्दश्चूर्णनमेव केलिः क्रीडा तदर्थं कालो यमो विनाशकारित्वात् । 'कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः' इत्यमरः । द्विरदपतिर्गजनाथो रण एव संग्राम एव सरस्तडागस्तत् रणसरो युद्धतडागो झटिति शीघ्रं लक्ष्म्याः श्रियः करेण हस्तेन धृतं धारितं विभ्रमपुण्डरीकं विलाससिताम्भोजं 'पुण्डरीकं सिताम्भोजम्' इत्यमरः । एव शेषोऽवशिष्टांशो यस्य तच्चकार निष्पादितवान् । रूपकालङ्कारः ।

भाषा

शत्रु सेना के योद्धाओं के मुख कमलों को चूर २ कर देने की क्रीड़ा में यमस्वरूप, विक्रमाङ्कदेव के श्रेष्ठ हाथी ने रणरूपी तालाब को जल्दी से महालक्ष्मी के हाथ में विद्यमान विलास का श्वेतकमल मात्र ही शेष रह गया हो, ऐसा कर दिया । अर्थात् लक्ष्मी के हाथ के कमल को छोड़ कर शत्रु के मुख रूपी सब कमलों को रणरूपी सरोवर में नष्ट कर दिया ।

धृतसुभटकरङ्कमङ्कवर्ति-द्विरदघटाविकटास्थिचक्रवालम् ।
रणमनणु कृतान्तभुक्तशेष-प्रणयि बभूव शिवासहस्रभोग्यम् ॥८६॥

अन्वयः

धृतसुभटकरङ्कम् अङ्कवर्तिद्विरदघटाविकटास्थिचक्रवालं कृतान्तभुक्तशेषप्रणयि शिवासहस्रभोग्यम् अनणु रणं बभूव ।

व्याख्या

धृता गृहीताः सुभटानां सुयोधानां करङ्का अस्थिपञ्जरा येन तत् । अङ्के क्रोडे वर्त्तीनि गतानि द्विरदानां गजानां विकटानि भयङ्कराण्यस्थिचक्रवालान्यस्थिसमूहा यस्य तत्, कृतान्तस्य यमस्य भुक्तं भोजनं तस्य शेषस्तस्य प्रणयि स्थानं शेषयुक्तमित्यर्थः । तद्यमराजभक्षितमांसशिष्टयुक्तमिति भावः । शिवानां शृगालीनां सहस्रं तेन भोग्यं भोगयोग्यं रणं युद्धमनणु बहुलं बभूव जातम् ।

भाषा

बड़े बड़े योद्धाओं के अस्थिपञ्जरों को धारण करने वाला, (गोद में) पास ही में हाथियों के समूह की भयङ्कर हड्डियों के ढेर को रखने वाला, यमराज के खाने से बचे हुए मांस वाला और हजारों शृगालियों के उपभोग के योग्य, एक बहुत बड़ा युद्ध हुआ ।

किमपरमुपरि प्रतापभाजां विहतपदः स बभञ्ज राजयुग्मम् ।
द्रविडपतिरगात्क्वचित्पलाय्य न्यविशत बन्धनधाम्नि सोमदेवः ॥९०॥

अन्वयः

किम् अपरम् । प्रतापभाजाम् उपरि विहितपदः सः राजयुग्मं बभञ्ज । द्रविडपतिः पलाय्य क्वचित् गतः । सोमदेवः बन्धनधाम्नि न्यविशत ।

व्याख्या

किमपरमन्यत्किं वक्तव्यम् । प्रतापं प्रभावं भजन्ति सेवन्ते ते प्रतापभाजस्तेषां प्रभावशालिनामुपरि मस्तके विहितं स्थापितं पदं चरणं येन सः स्थापित चरणः स विक्रमाङ्कदेवो राज्ञोर्द्रविडपतिराजिगसोमदेवयोर्युग्मं युगलं बभञ्ज सम्मर्दितवान् । द्रविडपती राजिगः पलाय्य द्रुतगत्या क्वचिदज्ञातस्थानं गतो जगाम । सोमदेवो बन्धनस्य धाम स्थानं तस्मिन् कारागारे न्यविशत निविष्टवान् ।

भाषा

अब और दूसरा क्या कहना है ? प्रतापियों के मस्तक पर चरण रखने वाले विक्रमाङ्कदेव ने राजिग और सोमदेव, इन दोनों राजाओं को कुचल डाला । द्रविड़ देश का राजा राजिग भागकर कहीं अज्ञात स्थान में चला गया । सोमदेव कैद खाने में बन्द हो गया ।

उभयनरपतिप्रतापलक्ष्म्यौ विलुलुठतुश्चरणद्वये तदीये ।
त्रिभुवनमहनीयबाहुवीर्यद्रविणविभूतिमतां किमस्त्यसाध्यम् ॥९१॥

अन्वयः

उभयनरपतिप्रतापलक्ष्म्यौ तदीये चरणद्वये विलुलुठतुः । त्रिभुवनमहनीयबाहुवीर्यद्रविणविभूतिमतां किम् असाध्यम् (अस्ति) ।

व्याख्या

उभयनरपत्योः सोमदेवराजिगयोः प्रतापलक्ष्म्यौ प्रभावराजलक्ष्म्यौ राजिगसोमदेवोभयनरदेवयोः प्रभावसम्पत्ती तस्येदं तदीयं तस्मिन् विक्रमाङ्कदेवसम्बन्धिनि चरणद्वये पादयुग्मे विलुलुठतुर्विलोठनं चक्रतुः। त्रयाणां भुवनानां समाहारस्त्रिभुवनं तस्मिल्लोकत्रये महनीयं पूजनीयं प्रशंसनीयमित्यर्थः। बाह्वोर्भुजयोर्वीर्यं बलं द्रविणं धनं विभूतिरैश्वर्यञ्चाऽस्ति येषु ते तेषामसाधारणपुरुषाणां कृते किमसाध्यमप्राप्यमस्ति न किमपीत्यर्थः। अत्रार्थान्तरन्यासालङ्कारः।

भाषा

दोनो ही राजाओं के प्रताप और राजलक्ष्मी विक्रमाङ्कदेव के चरणों पर लोटने लगीं। तीनों लोकों में पूजनीय बाहुबल, धन और ऐश्वर्य से युक्त असाधारण पुरुषों के लिये कौन कार्य असाध्य है अर्थात् कोई भी कार्य असाध्य नहीं है।

विहितसमरदेवतासपर्यः परिकरितः क्षितिपालयुग्मलक्ष्म्या।
अथ शिथिलितकङ्कटस्तटान्त-स्थितकटकां स जगाम तुङ्गभद्राम् ॥९२॥

अन्वयः

अथ विहितसमरदेवतासपर्यः क्षितिपालयुग्मलक्ष्म्या परिकरितः शिथिलितकङ्कटः सः तटान्तस्थितकटकां तुङ्गभद्रां जगाम।

व्याख्या

अथ राजद्वयविजयानन्तरं विहिता कृता समरदेवतायाः संग्रामाधिष्ठातृदेवतायाः सपर्या पूजा 'पूजा नमस्यापचितिः सपर्या चार्हणाः समाः' इत्यमरः। येन सः, क्षितिपालयो राज्ञोः सोमदेवराजिगयोर्युग्मं युगलं तस्य लक्ष्मी राजलक्ष्मीस्तया परिकरितः परिवेष्टितस्समालिङ्गित इत्यर्थः। शिथिलितः श्लथीकृतः कङ्कटः कवचो येन स त्यक्तकवच इत्यर्थः। स विक्रमाङ्कदेवस्तटान्ते तीरप्रान्ते स्थितं प्राप्तं कटकं सैन्यं यस्याः सा तां तुङ्गभद्रां तन्नाम्नीं नदीं जगाम ययौ।

भाषा

दोनों राजाओं को परास्त करने के अनन्तर संग्राम की देवता का पूजन करने वाला, दोनों राजाओं की राजलक्ष्मी से आलिङ्गित अर्थात् राजलक्ष्मी को

प्राप्त करने वाला और युद्ध समाप्त हो जाने से आवश्यकता न रहने के कारण कवच को ढीला करने वाला विक्रमाङ्कदेव, तट पर विद्यमान सेना वाली तुङ्गभद्रा नदी पर गया।

वितरितुमिदमग्रजस्य सर्वं पुनरुपजातमतिः स राजपुत्रः।
तुहिनकिरणखण्डमण्डनेन स्फुरदशरीरगिरा रुषा न्यषेधि ॥६३॥

अन्वयः

अग्रजस्य इदं सर्वं पुनः वितरितुम् उपजातमतिः सः राजपुत्रः तुहिनकिरणखण्डमण्डनेन रुषा स्फुरदशरीरगिरा न्यषेधि।

व्याख्या

अग्रजस्य ज्येष्टभ्रात्रे सोमदेवाय 'अग्रजस्येत्यत्र सम्बन्धसामान्ये षष्ठी। इदं सर्वं राज्यादिकं पुनर्वितरितुं समर्पयितुमुपजाता समुत्पन्ना मतिर्बुद्धिर्यस्य स उपजातमतिः स राजपुत्रो नृपसुतो विक्रमाङ्कदेवस्तुहिनकिरणः शीतमयूखश्चन्द्रो मण्डनं शिरोभूषणं यस्य स तेन शङ्करेण रुषा क्रोधेन स्फुरन्ती प्रकटिताऽशरीरा देहरहिता गीर्वाणी 'गीर्वाग्वाणी सरस्वती' इत्यमरः। तयाऽऽकाशवाण्या न्यषेधि निवारितः।

भाषा

अपने बड़े भाई सोमदेव को उसका राज्य आदि फिर से लौटा देने की उत्पन्न भई हुई बुद्धि वाले विक्रमाङ्कदेव को चन्द्रमा के खण्ड को अपने मस्तक पर आभूषण के रूप में धारण करने वाले भगवान् शंकर ने क्रोधपूर्वक आकाशवाणी द्वारा मने किया।

अथ विक्रमाङ्कदेवस्य राज्याभिषेकं कुलकेन वर्णयति कविः—

मुखपरिचितराजहंसभङ्ग्या सरसिरुहेष्विव पूरयत्सु शङ्खान्।
सरिति घटिकयेव शोधयन्त्यां प्रतिफलितार्कमिषेण लग्नवेलाम् ॥६४॥

अन्वयः

मुखपरिचितराजहंसभङ्ग्या सरसिरुहेषु शङ्खान् पूरयत्सु इव, सरिति प्रतिफलितार्कमिषेण घटिकया लग्नवेलां शोधयन्त्याम् इव (विक्रमादित्यदेवोऽभिषेकमलभतेति ९८ संख्याकश्लोकेन सम्बन्धः।)

व्याख्या

मुखे आननेऽग्रभागे वा परिचिता स्नेहमापन्नाः स्थिता राजहंसा मरालराजाः 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैस्सिता' इत्यमरः। तेषां भङ्ग्या व्याजेन सरसी-रुहेषु कमलेषु 'पङ्केरुहं तामरसं सारसं सरसीरुहम्' इत्यमरः। शङ्खान् कम्बून् पूरयत्सु सत्सु ध्वनयत्सु सत्स्विव, सरति नद्यां प्रतिफलितो जले प्रतिबिम्बितोऽर्कः सूर्यस्तस्य मिषेण व्याजेन घटिकया समयसूचकघटीयन्त्रेण लग्नवेलामभिषेकस्य शुभमुहूर्तं शोधयन्त्यामिव विचारयन्त्यां सत्यामिव (विक्रमादित्यदेवोऽभिषेकमल-भतेत्यनेन सम्बन्धः।) सापन्हवोत्प्रेक्षालङ्कारः।

भाषा

कमलों के मुख पर या अग्रभागों में प्रेमपूर्वक बैठे हुए राजहंसों के मिष से मानों कमलों के शंखों को बजाते रहने पर और नदी के जल में प्रतिबिम्बित सूर्य बिम्ब के मिष से मानों नदी के, घटिका देखकर शुभमुहूर्त का विचार करते रहने पर (विक्रमाङ्कदेव का राज्याभिषेक हुआ।)

अतिशिशिरतया मरुत्सु भक्त्या कुलसरितामिव वारि धारयत्सु।
नभसि विकरतीव गाङ्गमम्भः पवनसमाहृतशीकरच्छलेन ॥६५॥

अन्वयः

मरुत्सु अतिशिशिरतया भक्त्या कुलसरितां वारि धारयत्सु (सत्सु) इव, नभसि पवनसमाहृत [illegible] गाङ्गम् अम्भः विकरति (सति) इव (विक्रमादित्यदेवोऽभिषेकमलभतेत्यन्वयः)

व्याख्या

मरुत्सु वायुष्वतिशिशिरतयाऽतिशैत्येन भक्त्या पूज्यत्वप्रयुक्तानुरागेण कुल-सरितां गङ्गादिपवित्रनदीनां वारि जलं धारयत्सु वहत्सु सत्स्विव, नभस्याकाशे पवनेन वायुना समाहृताः समानीताः शीकरा अम्बुकणाः 'शीकरोऽम्बुकणाः स्मृताः' इत्यमरः। तेषां छलेन व्याजेन गङ्गाया इदं गाङ्गमाकाशगङ्गासम्बन्ध्यम्भो जलं विकिरति विक्षिपति सतीव (विक्रमादित्यदेवोऽभिषेकमलभतेति)।

भाषा

वायुओं के अत्यन्त ठंडे होने से मानों उनके द्वारा भक्तिपूर्वक गङ्गादि कुल नदियों से (अभिषेक के लिए) लाए गए पवित्र जलों को धारण करते रहने

पर, और आकाश के वायुओं द्वारा लाए हुए जल कणों के मिष से मानों आकाशगङ्गा के जल को छिड़कते रहने पर (विक्रमाङ्कदेव का राज्याभिषेक हुआ।)

अतिविशदतया दिशां मुखेषु स्मितमिव केतकमित्रमुद्वहत्सु ।
निखिलभुवनमानसेषु हर्ष-प्रसरवशेन नितान्तमुत्सुकेषु ॥६६॥

अन्वयः

दिशां मुखेषु अतिविशदतया केतकमित्रं स्मितम् उद्वहत्सु (सत्सु) इव निखिलभुवनमानसेषु हर्षप्रसरवशेन नितान्तम् उत्सुकेषु (सत्सु) (विक्रमादित्यदेवोऽभिषेकमलभतेत्यन्वयः।)

व्याख्या

दिशां ककुभां 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। मुखेष्वाननेष्वग्रभागेषु वाऽतिविशदतयाऽतिनैर्मल्येन केतक्याः पुष्पं केतकं तस्य मित्रं शुक्लत्वात्केतकीपुष्पसदृशं स्मितमीषद्धास्यमुद्वहत्सु धारयत्सु सत्स्विव, दिक्षु नैर्मल्यं प्राप्तास्वित्यर्थः। निखिलभुवनानां सकललोकस्थितजनानां मानसानि मनांसि तेषु सकललोकगतजनमनःसु हर्षस्याऽऽनन्दस्य प्रसरो विस्तारस्तस्य वशेन कारणेन नितान्तमत्यन्तमुत्सुकेषु समुत्कण्ठितेषु सत्सु (विक्रमादित्यदेवोऽभिषेकमलभतेति।)

भाषा

दिशाओं के अत्यन्त निर्मल होने से मानों श्वेत केवड़े के फूलों के समान उनके मुस्कराते रहने पर और समस्त लोकों के मनुष्यों के मनों में आनन्द का संचार होने के कारण उनके उत्कण्ठित हो उठने पर (विक्रमाङ्कदेव का राज्याभिषेक हुआ।)

वरकरिषु गभीरदुन्दुभीनां ध्वनिमिव संजनयत्सु गर्जितेन ।
दिशि दिशि तुरगेषु सान्द्रशङ्ख-स्वनकमनीयसहर्षहेषितेषु ॥६७॥

अन्वयः

वरकरिषु गर्जितेन गभीरदुन्दुभीनां ध्वनिं संजनयत्सु (सत्सु) इव,

दिशि दिशि तुरगेषु सान्द्रशङ्खस्वनकमनीयसहर्षहेषितेषु (सत्सु) (विक्रमादित्यदेवोऽभिषेकमलभतेत्यन्वयः ।)

व्याख्या

वरकरिषु श्रेष्ठगजेषु गर्जितेन बृंहितेन गभीरदुन्दुभीनां गम्भीरभेरीणां 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः । ध्वनिं शब्दं संजनयत्सु सत्स्विव, दिशि दिशि प्रतिदिशं तुरगेषु घोटकेषु सान्द्रा घना गम्भीरा वा शङ्खानां कम्बूनां स्वनाः शब्दा इव कमनीयानि मनोज्ञानि सहर्षाणि प्रमोदसहितानानि हेषितानि तुरगरवाः येषां ते तेषु गम्भीरकम्बुशब्दमनोज्ञसप्रमोदहेषितेषु सत्सु (विक्रमादित्यदेवोऽभिषेकमलभतेति ।

भाषा

श्रेष्ठ हाथियों की गर्जना से मानों उनके भेरीनाद करते रहने पर और चारो ओर घोड़ों के, गम्भीर शङ्खों की ध्वनि के समान कर्णप्रिय सहर्ष हिनहिनाते रहने पर (विक्रमाङ्कदेव का राज्याभिषेक हुआ ।)

अथ सुरपथवल्गद्दिव्यभेरीनिनादं
प्रशमितपरितापं भर्तृलाभात्पृथिव्याः ।
अलभत चिरचिन्ताचान्तचालुक्यलक्ष्मी-
क्लममुषमभिषेकं विक्रमादित्यदेवः ॥९८॥

अन्वयः

अथ विक्रमादित्यदेवः पृथिव्याः भर्तृलाभात् प्रशमितपरितापं सुरपथवल्गद्दिव्यभेरीनिनादं चिरचिन्ताचान्तचालुक्यलक्ष्मीक्लममुषम् अभिषेकम् अलभत ।

व्याख्या

अथ समरविजयानन्तरं विक्रमादित्यदेवो विक्रमाङ्कदेवो राजकुमारः पृथिव्याः क्षमाया भर्तृलाभात् सुस्वामिप्राप्त्या प्रशमितः शान्ति प्रापितः परितापस्सन्तापो दुःखं वा येन स तं दूरीकृतदुःखं, सुरपथे गगने वलगन् समुत्कर्षं प्राप्नुवन्दिव्यायाः स्वर्गीयाया भेर्या निनादः शब्दो यस्मिन् स तं गगनप्रसरत्स्वर्गीयभेरीनिस्वनं, चिराच्चिरकालादारभ्य चिराय वा व्याप्ता चिन्ता स्वस्वामिपराजयजन्यशोको-

ऽथवा सुस्वामिप्राप्त्यर्थचिन्ता तयाऽऽचान्ता परिपूर्णा चालुक्यलक्ष्मीश्चालुक्य-राजवंशश्रीस्तस्या क्लमं ग्लानिं मुष्णातीति चिरचिन्ताचान्तचालुक्यलक्ष्मीक्लममुट् तमभिषेकं राज्याभिषेकमलभत प्राप्तवान् ।

भाषा

युद्ध में विजय प्राप्त होने के अनन्तर राजकुमार विक्रमाङ्कदेव ने, पृथिवी को अच्छा स्वामी मिल जाने से, अपने स्वामिओं के पराजय के सम्पूर्ण दुःखों को दूर कर देने वाले, आकाश में गुँजने वाले स्वर्गीय भेरी की ध्वनि से युक्त, और चिरकाल तक अच्छे स्वामी (राजा) को प्राप्त करने की चिन्ता में डूबी हुई चालुक्य वंशीय राजाओं की राज्यलक्ष्मी के मनोमालिन्य को दूर कर देनेवाले, राज्याभिषेक को प्राप्त किया ।

इति पञ्चभिः श्लोकैः कुलकम् ।

श्रीचालुक्यनरेन्द्रसूनुरनुजं तत्रैव पुण्ये दिने
कारुण्यातिशयादसूत्रयदसौ पात्रं महत्याः श्रियः ।
दासी यद्भवनेषु विक्रमधनक्रीता ननु श्रीरियं
तेषामाश्रितपोषणाय गहनं किं नाम पृथ्वीभुजाम् ॥६६॥

अन्वयः

असौ श्रीचालुक्यनरेन्द्रसूनुः तत्र पुण्ये दिने एव कारुण्यातिशयात् अनुजं महत्याः श्रियः पात्रम् असूत्रयत् । यद्भवनेषु विक्रमधनक्रीता इयं श्रीः दासी ननु, तेषां पृथ्वीभुजाम् आश्रितपोषणाय किं नाम गहनम् (अस्ति) ।

व्याख्या

असौ श्रिया विराजितस्य चालुक्यनरेन्द्रस्याऽऽहवमल्लदेवस्य सूनुः पुत्रो विक्रमाङ्कदेवस्तत्र तस्मिन् पुण्ये पावने सुन्दरे वा 'पुण्यं तु चार्वपि' इत्यमरः । दिने राज्याभिषेकदिवस एव कारुण्यस्य दयाया अतिशय आधिक्यं तस्मादत्यधिक-दयालुत्वादनुजं स्वकनिष्ठभ्रातरं सिंहदेवं महत्या विशालायाः श्रियो लक्ष्म्याः पात्रं भाजनमसूत्रयत् कृतवान् । तस्मै वनवासिमण्डलाधीश्वरं चकारेति भावः । येषां राज्ञां भवनेषु सदनेषु विक्रमधनेन पराक्रमरूपद्रव्येण क्रीता, मूल्येन स्वायत्ती-

कृतेयं श्री राज्यलक्ष्मीर्दासी सेविका ननु निश्चयेन, तेषां पृथ्वीभुजां भूभुजामाश्रितानामवलम्बितानामाश्रयं विधाय वसतां सिंहदेव-महाकविप्रभृतीनां पोषणाय भरणाय किं नाम गहनं कठिनम्। तेषां भरणपोषणेष्वेतादृशानां महाप्रतापिनां राज्ञां किमपि काठिन्यं नास्तीति भावः।

भाषा

इस श्रीमान् आहवमल्लदेव के पुत्र विक्रमाङ्कदेव ने उसी शोभन दिन ही अत्यन्त दयालुता के कारण अपने छोटे भाई सिंहदेव को विशाल सम्पत्ति का भाजन बनाया। अर्थात् उसे वनवासिमण्डल का राजा बना दिया। जिन राजाओं के घरों में पराक्रम रूप धन से खरीदी हुई यह लक्ष्मी निश्चय पूर्वक दासी बन कर रहती है उन राजाओं को अपने आश्रितों का (सोमदेव तथा अन्य महाकवि गुणी आदि का) पालन पोषण करना क्या कठिन है।

इति श्री त्रिभुवनमल्लदेव-विद्यापति-काश्मीरकभट्ट-महाकवि-बिल्हणविरचिते विक्रमाङ्कदेवचरिते महाकाव्ये षष्ठः सर्गः।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाजबुधोत्तमात्समुदितः श्रीविश्वनाथः सुधीः।
चक्रे रामकुबेर—पण्डितवरात्सम्प्राप्तसाहाय्यक—
टीकायुग्ममिदं रमाकरुणया सर्गेऽत्र षष्ठे नवम्॥

ॐ शान्तिः शान्तिः शान्तिः।

॥ श्रीः ॥

महाकवि श्री बिल्हण-विरचितं

विक्रमाङ्कदेवचरितम्

सप्तमः सर्गः ।

स सर्वमावर्ज्य रिपुप्रमाथी मनोरथानामथ पूरणेन ।
परिभ्रमन्युद्धकुतूहलेन दिग्दन्तिशेषाः ककुभश्चकार ॥१॥

अन्वयः

अथ रिपुप्रमाथी सः मनोरथानां पूरणेन सर्वम् आवर्ज्य युद्धकुतूहलेन परिभ्रमन् (सन्) ककुभः दिग्दन्तिशेषाः चकार ।

व्याख्या

अथ विक्रमाङ्कदेवस्य राज्याभिषेकानन्तरं रिपूणां शत्रूणां प्रमाथी मर्दकः स विक्रमाङ्कदेवो मनोरथानामभिलाषाणां पूरणेन सफलीकरणेन सर्वं जनसमूहमावर्ज्य वशीकृत्य युद्धस्य समरस्य कुतूहलमुत्कण्ठा तेन परिभ्रमन् परितो विचरन् ककुभो दिशः 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' । दिशां दन्तिनो दिग्दन्तिनो दिग्गजा एव शेषा अवशिष्टा यासु ताश्चकार सम्पादितवान् । सकलगजाहरणाद्दिग्गजा एवाऽवशिष्टा आसन्निति भावः । सर्गेऽस्मिन्निन्द्रवज्राच्छन्दः 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति लक्षणात् ।

भाषा

(विक्रमाङ्कदेव के) राज्याभिषेक के अनन्तर, शत्रु का मर्दन करने वाले विक्रमाङ्कदेव ने मनोरथों को पूर्ण कर, सब जनों को अपने अनुकूल बना कर, युद्ध की उत्कण्ठा से चारों ओर घूमते हुए दिशाओं को, दिग्गज ही अवशिष्ट हैं जिनमें ऐसा बना दिया । अर्थात् चारो दिशाओं के हाथियों को अपने स्वाधीन कर लेने से केवल दिग्गज (दिशाओं के हाथी) ही अवशिष्ट रह गये ।

गते समाप्तिं नरनाथचक्रे निचोलकारासितचापदण्डः ।
निर्वाप्य चोलस्य पुनः प्रतापं क्रमेण कल्याणमसौ विवेश ॥२॥

अन्वयः

असौ चोलस्य प्रतापं निर्वाप्य नरनाथचक्रे क्रमेण समाप्तिं गते (सति) निचोलकारासितचापदण्डः (सन्) पुनः कल्याणं विवेश ।

व्याख्या

असौ विक्रमाङ्कदेवो चोलस्य चोलदेशाधिपस्य प्रतापं प्रभावं निर्वाप्य शान्ति नीत्वा नराणां मनुष्याणां नाथाः स्वामिनस्तेषां चक्रं समूहस्तस्मिन् राजसमूहे क्रमेण शनैः समाप्ति गते पराजयं प्राप्ते सति निचोल आवरकम् ("खोल" इति भाषायां प्रसिद्धः ।) एव कारा गुप्तिगृहं 'कारास्याद्बन्धनालये' इत्यमरः । तस्यामासितो निवेशितश्चापदण्डो धनुर्दण्डो येन सः । एवम्भूतस्सन् पुनर्मुहुः कल्याणं कल्याणकटकपुरं विवेश प्रविष्टवान् समाजगामेत्यर्थः । अत्र रूपकालङ्कारः ।

भाषा

विक्रमाङ्कदेव ने, चोल देश के राजा के प्रताप को ठंडा कर अर्थात् उसे हराकर, सम्पूर्ण राजाओं को क्रम से पराजित कर देने पर, अपने धनुष्य को खोल में रखकर फिर से कल्याण कटक पुर में प्रवेश किया ।

अत्रान्तरे मन्मथबालमित्रं लतावधूविभ्रमसूत्रकारः ।
स्थानोपदेशी पिकपञ्चमस्य शृङ्गारबन्धुर्मधुराविरासीत् ॥३॥

अन्वयः

अत्रान्तरे मन्मथबालमित्रं लतावधूविभ्रमसूत्रधारः पिकपञ्चमस्य स्थानोपदेशी शृङ्गारबन्धुः मधुः आविरासीत् ।

व्याख्या

अत्रान्तरेऽस्मिन्नवकाशे मन्मथस्य कामदेवस्य 'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः' इत्यमरः । बालमित्रं बालसखा, लता एव वध्वः कान्तास्तासां विभ्रमस्य विलासोपदेशस्य सूत्रधारो नाट्याचार्यः, पिकानां कोकिलानां 'वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः । पञ्चमः पञ्चमस्वरस्तस्य 'पिकाः

गायन्तिपञ्चमम्' इति । स्थानस्य शुद्धोच्चारणोपयुक्त-मुखस्थित-कण्ठ ताल्वाद्य-भिघातस्थानस्योपदेश्युपदेशकः सङ्गीताचार्यः, शृङ्गारस्य शृङ्गाररसस्य बन्धु-रुद्दीपको मधुर्वसन्त आविरासीत् समाजगाम । मालारूपकमलङ्कारः ।

भाषा

इसी बीच में कामदेव का लंगोटिया साथी, लता रूपी स्त्रियों को विभिन्न विलासों का उपदेश देने वाला, नाट्याचार्य; कोयल के पञ्चम स्वर के शुद्ध उच्चारण के लिये कण्ठ तालु आदि स्थानों की शिक्षा देने वाला सङ्गीताचार्य; शृङ्गार रस को उद्दीप्त करने वाला; वसन्त ऋतु आ गया ।

शीततुंभीत्या विविशुः समस्ताः किं कन्दरासीमनि चन्दनाद्रेः ।
यन्निःसरन्ति स्म हिमव्यपाये दिवा च रात्रौ च ततः समीराः ॥४॥

अन्वयः

समस्ताः समीराः किं चन्दनाद्रेः कन्दरासीमनि शीततुंभीत्या विविशुः यत् हिमव्यपाये (ते) दिवा च रात्रौ च ततः निःसरन्ति स्म ।

व्याख्या

समस्तास्सकलास्समीरा वायवः किं चन्दनाद्रेर्मलयपर्वतस्य कन्दरासीमनि दरीमध्ये 'दरी तु कन्दरो वाऽस्त्री' इत्यमरः । शीततुंभीत्या शिशिरर्तुभयेन विविशुः प्रविष्टाः । यद्यस्मात्कारणात् हिमस्य शिशिरर्तोर्व्यपाये समाप्तौ ते पवना दिवा दिने च रात्रौ च निशायाञ्च 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः । ततश्चन्दनाद्रेर्निःसरन्ति स्म निर्गच्छन्ति स्म । कन्दरासु प्रवेशे शीततुंभीतेर्हेतुत्वेनोत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

सम्पूर्ण वायु क्या शिशिर ऋतु के (थण्डे के) भय से मलयाचल की कन्दराओं में छिप कर बैठे थे ? क्योंकि शिशिर ऋतु के (जाड़े के) बीतते ही वे वायु रात दिन मलयाचल से निकलते ही चले आ रहे थे ।

कृतप्रकोपाः पवनाशनानां निवासदानादिव पन्नगानाम् ।
विनिर्ययुश्चन्दनशैलकुञ्जादाशामुदीचीं प्रति गन्धवाहाः ॥५॥

अन्वयः

गन्धवाहाः पवनाशनानां पन्नगानां निवासदानात् कृतप्रकोपाः इव (सन्तः) चन्दनशैलकुञ्जात् उदीचीम् आशां प्रति विनिर्ययुः ।

व्याख्या

गन्धवाहा अनिलाः 'गन्धवाहानिलाशुगाः' इत्यमरः । पवनो वायुरशनं भोजनं येषां ते तेषां वायुभक्षकाणां पन्नगानामुरगाणां 'उरगः पन्नगो भोगी जिह्मगः पवनाशनः' इत्यमरः । निवासस्य स्थितेर्दानं तस्मात् कृतः प्रदर्शितः प्रकोपः क्रोधो यैस्तेऽमर्षयुक्तास्सन्त इवाऽस्मद्भक्षका एवाऽत्र निवसन्ति ततोऽत्राऽस्मन्निवासो न युक्त इति हेतोः कुपिताः सन्त इवेत्यर्थः । चन्दनशैलस्य मलयाचलस्य कुञ्जान्निकुञ्जात् 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः । उदीचीमुत्तरामाशां दिशं प्रति विनिर्ययुर्निर्जग्मुः । मधौ दक्षिणानिलो वहतीति-प्रसिद्धिः । पवने स्वभक्षकसर्पनिवासहेतुककोपकर्त्तृत्वस्य मलयाचलपरित्यागे हेतुत्वेनोत्प्रेक्षणादुत्प्रेक्षा ।

भाषा

वायुगण, वायुभक्षक सर्पों को, मलयाचल द्वारा आश्रय दिये जाने से मानों क्रुद्ध होकर मलय पर्वत के कुञ्ज से उत्तर दिशा की ओर भाग चले । अर्थात् दक्षिणानिल उत्तर दिशा की ओर बहने लगा ।

रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् ।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम् ॥६॥

अन्वयः

रविः रथस्थितानां पुरातनानां वाहनानां परिवर्तनाय इव तुरगोत्तमनाम् उत्पत्तिभूमौ उत्तरस्यां दिशि प्रतस्थे ।

व्याख्या

रविस्सूर्यो रथस्थितानां रथे विनियोजितानां पुरातनानां वृद्धानां वाहनाना-मश्वानां परिवर्तनायेव तेषां स्थानेऽन्यनवीनाश्वग्रहणार्थमिव तुरगोत्तमानामश्व-श्रेष्ठानामुत्पत्तिभूमौ जन्मभूमौ काबुलप्रदेश इत्यर्थः । काबुलप्रदेशो भारत-

स्योत्तरदिशि विद्यमानोऽस्ति । उत्तरस्यां दिश्युदीच्यामाशायां 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चताः' इत्यमरः । प्रतस्थे गन्तुमारेभे । रविरुत्तरायणोऽभूदिति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

सूर्य अपने रथ के बुढ्ढे घोड़ों को बदल देने के लिये मानों श्रेष्ठ घोड़ों के उत्पत्ति स्थान उत्तरदिशा में अर्थात् काबुल में (काबुली घोड़े प्रसिद्ध हैं) प्रस्थित हुवा । अर्थात् सूर्य उत्तरायण होने लगे ।

अहो नु चैत्रं प्रति कापि भक्तिरकृत्रिमा केरलमारुतस्य ।
द्राघिष्ठमध्वानमसौ विलङ्घ्य सर्वत्र तस्यानुचरो यदासीत् ॥७॥

अन्वयः

अहो नु केरलमारुतस्य चैत्रं प्रति अकृत्रिमा का अपि भक्तिः यत् असौ द्राघिष्ठम् अध्वानं विलङ्घ्य सर्वत्र तस्य अनुचरः आसीत् ।

व्याख्या

"अहो" इत्याश्चर्ये 'नु' इति वितर्के । केरलमारुतस्य दक्षिणस्थकेरलदेशवाहिनः पवनस्य दक्षिणानिलस्येत्यर्थः । चैत्रं चैत्रमासं प्रति वसन्तकालं प्रतीत्यर्थः । अकृत्रिमा स्वाभाविकी काप्यनिर्वचनीयाऽपूर्वेत्यर्थः । भक्तिरनुरागः । यद्यस्मात्कारणादसौ दक्षिणानिलो द्राघिष्ठमतिदीर्घमध्वानं मार्गं 'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' इत्यमरः । विलङ्घ्य समतिक्रम्य सर्वत्र सर्वस्थाने तस्य चैत्रमासस्य वसन्तस्य वाऽनुचरोऽनुगाम्यासीत् जातः । वसन्ते दक्षिणानिलः सर्वत्रैव वहतीति भावः । अत्र केरलमारुते सेवकव्यवहारसमारोपात् समासोक्तिरलङ्कारः ।

भाषा

आश्चर्य की बात है कि केरल के वायु का अर्थात् दक्षिणानिल का चैत्र मास के प्रति अर्थात् वसन्त ऋतु के प्रति एक विलक्षण स्वाभाविक अनुराग है । क्योंकि वह दक्षिण का वायु एक भारी रास्ता तँय कर सर्वत्र चैत्र का अर्थात् वसन्त ऋतु का साथ देता था । अर्थात् वसन्त ऋतु में सदैव दक्षिणानिल बहता ही है ।

अथ दक्षिणानिलस्य कामोद्दीपकत्वाद्विरहिणीनां दयनीयां दशां वर्णयति कविः—

देया शिलापट्टकपाटमुद्रा श्रीखण्डशैलस्य दरीगृहेषु ।
वियोगिनीकण्टक एष वायुः कारागृहस्यास्तु चिरादभिज्ञः ॥८॥

अन्वयः

श्रीखण्डशैलस्य दरीगृहेषु शिलापट्टकपाटमुद्रा देया । (येन) विनियोगिनीकण्टकः एषः वायुः कारागृहस्य चिरात् अभिज्ञः अस्तु ।

व्याख्या

श्रीखण्डशैलस्य चन्दनाद्रेर्मलयाचलस्य दरीगृहेषु कन्दरागृहेषु 'दरी तु कन्दरो वास्त्री' इत्यमरः । शिलापट्टाः प्रस्तरखण्डपट्टा एव कपाटानि तेषां मुद्रा प्रावरणं देया निवेश्या येन कारणेन शिलामुद्रणरूपेण वियोगिनीकण्टको विरहिणीनां हृदि कण्टकवच्छल्यवद्व्यथाजनक एष प्रसिद्धो वायुर्दक्षिणानिलः कारागृहस्य बन्धनालयस्य 'प्रग्रहोपग्रहौ बन्द्यां कारास्याद्बंधनालये' इत्यमरः । चिराच्चिराय बहुकालपर्यन्तमित्यर्थः । अभिज्ञस्तन्निवासजन्यदुःखानुभविताऽस्तु जायताम् । परपीडकः कारागृहनिवासयोग्य इति भावः ।

भाषा

मलयाचल के कन्दरा रूपी घरों को पत्थरों की चट्टान रूपी किवाड़ों से बन्द कर देना चाहिये । जिससे (उन कन्दराओं में रहने वाला) विरहिणियों के हृदय में काँटे गड़ाने के समान पीड़ा देने वाला यह दक्षिणानिल चिरकाल तक कैदखाने में रहने के दुःख का अनुभव करे । क्योंकि जो दूसरों को व्यर्थ दुःख देता है वह कैदखाने में जाने योग्य है ।

विरूक्षणीयः सखि दाक्षिणात्यस्त्वया न वायुः परुषैर्वचोभिः ।
यत्कोपनिःश्वासपरम्पराभिः पीनत्वमायात्ययमुष्णतां च ॥९॥

अन्वयः

हे सखि ! त्वया परुषैः वचोभिः दाक्षिणात्यो वायुः न विरूक्षणीयः । यत् अयं कोपनिःश्वासपरम्पराभिः पीनत्वम् उष्णतां च आयाति ।

व्याख्या

हे सखि ! हे वयस्ये ! त्वया परुषैः क्रूरैः क्रोधोत्पादकैरित्यर्थः । वचोभिर्वचनैर्दक्षिणस्यां भवो दाक्षिणात्यो मलयाचलसम्बन्धी वायुः पवनो न विरूक्षणीयो न कोपनीयः । यद्यस्मात्कारणादयं वायुः कोपस्य त्वत्परुषवचनजन्यक्रोधस्य निःश्वासपरम्पराः परुषवाक्यजातक्रोधोत्पन्नमनःक्षोभजनिःश्वासपरम्परास्ताभिः पीनत्वं स्थूलत्वमुष्णतां तापकत्वञ्चाऽऽयाति प्राप्नोति । मलयानिलः शीतलोऽपि विरहिणीनामुष्णतामेव वेगेन वर्धयतीति भावः ।

भाषा

हे सखि ! तुम कडुए वचनों से दक्षिणानिलको कुपित न करो । क्योंकि यह वायु क्रुद्ध होकर लम्बे २ उच्छ्वास लेने से मोटा अर्थात् वायु में उच्छ्वास के वायु मिलने से अधिक, और गरम हो जाता है । विरहिणियों को दक्षिणानिल ठंडा होने पर भी गरम ही मालुम होता है ।

बाणेन हत्वा मृगमस्य यात्रा निवार्यतां दक्षिणमारुतस्य ।
इत्यर्थनीयः शबराधिराजः श्रीखण्डपृथ्वीधरकन्दरस्थः ॥१०॥

अन्वयः

श्रीखण्डपृथ्वीधरकन्दरस्थः शबराधिराजः बाणेन मृगं हत्वा अस्य दक्षिणमारुतस्य यात्रा निवार्यताम् इति अर्थनीयः ।

व्याख्या

श्रीखण्डपृथ्वीधरो मलयाचलस्तस्य कन्दरो दरी 'दरी तु कन्दरो वा स्त्री' इत्यमरः । तस्मिन् तिष्ठतीति श्रीखण्डपृथ्वीधरकन्दरस्थः शबराणां वनेचराणामधिराजः स्वामी बाणेन शरेण मृगं वायुवाहनरूपं मृगं हत्वा मारयित्वाऽस्य दक्षिणमारुतस्य दक्षिणानिलस्य यात्रा प्रवह इत आगमनमित्यर्थः । निवार्यतां प्रतिषेधनीयेत्यर्थनीयः प्रार्थनीयः । वायोर्वाहनं मृगः अत एव स पृषदश्व इति कथ्यते । 'पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः' इत्यमरः । वाहनाभावे वायोरत्राऽऽगमनमसम्भवमिति भावः ।

भाषा

मलयाचल की कन्दरा में रहने वाले शबरराज से यह प्रार्थना करनी

चाहिये कि वायु के वाहन मृग को मार कर वायु का इस तरफ़ आना रोक दे। अर्थात् दक्षिणानिलके न आने से विरहजनित पीड़ा न हो सकेगी।

यद्वा मृषा तिष्ठतु दैन्यमेतन्नेच्छन्ति वैरं मरुता किराताः।
केलिप्रसङ्गे शबराङ्गनानां स हि स्मरग्लानिमपाकरोति ॥११॥

अन्वयः

यत् वा एतत् दैन्यं मृषा तिष्ठतु। किराताः मरुता वैरं न इच्छन्ति। हि सः शबराङ्गनानां केलिप्रसङ्गे स्मरग्लानिम् अपाकरोति।

व्याख्या

यद्वेति पक्षान्तरे एतद्दैन्यं मलयानिलस्य प्रियविप्रलम्भव्यथोद्बलकत्वात्तस्माद्भयेन मृगमारणप्रार्थनं मृषा मिथ्या निरर्थकमेवेत्यर्थः। तिष्ठत्वाऽऽस्ताम्। किराताः शबरा मरुता मलयवायुना सह वैरं शत्रुतां नेच्छन्ति नाऽऽकाङ्क्षन्ति। हि यस्मात् कारणात् 'हि हेतावधारणे' इत्यमरः। स दक्षिणानिलः शबराणां वनेचराणां 'भेदाः किरातशबरपुलिन्दम्लेच्छजातयः' इत्यमरः। अङ्गना ललनास्तासां केलिप्रसङ्गे सुरतक्रीडाकाले स्मरग्लानिं कामोद्वेगजन्यक्रीडोत्पन्नशारीरिकश्रमपाकरोति दुरीकरोति। श्रमापनयनेनोपकारित्वादयं दक्षिणानिलो शत्रुभावं न जनयतीति तस्य मृगविनाशाभ्यर्थना वृथैवेति भावः।

भाषा

अथवा किरातराज से वायु के वाहन रूप मृग को मारने की अभ्यर्थना व्यर्थ है। किरात लोग दक्षिणानिल से वैर करना नहीं चाहते। क्योंकि वह दक्षिणानिल कiरातिनियों की सुरत क्रीडा में सुरत जनित श्रम का अपहरण करता रहता है। अर्थात् दक्षिणानिल उपकारी होने से उस से किरातराज का शत्रुभाव हो ही नहीं सकता।

दुराग्रहश्चन्दनमारुतस्य सदा यदन्यर्तुपराङ्मुखोऽयम्।
अनेन चैत्रः सुतरामसह्यश्चन्द्रोदयेनेव शरत्प्रदोषः ॥१२॥

अन्वयः

चन्दनमारुतस्य दुराग्रहः यत् अयं सदा अन्यर्तुपराङ्मुखः। अनेन चैत्रः चन्द्रोदयेन शरत्प्रदोषः इव सुतराम् असह्यः।

व्याख्या

चन्दनमारुतस्य चन्दनसम्पर्केण समागतस्य दक्षिणानिलस्य दुराग्रहो दुष्टाभिनिवेशः कुप्रवृत्तिरित्यर्थः। यदयं मारुतोऽन्येषु वसन्तातिरिक्तेषु ऋतुषु पराङ्मुखो न प्रवहति। अनेन मलयानिलेन हेतुना चैत्रो वसन्तमासश्चन्द्रोदयेनेन्दुप्रकाशेन शरत्प्रदोषः शरत्कालिकरजनीमुखमिव 'प्रदोषो रजनीमुखम्' इत्यमरः। सुतरामत्यन्तमसह्यः सोढुमशक्यः। विरहिणीनां दक्षिणानिलवच्छीतलः शरत्कालिकश्चन्द्रोदयोऽपि नितरां सन्तापजनको भवतीति भावः।

भाषा

यह तो दक्षिणानिल का दूराग्रह ही है कि वह वसन्त ऋतु को छोड़ कर अन्य ऋतुओं में बहता ही नहीं। इसके कारण से वसन्तमास चैत्र, चन्द्रमा का उदय होने के कारण से शरत् ऋतु की शाम के समान ही असह्य हो जाता है। अर्थात् विरहिणियों को वसन्त ऋतु तथा शरत् काल का चन्द्र दोनों ही सन्ताप जनक होते हैं।

वियोगिनीनां किमु पापमेतन्मेधाथवा दक्षिणमारुतस्य।
कदापि दिङ्मोहवशाद्यदेष न चन्दनाद्रेः परतः प्रयाति॥१३॥

अन्वयः

एतत् वियोगिनीनां पापं किमु, अथवा दक्षिणमारुतस्य मेधा यत् एषः दिङ्मोहवशात् कदापि चन्दानाद्रेः परतः न प्रयाति।

व्याख्या

एतत्प्रत्यक्षदृश्यमानोपद्रवः वियोगिनीनां विरहिणीनां पापं दुष्कृतपरिणामः किमु किमथवा यद्वा दक्षिणमारुतस्य दक्षिणानिलस्य मेधा धारणावती बुद्धिः 'धीर्धारणवती मेधा' इत्यमरः। यद्यस्मात्कारणादेष मलयवायुर्दिङ्मोहवशाद्दिग्भ्रमकारणेन कदापि कस्मिन्नपि काले चन्द्रनाद्रेर्मलयपर्वतात्परतोऽन्यस्मात्प्रदेशान्न प्रयाति न गच्छति।

भाषा

यह जो विरहिणियों का प्रत्यक्ष कष्ट है वह वियोगिनियों के पापों का परिणाम है या दक्षिणानिल की मेधा का फल है? क्योंकि मलयवायु दिग्भ्रम होने से कभी भी मलयपर्वत को छोड़ कर अन्य स्थानों से नहीं बहता है।

इति भ्रमत्सौरभमांसलेन निमीलितानां मलयानिलेन।
अभूच्चिरं भूमिगृहस्थितानां प्रलापमाला प्रियकाङ्क्षिणीनाम् ॥१४॥

अन्वयः

भ्रमत्सौरभमांसलेन मलयानिलेन निमीलितानां भूमिगृहस्थितानां प्रियकाङ्क्षिणीनाम् इति प्रलापमाला चिरम् अभूत्।

व्याख्या

भ्रमन्नितस्ततः प्रसरन् यस्सौरभस्सुगन्धस्तेन मांसलो बहुलस्तेन प्रसरत्सुगन्धबहुलेन मलयानिलेन दक्षिणपवनेन निमीलितानां व्यथितानां भूमौ पृथिव्यामधस्तात् गृहाणि सदनानि, ग्रीष्मातपनिवारणाय भूम्यभ्यन्तरे निर्मितानि शीतभवनानि तेषु स्थिता विद्यमानास्तासां प्रियाणां प्रेमास्पदजनानां पतीनामित्यर्थः। काङ्क्षिण्योऽभिलाषिण्यस्तासां ललनानां वियोगिनीनामित्यर्थः। इति पूर्वोक्तप्रकाराः प्रलापमाला निरर्थकवाक्यकदम्बः 'विप्रलापो विरुद्धोक्तिः प्रलापोऽनर्थकं वचः' इत्यमरः। चिरं बहुकालपर्यन्तमभूज्जाता।

भाषा

चारों ओर फैलने वाली सुगन्ध से भरे दक्षिण वायु से पीड़ित, तल घर में (तहखाने में) रहने वाली, अपने प्रिय की अभिलाषा रखने वाली वियोगिनी स्त्रियों के पूर्वोक्त प्रकार के निरर्थक वाक्यसमूह चिरकाल तक चलते रहे।

इति षट्श्लोकात्मकं कुलकम्।

कन्दर्पदेवस्य विमानसृष्टिः प्रासादमाला रसपार्थिवस्य।
चैत्रस्य सर्वर्तुविशेषचिन्हं दोलाविलासः सुदृशां रराज ॥१५॥

अन्वयः

कन्दर्पदेवस्य विमानसृष्टिः, रसपार्थिवस्य प्रासादमाला चैत्रस्य सर्वर्तुविशेषचिन्हं सुदृशां दोलाविलासः, रराज।

व्याख्या

कन्दर्पदेवस्य कामदेवस्य 'कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः। विमानसृष्टिर्व्योमयानरचना, 'व्योमयानं विमानोऽस्त्री' इत्यमरः।

रसः शृङ्गाररस एव पार्थिवो राजा तस्य प्रासादानां हर्म्याणां माला पङ्क्तिः। अत्युच्चत्वेन निरतिशयरमणीयत्वेन च दोलाविलासे कामसम्बन्धिविमानसृष्टे रसनृपसम्बन्धिप्रासादमालायाश्चाऽऽरोपः। चैत्रस्य चैत्रमासस्य सर्वं सकलमृतु-विशेषस्य वसन्तस्य चिन्हं लक्षणं यद्वा चैत्रस्य वसन्तस्य सर्वर्तुभ्यो विशेषं विशिष्टं चिह्नं लक्षणं 'कलङ्काङ्कौ लाच्छनञ्च चिन्हं लक्ष्म च लक्षणम्' इत्यमरः। यतो वसन्त एव दोलारोहणक्रीडा विशेषतो भवतीति भावः। सुष्ठु दृशौ नयने यासां तास्तासां सुन्दरनयनाङ्गनानां दोलासु प्रेङ्खासु विलासः क्रीडा रराज शुशुभे। विशेषविनोदकारित्वेन चैत्रमासभवस्य वसन्तर्तुसकलचिह्नस्याऽभेदारोपो दोला-विलासेऽतोऽत्र मालारूपकम्।

भाषा

कामदेव की विमान रचना, शृङ्गार रस रूपी राजा के महलों की कतार, चैत्र मास का सब ऋतुओं में श्रेष्ठ वसन्तऋतु का चिह्न अथवा वसन्त का अन्य सब ऋतुओं से विशिष्ट चिह्न, सुनयनी स्त्रियों की झूला झूलने की क्रीडा शोभित होने लगी। अर्थात् चैत्र मास या वसन्त ऋतु के आते ही सुन्दर नेत्रवाली कामिनियों में झूला झूलने का उमङ्ग, कामदेव की प्रेरणा से काम सम्बन्धि दूर २ की उनकी मानसिक उडानें तथा शृङ्गार रस का साम्राज्य चारोतरफ छा गया।

दोलाधिरूढस्य वधूजनस्य नितम्बभारेण गतागतेषु।
त्रुटिर्यदालम्बगुणेषु नाभूत् सा भाग्यशक्तिः कुसुमायुधस्य ॥१६॥

अन्वयः

यत् दोलाधिरूढस्य वधूजनस्य नितम्बभारेण गतागतेषु आलम्बगुणेषु त्रुटिः न अभूत् सा कुसुमायुधस्य भाग्यशक्तिः।

व्याख्या

यदित्यनेन वाक्यार्थपरामर्शः। दोलां प्रेङ्खां 'दोला प्रेङ्खादिका स्त्रियाम्' इत्यमरः। 'हिंडोला' इति भाषायाम्। अधिरूढस्समासीनस्तस्य प्रेङ्खास्थितस्य वधूजनस्य कामिनीजनस्य नितम्बः श्रोणिस्तस्य भारो गुरुत्वं तेन गतमागत-मितस्ततः संचलनं येषां ते तेष्वालम्बगुणेषु दोलावलम्बनरज्जुषु त्रुटिर्भङ्गो नाऽभून्न जातः सा कुसुमायुधस्य कामस्य भाग्यशक्तिरदृष्टमहत्त्वम्। ललनानि-

तम्बानामत्यन्तगुरुत्वाद्दोलावलम्बनरज्जूनां भङ्गस्तु निश्चितप्राय एवाऽऽसीत्। परन्तु स न जात इत्यत्र कामस्याऽदृष्टमहत्वमेव कारणमिति भावः। काव्यलिङ्गमलङ्कारः।

भाषा

चूँकि हिंडोले पर झूलने वाली कामिनियों के नितम्बों के बोझे से झोंकों में इधर उधर जाने वाली झूले की रस्सियाँ न टूँटी इसमें कामदेव की भाग्य सम्पत्ति ही कारण है। अर्थात् उन स्त्रियों के नितम्ब बहुत भारी थे और कामदेव की पूर्ण कृपापात्र थीं। अर्थात् पूर्णतया कामासक्त थीं।

जनेषु दोलातरलाः पुरन्ध्रीः संभूय भूयःसु विलोकयत्सु।
लक्ष्यस्य विस्तीर्णतया मनोभूरवन्ध्यपातैरिषुभिर्ववर्ष ॥१७॥

अन्वयः

दोलातरलाः पुरन्ध्रीः भूयःसु जनेषु संभूय विलोकयत्सु (सत्सु) मनोभूः लक्ष्यस्य विस्तीर्णतया अवन्ध्यपातैः इषुभिः ववर्ष।

व्याख्या

दोलासु प्रेङ्खासु तरलाश्चञ्चलाः पुरन्ध्रीर्ललनाः (कर्म) 'पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता' इत्यमरः। भूयःसु बहुलेषु जनेषु कामिजनेषु संभूयैकत्रीभूय विलोकयत्सु पश्यत्सु सत्सु मनसि भवतीति मनोभूः कामो लक्ष्यस्य शरपातविषयस्य विस्तीर्णतया विशालदेशव्यापित्वेनाऽवन्ध्योऽनिष्फलः पातो लक्ष्ये वेधो येषां तैरिषुभिः स्वपुष्पबाणैर्ववर्ष वृष्टवान्। तत्रैकत्रीभूताः कामिजनास्ता दोलास्थिताः कामिनीर्वीक्ष्य कामार्ता जाता इति भावः।

भाषा

हिंडोले पर झूलने वाली कामिनियों को कामी लोगों के इकठ्ठा होकर देखते रहने पर कामदेव ने निशाने के स्थूल अर्थात् बड़े होने के कारण अपने अमोघ बाणों की वर्षा की। अर्थात् उन झूला झूलने वाली स्त्रियों को देखने के लिये इकठ्ठा भए हुए सभी कामी जन कामासक्त हो गए।

दोलाविनोदेन विलासवत्यः सुदूरमारुह्य निवर्तमानाः।
अर्धं नभःप्राङ्गणसङ्गिनीनां विलासमापुस्त्रिदशाङ्गनानाम् ॥१८॥

अन्वयः

विलासवत्यः दोलाविनोदेन सुदूरम् आरुह्य निवर्तमानाः (सत्यः) नभःप्राङ्गणसङ्गिनीनां त्रिदशाङ्गनानाम् अर्धं विलासम् आपुः ।

व्याख्या

विलासवत्योऽङ्गना दोलायाः प्रेङ्खया विनोदेन क्रीडया सुदूरमत्यूर्ध्वदेशमारुह्य गत्वा निवर्तमाना पुनरधोदेशं प्रति निवृत्ताः सत्यो नभ एवाऽऽकाशमेव प्राङ्गणं विस्तृतस्थानं तस्मिन्सङ्गिन्यः प्राप्तास्तासां त्रिदशाङ्गनानां देवाङ्गनानामाकाशे संचरणशीलानामप्सरसां वाऽर्धं विलासं विभ्रमं सारूप्यमित्यर्थः । आपुः प्राप्तवत्यः । अङ्गनानां रूपलावण्यातिशयाद्देवाङ्गनासादृश्यम् । दोलाया आकाशे चाऽल्पकाल-वृत्तित्वादर्धमेवाऽप्सरसां विलासं शोभां वा प्रापुरित्यर्थः । अत्र निदर्शनालङ्कारः ।

भाषा

अङ्गनाओं के हिंडोले की क्रीडा में बहुत ऊँचे जाकर फिर नीचे लौट आने से, वे, आकाशरूपी आंगन में विहार करने वाली अप्सराओं के आधे सारूप्य को प्राप्त हुई । अर्थात् कामिनियाँ झूला झूलते हुए आधे समय तक खूब ऊँचे और आधे समय तक नीचे रहने से ऊँचे रहने के आधे समय के लिये साक्षात् आकाश में विहार करने वाली अप्सराओं की शोभा प्राप्त करती थीं ।

विलासदोलाफलके नितम्ब—विस्ताररुद्धे परितस्तरुण्याः ।
लब्धः परं कुञ्चितकार्मुकेण तत्रावकाशः कुसुमायुधेन ॥१९॥

अन्वयः

विलासदोलाफलके परितः तरुण्याः नितम्बविस्ताररुद्धे (सति) तत्र परं कुञ्चितकार्मुकेण कुसुमायुधेन अवकाशः लब्धः ।

व्याख्या

विलासस्य क्रीडाया दोलाफलकं दारुमयान्दोलनफलकं 'तख्ता' इति भाषायाम् । तस्मिन् परितः सर्वतस्तरुण्या युवतीजनस्य नितम्बस्य कटिपश्चा-द्भागस्य 'पश्चान्नितम्बः स्त्रीकट्याः' इत्यमरः । विस्तारेण विशालरूपेण रुद्धे समाच्छादिते सति तत्र दोलाफलके परं केवलं कुञ्चितं संकोचमाप्तं कार्मुकं धनुर्यस्य स तेन कुसुमायुधेन कामेनाऽवकाशः स्थानं लब्धः प्राप्तः । दोलावि-

लासो युवतीनामतीव कामोद्दीपक इति भावः। यथा स्वल्पावकाशेऽपि संकुचितस्थाने विदग्धजनः स्वशरीरं तत्र प्रविश्य सुखानुभूतिं करोतीत्यप्रकृतव्यवहारस्य कुसुमायुधव्यवहारे समारोपात्समासोक्तिरलङ्कारः।

भाषा

क्रीडा के झूले का तख्ता युवतियों के नितम्बों से चारो तरफ से छेक लिया जाने पर अर्थात् वहाँ बिलकुल जमीन न रहने पर भी, वहाँ केवल अपने धनुष को सिकोड लेने वाले कामदेव ने ही स्थान प्राप्त किया। अर्थात् झूला झूलने से युवतियाँ कामासक्त हो गईं।

सौन्दर्यमिन्दीवरलोचनानां दोलासु लोलासु यदुल्ललास।
यदि [१]प्रसादाल्लभते कवित्वं जानाति तद्वर्णयितुं मनोभूः॥२०॥

अन्वयः

लोलासु दोलासु इन्दीवरलोचनानां यत् सौन्दर्यम् उल्ललास, यदि मनोभूः प्रसादात् कवित्वं लभते (तर्हि सः) तत् वर्णयितुं जानाति।

व्याख्या

लोलासु चञ्चलासु दोलासु प्रेङ्खास्विन्दीवराणीव नीलकमलानीव लोचनानि नेत्राणि यासां तास्तासामङ्गनानां यत् सौन्दर्यं रामणीयकमुल्ललास प्रादुर्बभूव, यदि मनोभूः कामः प्रसादात्सरस्वत्यनुग्रहात् कवित्वं काव्योत्पादनप्रागल्भ्यं लभते प्राप्नोति तर्हि स कामस्तत्सौन्दर्यं वर्णयितुं विस्तारेण कथयितुं जानाति पटुस्स्यादित्यर्थः[२]। समर्थः कविरेव स्वकृतेर्गुप्तरहस्यं ज्ञातुं समुद्घाटयितुञ्च क्षमो न त्वन्यः। अतः कामविलासरहस्यं कामस्य कवित्वे एव याथार्थ्येन वर्णितं स्यान्नत्वन्यस्येति भावः।

---

[१] 'प्रमादात्' इति पाठस्तु लेखकानवधानतैव। चरितचन्द्रिका टिप्पणीकारस्य 'प्रमादादनवधानतां परित्यज्येति भावः।" इत्यपि चिन्त्यम्।

[२] त्रिपुरारहस्यमाहात्म्ये-लक्ष्म्यास्त्रिपुराप्रसादेन कामस्य पुत्रत्वेन प्राप्तिः। स कविरासीदिति तस्य "त्रिपुरानवकम्" रचनया सिद्धम्। तन्नवकानुष्ठानेन पण्डिताः कवित्वं प्राप्नुवन्तीति प्रसिद्धिः।

भाषा

चञ्चल झूलों पर नीलकमलनयनी ललनाओं का जो सौन्दर्य उमड़ पड़ा उसका यथार्थ वर्णन, यदि कामदेव ही सरस्वती के प्रसाद से कविता रचना की शक्ति प्राप्त करें तो ही हो सकता है। अर्थात् कामदेव ही यदि कवि हों तो वे इस काम सम्बन्धित ललनाओं के सौन्दर्य का सफलता से वर्णन कर सकते हैं।

दोलासु यद्दोलनमङ्गनानां यत्(या)मल्लिका यच्(श्च)[1] च लवङ्गवायुः ।
सा विश्वसंमोहनदीक्षितस्य मुख्याङ्गसम्पत्कुसुमायुधस्य ॥२१॥

अन्वयः

अङ्गनानां दोलासु यत् दोलनं, यत् लवङ्गवायुः यत् च मल्लिका, सा विश्वसंमोहनदीक्षितस्य कुसुमायुधस्य मुख्याङ्गसम्पत् (अस्ति ।)

व्याख्या

अङ्गनानां सुन्दरीणां दोलासु प्रेङ्खासु यद्दोलनमधस्तादुपरि चंक्रमणं यच्चात्र यदिति क्रियाविशेषणं यथेत्यर्थः। लवङ्गवायुर्देवकुसुमसम्पर्कजन्य-सुगन्धवाही पवनः 'लवङ्गं देवकुसुमम्' इत्यमरः। यदत्राऽपि पूर्ववत्। मल्लिका पुष्पविशेषः 'बेला' इति भाषायाम्। सा विश्वस्य सम्पूर्णसंसारप्राणिनां संमोहनं कार्मणकर्म वशीकरणमित्यर्थः। तस्मिन् दीक्षितस्य सन्नद्धस्य कुसुमा-युधस्य कामस्य मुख्याङ्गानां प्रधानसाधनानां सम्पत्सम्पत्तिरस्ति। आंदोलन-मल्लिकापुष्प-लवङ्गवायव एव कामस्याऽखिललोकवशीकरणे प्रधानसाधना-नीत्यर्थः।

भाषा

ललनाओं का हिंडोलों पर झूलना, बेले के फूल और देवपुष्प, ये सब विश्व का वशीकरण करने में तत्पर कामदेव की प्रधान साधन सम्पत्ति है।

प्रसार्य पादौ विहितस्थितीनां दोलासु लोलांशुकपल्लवानाम् ।
मनोरथानामपि यन्न गम्यं तद्द्रष्टुमापुः सुदृशां युवानः ॥२२॥

---

[1] अत्र यत् यत् इत्यस्य स्थाने या मल्लिका, यश्च लवङ्गवायुः, इत्येव पाठः समीचीनः प्रतिभाति, परं पाठन्तराऽलाभात्तथैव मुद्रापितमिति विचिन्तनीयम।

अन्वयः

युवानः दोलासु पादौ प्रसार्य विहितस्थितीनां लोलांशुकपल्लवानां सुदृशां यत् मनोरथानाम् अपि न गम्यं तत् द्रष्टुम् आपुः ।

व्याख्या

युवानस्तरुणजना दोलासु प्रेङ्खासु पादौ चरणौ प्रसार्य विस्तार्य विहिता कृता स्थितिः समुपवेशनं याभिस्तास्तासामासीनानां लोलाश्चञ्चलाः स्वनियत-स्थानात्परिच्युता अंशुकाः पल्लवा इवेत्यंशुकपल्लवा मसृणाम्बराणि यासां तास्तासां सुदृशां सुनयनानामङ्गनानां यत् गुह्यं स्थानं गोपनीयाङ्गं जघनादि मनोरथानामपि कल्पनानामपि न गम्यं न प्राप्यं तद्द्रष्टुमवलोकयितुमापुः प्राप्तवन्तः । दोलनजनितवायुवेगेन तासां मसृणाम्बरेषु स्थानभ्रष्टेषु सत्सु युवानस्तासां कल्पनायामप्यप्राप्यं जघनादिगोपनीयाङ्गं ददृशुरिति भावः ।

भाषा

युवक लोगों ने, पांव लम्बा कर झूलों पर बैठी हुई, हवा के झोके मे स्थानच्युत मुलायम साड़ी वाली सुनयनी अङ्गनाओं के, कल्पना में भी न आने वाले जघनादि गोपनीय अङ्गों को देखा ।

उन्नम्य दूरं मुहुरानमन्त्यः कान्ताः श्लथीभूतनितम्बजाड्याः ।
दोलाविलासेन जितश्रमत्वात् प्रकर्षमापुः पुरुषायितेषु ॥२३॥

अन्वयः

दूरम् उन्नम्य मुहुः आनमन्त्यः श्लथीभूतनितम्बजाड्याः कान्ताः दोला-विलासेन जितश्रमत्वात् पुरुषायितेषु प्रकर्षम् आपुः ।

व्याख्या

दूरं विप्रकृष्टदेशमुन्नम्योर्ध्वं समुत्थाय मुहुर्वारम्वारमानमन्त्योऽधोदेशं प्राप्नु-वन्त्य उत्थाय पुनरुपविशन्त्यः श्लथीभूतं शिथिलीभूतं निरस्तमित्यर्थः । नितम्बस्य कटिपश्चाद्भागस्य जाड्यं क्रियाशीलत्वशून्यत्वं यासां ताः कान्ता अङ्गना दोलायाः प्रेङ्खाया विलासेन संचालनक्रीडया जितोवशीकृतः श्रमः कार्यकरणक्षमत्वं याभिस्तास्तासां भावो जितश्रमत्वं तस्मात् समुपार्जितकठिनकार्यसम्पादन-शक्तित्वात् पुरुषायितेषु पुरुषकर्तृकव्यापारेषु विपरीतसुरतेषु प्रकर्षमुत्कृष्टत्वमापुः प्राप्तवत्यः ।

भाषा

दूर तक ऊपर जाकर फिर नीचे आने वाली अर्थात् झूला झुलाने में उठकर बैठने वाली, अपने नितम्बों के शैथिल्य को त्याग कर उनसे काम लेने वालीं ललनाएँ हिंडोलों के चलाने में जरा भी थकावट का अनुभव न करने से पुरुषों के द्वारा किये जाने वाले काम में अर्थात् विपरीत रति में उत्कृष्टता को प्राप्त हुईं। अर्थात् बिना थकावट झूला चलाने में अपनी कमर को आगे पीछे करने वाली ललनाओं ने विपरीतरति में अपनी समर्थता का परिचय दिया।

कुचस्थलैर्निर्दलितो वधूनां संजीवितः श्वाससमीरणेन।
क्लेशातिरेकान्मलयानिलोऽभूद् भृत्येषु मान्यः कुसुमायुधस्य ॥२४॥

अन्वयः

वधूनां कुचस्थलैः निर्दलितः मलयानिलः श्वाससमीरणेन संजीवितः (सन्) क्लेशातिरेकात् कुसुमायुधस्य भृत्येषु मान्यः अभूत्।

व्याख्या

वधूनां स्त्रीणां कुचस्थलैः कठिनस्तनमण्डलैर्विदलितः आघातात्संचूर्णितो मलयानिलो दक्षिणसमीरणो वधूनामेव श्वाससमीरणेन वियोगजन्यदीर्घश्वास-वायुना संजीवितस्सन् समासादितप्राणः सन् प्रवृद्धस्सन्नित्यर्थः। क्लेशस्य कष्टस्याऽतिरेको बाहुल्यं तस्मात् कष्टप्राचुर्यात् कुसुमायुधस्य कामस्य भृत्येषु कर्मकरेषु सहायकेष्वित्यर्थः। मान्यः प्रतिष्ठितोऽभूज्जातः। कामस्य दक्षिणा-निलोऽतीव प्रियः सहायकत्वादिति भावः। अत्र समीरणे सेवकवृत्तान्तसमा-रोपात् समासोक्तिरलङ्कारः।

भाषा

स्त्रियों के कठिन कुचस्थलों से टकराकर गत प्राण होते हुए और स्त्रियों के ही वियोगजन्य उच्छ्वासों से पुनः जीवित मलयानिल, अधिक कष्ट भोगने के कारण कामदेव के भृत्यों या सहायकों में मान्य हो गया। अर्थात् मलयानिल कामदेव का प्रधान सहायक है।

यत्पूरयामास विलासदोलाः पुरन्ध्रिभिः सिञ्जितनूपुराभिः।
तेनोद्रसां मन्मथराजधानीं मन्ये वसन्तोमकरोद्वसन्तः ॥२५॥

अन्वयः

वसन्तः सिञ्जितनूपुराभिः पुरन्ध्रिभिः विलासदोलाः यत् पूरयामास तेन उद्वसां मन्मथराजधानीं वसन्तीम् अकरोत् । (इत्यहं) मन्ये ।

व्याख्या

वसन्तो वसन्तर्तुः, सिञ्जितानि शब्दायमानानि नूपुराणि मञ्जीराणि 'मञ्जीरो नुपुरो स्त्रियाम्' इत्यमरः । यासां तास्ताभिः पुरन्ध्रिभिः स्त्रीभिर्विलासदोलाः क्रीडाप्रेङ्खा यत् पूरयामास परिपूरितवान्, तेन कारणेन उद्वसां उद्गता वसन्तो यस्याः सा उद्वसा तां जनशून्यामित्यर्थः । मन्मथस्य कामस्य राजधानी प्रधान-नगरी तां वसन्तीं जनबहुलामकरोत् कृतवान् । वसन्ते कामिनीकर्तृकविलास-दोलाकर्मकाक्रमणेन कामराजधानीरूपविलासदोलायां कामिनीजनाध्युषितत्वं सूचितम् । इत्यहं मन्ये तर्कयामि । उत्प्रेक्षालङ्कारः ।

भाषा

चूँकि वसन्त ऋतु ने शब्द करने वाले पैजेब पहने हुई अङ्गनाओं से, आनन्द देने वाले हिंडोलों को भर दिया । इससे मैं समझता हूँ कि वसन्त ऋतु ने कामदेव फी उजड़ी राजधानी को बसा दिया ।

चुचुम्ब वक्त्राणि चकर्ष वस्त्रं चिरं विशश्राम नितम्बबिम्बे ।
दोलाविलासे गुरुरङ्गनानामनङ्कुशः केरलमारुतोऽभूत् ॥२६॥

अन्वयः

केरलमारुतः अङ्गनानां वक्त्राणि चुचुम्ब, वस्त्रं चकर्ष, नितम्बबिम्बे चिरं विशश्राम । (अतः) दोलाविलासे (अङ्गनानाम्) अनङ्कुशः गुरुः अभूत् ।

व्याख्या

केरलमारुतो दक्षिणदिग्गतकेरलदेशपवनो दक्षिणानिल इत्यर्थः । अङ्गनानां स्त्रीणां वक्त्राणि मुखानि चुचुम्ब पस्पर्श । वस्त्रमम्बरं चकर्ष हठाज्जग्राह । नितम्बबिम्बे पश्चात्कटिभागे चिरं बहुकालं विशश्राम विश्रान्ति लेभे । अतोऽङ्ग-नानां दोलाविलासे प्रेङ्खाक्रीडायामनङ्कुशः स्वच्छन्दो गुरुरुपदेष्टा आचार्य इत्यर्थः । अभूत् संजातः । गुरुर्यथा स्वशिष्येभ्यः शिक्षां ददाति तथैव दक्षिणपवनोऽङ्गनाभ्यो मुखचुम्बनादिकार्यसाहाय्येन दोलाविलाससम्बन्धिनीं शिक्षां ददाविति भावः ।

भाषा

दक्षिण दिशा के केरल देश के वायु ने अर्थात् दक्षिणानिल ने कामिनियों के मुखों को चूमा, साड़ी को खींचा, कटि पश्चात् भाग में चिर काल तक विश्रान्ति ली। इसलिये अङ्गनाओं का हिंडोले की क्रीड़ा का वह आचार्य हो गया। अर्थात् हिंडोले की क्रीड़ा में क्या २ किया जाता है (चुम्बन करना, कपड़ा हटाना और निस्तम्बों पर हाथ फेरना) इसका उपदेश दिया।

गीतेषु याताः किमु शिष्यभावं वामभ्रुवां विभ्रमदोलिनीनाम्।
पुंस्कोकिलाः काननचारिणो यच्चातुर्यमापुः कलपञ्चमस्य ॥२७॥

अन्वयः

काननचारिणः पुँस्कोकिलाः गीतेषु विभ्रमदोलिनीनां वामभ्रुवां शिष्यत्वं याताः किमु, यत् (ते) कलपञ्चमस्य चातुर्यम् आपुः।

व्याख्या

कानने वने 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। चरन्ति विहरन्तीति ते वनगताः पुंस्कोकिलाः पिकाः 'वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः। गीतेषु गानकलासु विभ्रमेण विलासेन दोलायन्ते दोलासु विहरन्तीति विभ्रमदोलिन्यस्तासां विलासदोलासु विहरन्तीनां वामभ्रुवां चञ्चल-भ्रुकुटीनां कान्तानां शिष्यत्वं छात्रभावं याताः प्राप्ताः किमु। यद्यस्मात्कारणात्ते पिकाः कलो मधुरः पञ्चमः पञ्चमस्वर इति तस्य मधुरपञ्चमस्वरस्य चातुर्यं नपुण्यमापुः प्राप्ताः। वामभ्रुवां शिष्यभावं विना पुंस्कोकिलानां पञ्चमस्वरस्यै-तादृशं नैपुण्यं सर्वथैवाऽसंभवीति भावः। उत्प्रेक्षालङ्कारः।

भाषा

जंगलों में विहार करने वाले पिक, क्या गान कला में विलास पूर्वक झूला झूलने वाली व टेढ़ी भौंवों वाली ललनाओं के शिष्य तो नहीं हो गए, क्यों कि उन्होंने मधुर पञ्चम स्वर में बोलने की चतुरता प्राप्त करली थी। अर्थात् विना गुरु के विद्या कहाँ? इससे उन झूला झूलने वाली नारियों से कोकिलों ने पञ्चमस्वर में बोलना सीखा होगा।

सङ्गादजस्रं वनदेवतानां लीलावनान्तस्थितयः शकुन्ताः ।
आरुह्य दोलासु विलासिनीनां ताभिः सह भ्रेमुरसंभ्रमेण ॥२८॥

अन्वयः

लीलावनान्तस्थितयः शकुन्ताः वनदेवतानाम् अजस्रं सङ्गात् विलासिनीनां दोलासु आरुह्य ताभिः सह असंभ्रमेण भ्रेमुः ।

व्याख्या

लीलावनस्य क्रीडोद्यानस्याऽन्ते मध्ये स्थितिर्निवासो येषां ते क्रीडोद्यानमध्यवासिनः शकुन्ताः पक्षिणः 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः । वनदेवतानामरण्याधिष्ठातृदेवतानामजस्रं निरन्तरं 'नित्यानवरताजस्रमप्यथातिशयो भरः' इत्यमरः । सङ्गात् सहवासाद्विलासिनीनां कामिनीनां दोलासु प्रेङ्खास्वारुह्य स्थित्वा ताभिर्दोलिनीभिस्सहाऽसंभ्रमेणाऽव्याकुलं यथास्यात्तथा भ्रेमुर्गतागतं चक्रुः । काव्यलिङ्गमलङ्कारः ।

भाषा

क्रीडोद्यान में रहने वाले पक्षी, वनदेवताओं के निरन्तर साथ रहने से झूला झूलने वाली रूपवती स्त्रियों के झूलों पर बैठ कर उनके साथ निडर होकर झूला झूलते थे । अर्थात् वे स्त्रियां वनदेवताओं के ऐसी रूपवती थीं ।

हस्तद्वयीगाढगृहीतलोल—दोलागुणानां जघने वधूनाम् ।
[1]असंवृते स्रस्तदुकूलबन्धे किमप्यभूदुच्छ्वसितो मनोभूः ॥२९॥

अन्वयः

हस्तद्वयीगाढगृहीतलोलदोलागुणानां वधूनां स्रस्तदुकूलबन्धे जघने असंवृते (सति) मनोभूः किमपि उच्छ्वसितः अभूत् ।

व्याख्या

हस्तयोः करयोर्द्वयीति हस्तद्वयी तया गाढं दृढं गृहीता धृता लोलाश्चञ्चला दोलागुणा दोलारज्जवो याभिस्तास्तासां वधूनां नारीणां स्रस्तः स्थानाच्च्यु-

[1] "असंवृतस्रस्तदुकूलबन्धे" इति पाठस्तु चिन्त्यः ।

तो दूकूलबन्धो नीविबन्धो यस्मात्तस्मिन् जघने कटिपुरोभागेऽसंवृतेऽना-च्छादिते प्रकटीभूते सति मनोभूः कामः किमप्यनिर्वचनीयं यथास्यात्तथोच्छ्वसित उल्लासयुक्तः सानन्द इत्यर्थः। अभूज्जातः। नारीणां गुह्याङ्गदर्शनेन यूनामनिर्वचनीयाऽऽनन्दप्राप्तिरभूदिति भावः।

भाषा

झूला झूलते समय दोनों हाथों से दृढ़तापूर्वक हिंडोले की चञ्चल रस्सियों को पकड़ रखने वाली अङ्गनाओं के, नीवी की गांठ खुल जाने से, और धोती सरक पड़ने से जघनस्थल के दिखाई पड़ने पर कामदेव अनिर्वचनीय उल्लास को प्राप्त हुआ। अर्थात् स्त्रियों के गोपनीय अङ्गों को देखने से युवकों को एक विशिष्ट आनन्द मिलता है।

त्वरोपयातप्रियबाहुपाश-रुद्धेषु कण्ठेषु वियोगिनीनाम्।
वृथासमाहूतकृतान्तपाशः स्मितं लतानां मधुराततान ॥३०॥

अन्वयः

वियोगिनीनां कण्ठेषु त्वरोपयातप्रियबाहुपाशरुद्धेषु (सत्सु) वृथासमाहूतकृतान्तपाशः मधुः लतानां स्मितम् आततान।

व्याख्या

वियोगिनीनां विरहिणीनां कण्ठेषु ग्रीवासु त्वरया शीघ्रतयोपयातास्संप्राप्ताः प्रियाः कान्तास्तेषां बाहवो भुजा एव पाशा रज्जवस्तै रुद्धेषु सत्सु वृथैव मुधैव समाहूतस्संप्रापितः कृतान्तस्य यमस्य पाशो येन स मधुर्वसन्तो चैत्रमासो वा लतानां वीरुधां स्मितमीषद्धास्यं विकासमित्यर्थः। आततान विस्तारयामास। वसन्तागमनेनोद्दीपितमदनानां विरहिणीनां कामिनीनां झटिति प्रियालिङ्गनप्राप्त्या वसन्तजन्यमन्मथसंतापे सत्यपि प्राणवियोगो न जात इति दृष्ट्वा स्त्रीत्व-साजात्यात् लता वसन्तमुपहसन्तीति भावः।

भाषा

वियोगिनी स्त्रियों के गलों के, शीघ्रता पूर्वक आए हुए उनके पतियों के बाहु पाश से उपरुद्ध हो जाने पर, यमराज के पाश को (उनके गलों में बांध कर उनका प्राणान्त करने के लिये) व्यर्थ ही बुलाने वाले वसन्त ने लताओं को विकसित किया। अर्थात वसन्तजनितसन्ताप से मरणासन्न स्त्रियों की,

उनके पतिओं द्वारा जल्दी मे आकर आलिङ्गन किये जाने के कारण, वियोग से उनकी मृत्यु न हो सकने से, लताएँ वसन्त को हँसने लगीं अर्थात् विकसित हो गईं।

निवारणं पल्लववीजनानां स्थितिर्निवातेषु गृहोदरेषु ।
मूर्च्छाप्रबन्धेषु वियोगिनीनामासीदपूर्वः परिहारमार्गः ॥३१॥

अन्वयः

वियोगिनीनां मूच्च्र्छाप्रबन्धेषु पल्लववीजनानां निवारणं निवातेषु गृहोदरेषु स्थितिः (इति) अपूर्वः परिहारमार्गः आसीत् ।

व्याख्या

वियोगिनीनां पतिविरहितानां कामिनीनां मूच्र्छाप्रबन्धेषु पतिविरहजन्य-दुःखातिशयात्संज्ञाशून्यदशायां पल्लवैः किसलयैर्वीजनानि वायुसञ्चालनानि तेषां शीतत्वात्किसलयेन वायुसंचालनानां निवारणं निषेधः । नास्ति वातो वायुर्येषु ते निवातास्तेषु वायुरहितेषु गृहाणामुदराणि मध्यानि तेषु गृहमध्यस्थानेषु स्थिति-र्निवास इत्यपूर्वो विचित्रः परिहारमार्गो मूच्च्र्छानिवारणस्योपचारविधिरासीत् । विरहावस्थायां शीतोपचारा अपि विशिष्टसन्तापकरा भवन्तीति भावः ।

भाषा

पतिविरहजन्य अधिक दुःख से मूर्छित, विरहिणियों की मूर्छावस्था में कोमल-पत्तों से ठण्डी हवा झलने का निषेध और वायुरहित गृहमध्य में निवास इत्यादि मूर्च्छानिवारण के लिये अभूतपूर्व उपचार होते थे । अर्थात् विरहिणियों को विरहावस्था में शीतोपचार अधिक संतापकारक होते हैं । इसीलिये मूर्छा निवृत्ति के लिये शीतोपचार का निषेध किया जाता था ।

लीलाशुकाः कोकिलकूजितानामतिप्रहर्षाद्विहितानुकाराः ।
गृहादधाव्यन्त[१] वियोगिनीभिर्गुणो हि काले गुणिनां गुणाय ॥३२॥

अन्वयः

अतिप्रहर्षात् कोकिलकूजितानां विहितानुकाराः लीलाशुकाः वियोगि-नीभिः गृहात् अधाव्यन्त, हि गुणिनां गुणः काले गुणाय (भवति) ।

---

[१] 'अवाह्यन्त' इति पाठः साधुतरः ।

व्याख्या

अतिप्रहर्षादानन्दातिशयात् कोकिलानां पिकानां कूजितानि ध्वनयस्तेषां विहितः कृतोऽनुकारोऽनुकरणं यैस्ते लीलाशुकाः क्रीडाशुकाः 'कीरशुकौ समौ' इत्यमरः । वियोगिनीभिर्विरहिणीभिर्गृहात्स्वसदनादधाव्यन्त बहिर्निष्कास्यन्ते स्म । कोकिलकूजितस्य विरहे दुःखप्रदायित्वेनाऽसह्यत्वात्तदनुकारिणां लीलाशुकानां गृहादपसारणं ताभिः कृतमिति भावः । हि यतः गुणिनां गुणवतां गुणः स्वरमाधुर्यादिरूपः काले समुचिते समय एव गुणाय प्रहर्षाय भवति नत्वन्यथेति शेषः । कीराणां कोकिलशब्दानुकरणं गुणः परञ्च विरहावस्थायां स दोष एव जात इति भावः । अत्राऽर्थान्तरन्यासालङ्कारः ।

भाषा

अत्यन्त हर्ष से कोयल के शब्दों का अनुकरण करने वाले पालतू सुग्गे, वियोगिनियों द्वारा दौड़ा कर बाहर कर दिये गए । क्योंकि गुणियों का गुण अवसर पर ही गुणाधायक होता है । अर्थात् सुग्गों का, कोयल की बोली बोलना यह एक गुण है किन्तु पतिविरहजन्य दुःख की अवस्था में वह गुण अवगुण सा हो जाता है ।

श्रुत्वेव वृत्तावसरं तुषारं बहिःस्थितानामलिनां निनादैः ।
द्विवर्षकन्यामुखकोमलाभं पङ्कोदरात्पङ्कजमाविरासीत् ॥३३॥

अन्वयः

द्विवर्षकन्यामुखकोमलाभं पङ्कजं, बहिः स्थितानाम् अलिनां निनादैः तुषारं वृत्तावसरं श्रुत्वा इव पङ्कोदरात् आविरासीत् ।

व्याख्या

द्वौ वर्षौ यस्याः सा द्विवर्षा, द्विवर्षा चाऽसौ कन्या च द्विवर्षकन्या तस्या मुखस्येव कोमला सुकुमाराऽऽभा कान्तिर्यस्य तत् 'स्युः प्रभा रुग्रुचिस्त्विड्भाऽऽभाश्छविद्युतिदीप्तयः' इत्यमरः । पङ्कजं कमलं बहिःस्थितानां बाह्यस्थानवर्तिनामलीनां भ्रमराणां निनादैर्झङ्कारैस्तुषारं हिमं 'तुषारस्तुहिनं हिमम्' इत्यमरः । वृत्तो निर्गतोऽवसरः कालो हेमन्तशिशिरर्तू यस्य स तं श्रुत्वेवाऽऽकर्ण्येव पङ्कोदरात्सरसः पङ्कमुदरे यस्येति विग्रहात्, पङ्कस्य कर्दमस्योदरं मध्यं तस्माद्वा कर्दमान्तरादाविरासीत्प्रकटीबभूव । हिमसमये पङ्कजानि न समुत्पद्यन्ते भ्रमराश्च न गुञ्जन्ति तस्माद्भ्रमरशब्दश्रवणाद्धिमगमनमनुमाय वसन्तागमनात्कोमलं कमलं प्रादुर्बभूवेति भावः । अत्रोत्प्रेक्षालङ्कारः ।

भाषा

दो वर्ष की कन्या के मुख के समान कोमल कान्ति वाला, कमल, बाहर रहने वाले भ्रमरों की गुन्जार से मानों हेमन्त और शिशिर ऋतुओं के बीत जाने की सूचना पाकर तालाब से प्रकट हुआ। अर्थात् हेमन्त और शिशिर ऋतुओं में कमल नहीं उत्पन्न होते और भ्रमर भी गुन्जार नहीं करते।

नवीनदन्तोद्गमसुन्दरेण वासन्तिकाकुड्मलनिर्गमेन ।
उत्सङ्गसङ्गी विपिनस्थलीनां बालो वसन्तः किमपि व्यराजत् ॥३४॥

अन्वयः

विपिनस्थलीनाम् उत्सङ्गसङ्गी वसन्तः बालः नवीनदन्तोद्गमसुन्दरेण वासन्तिकाकुड्मलनिर्गमेन किमपि व्यराजत् ।

व्याख्या

विपिनस्थलीनामरण्यभूमीनां 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः। विपिनस्थल्याः स्त्रीत्वेन जननीत्वं व्यङ्ग्यम् । उत्सङ्गेऽङ्के मध्ये वा सङ्गत इत्युत्सङ्गसङ्गी 'उत्सङ्गचिह्नयोरङ्कः' इत्यमरः। अङ्कवर्ती वसन्तो बालः कुमारो नवीनः प्रत्यग्रो दन्तोद्गमो दशनोत्पत्तिस्तद्वत्सुन्दरो मनोहरस्तेन वासन्तिका माधवीलता 'वासन्ती माधवीलता' इत्यमरः। तस्याः कुड्मलानि कलिकास्तासां निर्गम उत्पत्तिस्तेन किमप्यनिर्वचनीयं यथा स्यात्तथा व्यराजत् शुशुभे। वसन्ते बालत्वारोपाद्वासन्तीकलिकासु दशनत्वारोपात्, विपिनस्थलीनां धात्रीत्वारोपस्य व्यङ्ग्यत्वाच्च एकदेशविवर्तिरूपकम् ।

भाषा

जंगल की भूमियों की गोद में रहने वाला वसन्त रूपी बालक, नये दांत निकलने के समान सुन्दर माधवीलता की कलियों के निकलने से एक अवर्णनीय शोभा को प्राप्त हुआ।

सुगन्धिनिःश्वासमिवानुवेल-मुद्वेल्लता दक्षिणमारुतेन ।
मुखं [illegible]तदन्तुरं तच्चुचुम्ब मुग्धस्य मधोर्वनश्रीः ॥३५॥

अन्वयः

वनश्रीः अनुवेलं सुगन्धिनिःश्वासम् इव उद्वेल्लता दक्षिणमारुतेन मुग्धस्य मधोः तत् प्रसूनस्मितदन्तुरं मुखं चुचुम्ब ।

व्याख्या

वनश्रीर्वनलक्ष्मीर्वनशोभेत्यर्थः । अनुवेलं प्रतिक्षणं सुगन्धिनिःश्वासमिव सुन्दरगन्धयुक्तमुखनिःश्वासमिवोद्वेल्लता विस्तारयता दक्षिणमारुतेन मलयानिलेन मुग्धस्य बालस्य मधोर्वसन्तस्य तदनिर्वचनीयं प्रसूनान्येव पुष्पाण्येव शुभ्रत्वेन स्मितानीषद्धास्यानि तैर्दन्तुरं दन्तुरितं मनोहरमितिभावः । मुखमाननमग्रभागञ्च चुचुम्ब परिचुम्बितवती । वसन्ततौ पुष्पोद्गमेन वनशोभाऽऽविरासीदिति भावः । समासोक्तिरलङ्कारः ।

भाषा

वनकी शोभा ने सुगन्धित सांस के समान सुगन्धयुक्त दक्षिणानिल के बहते रहने से बालरूप बसन्त ऋतु के, उस अवर्णनीय श्वेत फूल रूपी मुस्कराहट से युक्त मनोहर मुख को या अग्रभाग को चूमा । अर्थात् वसन्तऋतु में फूलों से वन की शोभा प्रकट होती थी ।

संक्रान्तभृङ्गीपदपंक्तिमुद्रं पौष्पं रजः क्ष्माफलके रराज ।
क्रमाल्लिपिज्ञानकृतक्षणस्य क्षुण्णं मधोरक्षरमालयेव ॥३६॥

अन्वयः

क्ष्माफलके संक्रान्तभृङ्गीपदपङ्क्तिमुद्रं पौष्पं रजः क्रमात् लिपिज्ञानकृतक्षणस्य मधोः अक्षरमालया इव क्षुण्णं रराज ।

व्याख्या

क्ष्माफलके पृथ्वीतलपट्टिकायां संक्रान्ताः संलग्ना भृङ्गीणां भ्रमरीणां पदानि चरणास्तेषां पङ्क्तयः श्रेणयस्तासां मुद्राश्चिह्नानि, यस्मिंस्तत् पुष्पस्येदं पौष्पं कुसुमसम्बन्धी 'तस्येदमित्यण्' । रजो धूलिः क्रमात् क्रमशो लिपिज्ञानेऽक्षरज्ञानाभ्यासे कृतो विहितः क्षण उत्सवो येन स तस्य 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' इत्यमरः । मधोर्वसन्तस्याऽक्षरमालया वर्णमालया क्षुण्णमिव संभृतमिव रराज शुशुभे । बालका यथाऽक्षरज्ञानाभ्यासे पट्टिकायां

तिर्यगान्रेखाबाहुल्यमेव रचयन्ति तथैव क्ष्माफलके वसन्तागमनात्पुष्पधूलि-बाहुल्यात्तत्र भृङ्गीणां भ्रमणेन तत्पादजनितरेखाकदम्बकं कविः बालस्य वसन्त-स्याऽक्षरज्ञानाभ्यासे क्ष्मापट्टिकायां तिर्यग्रेखादिकमित्युत्प्रेक्षते ।

भाषा

पृथ्वी रूपी पटिया पर भ्रमरियों के पावों की पंक्तियों से अङ्कित कुसुम-रज, धीरे २ वर्णमाला सीखने का उत्सव मनाने वाले वसंतऋतु की अक्षर-माला से मानों अंकित हो, ऐसी शोभित होती थी। अर्थात् वसंतऋतु में पृथ्वीपर बहुत पुष्परज गिरने से और उनपर भ्रमरियों के चलने से बनी लकीरों से कवि उत्प्रेक्षा करता है कि बालक बसन्त ने मानों अक्षर सीखते समय पृथ्वी रूपी पटिया पर टेढ़ी मेढ़ी लकीरें खींची हों।

समारुरोहोपरि पादपानां लुलोठ पुष्पोत्कररेणुपुञ्जे ।
लताप्रसूनांशुकमाचकर्ष क्रीडन्वनैः किं न चकार चैत्रः ॥३७॥

अन्वयः

चैत्रः पादपानाम् उपरि समारुरोह, पुष्पोत्कररेणुपुञ्जे लुलोठ, लता-प्रसूनांशुकम् आचकर्ष, वनैः क्रीडन् किं न चकार ।

व्याख्या

चैत्रो वसन्तमासः पादैर्मूलैः पिबन्तीति पादपास्तेषां पादपानां वृक्षाणामुपर्यूर्ध्वं समारुरोह वृक्षान्समाच्छादितवानित्यर्थः । पुष्पाणां कुसुमानामुत्करास्समूहास्तेषां रेणवो धूलयः 'रेणुर्द्वयोः स्त्रियां पुंसि पांसुर्वा न द्वयो रजः' इत्यमरः । तेषां पुञ्जे समूहे लुलोठ पपात । लतानां वीरुधां प्रसूनान्येव पुष्पाण्येवांऽशुकं श्लक्ष्ण-त्वान्मृदुत्वाच्चाम्बरमाचकर्ष बलाद्गृहीतवान् । इत्थं वनैर्वनस्थैर्वस्तुभिः क्रीड़न् विहरन् किं न चकार किं न कृतवान् । कर्तव्याकर्तव्यविवेकं परिहाय बालवत् यथेच्छं सर्वमेव चैत्रेणाऽनुष्ठितमिति भावः । यथा कश्चित् बालको वृक्षारोहणं धूलिविलुण्ठनं, अंशुकाकर्षणञ्च करोति तथा बालो मधुः कृतवानिति भावः । अत्र समासोक्तिरलङ्कारः ।

भाषा

(बालक) चैत्र अर्थात् वसन्त वृक्षों पर चढ़ गया । पुष्पों के समूह के पराग में अर्थात् मिट्टी में लोट पोट की, लता के पुष्प रूपी वस्त्र को खींच लिया ।

इस प्रकार बालक वसन्त ने वन में की सभी वस्तुओं से क्रीड़ा करते हुए क्या नहीं किया। अर्थात् बालक वसन्त ने कर्तव्याकर्तव्य का विचार छोड़कर अपनी इच्छा के अनुसार सब कुछ खेल किया। जैसे कोई बालक वृक्षारोहण, धूर में लोटना और मां के या अन्य स्त्रियों की साड़ी खींचना आदि चेष्टाएँ करता है वैसेही चैत्र ने किया। भाव यह है कि वसन्त ऋतु के आने से बृक्षों पर वासन्तिक शोभा छा गई, पुष्पों के समूह से खूब मकरन्द चून लगा और लताओं में से फूल टूट २ कर गिरने लगे।

दक्षः प्रवालौष्ठसमर्पणाय लतावधूनां मुकुलस्तनीनाम्।
मत्तालिवैतालिकगीतकीर्तिर्भ्रमन्मधुर्यौवनमारुरोह ॥३८॥

अन्वयः

मुकुलस्तनीनां लतावधूनां प्रवालौष्ठसमर्पणाय दक्षः मत्तालिवैतालिक-गीतकीर्तिः भ्रमन् मधुः यौवनम् आरुरोह।

व्याख्या

मुकुलानि कुड्मलान्येव स्तनाः कुचा यासां तास्तासां लतावधूनां वीरुद्रूपनारीणां प्रवालाः रक्तकिसलया एवौष्ठा अधरोष्ठास्तेषां समर्पणाय वितरणाय दक्षश्चतुरः प्रगल्भ इत्यर्थः। मत्ता मदान्धा अलयो भ्रमरा एव वैतालिकाः स्तुतिगायका-स्तैर्गीता गानेन वर्णिता कीर्तिर्यस्य स भ्रमन्नितस्ततो गतागतं कुर्वन् मधुर्वसन्तो यौवनं तारुण्यमारुरोह संप्राप्तवान्। प्रत्यग्रकुचभूषितानां किशोरीणाम-धरोष्ठप्रदाने चुम्बनदाने कुशलो वैतालिकगीतकीर्तिस्संचरन् मनुष्य इव मुकुलि-तानां लतानां किसलयप्रदाने कुशलो मत्तालिगीतकीर्तिर्भ्रमन् वसन्तो यौवनं प्रापेति भावः।

भाषा

कली रूपी स्तनों वाली, लता रूपी स्त्रियों को किसलय (नये लाल पत्ते) रूपी ओठों को (तृप्त करने में) देने में कुशल मदोन्मत्त भ्रमर रूपी स्तुतिगायकों से गाई गई कीर्तिवाला, चारों ओर विहरण करने वाला वसन्तऋतु युवावस्था को प्राप्त हुआ। अर्थात् छोटे२ नये कड़े स्तन वाली किशोरियों के लाल ओठों को चूम लेने में कुशल स्तुतिपाठकों द्वारा कीर्तिगान किए जाने वाले नवयुवक के

समान कलियों से युक्त लताओं को नये लाल पत्ते प्रदान करने में कुशल, भौंरों की गुंजाहट से कीर्तिगान किया जाने वाला वसन्त युवावस्था को प्राप्त हुआ।

सलीलमङ्गीकृतपञ्चबाण-साम्राज्यभारस्य मधोरभङ्गः।
एको भुजस्तस्य लवङ्गवायु-रन्यः पिकस्त्रीकलपञ्चमोऽभूत् ॥३९॥

अन्वयः

सलीलम् अङ्गीकृतसाम्राज्यभारस्य तस्य मधोः अभङ्गः एकः भुजः लवङ्गवायुः अन्यः पिकस्त्रीकलपञ्चमः अभूत्।

व्याख्या

लीलया विलासेन सहितं सलीलमङ्गीकृतः स्वीकृतः पञ्चबाणस्य कामस्य साम्राज्यभारोऽखिलराज्यशासनभारो येन स तस्य स्वीकृतकामसाम्राज्यभारस्य तस्य प्रसिद्धस्य मधोर्वसन्तस्याऽभङ्गोऽविकलो बलिष्ठ इत्यर्थः। एको भुजो बाहुर्लवङ्गवायुर्दक्षिणानिलोऽन्य इतरो बाहुः पिकानां कोकिलानां स्त्रियः कोकिलास्तासां कलः सुन्दरः पञ्चमः पञ्चमस्वरोऽभूत्। एतेन वसन्तस्य कामसाम्राज्ये मन्त्रित्वं प्रतीयते।

भाषा

खेलवाड से ही कामदेव के साम्राज्य के समग्र कार्यों को करने का स्वीकार करने वाले उस वसन्त ऋतु का एक बलवान् हाथ दक्षिणानिल था और दूसरा हाथ कोयल का सुन्दर पञ्चम स्वर था। अर्थात् काम के राज्य में वसन्त ही प्रधान मंत्री था जो दक्षिणानिल तथा कोकिला के पञ्चम स्वर का प्रयोग कर उसका साम्राज्य चलाता था।

राशीकृताः पुष्पपरागपुञ्जाः पदे पदे दक्षिणमारुतेन।
मत्तस्य चैत्रद्विरदस्य कर्तु-मक्षूणहेतोरिव पांसुतल्पान् ॥४०॥

अन्वयः

दक्षिणमारुतेन पदे पदे मत्तस्य चैत्रद्विरदस्य अक्षूणहेतोः पांसुतल्पान् कर्तुम् इव पुष्पपरागपुञ्जाः राशीकृताः।

व्याख्या

दक्षिणमारुतेन मलयानिलेन पदे पदे स्थाने स्थाने मत्तस्य मदान्धस्य चैत्र एव द्विरदो गजः 'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो गजः' इत्यमरः। तस्याऽक्षूणहेतोरक्षूणं[१] विश्रामः सततपरिश्रमेण समागतक्लान्तिरूपन्यूनताया दूरीकरणार्थं विश्रान्तिरित्यर्थः। स एव हेतुः कारणं तस्मात् पांसवो धूलय एव तल्पानि शय्याः 'तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपोऽस्त्रियाम्' इत्यमरः। तानि कर्तुमिव विधातुमिव पुष्पाणां कुसुमानां परागस्य रजसः पुञ्जास्समूहा राशीकृता एकत्रीकृताः। वसन्ते परागस्याऽऽधिक्यं भवति स च मलयमारुतवेगेनैकत्रीभवति श्रमनिवारणार्थं मत्तचैत्रगजस्य तल्पताञ्च प्राप्नोतीति भावः।

भाषा

दक्षिणानिलने स्थान स्थान पर मदोन्मत्त चैत्र रूपी हाथी के विश्राम के निमित्त धूलि की कोमल शय्या बनाने के लिये मानों पुष्प की धूलि को एकत्र किया।

लग्नद्विरेफध्वनिपूर्यमाणं वासन्तिकायाः कुसुमं नवीनम्।
आसादयामास वसन्तमास-जन्मोत्सवे मङ्गलशङ्खलीलाम्[२] ॥४१॥

अन्वयः

वसन्तमासजन्मोत्सवे लग्नद्विरेफध्वनिपूर्यमाणं वासन्तिकायाः नवीनं कुसुमं मङ्गलशङ्खलीलाम् आसादयामास।

व्याख्या

वसन्तमासस्य मधुमासस्य जन्मन उत्सवस्तस्मिन्, लग्नाः संश्लिष्टा द्विरेफा

---

[१] संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु ॥

'टुक्षु' गतौ—आदादिकधातोर्भावे नङ प्रत्यये बाहुलकाद्दीर्घे नञ्समासे 'अक्षूण' शब्दो निष्पन्नः। न क्षूणमक्षूणं गत्यवरोधो विश्राम इत्यर्थः।

[२] उक्तं साहित्यदर्पणे—

मल्लिकामुकुले चण्डि ! भाति गुञ्जन्मधुव्रतः।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥

भ्रमरास्तेषां ध्वनिभिर्झङ्कारैः पूर्यमाणं परिपूरितं वासन्तिकाया माधवीलताया नवीनं प्रत्यग्रं कुसुमं पुष्पं मङ्गलशङ्खस्य माङ्गलिककार्यचिन्हभूतशङ्खस्य लीलां विलासमासादयामास संप्राप। कथमन्यस्य लीलामन्यः कर्तुमर्हतीति लीलासदृशीं लीलामिति पर्यवसितेऽर्थे सति पदार्थनिदर्शनालङ्कारः। 'अभवन्वस्तुसम्बन्ध उपमापरिकल्पकः' इति लक्षणात्।

भाषा

वसन्त मास के जन्मोत्सव के अवसर पर छाए हुए भौरों की गुञ्जार से भरा जाने वाला (बजाया जाने वाला) माधवीलता का पुष्प, माङ्गलिक अवसरों पर बजाए जाने वाले शङ्ख की शोभा को प्राप्त हुआ।

गते हिमर्तौ ध्रुवमुष्णखिन्नः शीतोपचारं मलयः सिषेवे।
यदाजगाम व्यजनोपमानां समीरणश्चन्दनपल्लवानाम् ॥४२॥

अन्वयः

हिमर्तौ गते उष्णखिन्नः मलयः ध्रुवं शीतोपचारं सिषेवे। यत् व्यजनोपमानां चन्दनपल्लवानां समीरणः आजगाम।

व्याख्या

हिमः शीत ऋतुरिति हिमर्तुस्तस्मिन् गते व्यतीते सति, उष्णेनोष्मणा खिन्नः संतप्तो मलयो मलयगिरिः ध्रुवं निश्चयेन शीतोपचारं ग्रीष्मनिवारकं शैत्योत्पादकं साधनं सिषेवे सेवितवान्। यद्यस्मात्कारणाद्व्यजनमेवोपमानं येषां ते व्यजनोपमास्तेषां तालवृन्तसमानानां चन्दनपल्लवानां श्रीखण्डकिसलयानां समीरणो वायुराजगाम संचचाल। चन्दनपल्लवस्य शैत्यात्तत्सम्पर्काद्वायोरपि शैत्यजनकत्वमिति भावः।

भाषा

हेमन्त व शिशिर ऋतुओं के बीत जाने पर गरमी से खिन्न मलयपर्वत, निश्चय ही शीतोपचार का सेवन करने लगा। क्योंकि पंखों के समान चन्दनवृक्ष के कोमल पत्तों का वायु बहने लगा। अर्थात् गर्मी से पीड़ित होकर जन साधारण पंखा चला कर अपनी गर्मी दूर करते हैं। मलय पर्वत ने चन्दन के पत्तों से हवा लेकर अपनी गर्मी शान्त की।

मनस्विनीनां मनसोऽवतीर्य मानस्य वेगेन पलायितस्य ।
जीवग्रहायेव वसन्तमित्रं बभ्राम वायुः ककुभां मुखानि ॥४३॥

अन्वयः

वसन्तमित्रं वायुः मनस्विनीनां मनसः अवतीर्य वेगेन पलायितस्य मानस्य जीवग्रहाय इव ककुभां मुखानि बभ्राम ।

व्याख्या

वसन्तस्य वसन्तर्तोर्मित्रं सुहृद्वायुर्दक्षिणानिलः प्रशस्तं मनो यासां ता मनस्विन्यस्तासां मनस्विनीनां मानिनीनां मनसो हृदयादवतीर्य निष्क्रम्य वेगेन जवेन पलायितस्य प्रधावतो गच्छत इत्यर्थः । मानस्याऽहङ्कारस्य जीवस्य प्राणानां ग्रहाय ग्रहणाय इव प्राणवधार्थमिवेत्यर्थः । ककुभां दिशां 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्चताः' इत्यमरः । मुखानि मण्डलानि बभ्राम चचारान्वेष्टुं गतवानित्यर्थः । दक्षिणानिलेन मानवतीनां मानो दूरीभवतीति भावः । उत्प्रेक्षालङ्कारः ।

भाषा

वसन्तऋतु का मित्र दक्षिणानिल, मानवती स्त्रियों के मन में से निकल कर वेग से भाग चलने वाले मान का प्राणान्त करने के लिये मानों उसकी खोज में सब दिशाओं में घूमने (बहने) लगा। अर्थात् दक्षिणानिल के लगते ही मानवती का मान एक दम दूर हो जाता है ।

वियोगिनीनामवशाल्लुलोठ कण्ठेषु लीलाकलपञ्चमो यः ।
तेनैव चक्रे मदनस्य कार्यं पुण्यैर्यशोऽभूत्पिकपञ्चमस्य ॥४४॥

अन्वयः

अवशात् वियोगिनीनां कण्ठेषु यः लीलाकलपञ्चमः लुलोठ तेन एव मदनस्य कार्यं चक्रे । पुण्यैः पिकपञ्चमस्य यशः अभूत् ।

व्याख्या

अवशात्प्रियविरहवेदनया मनसोऽसामर्थ्यात् स्वशरीरचेष्टायाः पारतन्त्र्याद्वियोगिनीनां विरहिणीनां कण्ठेषु गलेषु यो लीलया विलासेन कलः मधुरः पञ्चमः

पञ्चमस्वरो लीलाकलपञ्चमो लुलोठ समुच्चारितस्तेनैव तासां कण्ठस्थित-पञ्चमस्वरेणैव मदनस्य कामस्य कार्यं सर्वलोकविजयात्मकं चक्रे अकारि। पुण्यैस्सुकृतैरेव पिकपञ्चमस्य कोकिलपञ्चमस्वरस्य यशः कीर्तिरभूत् बभूव। कोकिलपञ्चमस्वरस्य यत्कामोद्दीपनात्मकं कार्यं तद्वियोगिनीकण्ठगतपञ्चमस्वर-निनादेनैव सम्पादितम्। परन्तु प्रसिद्धिवशात् पुराकृतपुण्यैः कोकिलपञ्चमस्व-रस्यैव तद्विषये यशो जातम्।

भाषा

विरहजन्य पीडा जनित असामर्थ्य से विरहिणियों के गलों में से जो विलास से भरा सुन्दर पञ्चम स्वर निकलता है वही कामदेव के सब कामोद्दीपक कार्यों को करता है। किन्तु प्रसिद्धि के कारण उसका यश, पुरातन सुकृतों से, कोयल के पञ्चम स्वर को प्राप्त हुआ है।

पदातिसंवर्गणकारणेन पदे पदे चम्पकराशिभङ्ग्या।
वसन्तसामन्तविकीर्यमाणं हेमेव रेजे स्मरपार्थिवस्य॥४५॥

अन्वयः

पदे पदे चम्पकराशिभङ्ग्या स्मरपार्थिवस्य पदातिसंवर्गणकारणेन वसन्तसामन्तविकीर्यमाणं हेम इव रेजे।

व्याख्या

पदे पदे स्थाने स्थाने 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। चम्पकराशिभङ्ग्या चम्पकपुष्पसमूहव्याजेन स्मरः काम एव पार्थिवस्तस्य कामनृपतेः पदातीनां कामसैनिकानां संवर्गणमावर्जनमाकर्षणमित्यर्थः। तस्य कारणेन वसन्त एव सामन्तस्सहायकनृपस्तेन मन्त्रिणेत्यर्थः। विकीर्यमाणं पुरस्काररूपेण दीयमानं हेमेव सुवर्णमिव रेजे शुशुभे। सापह्नवोत्प्रेक्षालङ्कारः।

भाषा

स्थान स्थान पर, कामदेव की पैदल सेना के लिये, चम्पे के फूलों के ढेर के मिष से, मानों वसन्त रूपी सामन्त राजा अर्थात् मन्त्री के द्वारा पुरस्कार के रूप में दिया जाने वाला सोना ही शोभित हो रहा था।

चचार चूतद्रुममञ्जरीषु चुचुम्ब नानाकलिकामुखानि ।
स्त्रीराज्यमध्यस्थ इव द्विरेफः स्थातुं न लेभे क्षणमेवमेव ॥४६॥

अन्वयः

द्विरेफः चूतद्रुममञ्जरीषु चचार । नानाकलिकामुखानि चुचुम्ब । स्त्रीराज्यमध्यस्थः इव एवम् एव क्षणं स्थातुं न लेभे ।

व्याख्या

द्विरेफो भ्रमरः 'द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः' इत्यमरः । चूतद्रुमाणां सहकारपादपानां 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः । मञ्जर्यः वल्लर्यस्तासु 'वल्लरिर्मञ्जरिः स्त्रियौ' इत्यमरः । चचार विहरति स्म । नानाकलिकानां विभिन्नपुष्पकोरकाणां मुखानि वदनान्यग्रभागानित्यर्थः । चुचुम्बाऽऽस्वादयत् । स्त्रीणां नारीणां राज्यं तस्य मध्ये तिष्ठतीति स्त्रीराज्य-मध्यस्थ इव कामिनीराज्यान्तर्गत इवैवमेव कर्मरहितः क्षणमीषत्कालपर्यन्तमपि स्थातुं मनश्चाञ्चल्यं विहाय धैर्येणावस्थातुं न लेभे न प्राप । स्त्रीसमूहान्तर्गतो नरो मनसः स्थिरत्वं विधातुं न शक्नोति । ध्रुवमेव कामाभिभूतस्सन् ताभिस्सह रमते तथैव भ्रमरोऽपि । इत्यप्रकृतव्यवहारसमारोपात्समासोक्तिरलङ्कारः ।

भाषा

भ्रमर आम की बौरों पर चक्कर काटने लगा । विभिन्न फूलों की कलियों के मुखों का चुम्बन करने लगा अर्थात् अग्रभाग का आस्वादन लेने लगा । स्त्रियों के राज्य में अर्थात् मध्य में रहने वाले के समान वह बिना कुछ व्यापार किए एक क्षण भी स्थिर न रह सका । अर्थात् सदैव मञ्जरी व कलिका रूपी कामिनियों के साथ रहने से कामाभिभूत होकर एक क्षण भी स्थिर चित्त से न रह सका ।

विलासिनामादिगुरुस्त्रिलोक्या-मन्योन्यलीलाभुजबन्धनेषु ।
उत्तम्भिताशोकपलाशपाणिर्न चैत्रमल्लः प्रतिमल्लमाप ॥४७॥

अन्वयः

त्रिलोक्यां विलासिनाम् अन्योन्यलीलाभुजबन्धनेषु आदिगुरुः उत्तम्भि-ताशोकपलाशपाणिः चैत्रमल्लः प्रतिमल्लं न आप ।

व्याख्या

त्रयाणां लोकानां समाहारस्त्रिलोकी त्रिभुवनं तस्यां विलासिन्यश्च विलासिनश्चेति विलासिनस्तेषां विलासिनां 'पुमान् स्त्रिया' इत्येकशेषः। कामविलासयुक्तानामन्योन्यस्य परस्परस्य लीलायां कामक्रीडायां भुजबन्धनानि बाहुबन्धनानि तेषु कामक्रीडाबाहुबन्धनविशयेष्वादिगुरुः प्रथमाचार्यो हठात्प्रवर्तकः, नितरां कामोद्दीपकत्वात्। उत्तम्भितौ युद्धाह्वानायोत्थापितौ, अशोकश्च पलाशश्चाऽशोकपलाशावेव पाणी येन सः चैत्र एव मल्लो वीरश्चैत्रमल्लः प्रतिमल्लं प्रतिपक्षवीरं न आप युद्धार्थं न प्राप। चैत्रमासः सर्वोत्कृष्टत्वेन कामिनामुद्दीपकः। तेन तुल्यः कोऽपि नेत्यर्थः।

भाषा

तीनों भुवनों में काम विलास से युक्त प्राणियों को परस्पर कामक्रीडा में भुजबन्ध की शिक्षा देने वाला, आदि गुरु; और अशोक और पलास रूपी दोनों हाथों को उठाकर युद्ध के लिये ललकारने वाले चैत्र मास रूपी योद्धा को लड़ने के लिये कोई विपक्षी योद्धा न मिल सका। अर्थात् चैत्र मास में कामोद्दीपक अशोक और पलास के वृक्षों को देख कर सभी प्राणी कामासक्त हो जाते हैं और चैत्र के प्रभाव से कोई भी वञ्चित नहीं रह सकता।

पुरन्ध्रिगण्डूषसुराभिलाषं पश्यन्नशोको बकुलद्रुमस्य।
प्रियप्रियापादतलप्रहार–मात्मानमल्पव्यसनं विवेद ॥४८॥

अन्वयः

बकुलद्रुमस्य पुरन्ध्रिगण्डूषसुराभिलाषं पश्यन् अशोकः प्रियप्रियापादलताप्रहारम् आत्मानम् अल्पव्यसनं विवेद।

व्याख्या

बकुलद्रुमस्य केसरवृक्षस्य 'अथ केसरे। बकुलो वञ्जुलोऽशोके' इत्यमरः। 'मौलसरी' इति भाषायाम्'। पुरन्ध्रीणां कामिनीनां गण्डूषस्य या सुरा मुखवर्ति मद्यं तस्याऽभिलाषमिच्छां पश्यन्निरीक्षमाणोऽशोक अशोकद्रुमः प्रियोऽभीष्टः प्रियायाः कान्तायाः पादतलस्य चरणतलस्य प्रहारस्ताडनं यस्य स तमात्मानं स्वमल्पं क्षुद्रं न्यूनं वा व्यसनं प्रकृत्या प्रियवस्तु यस्य स तमल्पव्यसनं विवेद ज्ञातवान्। कान्तामुखोच्छिष्टमद्याभिलाषस्य निन्दितत्वात्तदपेक्षया कान्तापादतलप्रहारस्याऽल्प-

व्यसनत्वं, तत्र कामिनीस्पर्शजनितसुखानुभवश्चेति भावः। 'पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः' इति कविसमयः।

भाषा

मौलसरी के वृक्ष की, (फूलने के लिये) कामिनी के शराब के कुल्ले की अभिलाषा को जानने वाला अशोक वृक्ष, (अपने फूलने के लिये) कामिनी के पाद प्रहार की अभिलाषा रखने वाले अपने को अपेक्षाकृत कम व्यसनी समझने लगा। अर्थात् अपने ऊपर झूठी शराव के थूके जाने से कामिनी की लात खा लेना अच्छा है ऐसा समझने लगा। क्योंकि उसमें कामिनीस्पर्शजनित-सुखानुभूति होती है।

चूतद्रुमालीभुजपञ्जरेण रणद्द्विरेफावलिकङ्कणेन।
मित्रं मधुः कोकिलमञ्जुनाद-पूर्वाभिभाषी स्मरमालिलिङ्ग ॥४६॥

अन्वयः

मित्रं कोकिलमञ्जुनादपूर्वाभिभाषी मधुः रणद्द्विरेफावलिकङ्कणेन चूतद्रुमालीभुजपञ्जरेण स्मरम् आलिलिङ्ग।

व्याख्या

मित्रं सुहृत् 'अथ मित्रं सखा सुहृत्' इत्यमरः। कोकिलानां पिकानां मञ्जुनादः प्रियध्वनिः पूर्वो यस्मिन्कर्मणि तत् कोकिलमञ्जुनादपूर्वं यथास्यात्तथाऽभिभाषते स्वागतं वदतीति अथवा कोकिलनादेन पूर्वाभिभाषी प्रथमस्वागतकर्ता मधुर्वसन्तो रणन्तो झङ्कारशब्दं कुर्वन्तो द्विरेफाः भ्रमरास्तेषामावलिः पङ्क्तिः 'वीथ्यालिरावलिः पंक्तिः श्रेणी लेखास्तु राजयः' इत्यमरः। एव कङ्कणं यस्य स तेन भ्रमरपङ्क्तिरूपकङ्कणयुक्तेन चूतद्रुमाणां सहकारवृक्षाणामावलिः पंक्तिरेव भुजपञ्जरं बाहुपिञ्जरं बाहुपाश इत्यर्थः। तेन सहकारवृक्षावलिरूपबाहुपाशेन स्मरं काममालिलिङ्ग परिरब्धवान्। मधौ मित्रत्वारोपश्चूतद्रुमाल्यां भुजपञ्जरत्वारोपो रणद्विरेफावल्यां कङ्कणत्वारोपश्च स्मरकर्मकालिङ्गने हेतुरिति रूपकम्।

भाषा

मित्र तथा कोयल की कोमल कूकों से प्रथम स्वागत करने वाले वसन्त ऋतु ने गुंजार करने वाले भौरों की कतार रूपी कंगन वाले आम के पेड़ों की कतार रूपी बाहुपाश से कामदेव का आलिङ्गन किया।

उन्निद्रपङ्क्तिस्थितचम्पकानि चकाशिरे केलिवनान्तराणि ।
वियोगिनीनां कवलीकृतानां सुवर्णकाञ्चीभिरिवाञ्चितानि ॥५०॥

अन्वयः

उन्निद्रपङ्क्तिस्थितचम्पकानि केलिवनान्तराणि कवलीकृतानां वियोगिनीनां सुवर्णकाञ्चीभिः अञ्चितानि इव चकाशिरे ।

व्याख्या

उद्‌गता दूरीभूता निद्रा संकोचो येषां तान्युन्निद्राणि विकसितानि पंक्तीषु श्रेणीषु स्थितानि विद्यमानानि चम्पकानि चम्पककुसुमानि येषु तानि केलिवनानां क्रीडोद्यानानामन्तराणि मध्यभागाः कवलीकृतानां चम्पकादिपुष्पसमृद्धिमता वसन्तेन भक्षितानां हृतानामित्यर्थः। वियोगिनीनां विरहिणीनां सुवर्णकाञ्चीभिः काञ्चनरशनाभिरञ्चितानि तत्समानपीतवर्णत्वात्समन्वितानीव चकाशिरे विदिद्युतिरे । वसन्ते पतिविरहाद्दशमविरहावस्थां प्राप्तानां मृतानामित्यर्थः । वियोगिनीनां पीतवर्णत्वात्काञ्चनकाञ्चीरूपाणीव चम्पकपुष्पाणि शुशुभिर इति भावः । उत्प्रेक्षालंकारः ।

भाषा

फूले हुए और कतार में लगे पीले चम्पे के फूलों से युक्त क्रीडा कानन के मध्यस्थल, वसन्त ऋतु के कारण पति वियोग से दशम विरहावस्था को प्राप्त अर्थात् मृत वियोगिनियों की मानों सोने की पीली करधनियों के रूप से शोभित हो रहे थे ।

मर्मव्यथाविस्मयघूर्णमान-मूर्धोच्छलत्कुण्डलविभ्रमेण ।
शब्दानुसारेण वियोगिनीभिः क्षिप्ताः पिकानामिव कण्ठपाशाः ॥५१॥

अन्वयः

वियोगिनीभिः मर्मव्यथाविस्मयघूर्णमानमूर्धोच्छलत्कुण्डलविभ्रमेण पिकानां शब्दानुसारेण कण्ठपाशाः क्षिप्ताः ।

व्याख्या

वियोगिनीभिर्विरहिणीभिर्मर्मव्यथायाः कोकिलकूजितश्रवणजनितमार्मिकवेदनाया विस्मयेनाऽऽधिक्येनाऽथवा विस्मयो लोकसीमातिवर्तित्वं तेन 'विविधेष

पदार्थेषु लोकसीमातिवर्तिषु । विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः' इति साहित्यदर्पणे । घूर्णमानेभ्यो भ्रमद्भ्यो मूर्धभ्यो मस्तकेभ्य उच्छलतामूर्ध्वं गच्छतां कुण्डलानां कर्णभूषणानां विभ्रमेण व्याजेन पिकानां कोकिलानां शब्दस्य रवस्याऽनुसारोऽनुसरणं तेनाऽमुकस्थानतः शब्दः समायातीत्यनुमानेन तेषां बन्धनाय कण्ठपाशाः कण्ठरज्जव इव क्षिप्ता मुक्ताः । पिकस्वराणां पीडादायकत्वेन पिकानां बन्धनार्थं विरहिणीभिः कर्णभूषणचंक्रमणव्याजात्पाशाः क्षिप्ता इवेति भावः । अत्रापन्हुतिरलङ्कारः ।

भाषा

वियोगिनिओं ने कोकिल के शब्दों को सुन कर मार्मिक वेदना के आधिक्य मे मस्तकों को सतत हिलाने से ऊपर गोलाकार रूप में हिलने वाले कर्णभूषणों के मिष से मानों कोयल के शब्दों का अनुसरण कर उनके गलों को बांध कर उनका प्राणान्त करने वाले पाशों को छोड़ा ।

उदञ्चयन्किंशुकपुष्पसूचीः सलीलमाधूतलताकशाग्रः ।
वियोगिनां निग्रहणाय सज्जः कामाज्ञया दक्षिणमारुतोऽभूत् ॥५२॥

अन्वयः

किंशुकपुष्पसूचीः उदञ्चयन् सलीलम् आधूतलताकशाग्रः दक्षिणमारुतः कामाज्ञया वियोगिनां निग्रहणाय सज्जः अभूत् ।

व्याख्या

किंशुकपुष्पाणि पलाशकुसुमान्येव सूचय स्ताः (कर्म) किंशुकपुष्पसूची रुदञ्चयन्नुन्नयन् लीलया विलासेन सहितं सलीलं यथास्यात्तथा आधूतं कम्पितं लतैव कशा तस्या अग्रं येन स दक्षिणमारुतो मलयपवनः कामस्य मकरध्वजस्याऽऽज्ञयाऽनुशासनेन वियोगिन्यश्च वियोगिनश्चेति वियोगिनस्तेषां वियोगिनां 'पुमान्स्त्रियेत्येकशेषः' । निग्रहणाय शासनाय सज्ज उद्यतः संनद्धोऽभूत् । यथा शकटस्थबलीवर्दप्रेरणाय सूचीकशयोः प्रयोगः क्रियते तथैव कामाज्ञया कामिजनपीडनाय वसन्तेन किंशुकपुष्पलतयोः प्रयोगः कृत इति भावः । अत्र रूपकालङ्कारः ।

भाषा

पलाश के फल रूपी काँटे को लिए हुए, विलास से लता रूपी कोड़े

या चाबुक के अग्रभाग को हिलाने वाला दक्षिण वायु, कामदेव की आज्ञा से, वियोगी और वियोगिनिओं पर शासन करने के लिए तयार हो गया। गाड़ी के बैल को हाँकने के लिये चाबुक और चाबुक के दण्डे में एक काँटा भी लगा रहता है जिससे गाड़ीवान बैलों को ठीक चलाता है। उसी प्रकार वियोगी और वियोगिनिओं पर अपना शासन चलाने के लिए काम की आज्ञा से वसन्तऋतु पलाश का फूल रूपी काँटा और लता रूपी चाबुक लेकर, तयार हो गया।

प्रसूननाराचपरम्पराभिर्वर्षत्सु योधेष्विव पादपेषु।
वसन्तमत्तद्विरदाधिरूढः प्रौढ़त्वमाप स्मरभूमिपालः ॥५३॥

अन्वयः

योधेषु इव पादपेषु प्रसूननाराचपरम्पराभिः वर्षत्सु (सत्सु) वसन्तमत्तद्विरदाधिरूढ़ः स्मरभूमिपालः प्रौढ़त्वम् आप।

व्याख्या

योधेषु भटेष्विव 'भटा योधाश्च योद्धारः' इत्यमरः। पादपेषु वृक्षेषु प्रसूनानि पुष्पाण्येव नाराचाः प्रक्ष्वेडना लोहनिर्मितशरास्तेषां परम्परास्ताभिः प्रसूननाराच परम्पराभिर्वर्षत्सु पुष्पबाणधाराः पातयत्सु सत्सु, पादपेभ्यः पुष्पेषु पतत्स्वतिभावः। वसन्त एव मत्तो मदान्धो द्विरदो गजस्तमधिरूढोऽधिष्ठितः स्मरः काम एव भूमिपालो राजा प्रौढत्वं प्रकर्षमौन्नत्यमित्यर्थः। आप प्राप। पुष्पोद्गमेन वसन्ते कामस्य प्रभावः प्रसृत इति भावः।

भाषा

योधाओं के समान वृक्षों के पुष्परूपी लोहे के बाणों की वृष्टि करते रहने पर अर्थात् अत्यधिक फूलों के उत्पन्न होकर नीचे गिरते रहने पर वसन्त रूपी मदोन्मत्त हाथी पर सवार कामरूपी राजा उन्नत अवस्था को प्राप्त हुआ अर्थात् काम का साम्राज्य चारों ओर फैल गया।

समर्प्यमाणाद्भुतकौसुमास्त्र-श्रेण्या चित्रोकृत[illegible]न।
अधिज्यधन्वापि पराङ्मुखोऽभून्निषङ्गभारे भगवाननङ्गः ॥५४॥

अन्वयः

चित्रीकृतकाननेन चैत्रेण समर्प्यमाणाद्भुतकौसुमास्त्रः अधिज्यधन्वा अपि भगवान् अनङ्गः निषङ्गभारे पराङ्मुखः अभूत् ।

व्याख्या

चित्रीकृतमलङ्कृतं विभिन्नवर्णनवीनपुष्पादिनेति भावः । काननं वनं 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इत्यमरः । येन स तेन चैत्रेण वसन्तमासेनेत्यर्थः । समर्प्यमाणं दीयमानमद्भुतं विचित्रं कौसुमं पौष्पमस्त्रं बाणो यस्मै स ज्यां मौर्वीमधिगतमधिज्यं धनुर्यस्य सः समारोपितचापोऽपि भगवान् पूज्योऽनङ्गः कामो निषङ्गभारे तूणीरभारग्रहणे पराङमुखो निरभिलाषोऽभूत् । चैत्रेण कानने महान्पुष्परूपबाणराशिरेकत्रीकृतो दत्तश्च कामाय येन बाणसंरक्षणाय तूणीरधारणस्याऽऽवश्यकतैव न जातेति भावः ।

भाषा

जंगलों को रंगबिरंगी फूलों से सुशोभित करने वाले चैत्र से, आश्चर्यजनक फूलों के बाणों को पाकर, धनुष चढ़ाकर रखने वाले भी भगवान् कामदेव, तरकस धारण करने में विमुख रहे। अर्थात् सदैव चैत्र द्वारा पुष्पबाण दिये जाने के कारण धनुष चढ़ाए रहने पर भी तरकस में बाण रखकर उसे पीठ पर लटका रखने की आवश्यकता भगवान् कामदेव को न पड़ी ।

भृङ्गारिणीमार्जितदन्तपंक्ति-कान्त्येव निर्यन्त्रणमुच्छलन्त्या ।
प्रक्षाल्यमानस्य शनैरवापु-रनिन्द्यमिन्दोः किरणाः प्रसादम् ॥५५॥

अन्वयः

निर्यन्त्रणम् उच्छलन्त्या भृङ्गारिणीमार्जितदन्तकान्त्या प्रक्षाल्यमानस्य इव इन्दोः किरणाः शनैः अनिन्द्यं प्रसादम् अवापुः ।

व्याख्या

निर्यन्त्रणं निरर्गलमुच्छलन्त्योर्ध्वं प्रसरन्त्या भृङ्गारिणीभिरङ्गनाभिर्मार्जिता-स्स्वच्छीकृता धवलीकृता इत्यर्थः । दन्ता दशनास्तेषां कान्तिस्तया प्रक्षाल्यमानस्य संमार्जितस्येव धवलीकृतस्येवेत्यर्थः । इन्दोश्चन्द्रस्य किरणाः कराः शनैः क्रमशोऽनिन्द्यं निर्मलं प्रसादं धावल्यमवापुः प्रापुः । उत्प्रेक्षालङ्कारः ।

भाषा

बिना रोक टीक ऊपर की ओर फैलनेवाली, अङ्गनाओं द्वारा साफ किए हुए दाँतों की कान्ति से मानों धोए हुए अर्थात् साफ किए हुए चन्द्रमा के किरण, धीरे धीरे अपूर्व स्वच्छता अर्थात् धवलता को प्राप्त हुए ।

अथ विरहिणीविलापं वर्णयति कविः—

त्वं चैत्र मित्रं यदि मन्मथस्य तस्मिन्ननङ्गे कथमक्षताङ्गः ।
ज्ञातं तवान्तर्गतमागतोऽसि मिषेण नाशाय वियोगिनीनाम् ॥५६॥

अन्वयः

हे चैत्र यदि त्वं मन्मथस्य मित्रं (तर्हि) तस्मिन् अनङ्गे (सति) त्वं कथम् अक्षताङ्गः । तव अन्तर्गतं (मया) ज्ञातम् । त्वं मिषेण वियोगिनीनां नाशाय आगतः असि ।

व्याख्या

हे चैत्र ! हे वसन्त ! यदि त्वं मन्मथस्य कामस्य मित्रं सुहृत्तर्हि तस्मिन्कामेऽनङ्गेऽङ्गहीने सति त्वं कथमक्षतान्यङ्गानि यस्य स अभग्नावयवोऽविकलशरीर असीत्यर्थः । तव वसन्तस्याऽन्तर्गतं मानसगतो भावो मया विरहिण्या ज्ञातं बुद्धम् । त्वं मिषेण व्याजेन वियोगिनीनां विरहिणीनां नाशाय विध्वंसनायाऽऽगतस्समायातोऽसि । कामस्याऽनङ्गत्वे जातेऽपि त्वमधुना पुष्पविकासादिव्याजेन तदीयं वियोगिनीनाशरूपं कार्यं सम्पादयसीति भावः ।

भाषा

हे वसन्त ! यदि तुम कामदेव के मित्र हो तो कामदेव के शरीर रहित होने पर तुम कैसे अविकल शरीर वाले हो अर्थात् तुम कैसे बिना आघात के रह गये । तुम्हारे हार्दिक भाव को मैंने समझ लिया । तुम बहाने से वियोगिनिओं का नाश कर डालने के लिये आए हो । अर्थात् कामदेव के काम में तुम, फूलों को पैदा कर बहाने से सहायता कर ही रहे हो ।

नूनं महापातकिनं वितर्क्य वियोगिवर्गक्षयदीक्षितं त्वाम् ।
पस्पर्श न त्र्यम्बकनेत्रवह्निः पापैरखण्डैः प्रियखण्डितानाम् ॥५७॥

अन्वयः

त्र्यम्बकनेत्रवह्निः प्रियखण्डितानाम् अखण्डैः पापैः त्वां वियोगिवर्ग-क्षयदीक्षितं नूनं महापातकिनं वितर्क्य न पस्पर्श ।

व्याख्या

त्रीणि अम्बकानि नेत्राणि यस्य स त्र्यम्बकः शिवस्तस्य नेत्रवह्निर्नयनाग्निः शिवनेत्रवह्निः प्रियेण कान्तेन खण्डिता विरहितास्तासां विरहिणीनामथवा प्रियाः खण्डिता सुदूरं गता यासां तासां वियोगिनीसम्बन्धिनामित्यर्थः । अखण्डैरतिमहद्भिः पापैर्दुष्कृतैः प्राणापहरणरूपैरित्यर्थः । त्वां वसन्तं वियोगिनां विरहिणां वर्गस्य समूहस्य क्षये नाशकार्ये दीक्षितं संजातदीक्षं सन्नद्धमत एव नूनं निश्चयेन महापातकिनं महापापिनं वितर्क्य विचार्य न पस्पर्श न स्पृष्टवान् न दग्धवानित्यर्थः ।

भाषा

शंकर की आंख की आगने, वियोगिनिओं के सम्बन्ध में किये हुए बड़े २ पापों से, तुम को विर ी लोगों के समूह को नाश करने में लगे हुए अत एव निश्चय पूर्वक महापातकी समझ कर, नहीं छूवा अर्थात् नहीं जलाया ।

हराहवे पञ्चशरं विमुच्य पलायितः क्षत्रपराङ्मुखस्त्वम् ।
अस्य क्षताङ्गस्य पुरोऽधुनात्र हा चैत्रचाण्डाल कथं स्थितोऽसि ॥५८॥

अन्वयः

क्षत्रपराङ्मुखः त्वं हराहवे पञ्चशरं विमुच्य पलायितः । हे चैत्र-चाण्डाल ! अधुना अत्र क्षताङ्गस्य अस्य पुरः हा ! कथं स्थितः असि ।

व्याख्या

क्षात्रयकुलवाचकस्य क्षत्रशब्दस्याऽत्र लक्षणया क्षत्रियधर्मोऽर्थः । क्षत्रात्-क्षत्रियधर्मात्पराङमुखो निरपेक्षस्त्यक्तक्षत्रियधर्मस्त्वं हरस्य शंकरस्याऽहवो युद्धं तस्मिन्, शङ्करेण सह संजाते युद्धे पञ्चशरं कामं 'कामः पञ्चशरः स्मरः' इत्यमरः । विमुच्य परित्यज्य पलायितोऽपसृतः । प्राणभयात्तमेकाकिनं परित्यज्य पलाय्य दूरं गत इत्यर्थः । चैत्र एव चाण्डालस्तत्सम्बोधने हे चैत्रचाण्डाल ! हे चैत्राधम ! अधुनेदानीमत्राऽस्मिन्प्रदेशे क्षतं भग्नं शरीरं गात्रं यस्य स तस्य भग्नगात्रस्याऽस्य कामस्य पुरोऽग्रे हा खेदसूचकमव्ययम् । कथं केन प्रकारेण

स्थितोऽसि विद्यमानोऽसि। घोरसङ्कटे त्यक्तसङ्गस्य कामस्य पुनः सम्मुखे समागमस्ते निर्लज्जत्वमेव द्योतयतीति भावः।

भाषा

क्षत्रियधर्म से विमुख तुम, शिव के साथ भये हुए युद्ध में कामदेव को छोड़कर भाग गये थे। हे नीच चैत्र! इस समय, इस स्थान पर भग्न शरीर कामदेव के सन्मुख हाय! कैसे उपस्थित हो सके हो। अर्थात् घोर संकट में कामदेव का साथ छोड़कर भाग जाने वाले तुम, इस समय यहाँ कामदेव के सन्मुख कैसे उपस्थित होकर निर्लज्जता प्रकट कर रहे हो।

इहैव सङ्गः फलवान्बभूव त्वया महापातकिना पिकानाम्।
यदर्धदग्धोल्मुककश्मलेन देहेन लोकस्य बहिश्चरन्ति ॥५६॥

अन्वयः

महापातकिना त्वया पिकानां सङ्गः इह एव फलवान् बभूव। यत् (ते) अर्धदग्धोल्मुककश्मलेन देहेन लोकस्य बहिः चरन्ति।

व्याख्या

महापातकिनाऽत्युग्रपापिना त्वया वसन्तेन पिकानां कोकिलानां सङ्गस्सहवास इहैवाऽस्मिन्नेव जन्मनि फलवान् फलसंयुक्तो बभूव जातः। 'अत्युग्रपुण्यपापानामिहैव फलमश्नुते' इति वचनात्। यद्यस्मात्कारणात् ते पिका अर्धं दग्धं ज्वलितमुल्मुकमलातम् 'अङ्गारोऽलातमुल्मुकम्' इत्यमरः। तद्वत्कश्मलेन कृष्णवर्णेन देहेन शरीरेण लोकस्य जनस्थानस्य जनसमुदायस्य वा बहिर्बाह्यदेशे वने इत्यर्थः। चरन्ति भ्रमन्ति। महापातकिना वसन्तेन सह पिकानां संसर्गात् तेषामपि पापसम्बन्धात्कृष्णवर्णत्वं लोकाद्बहिर्निष्कासनञ्च जातमिति भावः।

भाषा

महापापी तुम्हारे साथ कोयलों का साथ होने से कोयलों को उसका फल इसी जन्म में मिल गया। क्योंकि कोयल अधजली मशाल के समान काले रंग के शरीर से जन समूह के बाहर जंगलों में भटकने लगीं। अर्थात् पापी के संसर्ग के पाप से काली पड़ कर नगर से दूर जंगलों में रहने लगीं।

त्वं दृष्टदोषोऽपि पुनः स्मरेण यत्संगृहीतः शृणु तत्र हेतुम् ।
अङ्गीकृतस्त्रीवधपातकेन केनापि न स्वीकृत एष भारः ॥६०॥

अन्वयः

यत् दृष्टदोषः अपि त्वं स्मरेण पुनः संगृहीतः तत्र हेतुं शृणु । अङ्गीकृतस्त्रीवधपातकेन केन अपि एष भारः न स्वीकृतः ।

व्याख्या

यत् यतो दृष्टः परिज्ञातो दोषो मित्रसाहाय्यकारित्वाभावरूपो दुर्गुणो यस्य स विज्ञातदुर्गुणोऽपि त्वं वसन्तः, स्मरेण कामेन पुनर्मुहुः संगृहीतोऽङ्गीकृतस्तत्र तस्मिन्विषये हेतुं कारणं शृणु समाकर्णय । अङ्गीकृतमुररीकृतं स्त्रीणां नारीणां वधरूपं पातकं पापं येन स तेन स्वीकृतनारीहननरूपपापेन केनाऽपि केनाऽपि व्यक्तिविशेषेण एष स्त्रीवधरूपो भारः कार्यं न स्वीकृतो नोररीकृतः ।

भाषा

कामदेव ने, मित्र की सहायता न करने के दोष से युक्त भी तुमको फिर से क्यों अपने साथ रख लिया, इसका कारण सुनो । स्त्रीवध का पाप स्वीकार करने वाले, तुम्हारे सिवाय किसी ने भी इस बोझ को उठाना अर्थात् इस कार्य को करना स्वीकार नहीं किया । अर्थात् स्त्रीवध का पाप किसी के स्वीकार न करने से, तुम जैसे दोषी को भी उसने अपना लिया ।

इत्थं वियोगज्वरजर्जराणा-मुद्वेजितानां मधुमासलक्ष्म्या ।
आसन्मुहुः पक्ष्मललोचनानां चैत्रे विचित्रोक्तिविचेष्टितानि ॥६१॥

अन्वयः

चैत्रे मधुमासलक्ष्म्या उद्वेजितानां वियोगज्वरजर्जराणां पक्ष्मललोचनानाम् इत्थं विचित्रोक्तिविचेष्टितानि मुहुः आसन् ।

व्याख्या

चैत्रे वसन्ते मधुमासलक्ष्म्या वसन्तशोभयोद्वेजितानां पीडितानां वियोगज्वरेण पतिविरहरूपज्वरेण जर्जराणां शिथिलीभूतानां पक्ष्मलानि घनपक्ष्मयुक्ता 'पक्ष्माक्षिलोम्नि किंजल्के तंत्वाद्यंशेऽप्यणीयसि' इत्यमरः । लोचनानि नयनानि

यासां तास्तासां पक्ष्मललोचनानामङ्गनानामित्थमनेन पूर्वोक्तप्रकारेण विचित्रा आश्चर्योत्पादिका उक्तयो भाषितानि 'व्याहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः । तासां विचेष्टितानि विलसितानि मुहुर्वारम्वारमासन् बभूवुः ।

भाषा

वसन्त ऋतु में वसन्त की शोभा से पीड़ित, और पति विरह से जर्जरित, सुन्दर गज्ञीन पखौनियों वाली नारियों के इस प्रकार के आश्चर्य कारक उक्तियों के विलास बार २ होते थे । अर्थात् विरह के कारण पीड़ित हो, स्त्रियाँ इस प्रकार के अनेक विचित्र उद्‌गार बार २ निकालती थीं ।

गम्भीरता चाटुपराङ्मुखत्वं सौभाग्यमन्यप्रमदारदाङ्कः ।
दोषोऽपि यूनां गुण एव मेने पुरन्ध्रिभिर्मानपराङ्मुखीभिः ॥६२॥

अन्वयः

मानपराङ्मुखीभिः पुरन्ध्रिभिः यूनां गम्भीरता चाटुपराङ्मुखत्वं सौभाग्यं अन्यप्रमदारदाङ्कः दोषः अपि गुणः एव मेने ।

व्याख्या

माने दर्पे पराङ्मुख्यो वसन्तर्तुकारणेनौत्सुक्यादुदासीनास्ताभिर्मानरहिताभिः पुरन्ध्रिभिरङ्गनाभिर्यूनां युवजनानां गम्भीरता धैर्यं चाञ्चल्याभाव इत्यर्थः । चाटुपराङ्मुखत्वमनुनयानुरूपप्रेमवार्ताप्रचाररहितत्वं 'अस्त्री चाटुचटुश्लाघा प्रेम्णा मिथ्या विकत्थनम्' इत्यमरः । सौभाग्यं सुन्दरभाग्यशालित्वं स्त्रीसमागमाप्तीच्छाया क्लेशराहित्यमित्यर्थः । अन्यासां प्रमदानां स्त्रीणां रदानां दशनानामङ्कश्चिन्हं 'कलङ्काङ्कौ लाच्छनञ्च चिन्हं लक्ष्म च लक्षणम्' इत्यमरः । इति दोषोऽपि गुण एव मेने तत्र दोषत्वबुद्धिरेव न जातेतिभावः । वसन्तर्तुकृतात्युग्रकामवेदनया यूनां सकलदोषान् विस्मृत्य ताः कामपरवशाजाता इत्यर्थः । यूनां दोषा अपि तासां कृते तस्मिन्काले कामोद्दीपका जाता इति भावः ।

भाषा

स्त्री के सामने विद्यमान रहने पर भी युवकों का धीरता से बिना किसी प्रकार की चञ्चलता दिखाते हुए बैठे रहना, मीठी २ रस भरी प्रेम की बातें न करना, स्त्री समागम की इच्छा रहते हुए भी किसी प्रकार के क्लेश से पीड़ित न होकर, अपनी ही ऐंठ में रहना, और उनके शरीर पर के अन्य स्त्री के या

सौत के दांत से काटने के चिन्ह—इन दोषों को भी, मान रहित स्त्रियों ने गुण ही समझा। युवा कामियों में, इन दोषों को देख कर पत्नियाँ क्रुद्ध हो जाती हैं। परन्तु वसन्त-ऋतु के प्रभाव से जिनका मान ही दूर हो गया है अतएव कामासक्त भई हुई स्त्रियों ने इन दोषों को भी गुण ही समझा।

बन्दिकृतं वसन्तवर्णनमारभते कविः—

मानग्रन्थिकदर्थनाय कथिताः सर्वत्र पुंस्कोकिलाः
केलीकर्मणि दाक्षिणात्यमरुतामध्यक्षभावोऽर्पितः।
पुष्पास्त्रस्य जगत्त्रयेऽपि विरहप्रत्यूहहेवाकिनः
संनद्धोऽयमसाध्यसाधनविधौ साम्राज्यमन्त्री मधुः ॥६३॥

अन्वयः

सर्वत्र मानग्रन्थिकदर्थनाय पुंस्कोकिलाः कथिताः। केलीकर्मणि दाक्षिणात्यमरुताम् अध्यक्षभावः अर्पितः। जगत्त्रये अपि विरहप्रत्यूह-हेवाकिनः पुष्पास्त्रस्य साम्राज्यमन्त्री अयं मधुः असाध्यसाधनविधौ संनद्धः। (अस्ति)।

व्याख्या

(वसन्तेन) सर्वत्र सर्वस्थानेषु मानः कोप एव ग्रन्थिस्तस्य कदर्थनाय भञ्जनाय विनाशायेत्यर्थः। पुंस्कोकिलाः पिकाः कथिता आज्ञप्ताः। केलीकर्मणि काम-क्रीडाविलासे रत्यादिष्वित्यर्थः। दाक्षिणात्यमरुतां मलयपवनानामध्यक्षभाव आधिपत्यमर्पितो दत्तः। जगतां भुवनानां 'विष्टपं भुवनं जगत्' इत्यमरः। अयं तस्मिन् त्रिलोक्यामपि विरहे वियोगसमये प्रत्यूहा विघ्नाः 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। क्लेशोत्पादका उपद्रवा इत्यर्थः। तेषां हेवाक[१] उत्कटेच्छाऽ-स्त्यस्येति तस्य प्रियविरहसमये पीडोत्पादनकामस्य पुष्पास्त्रस्य कामस्य साम्राज्यस्य सार्वभौमराज्यस्य मन्त्री धीसचिवः 'मन्त्री धीसचिवोऽमात्यः इत्यमरः। अयं प्रसिद्धो मधुर्वसन्तोऽसाध्यानामसम्भवानां विरहिदुःखानां साधनमुत्पादनं तस्य

---

[१] हेवाकशब्दः कश्मीरकविभिः कल्हणबिल्हणादिभिरेव प्रायः प्रयुक्तः।
'जायन्ते महतामहो निरुपमप्रस्थानहेवाकिनां
निःसामान्यमहत्त्वयोगपिशुना वार्ता विपत्तावपि' इति कल्हणः।

विधिः प्रक्रिया तस्मिन्संनद्धः सुसज्जोऽस्ति। शार्दूलविक्रीडितच्छन्दः। "सूर्याश्वै-र्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात्। रूपकालङ्कारः।

भाषा

वसन्त ने सब स्थानों में प्रेमकोप रूपी गांठ को खोल डालने के लिये कोयलों को आज्ञा दे दी। रत्यादि कामक्रीडाओं में मलयानिल को मुख्य स्थान दे दिया। तीनों लोकों में वियोगजनित कष्ट देने की उत्कट इच्छा रखने वाले कामदेव के साम्राज्य का मन्त्री, यह वसन्त, विरही जनों में, असम्भव दुःखों को उत्पन्न करने के काम में कटिबद्ध है। अथात् कोयल व मलयानिल की सहायता से वसन्त ऋतु, वियोगियों को अत्यधिक कष्ट पहुँचाने की कामदेव की उत्कट इच्छा को पूर्ण करने में सहायता करता है।

लीलास्नानविधिक्षमं मधुलिहां पुष्पेषु जातं मधु
स्थायित्वं कलकण्ठकण्ठकुहरेष्वासेवते पञ्चमः।
एकच्छत्रजगज्जयार्जनरुचेर्देवस्य शृङ्गारिण-
श्चैत्रश्चित्रमकाण्ड एव समभूत्त्रैलोक्यजैत्रो भटः ॥६४॥

अन्वयः

मधुलिहां पुष्पेषु लीलास्नानविधिक्षमं मधु जातम्। पञ्चमः कलकण्ठ-कण्ठकुहरेषु स्थायित्वम् आसेवते। एकच्छत्रजगज्जयार्जनरुचेः शृङ्गा-रिणः देवस्य अकाण्डे एव चैत्रः त्रैलोक्यजैत्रः भटः समभूत् (इति) चित्रम्।

व्याख्या

मधुलिहां भ्रमराणां (कृते) पुष्पेषु कुसुमेषु लीलया क्रीडया स्नानं तस्य विधिर्विधानं तस्य क्षमं योग्यमत्यधिकमित्यर्थः। मधु पुष्परसो जातं समुत्पन्नम्। पञ्चमः पञ्चमस्वरः कलो मधुरः कण्ठो येषां ते कलकण्ठाः कोकिलास्तेषां कण्ठा एव कुहराणि गुहास्तेषु स्थायित्वं स्थिरतामासेवते जुषते। 'पिको वदति पञ्चमम्' इत्युक्तेः। एकं छत्रं यस्य स एकच्छत्रो यो जगतो भुवनस्य 'विष्टपं भुवनं जगत्' इत्यमरः। जयो विजयस्तस्याऽर्जने प्राप्तौ रुचिः प्रीतिर्यस्य स तस्य शृङ्गारिणो देवस्य कामस्य भगवतोऽकाण्डेऽकस्मादेव चैत्रो वसन्तमासस्त्रैलोक्यस्य त्रिभुवनस्य जैत्रो जयनशीलो भटो योद्धा समभूत् संप्राप्त इति चित्रमाश्चर्यकरम्।

भाषा

भौरों के लिये, फूलों में क्रीडापूर्वक स्नान करने योग्य अर्थात् अत्यधिक पुष्प-रस (मकरन्द) उत्पन्न हो गया। पञ्चम स्वर, कोकिलों के कण्ठकुहरों में स्थिर हो गया। जगत् का एक छत्र विजय प्राप्त करने की अभिलाषा रखने वाले कामदेव का योद्धा चैत्र, अचानक ही, तीनों भुवनों को जीतने वाला हो गया—यह एक आश्चर्य की बात है।

भृङ्गैर्विश्ववियोगिवर्गदलनोत्तालस्य वैतालिकैः
प्रारब्धा विरुदावलीव पठितुं शृङ्गारबन्धोर्मधोः।
नादः कोकिलयोषितां प्रमुषितत्रैलोक्यमानग्रहः
कामः सम्प्रति कौतुकाद्यदि परं पौष्पं धुनीते धनुः ॥६५॥

अन्वयः

वैतालिकैः भृङ्गैः विश्ववियोगिवर्गदलनोत्तालस्य शृङ्गारबन्धोः मधोः विरुदावली पठितुं प्रारब्धा इव। प्रमुषितत्रैलोक्यमानग्रहः कोकिलयोषितां नादः (प्रारब्धः)। यदि परं सम्प्रति कामः कौतुकात् पौष्पं धनुः धुनीते (तर्हि धुनोतु नाम)।

व्याख्या

वैतालिकै राज्ञां प्रातःकाले निद्राप्रबोधजनकस्तुतिकारकैः 'वैतालिका बोधकराश्चाक्रिका घाण्टिकार्थकाः। स्युर्मागधास्तु मगधा बन्दिनः स्तुतिपाठकाः' इत्यमरः। भृङ्गैर्भ्रमरैर्विश्वेषां सर्वेषां वियोगिनां वियोगिस्त्रीपुरुषाणां (पुमान् स्त्रियेति-एकशेषः) वर्गः समूहस्तस्य दलनं संहारस्तस्मिन्नुत्ताल उत्कटस्तस्य सकलवियोगिसमूहसंहारोत्कटस्य शृङ्गारस्य स्त्रीपुंसोः परस्परं सम्भोगस्पृहाया बन्धुर्मित्रं सहायक इत्यर्थः। तस्य, उक्तञ्च—"पुंसः स्त्रिया स्त्रियाः पुंसि संभोगं प्रति या स्पृहा। स शृङ्गार इति ख्यातः क्रीडारत्यादिकारकः"॥ यद्वा शृङ्गारस्य कामस्य बन्धोर्मित्रस्य मधोर्वसन्तस्य विरुदानां यशःप्रशस्तीनामावली पङ्क्तिर्विरुदावली 'वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः' इत्यमरः। पठितुमुच्चारयितुं प्रारब्धा इव। प्रमुषितो बलाद्विनाशितस्त्रैलोक्यस्य मानग्रहः कोपग्रहणं येन सः कोकिलयोषितां पिकीनां नादः शब्दोऽपि प्रारब्ध इति भावः। यदि परं यदि केवलं सम्प्रत्यधना कामो मनोजः कौतुकात्कौतूहलात्पौष्पं कुसुममयं धनुः

शरासनं धुनीते सञ्चालयति तर्हि धुनोतु नाम सञ्चालयतु, तदीयं कार्यं भृङ्गमधुकोकिलैः सम्पादितमेवेति भावः ।

भाषा

स्तुतिपाठ कर जगाने वाले वैतालिक रूपी भौरों ने, सब विरहिजनों के समूहों का संहार करने में प्रबल और स्त्री पुरुषों की परस्पर संभोग की अभिलाषा के सहायक, वसन्तऋतु की, अथवा कामदेव के मित्र वसन्त ऋतु की, मानों यशः प्रशस्ति का पाठ करना प्रारम्भ कर दिया है। अर्थात् वसन्त ऋतु के आने से भौरों की गुंजार चारों ओर होने लगी है जो कामोत्पादक है। तीनों लोकों की मनिनिओं के कोप को हठात् दूर कर देने वाली कोकिलाओं की कूक भी प्रारम्भ हो गयी है। अगर इसके ऊपर भी कामदेव, खेलवाड में अपने फूलों के धनुष्य को चलाने लगें तो भले ही चलावें, उनका कार्य तो भृङ्ग आदि सेवकों ने कर ही दिया है।

कूजत्कोकिलकोपिता गुलिधनुःशिक्षां समासेवते
खिन्ना चन्दनमारुतेन मलये दावाग्निमाकाङ्क्षति ।
किञ्चान्विष्यति दुर्मना दलयितुं कामेन मैत्रीं मधोः
कर्तुं धावति दुर्लभे त्वयि सखी कां कां न वातूलताम् ॥६६॥

अन्वयः

त्वयि दुर्लभे (सति), सखी कूजत्कोकिलकोपिता (सती) गुलिधनुःशिक्षां समासेवते। चन्दनमारुतेन खिन्ना (सती) मलये दावाग्निम् आकाङ्क्षति। किञ्च दुर्मनाः (सती) कामेन मधोः मैत्रीं दलयितुम् अन्विष्यति। कां कां वातूलतां कर्तुं न धावति।

व्याख्या

त्वयि विक्रमाङ्कदेवे दुर्लभे दुष्प्राप्ये सति त्वद्वियोगावस्थायामित्यर्थः। सखी कामिनी कूजद्भिः शब्दं कुर्वाणैः कोकिलैः पिकैः कोपिता रोषं प्रापिता सती गुलिधनुषो मृद्गुलिकां निधाय येन यन्त्रेण वानरेषु पक्षिषु च गुलिकाप्रहारः क्रियते तद्यन्त्रं तस्य "धनुही" "गुलेला" इति भाषायां प्रसिद्धस्य, शिक्षामभ्यासं समासेवते करोति। कोकिलशब्देन त्वद्वियोगावस्थायां पीडा न भवेदिति कोकिल-दूरीकरणार्थं गुलिधनुषोऽभ्यासं प्रारभत इति भावः। चन्दनवायुना चन्दनगन्ध-

युक्तवायुना दक्षिणानिलेन खिन्ना दुःखिता सती मलये मलयपर्वते दावाग्नि वनदाहकाग्नि दावानलमित्यर्थः। आकाङ्क्षति वाञ्छति। येन दावानलेन मलयजचन्दनवृक्षेषु दग्धेषु चन्दनवायोरभावः स्यादिति भावः। किञ्चाऽन्यच्च दुर्मना दुःखितहृदया सती कामेन मन्मथेन मधोर्वसन्तस्य मैत्रीं सख्यं दलयितुं विनाशयितुमन्विष्यति प्रेच्छति उपायं मृगयतीति भावः। कां कां वातूलता-मुन्मत्ततां 'वातूलः पुंसि वात्यायामपि वातसहे त्रिषु' इत्यमरः। कर्तुं सम्पादयितुं न धावति न वेगेन प्रवर्तते।

भाषा

तुम्हारे न मिलने पर अर्थात् तुम्हारी विरहावस्था में, कामिनी, कूंकने वाली कोयलों से क्रुद्ध होकर गुलेला चलाने का अभ्यास प्रारम्भ करती है जिससे गोली से कोयलों को मार कर उडादे जिसमें उनके शब्दों से विरहावस्था में कष्ट न हो। चन्दन की सुगन्ध युक्त वायु से अर्थात् मलयानिल से खिन्न होकर मलयाचल में दावानल लगने की अभिलाषा करती है। जिसमें सब चन्दन के वृक्ष जल कर भस्म हो जाएँ और विरहावस्था में चन्दन वायुओं से कष्ट न हो, और दुःखित होकर, कामदेव और वसन्त की मित्रता का नाश करने के उपायों को खोजती है। कौन २ सा पागलपने का काम करने में वह शीघ्रता से नहीं प्रवृत्त होती है।

सन्नद्धं माधवीनां मधु मधुपवधूकेलिगण्डूषयोग्यं
विश्राम्यन्ति श्रमेण क्वचिदपि मरुतो न क्षणं दाक्षिणात्याः।
क्रीडाशैलीभवन्ति प्रतिकलमलिनां कौसुमाः पांसुकूटा—
श्चैत्रे पुष्पास्त्रमित्रे तदिह विरहिणां कीदृशी जीविताशा ॥६७॥

अन्वयः

माधवीनां मधु मधुपवधूकेलिगण्डूषयोग्यं सन्नद्धम्। दाक्षिणात्याः मरुतः श्रमेण क्वचिदपि क्षणं न विश्राम्यन्ति। अलिनां कौसुमाः पांसुकूटाः प्रतिकलं क्रीडाशैलीभवन्ति। तत् पुष्पास्त्रमित्रे चैत्रे (सति) इह विरहिणां जीविताशा कीदृशी।

व्याख्या

माधवीनां वासन्तीलतानां 'वासन्ती माधवीलता' इत्यमरः। मधु पुष्परसो

मधुपानां भ्रमराणां वध्वः कान्तास्तासां केलयः क्रीडास्तासु गण्डूषा मुखपूर्तयः 'गण्डूषो मुखपूर्तौ स्यात्' इति हैमः। तेषां योग्यं तदर्थं पर्याप्तं सन्नद्धं प्रगुणीभूतं समागतम्। माधवीलतासु मकरन्दाधिक्यं जातमिति भावः। दाक्षिणात्या दक्षिणदिशात आगता मरुतो मलयानिलाः श्रमेण दूरदेशागमनपरिश्रमेण क्वचिदपि कुत्राऽपि क्षणमीषत्कालपर्यन्तमपि न विश्राम्यन्ति विश्रान्ति न काङ्क्षन्ति। अलिनां भ्रमराणां कृते कौसुमाः पौष्पाः पांसुकूटा धूलिसमूहाः प्रतिकलं प्रतिक्षणं क्रीडा-शैलीभवन्ति लीलापर्वतीभवन्ति लीलापर्वत इवाऽऽचरन्तीति भावः। अभूततद्भावे च्विः। तत्तस्मात् कारणात् पुष्पाण्येव कुसुमान्येवाऽस्त्राणि शरा यस्य स पुष्पबाणः कामस्तस्य मित्रं सखा तस्मिन् चैत्रे वसन्ते विद्यमाने सतीहाऽस्मिन् जगति विरहिणां वियोगावस्थापन्नानां स्त्रीपुंसां जीवितस्य जीवनस्याऽऽशा कीदृशी किमिति। न जीवनाशेति भावः। अर्थापत्तिरलङ्कारः। स्रग्धरावृत्तम्। "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्" इति लक्षणात्।

भाषा

वासन्ती लताओं में मकरन्द, भौंरियों के लीलागत कुल्ला करने के योग्य तयार हो गया है। दक्षिण दिशा से बहने वाले मलयानिल, थकावट से कहीं भी विश्राम नहीं लेते हैं अर्थात् लगातार बहते ही रहते हैं। भौरों के लिये पुष्पधूलि के ढेर प्रतिक्षण क्रीडापर्वत का काम करते हैं। इसलिये कामदेव के मित्र वसन्त के आने पर वियोगियों के जीते रहने की आशा कैसी ? अर्थात् ऐसे समय में वियोगियों का जीते रहना सम्भव नहीं है।

पुष्पैर्भ्राजिष्णुभस्त्राकरणिमगणितैः शाखिनः के न याता-
श्चञ्चन्निस्त्रिंशलेखामयमिव भुवनं भृङ्गमालाभिरास्ते।
त्रैलोक्याकाण्डचण्डप्रहरणनिबिडोत्साहकण्डूलदोष्णः
पुष्पेशोर्जैत्रशस्त्रव्यतिकरविधये साधु सज्जो वसन्तः ॥६८॥

अन्वयः

के शाखिनः अगणितैः पुष्पैः भ्राजिष्णुभस्त्राकरणिं न याताः। भृङ्ग-मालाभिः भुवनं चञ्चन्निस्त्रिंशलेखामयम् इव आस्ते। त्रैलोक्याकाण्डचण्ड-प्रहरणनिबिडोत्साहकण्डूलदोष्णः पुष्पेशोः जैत्रशस्त्रव्यतिकरविधये वसन्तः साधु सज्जः।

व्याख्या

के शाखिनः के वृक्षा अगणितैरसंख्याकैः पुष्पैः कुसुमैर्भ्राजिष्णुर्देदीप्यमाना या भस्त्रा चर्मप्रसेविका 'भस्त्रा चर्मप्रसेविका' इत्यमरः। तुणीर इत्यर्थः। तस्या आकर्रांण स्पर्धां सादृश्यं वा न याता न प्राप्ताः। पुष्पबाणस्य कामस्य तूणीर-सादृश्यं न प्राप्ता इति भावः। भृङ्गमालाभिर्भ्रमरश्रेणीभिर्भुवनं लोकश्चञ्चन् वेगवान्यो निस्त्रिंशः खड्गस्तस्य लेखामयमिव पङ्क्तिमयमिवाऽऽस्ते। भ्रमर-पङ्क्तिभिस्सर्वत्र जगत् कामस्य वेगवत्खड्गलेखामयमिव वरीवर्तीति भावः। 'प्राचुर्ये मयट् प्रत्ययः'। त्रैलोक्यस्य भुवनत्रयस्याऽकाण्डेऽनवसरे यच्चण्डं भयङ्करं प्रहरणं संहारस्तस्मिन्निबिडेन घनेनोत्साहेन मनःप्रसारेण कण्डूलः कण्डुयुक्तो दोर्भुजो यस्य स तस्य पुष्पेषोः पुष्पाण्येवेषवो बाणा यस्य स तस्य कामस्य जैत्राणि जयनशीलानि शस्त्राण्यायुधानि 'आयुधं तु प्रहरणं शस्त्रमस्त्रमथास्त्रियौ' इत्यमरः। तेषां व्यतिकरः सम्बन्ध एकत्रीकरणमित्यर्थः। तस्य विधये सम्पादनाय वसन्तो वसन्तर्तुस्साधु सम्यक् सज्जः संनद्धः। कामस्य खड्गधारणं त्वप्रसिद्धम्। अत्र वसन्तकृतकामशस्त्रसज्जीकरणेन भावी मदनविजयो ध्वन्यते।

भाषा

कौन ऐसे वृक्ष थे जिन्होंने असंख्य फूलों से, चमकने वाले कामदेव के तरकस की स्पर्धा न की हो। क्योंकि कामदेव के तरकस में पुष्प ही बाणरूप से रहते हैं। भौंरों की पंक्तियों से तीनों भुवन वेगयुक्त कामदेव के खड्ग की रेखा से भरे से हो गये हैं। अर्थात् कालेरंग के भौंरों की पंक्तियाँ कालेरंग की खड्ग की रेखाओं के समान दिखाई पड़ती हैं। तीनों लोकों का अचानक तीक्ष्ण संहार करने के अत्यधिक उतसाह से खुजलाने वाली भुजावाले कामदेव के जयनशील शस्त्रास्त्रों के एकत्र करने के कार्य में वसन्तऋतु लग गया है।

शून्याः श्रीखण्डवातैरभिलषति भुवश्चन्दनाद्रेः परस्ता-
ल्लीलोद्याने सखीनां सृजति कलकलं कोकिलोत्सारणाय।
स्तौति क्रीडावनालीनिखिलपरिमलाचान्तये चञ्चरीकां-
श्चारुभ्रूस्त्वद्वियोगे कमिव न भजते जीवरक्षाभ्युपायम् ॥६६॥

अन्वयः

चारुभ्रूः त्वद्वियोगे चन्दनाद्रेः परस्तात् भुवः श्रीखण्डवातैः शून्याः अभिलषति। लीलोद्याने कोकिलोत्सारणाय सखीनां कलकलं सृजति।

क्रीडावनालीनिखिलपरिमलाचान्तये चञ्चरीकान् स्तौति । कम् इव जीव-रक्षाभ्युपायं न भजते ।

व्याख्या

चारू भ्रुवौ यस्याः सा सुभ्रूस्तव विक्रमाङ्कदेवस्य वियोगे विरहे चन्दनाद्रेर्मलयपर्वतस्य परस्तादनन्तरं भुवः पृथ्वीः श्रीखण्डानां चन्दनानां वाता वायवस्तैः शून्या रहिता अभिलषति वाञ्छति । चन्दनवायोर्विरहसन्तापोद्दीपकत्वाज्जनस्थाने तदागमनं कष्टप्रदमिति तस्य स्थितिर्मलयपर्वत एव भवत्वित्यभिलषतीति भावः । लीलायाः क्रीडाया उद्यानमुपवनं तस्मिन् क्रीडावाटिकायां कोकिलानां पिकानामुत्सारणाय दूरीकरणाय सखीनां स्वसखीनां कलकलं शब्दप्राचुर्यं सृजत्युत्पादयति । कोकिलशब्दस्य विरहपीडाकारकत्वात् सखीकलकलेन कोकिलान् दूरीकरोतीति भावः । क्रीडावनानां क्रीडोद्यानानामालीषु पङ्क्तिषु यो निखिलस्सकलः परिमलस्सुगन्धस्तस्याऽऽचान्तिः पानं तस्यै चञ्चरीकान् भ्रमरान् स्तौति प्रार्थयति । यदि भ्रमरैः सकलसुगन्धः पीतःस्यात्तर्हि सुगन्धाभावाद्विरहोद्दीपनं न स्यादिति भावः । कमिव कीदृशं जीवरक्षायाः प्राणरक्षाया अभ्युपायं साधनं न भजते न सेवते । सकलमेव प्राणरक्षोपायं सम्पादयतीति भावः ।

भाषा

सुन्दर भौवों वाली कामिनी, तुम्हारे वियोग में, मलयाचल के बाहर की पृथ्वी को चन्दनवायुओं से रहित होना चाहती है अर्थात् चन्दन वायु मलयाचल को छोड़कर अन्यत्र पृथ्वी पर कहीं न बहें, ऐसा चाहती है। क्योंकि विरहावस्था में यह चंदनवायु बहुत दुखःप्रद होता है। सैर करने के बाग में कोयलों को उड़ा देने के लिए अपनी सखियों से शोर कराती है जिसमें कोयलें भाग जाँय और उनकी कूक सुनकर विरहावस्था में कष्ट न हो। बगीचों की कतार में के सब सुगन्ध को पी जाने के लिए भौरों से बिनती करती है जिसमें विरहावस्था में सुगन्ध से विरहज्वाला अधिक न भभक पड़े। कौन सा ऐसा उपाय है जिसे प्राण बचाने के लिए वह नहीं करती है।

मलयगिरिसमीराः सिंहलद्वीपकान्ता-
मुखपरिचयलब्धस्फारकर्पूरवासाः ।
द्रविडयुवतिदोला केलिलोलन्नितम्ब-
स्थलशिथिलितवेगाः सेव्यतामाप्नवन्ति ॥७०॥

अन्वयः

मलयगिरिसमीराः सिंहलद्वीपकान्तामुखपरिचयलब्धस्फारकर्पूरवासाः द्रविडयुवतिदोलाकेलिलोलन्नितम्बस्थलशिथिलितवेगाः (सन्तः) सेव्यताम् आप्नुवन्ति ।

व्याख्या

मलयगिरिसमीरा मलयाचलानिलाः सिंहलद्वीपस्य 'सीलोन' इति ख्यातस्य कान्ताः स्त्रियस्तासां मुखान्याननानि तेषां परिचयः सम्पर्कस्तस्माल्लब्धः प्राप्तः स्फारो बहुलः कर्पूरस्य वासः सुगन्धो यैस्ते, द्रविडयुवतीनां चोलदेशाङ्गनानां दोलाकेलयः प्रेङ्खाक्रीडास्तासु लोलन्तश्चलन्तो नितम्बा एव स्थलानि तैस्तत्संघट्टनै-रित्यर्थः । शिथिलितः शिथिलीकृतो वेगो जवो 'वेगः प्रवाहजवयोरपि' इत्यमरः । येषां ते तथा सन्तः सेव्यतां ग्राह्यतामाप्नुवन्ति लभन्ते । मलयाचलानिलाः सिंहलद्वीपनारीमुखसम्पर्कात् कर्पूरगन्धयुक्ताश्चोलदेशाङ्गनानां दोलाक्रीडासु लोलनितम्बसंघट्टनात् शिथिलीकृतवेगास्सन्तश्चन्दनजन्यं शैत्यं कर्पूरजन्यं सुगन्धं नितम्बसंघट्टनजन्यं मन्दत्वञ्च वायूनां शीतलमन्दसुगन्धेति गुणत्रयं धारयन्तः सेव्या भवन्तीति भावः । मालिनीच्छन्दः । उदात्तालङ्कारः ।

भाषा

मलयाचल के पवन, सीलोन की अङ्गनाओं के मुखों के सम्पर्क से कर्पूर की सुगन्ध को धारण कर और चोलदेश की कामिनियों के रसयुक्त झूला झूलने में चञ्चल नितम्बस्थलों से टकरा कर मन्दगति होने से सेवनीय हो गये थे । अर्थात् दक्षिणानिल, चन्दन का शैत्य, कर्पूर का सुगन्ध और नितम्बों की टक्कर से मन्द गति, एवं शीतल, मन्द व सुगन्ध इन तीनों वायुओं के गुणों से युक्त होने से सेवनीय हो गये थे ।

पानीयं नालिकेरीफलकुहरकुहूत्कारि कल्लोलयन्तः
कावेरीतीरतालद्रुमभरितसुराभाण्डभाङ्कारचण्डाः ॥
उन्मीलन्नीलमोचापरिचयशिशिरा वान्त्यमी द्राविडीनां
कर्पूरापाण्डुगण्डस्थललुठितरया वायवो दाक्षिणात्याः ॥७१॥

अन्वयः

नालिकेरीफलकुहरकुहूत्कारि पानीयं कल्लोलयन्तः, कावेरीतीरतालद्रुम-

भरितसुराभाण्डभाङ्कारचण्डाः उन्मीलन्नीलमोचापरिचयशिशिराः द्राविडीनां कर्पूरापाण्डुगण्डस्थललुठितरयाः अमी दाक्षिणात्याः वायवः वान्ति ।

व्याख्या

नालिकेरीफलानां नारिकेलफलानां कुहरेषु मध्यस्थगह्वरेषु कुहूत्कारि कुहूदिति शब्दकर्तृ शब्दायमानमित्यर्थः । पानीयं जलं कल्लोलयन्तस्तरङ्गयन्तः कावेरी-नद्यास्तीरे तटे तालद्रुमास्तालवृक्षास्तैर्भरितानि तालनिस्सृतजलेन 'ताडी' इति प्रसिद्धेन परिपूरितानि सुराभाण्डानि मद्यपात्राणि तेषां भाङ्कारेण झाङ्कारेण शब्देनेत्यर्थः । चण्डाः प्रचण्डाः सुराया मादकत्वादुग्रस्वरा इत्यर्थः । उन्मीलयन्त्यो विकसन्त्यो नीला नीलवर्णा मोचाः शाल्मलिवृक्षाः कदल्यो वा 'पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः' इत्यमरः । 'कदली वारणबुसा रंभा मोचांशुमत्फला' इत्यमरः । तासां परिचयेन सम्पर्केण शिशिराः शीता द्राविडीनां चोलदेशाङ्गनानां कर्पूरवदापाण्डूनि घनसारवच्छुभ्राणि 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' इत्यमरः । गण्डस्थलानि कपोलस्थलानि तैर्लुठितः संभग्नः रयो वेगो येषां ते अमी स्पर्शगम्या दक्षिणे भवा दाक्षिणात्या वायवो मलयानिला वान्ति चलन्ति । अत्र दाक्षिणात्यवायुषु धावत्पुरुषव्यवहारप्रतीत्या समासोक्ति-रलङ्कारः । स्रग्धराच्छन्दः ।

भाषा

नारियलों के बीच के कुहूत् ऐसा शब्द करने वाले जल को तरङ्गित करने वाले, कावेरी नदी के किनारे के ताड के वृक्षों से चूने वाली ताडी से परिपूर्ण (ताडी रखने के) बर्तनों के शब्दों से उग्ररूप धारण करने वाले, फूलने वाली नीले (हरे) रंग के सेमर के या केलों के सम्पर्क से ठण्डे, चोलदेश की नारियों के कपूर के ऐसे श्वेत गालों से टकराने से मन्द वेग, ये मलयानिल बह रहे हैं ।

भृङ्गालीभिरधिज्यमन्मथधनुर्लीलां लभन्ते लताः
किं पुष्पं न बिभर्ति पुष्पधनुषस्त्रैलोक्यजैत्रास्त्रताः ।
दोलान्दोलनकेलिलोलवनितासंचारितास्त्रोऽधुना
पञ्चेषुश्चललक्ष्यभेदविधिना गर्वं समारोहति ॥७२॥

अन्वयः

लताः भृङ्गालीभिः अधिज्यमन्मथधनुर्लीलां लभन्ते । किं पुष्पं पुष्प-

धनुषः त्रैलोक्य-जैत्रास्त्रतां न बिभर्ति। दोलान्दोलनकेलिलोलवनितासंचारितास्त्रः पञ्चेषुः अधुना चललक्ष्यभेदविधिना गर्वं समारोहति।

व्याख्या

लता वीरुधः 'लता प्रतानिनी वीरुद्' इत्यमरः। भृङ्गालीभिर्भ्रमरपंक्तिभिर्ज्यां मौर्वीमधिगत अधिज्यं सज्जं मन्मथस्य कामस्य धनुश्चापस्तस्य लीलां शोभां लभन्ते प्राप्नुवन्ति। किं पुष्पं कुसुमं पुष्पधनुषः कामस्य त्रैलोक्यस्य त्रिभुवनस्य जैत्रं जयनशीलमस्त्रं तस्य भावस्त्रैलोक्यजैत्रास्त्रता तां न विभर्ति न धारयत्यपि तु सर्वाणि पुष्पाणि त्रैलोक्यजैत्रास्त्रतां धारयन्त्येव। दोलासु प्रेङ्खास्वान्दोलनकेलय दोलावेगेनोपर्यधोगमनक्रीडास्ताभिर्लोलाश्चला वनितास्तासु सञ्चारितानि सम्प्रापितान्यस्त्राणि येन स अथवा वनिता एवाऽङ्गना एव सञ्चारितानि प्रयुक्तान्यस्त्राणि येन सः पञ्च इषवो बाणा यस्य सः कामोऽधुनेदानीं वसन्तसमये चलान्यस्थिराणि लक्षाणि शरव्याणि 'लक्षं लक्ष्यं शरव्यं च' इत्यमरः। अङ्गनारूपाणि कामुकरूपाणि वा तेषां भेदो विदारणं तस्य विधिः करणं तेन गर्वं दर्पं समारोहति प्राप्नोति। स्थिरलक्ष्यभेदादस्थिरलक्षभेदनं कठिनमिति दर्पहेतुः। काव्यलिङ्गमलङ्कारः। शार्दूलविक्रीडितच्छन्दः।

भाषा

लताएँ, भौंरों की कतारों से युक्त होने से कामदेव के मौर्वी से युक्त अर्थात् सज्ज धनुष की शोभा को प्राप्त कर रहीं हैं। कौन फूल, कामदेव के, तीनों लोकों को जीतने योग्य अस्त्रत्व को नहीं धारण करते हैं अर्थात् सभी फूल तीनों लोकों को जीतने वाले अस्त्र का काम करते हैं। हिंडोले के, ऊपर नीचे होने की क्रीड़ा से चंचल कामियों और कामिनिओं पर अस्त्र का प्रयोग करने वाला कामदेव इस वसन्त ऋतु में अस्थिर निशाने का भेदन करने के कार्य से, या चंचल कामिनी रूपी अस्त्र का प्रयोग करने वाला कामदेव इस वसन्तऋतु में कामुक रूपी अस्थिर निसाने का भेदन करने के प्रावीण्य से, घमण्ड कर रहा है।

उन्मायन्मधुपेन पुष्पमधुना केलीभुवः पङ्किलाः
सर्वे भङ्गभयं दिशन्ति कुसुमप्राग्भारतः पादपाः।
चैत्रेणास्त्रपरम्पराव्ययविधौ दैन्यं परित्याजितः
कामः सम्प्रति बाणमोक्षरसिको लक्ष्येष्वलक्ष्येषु च ॥७३॥

अन्वयः

उन्माद्यन्मधुपेन पुष्पमधुना केलीभुवः पङ्किलाः (जाताः) सर्वे पादपाः कुसुमप्राग्भारतः भङ्गभयं दिशन्ति। संप्रति चैत्रेण लक्ष्येषु अलक्ष्येषु च बाणमोक्षरसिकः कामः अस्त्रपरम्पराव्ययविधौ दैन्यं परित्याजितः।

व्याख्या

उन्माद्यन्तो मदं प्रापिता मधुपा भ्रमरा येन स तेन पुष्पाणां कुसुमानां मधु रसस्तेन मकरन्देन केलीभुवः क्रीडास्थानानि पङ्किलाः कर्दमसंयुक्ता जाताः। सर्वे पादपा वृक्षाः कुसुमानां पुष्पाणां प्राग्भारतो बाहुल्यात्तद्भारात् भङ्गस्य पतनस्य त्रुटनस्येत्यर्थः भयं भीतिं दिशन्ति प्रकटयन्ति। सम्प्रत्यधुना चैत्रेण वसन्तेन लक्ष्येष्वलक्ष्येषु च लक्षेष्वलक्षेषु च निर्विचारमित्यर्थः। बाणमोक्षे शरसन्धाने रसिकः समासक्तः कामोऽस्त्राणां शस्त्राणां परम्परा समूहस्तस्या व्ययविधौ समुत्सर्जनेऽविचार्य प्रयोगकरणे इत्यर्थः। दैन्यं दीनतां निरुत्साहमिति-भावः। परित्याजितः परिहापितः। अगणितपुष्पास्त्राणां समर्पणादस्त्रविषयकं कामस्य दैन्यं दूरीकृतमिति भावः। शार्दूलविक्रीडितच्छन्दः।

भाषा

भौरों को मदोन्मत्त करने वाले मकरन्द से क्रीड़ास्थलों में कीचड़ हो गया है। अर्थात् क्रीडास्थलों में अत्यधिक मकरन्द चूआ है। सभी वृक्ष अत्यधिक फूलों के बोझ से टूट जाने का भय सूचित करते हैं। इस समय निशाने का विचार न कर यथेच्छ बाण छोड़ने में आसक्त कामदेव की बाणों के अधिक खर्च अर्थात् समाप्त हो जाने की दीनता को वसन्त ने दूर कर दिया है। अर्थात् वसन्त में अत्यधिक फूलों के होने से, पुष्पसायक कामदेव को, बिना बिचारे पुष्पबाणों का प्रयोग करने की कोई कमी नहीं है।

नीता नूतनयौवनप्रणयिना चैत्रेण चित्रां लिपिं
हर्षाद्वर्षति का न काननमही पुष्पैः कटाक्षैरिव।
दोलारूढपुरन्ध्रिपीनजघनप्राग्भारमाधुन्वतः
किं [illegible]नाय गहनं लङ्कानिलस्याधुना ॥७४॥

अन्वयः

नूतनयौवनप्रणयिना चैत्रेण चित्रां लिपिं नीता का काननमही कटाक्षैः

इव पुष्पैः हर्षात् न वर्षति । अधुना दोलारूढपुरन्ध्रिपीनजघनप्राग्भारम्
आधुन्वतः लङ्कानिलस्य मानद्रुमभञ्जनाय किं गहनम् ।

व्याख्या

नूतने नवीने यौवने युवावस्थायां प्रणयः स्नेहो यस्य स तेन चैत्रेण वसन्तेन चित्रां विचित्रां विविधवर्णयुक्तां लिपिमक्षरविन्यासं शोभामित्यर्थः । नीता प्रापिता का काननमही का क्रीडोद्यानभूमिः शुक्लत्वरक्तत्वनीलत्वात् कटाक्षैरिवाऽपाङ्गदर्शनैरिव 'कटाक्षोऽपाङ्गदर्शने' इत्यमरः । पुष्पैः कुसुमैर्हर्षादानन्दातिरेकान्न वर्षति वृष्टिं न करोति । उद्यानभूमिः पुष्पैराच्छादितेति भावः । अधुनाऽस्मिन्समये दोलासु प्रेङ्खासु आरूढा उपविष्टाः पुरन्ध्रयो युवतयस्तासां पीनं स्थूलं जघनं स्त्रीकटचाः पुरोभागः 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः' इत्यमरः । तस्य प्राग्भारो विस्तारस्तमाधुन्वतः कम्पयतो लङ्कानिलस्य दक्षिणपवनस्य मानिनीनां मानरूपस्य द्रुमस्य वृक्षस्य भञ्जनाय पातनाय विनाशायेत्यर्थः । किं गहनं किं कठिनं, न दुष्करमित्यर्थः । सम्प्रत्यनायासेनैव मानिनीनां मानभङ्गो भवतीति भावः । शार्दूलविक्रीडितच्छन्दः ।

भाषा

नई जवानी में प्रेम रखने वाले वसन्त के कारण, रंग बिरंगी विचित्र शोभा को प्राप्त, कौन सी उद्यान की भूमि हर्षपूर्वक, कटाक्ष के समान फूलों की वृष्टि नहीं करती है अर्थात् सर्वत्र पुष्पवृष्टि हो रही है । ऐसे समय में हिंडोलों पर झूलती हुई कामिनिओं के तने हुए विस्तृत जघनस्थल को कंपाने वाले दक्षिण पवन के लिये मान रूपी वृक्ष को तोड़ कर गिरा देना अर्थात् नष्ट कर देना क्या मुश्किल है ? अर्थात् वसन्त ऋतु में रंग बिरंगी फूलों को देखने से, झूला झूलने से जघनस्थल में कँप कँपी पैदा होने से और दक्षिणानिल के स्पर्श से, मानिनियों का मान अनायास ही छूट जाता है ।

पौलस्त्योद्यानलीलाविटपितलमिलन्मैथिलीपादमुद्राः
कर्पूरद्वीपवेलाचलविपिनतटीपांसुकेलीरसज्ञाः ।
क्रीडाताम्बूलचूर्णग्लपितमुखहृतक्लान्तयः केरलीना-
मामोदन्ते समीराः स्मरसुभटजयाकाङ्क्षिणो दाक्षिणात्याः ॥७५॥

अन्वयः

पौलस्त्योद्यानलीलाविटपितलमिलन्मैथिलीपादमुद्राः कर्पूरद्वीपवेलाचलविपिनतटीपांसुकेलीरसज्ञाः केरलीनां क्रीडाताम्बूलचूर्णग्लपितमुखहृतक्लान्तयः स्मरसुभटजयाकाङ्क्षिणः दाक्षिणात्याः समीराः आमोदन्ते ।

व्याख्या

पौलस्त्यस्य रावणस्योद्यानमुपवनमशोकवाटिका तस्य लीलाविटपी क्रीडावृक्षोऽशोकतरुस्तस्य तलेऽधो मीलन्त्यो विघटन्त्यो चिरकालादस्पष्टीकृता इत्यर्थः । मैथिल्याः सीतायाः पादमुद्राश्चरणचिह्नानि यैस्ते, कर्पूरद्वीपस्याऽन्तरीपविशेषस्य वेलाचलः समुद्रतटस्थपर्वतस्तस्य विपिनतटी वनतटी तस्याः पांसवो धूलयस्तासु केली क्रीडा तस्या रसज्ञा रसिकाः, केरलीनां केरलदेशजकामिनीनां क्रीडाभी रत्यादिक्रीडाभिस्ताम्बूलेन चूर्णेन कर्पूरेण च ग्लपितानि खिन्नानि श्रान्तानीत्यर्थः । मुखान्याननानि तेषां हृता दूरीकृता क्लान्तिर्म्लानता यैस्ते, स्मर एव काम एव सुभटो सुयोद्धा राजा तस्य जयस्य विजयस्याऽऽकाङ्क्षिण इच्छुका दक्षिणे भवा दाक्षिणात्याः समीरा वायवो दक्षिणानिला इत्यर्थः । आमोदन्ते आमोदं सुगन्धं हर्षं वा 'आमोदः सोऽतिनिर्हारी' इत्यमरः । परितो विस्तारयन्ति । स्रग्धराच्छन्दः ।

भाषा

रावण की बाग में विद्यमान, लीलावृक्ष अशोक के नीचे श्री सीता जी के चरणचिह्नों को अधमिटा करने वाले, कर्पूर द्वीप में समुद्र तट के पर्वत के प्रान्तभाग में विद्यमान जंगल की धूलि में खेलवाड़ करने के रसिक, केरलदेश की अङ्गनाओं के रत्यादिक्रीडाओं में पान और कपूर के खाने से श्रान्त अत एव खिन्न मुखों की ग्लानि को दूर करने वाले और वीर राजा कामदेव का विजय प्राप्त होने की अभिलाषा रखने वाले दक्षिणानिल, चारो ओर सुगन्ध या हर्ष फैला रहे हैं ।

यश्चूताङ्कुरकन्दलीकवलनात्कर्णामृतग्रामणी-
श्छायामात्रपरिग्रहेऽपि जगृहे पञ्चेषुजैत्रेषुताम् ।
ताम्यत्तालुविटङ्कसंकटतटीसञ्चारतः पञ्चमः
सोऽयं कोकिलकामिनीगलबिलादामूलमुन्मूलति ॥७६॥

अन्वयः

चूताङ्कुरकन्दलीकवलनात् कर्णामृतग्रामणीः यः छायामात्रपरिग्रहे अपि पञ्चेषुजैत्रेषुतां जगृहे, सः ताम्यत्तालुविटङ्कसंकटतटीसंचारतः अयं पञ्चमः कोकिलकामिनीगलबिलात् आमूलम् उन्मूलति।

व्याख्या

चूतानामाम्राणां 'आम्रश्चूतो रसालोऽसौ सहकारोतिसौरभः' इत्यमरः। आम्रपुष्पाणामित्यर्थः। अङ्कुराः कोमलाग्रभागा एव कन्दल्यः कन्दास्तासां कवलनाद्भक्षणात् कर्णयोः श्रोत्रयोरमृतानां पीयूषतुल्यवस्तूनां ग्रामणीः श्रेष्ठः 'ग्रामणीर्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु' इत्यमरः। यः पञ्चमस्वरः छायामात्रस्यांऽशमात्रस्य परिग्रहेऽपि ग्रहणेऽपि प्रतिध्वन्यांशमात्रकर्णगोचरीभूतेऽपि पञ्चेषुः कामस्तस्य जैत्रा जयनशीला इषवो बाणास्तेषां भावस्तां जगृहे स्वीचकार। चूतपुष्पं कामबाणः। अतोऽस्य कवलनात् कोकिलकामिन्याः शब्दस्य पञ्चमस्वरस्य कामजयनशीलबाणत्वं संजातमिति भावः। स ताम्यत् क्लिश्यत् तालु काकुदं 'तालु तु काकुदम्' इत्यमरः। तस्य विटङ्कमूर्ध्वस्थानं तस्य सङ्कटा सङ्कुला या तटी प्रान्तभागस्तस्यां संचारतो गमनादयं प्रसिद्धः पञ्चमः पञ्चमस्वरः कोकिलानां पिकानां कामिन्यः कान्तास्तासां गलविलात् कण्ठरंध्रादामूलं कण्ठरन्ध्रमूलतः प्रारभ्योन्मूलति निर्गच्छति बहिर्निस्सरतीत्यर्थः। पञ्चमस्वरध्वनिस्तालुनलिकासंचारादेव भवतीति स्वरविद्याकुशलानां गायकानामेवाऽनुभवगम्यम्। कोकीलाश्चञ्चुमुपरिकृत्वैव कूजन्तीति गलरन्ध्रमूलात्तस्य पञ्चमस्वरस्योत्पत्तिरिति कवेराशयः। शार्दूलविक्रीडितच्छन्दः।

भाषा

जो आम के (फूलों के) अङ्कुर की गाँठ को खाने से कान को सुख देनेवालों में श्रेष्ठ है, जिसकी भनकमात्र कान में पड़ने से जो कामदेव के जयनशील बाणों का काम करता है, ऐसा यह प्रसिद्ध पञ्चमस्वर, दबाई हुई तालू के उच्चभाग में की सकड़ी गली में से होकर निकलने वाला होने से कोकिलाओं के गले के छिद्र की जड़ में से निकल कर बाहर पड़ता है। अर्थात् पञ्चमस्वर सदैव तालू की नलिका से ही उत्पन्न होता है यह स्वरशास्त्रकोविद गायक ही अनुभव कर सकते हैं। कोकिलाएँ सिर ऊपर उठाकर ही सदैव शब्द करती हैं अतः यह पञ्चमस्वर उनके गले के मूल में से ही निकलता है।

विरहविधुरकामिनीसहस्र-प्रहितमनोभवलेखसूक्तिमिश्रैः ।
सुरभिसमयवर्णनैरकुर्वन्निति नृपतेरथ बन्दिनः प्रमोदम् ॥७७॥

अन्वयः

अथ बन्दिनः इति विरहविधुरकामिनीसहस्रप्रहितमनोभवलेखसूक्तिमिश्रैः सुरभिसमयवर्णनैः नृपतेः प्रमोदम् अकुर्वन् ।

व्याख्या

अथाऽनन्तरं बन्दिनः स्तुतिपाठका इति पूर्वोक्तप्रकारेण विरहेण कान्तवियोगेन तज्जनितक्लेशेनेत्यर्थः । विधुरा विह्वलाः कामिन्यस्तासां सहस्रं तेन प्रहिताः प्रेषिता मनोभवलेखाः कामसम्बन्धिलिखितपत्राणि तेषु सूक्तयस्सुभाषितानि ताभिर्मिश्राणि मिलितानि तैः सुरभिसमयस्य वसन्तर्तोः 'वसन्ते पुष्पसमयस्सुरभिः' इत्यमरः । वर्णनानि तैर्नृपते राज्ञो विक्रमाङ्कदेवस्य प्रमोदमानन्दं मनोविनोदमित्यर्थः । अकुर्वन् चक्रुः । पुष्पिताग्रावृत्तम् ।

भाषा

इस प्रकार स्तुतिपाठक लोगों ने, विरह से व्याकुल भई हुई हजारों कामिनिओं के द्वारा भेजे जाने वाले प्रेमपत्रों की सूक्तियों से मिश्रित, वसन्त ऋतु के वर्णनों से, राजा विक्रमाङ्कदेव को आनन्दित किया ।

इति श्री त्रिभुवनमल्लदेव-विद्यापति-काश्मीरकभट्ट श्री बिल्हण-विरचिते विक्रमाङ्कदेवचरिते महाकाव्ये सप्तमः सर्गः ।

नेत्राब्जाभ्रयुगाङ्कविक्रमशरत्कालेऽत्र दामोदरात्
भारद्वाजबुधोत्तमात्समुदितः श्री विश्वनाथः सुधीः ।
चक्रे रामकुबेरपण्डितवरात्सम्प्राप्तसाहाय्यक—
टीकायुग्ममिदं रमाकरुणया सर्गे नवे सप्तमे ॥

ॐ शान्तिः शान्तिः शान्तिः ।

॥ श्रीसङ्कष्टनाशिन्यै नमः ॥

हरिः ॐ

॥ श्री गणेशाय नमः ॥

॥ श्री सङ्कष्टनाशिन्यै नमः ॥

परिशिष्टम्

क.

विक्रमाङ्कदेवचरितमहाकाव्यस्य सप्तसर्गान्तर्गताः सूक्तयः ।

प्रथमसर्गे—

श्लोकाः

अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥ ९ ॥

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ॥११॥

गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः क्वापि कवीश्वराणाम् ।
रत्नेषु लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥१२॥

कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु ।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागरुधूपवासः ॥१४॥

व्युत्पत्तिरावर्जितकोविदाऽपि न रञ्जनाय क्रमते जडानाम् ।
न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः ॥१६॥

कथासु ये लब्धरसाः कवीनां ते नाद्रियन्ते कथान्तरेषु ।
न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥१७॥

श्लोकाः

लङ्कापतेः सङ्कुचितं यशो यद् यत्कीर्तिपात्रं रघुराजपुत्रः ।
स सर्व एवाऽऽदिकवेः प्रभावो न कोपनीयाः कवयः क्षितीन्द्रैः ॥२७॥

द्वितीयसर्गे—

फलं हि पात्रप्रतिपादनं श्रियः ॥ ॥२६॥

प्रियप्रसादेन विलाससम्पदा तथा न भूषाविभवेन गेहिनी ।
सुतेन निर्व्याजमलीकहासिना यथाङ्कपर्यङ्कगतेन शोभते ॥३२॥

किमश्वमेधप्रभृतिक्रियाक्रमैः सुतोऽस्ति चेन्नोभयलोकबान्धवः ।
ऋणं पितृणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभम् ॥३४॥

तृतीयसर्गे—

परां प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनुः ।
पुण्यात्मनामत्र तथाविधानां निमित्तमात्रं गुरवो भवन्ति ॥१७॥

इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति ॥४२॥

चतुर्थसर्गे—

शुभाशुभानि वस्तूनि सम्मुखानि शरीरिणाम् ।
प्रतिबिम्बमिवायान्ति पूर्वमेवान्तरात्मनि ॥३४॥

न कैश्चिदपि लभ्यन्ते निष्कम्पाः सुखसम्पदः ॥४६॥

उचिताचरणे केषां नोत्साहचतुरं मनः ॥६१॥

न कृच्छ्रेऽपि महाभागास्त्यागव्रतपराङ्मुखाः ॥६७॥

श्लोकाः

महात्मनाममार्गेण न भवन्ति प्रवृत्तयः ॥६५॥

एषा भगवती केन भज्यते भवितव्यता ॥६७॥

त्यागो हि नाम भूपानां विश्वसंवननौषधम् ॥११०॥

किं लक्ष्मीसुखमुग्धानामसम्भाव्यं दुरात्मनाम् ॥१११॥

राज्यग्रहगृहीतानां को मन्त्रः किं च भेषजम् ॥११५॥

पञ्चमसर्गे—

किं न सम्भवति चर्मचक्षुषां कर्म लुब्धमनसामसात्त्विकम् ॥५॥

अप्रतर्क्यभुजवीर्यशालिनः सङ्कटेप्यगहनास्तथाविधाः ॥६॥

वारणः प्रतिगजं विलोकयंस्तद्विमर्दरसमांसलस्पृहः ।
आददे न विशदं नदीजलं शीलमीदृशममर्षशालिनाम् ॥१२॥

दूषणं हि मुखरत्वमर्थिनाम् ॥१३॥

यत्र तत्र भुजदण्डचण्डिमा चित्रमप्रतिहतो मनोभुवः ॥१४॥

आलुपेन्द्रमवदातविक्रमस्त्यक्तचापलमसाववर्धयत् ।
दीपयत्यविनयाग्रदूतिका कोपमप्रणतिरेव तादृशाम् ॥२६॥

प्लावनाय जगतः प्रगल्भते नो युगान्तसमयं विनाम्बुधिः ॥३६॥

केसरी वसति यत्र भूधरे तत्र याति मृगराजतामसौ ॥३८॥

तेन तस्य वचनेन चारुणा प्राप कुन्तलपतिः प्रसन्नताम् ।
तीव्ररोषविषवेगशान्तये भेषजं विनय एव तादृशाम् ॥४७॥

श्लोकाः

कार्मुकेषु मिषमात्रमीक्षते नित्यकुण्डलितकार्मुकः स्मरः ॥४८॥

दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः ॥५१॥

वेत्ति कश्चरितमुन्नतात्मनाम् ॥५२॥

कार्यजातमसमाप्य धीमतां निद्रया परिचयोऽपि कीदृशः ॥७३॥

अद्यजातमपि मूर्ध्नि धार्यते किं न रत्नममलं वयोधिकैः ॥८३॥

षष्ठसर्गे—

यशसि रसिकतामुपागतानां तृणगणना गुणरागिणां धनेषु ॥२॥

कुसुममृदूनि मनांसि निर्मलानाम् ॥३॥

प्रणयिषु शुभचेतसां प्रसादः प्रसरति सन्ततिमप्यनुग्रहीतुम् ॥६॥

मरणमपि तृणं समर्थयन्ते मनसिजपौरुषवासितास्तरुण्यः ॥१३॥

अवतरति मृगीदृशां तृतीयं मनसिजचक्षुरुपायदर्शनेषु ॥१४॥

अपि नयनिपुणेषु नो भरेण क्षिपति पदं किमुत प्रमादिषु श्रीः ॥२८॥

अवतरति मतिः कुपार्थिवानां सुकृतविपर्ययतः कुतोऽपि तादृक् ।
झटिति विघटते यया नृपश्रीस्तटगिरिसंघटितेव नौः पयोधेः ॥२९॥

व्रतमिदमिह शस्त्रदेवतानां दृढमधुनापि कलौ निरङ्कुशेऽपि ।
अविनयपथवर्तिनं यदेताः प्रबलमपि प्रधनेषु वञ्चयन्ति ॥३०॥

श्लोकाः

सकलमपि विदन्ति हन्त शून्यं क्षितिपतयः प्रतिहारवारणाभिः ।
क्षणमपि परलोकचिन्तनाय प्रकृतिजडा यदमी न संरभन्ते ॥३२॥

गुणिनमगुणिनं वितर्कयन्ती स्वजनममित्रमनाप्तमाप्तवर्गम् ।
वितरति मतिविप्लवं नृपाणामियमुपसर्पणमात्रकेण लक्ष्मीः ॥३६॥

मलिनधियां धिगनार्जवं चरित्रम् ॥६१॥

इह हि विहितभूरिदुष्कृतानां विगलति पुण्यचयः पुरातनोऽपि ॥६४॥

यशसि रतिर्महतां न देहपिण्डे ॥७७॥

विमलविजयलालसाः खलानामवसरमल्पमपि प्रतिक्षिपन्ति ॥७८॥

त्रिभुवनमहनीयबाहुवीर्यद्रविणविभूतिमतां किमस्त्यसाध्यम् ॥९१॥

दासी यद्भवनेषु विक्रमधनक्रीता ननु श्रीरियम्
तेषामाश्रितपोषणाय गहनं किं नाम पृथ्वीभुजाम् ॥९९॥

सप्तमसर्गे—

गुणो हि काले गुणिनां गुणाय ॥३२॥

—श्रीरस्तु—

———

परिशिष्टम्

ख.

विक्रमाङ्कदेवचरितमहाकाव्यस्य सप्तसर्गान्तर्गतानां श्लोकानां अकारादिवर्णानुक्रमेणाऽनुक्रमणिका ।

"आ"

"इ"

परिशिष्टम्

ग.

विक्रमाङ्कदेवचरितमहाकाव्ये सप्तसर्गान्तर्गतानां प्रधाननाम्नां सूची।

(अत्र प्रथमसंख्या सर्गसूचिका द्वितीया श्लोकानाम्)

परिशिष्ट:

घ.

विक्रमाङ्कदेवचरितमहाकाव्यस्य विक्रमादित्यस्य च वर्णनात्मका लेखा ग्रन्थाश्च ।

१. **इतिहास प्रवेश**—श्री जयचन्द्र विद्यालङ्कार पृ० २५६

२. **राजतरङ्गिणी**—श्री महाकवि कल्हण

३. **सोलंकियों का प्राचीन इतिहास**—म० म० पं० श्री गौरीशंकर ओझा

४. **विक्रमाङ्कदेव चरित चर्चा**—श्रीमान् पं० महावीर प्रसाद द्विवेदी

५. **चालुक्य षष्ठ विक्रमादित्य का जीवन व समय**—श्री रामनाथ दीक्षित, साहित्य शिरोमणि, साधोलाल रिसर्च स्कालर, बनारस—श्री ए० व्ही० वेङ्कटरमण द्वारा तेमिल भाषा में लिखित The Life and Times of Chalukya Viktramaditya VI. का अनुवाद ।

6. Kalhana's Chronology of Kashmir by *Stein.*

7. Indian Antiquary. Page 325.

8. Indian Historical quarterly, Calcutta.

9. Kadamb Kula. by *J. M. Moraes, Bombay.*

10. Journal of the Royal Asiatic Society, Bombay.

11. Journal of the Bombay Branch of Royal Asiatic Society.

12. Journal of the Royal Asiatic Society, London.

13. History of Sanskrit Literature by *A. B. Keith.*

14. History of classical Sanskrit Literature by *M. Krishnammachariar.*

15. History of Paramar Dynesty by *D. C. Ganguly.*

16. Historical Inscriptions of Southern India. by *Sewell and Aiyangar.*

17. Early History of Deccan. by *R. G. Bhandarkar.*

18. Ancient India. (and South Indian History & culture) Chola Impire of India-pages 622-636. by *K. Krishnaswami Aiyangar, Madras.* Page 142

19. Dynesties of the Kanarese District. by *J. F. Fleit.*

20. Bombay Gazetteer.

21. Dynastic History of Northern India. by *H. C. Roy, Calcutta.*

22. विक्रमाङ्कदेवचरितमहाकाव्यम् Edited by *Dr. George Buhler,* with an elaborate Introduction.

२३. विक्रमाङ्कदेवचरितमहाकाव्यम् Edited by पं० रामवतार शर्मा, and printed in the ज्ञानमण्डल प्रेस, बनारस।

२४. विक्रमाङ्कदेवचरितम्—(१–२ सर्गाः), चौखम्बा संस्कृत सीरीज।